वङ्गीयविश्रुतबुधैरभिमन्त्रितोऽयं वङ्गोदरस्थितमियाय पुरं प्रसिद्धम् ॥२४॥

अध्याप्य तत्र नगरे कतिचिद्दिनानि गौराङ्गभूपतिसमर्पितमादरेण।
दिव्यं महोच्चपदमप्यधिगत्य सद्यो वाराणसीं पुनरियाय पितुर्निदेशात् ॥२५॥
अत्रागतेन किल काशिकहिन्दुविश्वविद्यालये धृतमहोच्चपदेन तेन।
विद्यार्थिनः करुणया विविधप्रदेशादत्रागताः स्वसमतां विनयेन नीताः ॥२६॥
वाराणसीपरिसरे निजहिन्दुविश्वविद्यालयं मदनमोहनमालवीयः।
सम्पाद्य यं प्रथममेव गुरुं चकार विद्याधरः स किल केन न वन्दनीयः ॥२७॥
तातस्मृतिं भुवि चिराय विधातुमारात्तन्नामधेयगतवर्णविशिष्टलेखम्।
विद्यालयं निगममार्गनिदर्शनाय संस्थाप्य यः स्वजननं सफलीचकार ॥२८॥
नानानिबन्धरचनाचतुरोऽयमिष्टं कात्यायनादिमुनिभिः कृतसूत्रतन्त्रम्।
श्रौतं पथं सरलभाष्यपदैर्नियोज्य यज्ञक्रमं बहुविधं विशदीचकार ॥२९॥
वाराणसेयधनिकव्रजकल्पितेषु विद्यालयेषु नियतं समयं प्रदाय।
विद्याधनं स्वगतमेष कुबेरकल्पो विश्राणयन्निजकुलं प्रथयांबभूव ॥३०॥
धर्मे निवेश्य हृदयं सततं विदेश-यात्रानुरक्तमनसो मनुजानमन्दम्।
विद्राव्य यः किल धनादिकमप्यपास्य तद्दत्तमत्र वचसापि न तानगृह्णात् ॥३१॥
भेदं कुलागतमुदस्य निजे समाजे सम्बन्धतत्परमतीनयमेकवीरः।
सद्यो विहाय सहसा सहभोजनेऽपि, वैरुध्यमेव समितिष्वगमत्प्रसङ्गात् ॥३२॥
दैनन्दिनक्रमगतं नियताग्निहोत्रं द्रष्टुं दिगन्तरगता अपि यस्य लोकाः।
काशीमुपेत्य बहुविस्मयमेव जग्मुः किं तस्य विश्रुतकथस्य कथाभिराभिः ॥३३॥
पुत्रीद्वयं तनयपञ्चकमत्र लोके पौत्रानपि प्रथितसद्गुणबद्धभावान्।
सायुज्यमाप्तुमजरं शिवयोर्विहाय सद्यो बबन्ध गमने मतिमद्वितीयाम् ॥३४॥
वस्वङ्कनन्दविधुसङ्कलितं तमेव जन्मानुगं दिवसमेत्य सुखेन वर्षम्।
विद्याधरोऽयमतिवाह्य शशाङ्कमौलेः सायुज्यमापदतिपुण्यवशेन लभ्यम् ॥३५॥
एतावदस्य चरितं विशदं विचित्रं मैत्रीमुपेत्य समये समयेऽनुभूतम्।
आनृण्यमाप कविरेष सनाढ्यवर्यो भाग्यादनूपनगरे वृतदिव्यवासः ॥३६॥

वेदोद्धारक म० म० पं० श्रीविद्याधरजी गौड

(शास्त्रार्थमहारथी पं० श्रीमाधवाचार्यजी शास्त्री गौड)

अणीयसां जन्मनिवासभूमि—
त्यागो, विपत्त्यै महतां सुखाय।
अब्धेरपेता मणयो व्रजन्ति
राज्ञां शिरः काक-मुखानि भेकाः ॥

संस्कृत साहित्य का यह प्रसिद्ध आभाणक वेदाचार्य स्वर्गीय म० म० श्रीविद्याधरजी शास्त्री गौड महोदय पर सोलहो आने चरितार्थ होता है। आप हरियाना प्रान्त की उस उर्वरा भूमि में उत्पन्न हुए थे, जो कभी मन्त्रद्रष्टा ऋषियों की जन्मभूमि होने का गौरव रखती थी, किन्तु कुटिल कराल काल के प्रभाव से वह बहुत समय से वैदिक-वाङ्मय के लिये ऊषर—सी हो चली थी।

हमारे चरित नायक के पूज्य पिता म० म० पं० श्रीप्रभुदत्तजी अग्निहोत्री ने काशी में पहुँचकर वैदिक साहित्य में अद्भुत दक्षता प्राप्त की, जिससे पञ्चगौडों का, विशेषतया 'गौड' जाति का मुख उज्ज्वल हो गया। पञ्चगौडों में सर्वप्रथम यही एकमात्र व्यक्ति माने जा सकते हैं जिन्होंने इस युग में काशी जैसे विद्या केन्द्र में वेद-विद्या में सर्वोत्कृष्ट स्थान प्राप्त किया। दाक्षिणात्य पञ्चद्राविडों में जो वैदिक विद्वत्ता प्रसिद्ध थी, वह केवल वेद के मूल पाठमात्र तक ही सीमित थी, परन्तु श्रीविद्याधरजी ने मूल तथा अर्थभाग दोनों में ही अपूर्व विद्वत्ता प्राप्त करके भूमण्डल के वैदिकों में सर्वातिशायी गौरव प्राप्त किया। प्रभु की कृपा से तीसरी पीढ़ी में भी शास्त्रीजी के योग्य वंशधर वैदिक परम्परा का स्वकुलक्रमागत गौरव बढ़ा रहे हैं जिनमें पं० श्रीवेणीरामजी वेदाचार्य अन्यतम हैं, जो काशीस्थ गोयनका संस्कृत कालेज में वेदों के अध्यापन में तत्पर रहते हैं और भारत में यत्र तत्र सर्वत्र मुख्य-मुख्य यज्ञानुष्ठान, प्रतिष्ठा-महोत्सवादि में आमन्त्रित होकर 'आचार्य' पद को अलंकृत करते हैं।

धर्म्मक्षेत्रे प्रसिद्धे कुरुनृप - रचिते स्थानपिण्डारकाख्ये,
खेड़ी-ग्रामे द्विजानां सुविदितयशसां भूपतिस्तोत्रभाजाम्।
प्रभ्वग्र्यो दत्तनामा निगमविधिनिधिर्गौडवंशावतंसो,
लेभे काश्यां वसन्योऽनवरतयजनाद् अग्निहोत्रि-प्रशस्तिम्॥ १ ॥
दीपाद्दीप इव प्रवर्तित अहो! तत्सूनुरग्रेसरः,
श्रीविद्याधरशर्मगौडविदितो विद्याधरो मूर्तिमान्।
दृष्ट्वा यच्छ्रुतिकर्म्मकाण्डगुरुतां श्रीमालवीयः[1] सुधीः,
वेदाचार्यपदेऽभिषेकमकरोत् श्रीविश्वविद्यालये॥ २ ॥
'विद्या ददाति विनयम्' कविसूक्तिरेषा,
कण्ठी कृता त्वनुदिनं श्रुतिमेवि लोके।
अस्याः पुनर्जगति सार्थकता तु दृष्टा,
विद्याधरे द्विजवरे विनयावतारे॥ ३ ॥
यो विद्ययाऽऽसीत्सुमहान्महात्मा,
महत्तमश्चापि सुशीलवृत्त्या।
अतो महत्त्वद्वययुक्तमस्मै,
ददावुपाध्याय[2]पदं स सम्राट्॥ ४ ॥

१—महामनाः श्रीमदनमोहनमालवीयः। २—महामहोपाध्यायपदवीम्।

गौड़ा महाराष्ट्रभवाः सगुर्जराः,
सकान्यकुब्जा अपि मैथिलास्तथा।
सारस्वता दक्षिणदेश - वासिनो-
यच्छिष्यतां प्राप्य कृतार्थतां गताः॥ ५ ॥

येनाऽऽम्नायविधिः कुकालवशतो गुप्तः पुनर्द्योतितो-
लुप्तं वैदिकवाङ्मयं पुनरहो! यत्नेन संरक्षितम्।
ते तेऽप्राप्यतमाः क्षयं प्रतिगता ग्रन्थाः सुसम्पादिताः,
श्रीविद्याधरशास्त्रिणां सुकृतिनां कां कां कृतिं ब्रूमहे॥ ६ ॥

अन्वर्थो ज्येष्ठपुत्रः स्वरचलनविधौ 'दोलता'[1] यस्य सिद्धा,
श्रीवेणीरामशास्त्री पितृसदृशगुणो मध्यमः कर्मठाग्र्यः।
अन्यैः श्रीमाधवाद्यैर्निगमनयरतैः पुत्रपौत्रैस्तदीयैः,
श्रीमद्विद्याधराणां भुवि विमलयशस्तन्यतेऽद्यापि काश्याम्॥ ७ ॥

विनशनक्षेत्रप्रभव इन्द्रप्रस्थेऽधुना कृताऽऽवासः।
माधवचरणसरोरुह - रसरसिकः शास्त्रिमाधवाचार्य्यः॥ ८ ॥

प्रसूनाञ्जलिः

(पं० श्रीब्रह्मदत्तजी द्विवेदी, अध्यक्ष—मुरारका संस्कृत महाविद्यालय, पटनासिटी)

पारम्पर्यक्रमानुबन्धिसौहार्दभाजा, याज्ञिकसम्राजा, प्रख्यातकर्मणा, श्रीवेणीरामशर्मणा, कथनोपकथनक्रमे विदितवैदुष्यप्रकर्षस्य, स्वीयतातपादस्य स्मृत्यङ्कोऽचिरादेव प्रकाशयिष्यते। तत्र भवताऽपि लेखो देय इति निर्दिशता तत्सम्बधिविषयोपनिबन्धितं पत्रजातं प्राहीयत।

श्रद्धेयपादपाथोजस्य सर्वविद्याधरस्य पण्डितप्रकाण्डस्य श्रीविद्याधरस्य पितृसमस्य स्मृतौ द्वित्राण्यप्यक्षराणि यथाकथञ्चित् प्रयुञ्जीय तदा "कथन्न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति" इत्यनुसरन्नहं वाचः प्रसादयेयमिति धिया नतु पाण्डित्यस्य विख्यापयिषया स्वल्पमपि परं श्रद्धयोपनतं सादरं चरणकमलयोरर्पये पद्यप्रसूनाञ्जलिम्।

जायन्ते बहवः स्वकर्मवशतो भोगाय रोगाय वा
किं तैरत्र जनैरकार्युपकृतिः स्वल्पापि देव्याः श्रुतेः।
एवं व्याकुलमानसा सुरगवी युष्मद्विधैः सेविता
सोत्कर्षं गमिताऽधुना श्वसिति चेत्येतद्धि तथ्यं वचः॥ १ ॥

१—वेदमन्त्राणां स्वरपाठप्रत्ययार्थं दोरिति हस्तोपलक्षणम्, तस्य लतेव कम्पनाद् दौलतरामाभिधानमन्वर्थतां द्योतयति।

आलोड्य साधु सुधिया, श्रुतिसञ्चयाब्धिम्
पीयूषमीप्सितमिदं सुजनाय दातुम् ।
प्रीत्योद्धृतं सुरपतेरपि प्रार्थनीयम्
स्तुत्यो न कस्य भुवने बुधवर्य एषः ॥ २ ॥

विवेकविद्याविनयावदात-
विकस्वरानश्वरगीतकीर्तेः ।
वेदज्ञविद्याधरशर्मणः स्यात्
स्मृतिः सदालोकपथप्रदर्शनी ॥ ३ ॥

म० म० श्रीविद्याधरगौडमहाभागानां कानिचित् संस्मरणानि

(पं० श्रीकेदारनाथजी ओझा, प्राध्यापक—राजकीय संस्कृत कालेज, पटना)

मध्यमायां काशीहिन्दूविश्वविद्यालयेऽधीयानोऽयं जनो वैदिकप्रवरान् श्रीप्रभुदत्ताग्निहोत्रिमहोदयान् धर्मविज्ञानविभागाध्यक्षपदे प्रतिष्ठितान् श्रीविद्याधरवैदिकांश्च वेदप्रधानाध्यापनं निर्वहतः साक्षात्कृतवान्। तदानीन्तनीं पण्डितानां प्रतिष्ठामर्यादां स्मारं स्मारं रोमाञ्चमञ्चति, अवैतनिकमध्यक्षपदं प्रतिष्ठयैव भूषयन्तस्ते न प्रतिदिनं तत्रोपतिष्ठन्ते स्म, किन्तु विशेषपरिस्थितिसमये एव। काशीस्थवैदुष्यधार्मिकसदस्सु साभापत्यं पालयतः धर्मशास्त्रीयव्यवस्थासु अग्रणीतां प्रणयतो नैकशोऽपश्यत्। मम न्यायगुरवः पूज्यचरणस्वर्गीयश्रीशङ्करतर्करत्नभट्टाचार्यमहोदया मारवाड़ीसंस्कृतमहाविद्यालयेऽध्यापयन्तः प्रविदितवैदुष्या निस्पृहाश्च आसन्। पूज्यश्रीगिरीशशुक्लन्यायाचार्यमहोदयानां स्वर्गमनानन्तरं हिन्दूविश्वविद्यालये न्यायप्रधानाध्यापकपदे पाण्डित्यप्रणयिनस्तर्करत्नचरणानेवाभिषेक्तुमकामयन्, परं निस्पृहास्तेऽङ्गीकुर्वाणा अपि प्रार्थनापत्रप्रदानं निराकुर्वाणा आसन्, तदानीं नियोजनविधिर्व्यवस्थापत्रादिकं श्रीप्रभुदत्तमहोदयानां प्रभावेण वचसा च समाहितम् अभूत्। धन्यो हि स समयो यत्र सन्ध्याया उपासकास्तत्र भस्मन आवश्यकताञ्च मन्वाना बहव आसन्, सायमस्याग्निहोत्रिणो गृहे आशुतोषादिव प्रतिदिनं विभूतिं लभमाना जनाः प्रमोदमासादयन्ति स्म। पश्चाच्च श्रीविद्याधरगौडमहोदया धर्मविज्ञानविभागाध्यक्ष्यं कुर्वाणा मम गुरुस्वर्गीय म० म० पं० श्रीबालकृष्णमिश्रचरणैः सह मैत्रीमाश्रयन्तोऽनुकम्पायाः पात्रं मामसकृदकुर्वन्। १९३६ ईश्वीयवत्सरे च वैदिकगवेषणायां नियोजितोऽयमकिञ्चनो वैदुष्यसम्पर्कसौभाग्यमपि अलभत इत्यधमर्णः स्मृतिग्रन्थसम्पादनरतान् विदुषो धन्यान् मन्यमानो विरसान्यपि श्रद्धाधौतानि सदोषाणि तु दोषज्ञदोर्भ्यामर्पणीयानि इमानि पद्यानि उपहरति।

प्रभुदत्त विधुं बुधमण्डलगं पितरं विदुषां श्रुतिशास्त्रवहम् ।
गुरुदीर्घशरीरसदाचरणं शरणं प्रणमामि मनोज्ञरुचम् ॥ १ ॥

आयातः प्रभुदत्तधीरनिलये काश्यां विभूतिप्रदे
आक्रीडन् शिवदत्तसोदरलघुन्यायेन न्यायप्रियः ।
मीमांसामधुरं रसं कविकृतेर्व्याख्यासुधां व्याकृतेः
आस्वादंश्च समस्तवैदिकसुधां विद्याधरोऽराजत ॥ २ ॥

गौराङ्गे भृतभूतिभालपटले दीर्घोत्तरीयच्छटे
सौजन्यामृतपूतसौम्यसरले हास्येन्दुभासं वहन् ।
नेत्रे नीरजसुन्दरे प्रतिजनं स्निग्धे प्रफुल्ले नयन्
गाङ्गं वारि निषेवयन् स्मरहरो ध्यानेन शान्तिप्रदः ॥ ३ ॥

काश्याः पण्डितपुण्डरीकमिहिरो हीरः श्रुतेर्भूषणः
वेदध्वानचतुर्मुखो नु विमुखो वासश्छटारोधनात् ।
धर्माचारविचारचारुचरितः शान्तो रसो मूर्तिमान्
नीतिं धैर्यमुदारताञ्च जनयन् विद्याधरो मानवान् ॥ ४ ॥

नित्यं होत्रविधिं विधाय विविधान् विद्यार्थिनोऽध्यापयन्
कर्माणि श्रुतिनिर्णितानि सकलस्मार्तानि कुर्वन् ददत् ।
आचार्यश्चरणादसौ कृततया विद्याधरोऽभूद् बुधः
तं वन्दे सुचिरं स्मरामि कृपया यस्यास्मि वृद्धिं गतः ॥ ५ ॥

म० म० पं० श्रीविद्याधरगौडमहोदयानां संक्षिप्तपरिचयः

(पं० श्रीमहादेवजी उपाध्याय, प्राध्यापक--वाराणसेय संस्कृत विश्वविद्यालय)

अनेकजनिसञ्चितं दुरपनेयमंहोव्रजं
स्मृतापि गहनं यथा दहति दीप्तदावानलः ।
अनादिसमयाज्जगद्विदितभूरिसूरिप्रसूः
गिरीन्द्रतनुजापतेर्जयति काशिकेयं पुरी ॥ १ ॥

विलक्षणविचक्षणव्रजपरम्परायामियं
तनूजमुदपादयत् निगमबोधभारालसम् ।
पद-क्रम-जटा-घनस्फुटनिवासभूताननं
यमाहुरपरं विधिं प्रभुपदादिदत्तं मुनिम् ॥ २ ॥

महेश्वरगिरिं यथाऽचलकुले, मणिं कौस्तुभम्
सुरत्ननिचये, विभाकरमिव ग्रहाणां ततौ।
अवापदमितद्युतिं सकलतन्त्रपारं गतं
यथार्थविदिताऽभिधं सुतवरेण्यविद्याधरम् ॥ ३ ॥

शुभार्थनिधिदर्शनागमनिवासभूताकृती
कृतिप्रवरविश्रुताधिकसमेधमानद्युती ।
अवाप्य शिवदत्तमन्तभवदेवदत्ताभिधं
समानजनुषौ बुधोऽद्युतदतीव यो वह्निवत् ॥ ४ ॥

समस्तनिगमप्रथाऽभ्यसनपाटवे विश्रुताः
गताः श्रवणगोचरं प्रमुखवैदिका नैकशः ।
षडङ्गसमलंकृताविकलवेदतत्त्वार्थवित्
प्रतीतिपदवीं गतो जगति नैव यस्मादृते ॥ ५ ॥

मदीयशुभयत्नतो जगति शर्मभाजो जनाः
भवन्तु नहि दृक्पथे पततु कोऽपि खेदान्वितः ।
चकास्तु विदुषां चयः सपदि पूर्णविद्याधरः
इयं मतिरलौकिकी स्थिरतराऽऽस्त यस्मिन् बुधे ॥ ६ ॥

गतस्य शिवरूपतामपि समग्रविद्याम्बुधेः
शरद्विमलचन्द्रिकासमसमज्ञयाऽलंकृतम् ।
प्रपञ्चभविकप्रदं चरितमत्र देशेऽखिले
प्रसारयति नित्यशोऽगणितशिष्यसन्मण्डली ॥ ७ ॥

चत्वारोऽस्य सुताः परस्परमतिस्पर्धातिरेकान्विताः
गम्भीराकृतयः प्रभूतजनिमत्सेव्या नदीशा यथा ।
आश्चर्यैकनिदानशक्तिनिचिताः कंसद्विषो वा भुजाः
विद्याभिर्वरकीर्तिमस्य विदुषस्तन्वन्ति दिक्षु स्थिराम् ॥८॥

परार्थबद्धकच्छानां विद्यासम्प्लुतचेतसाम् ।
विद्वत्सुराणां पदयोः श्रद्धया नतिरस्ति मे ॥ ९ ॥

वेदविदां वरिष्ठः

(पं० श्रीकालीप्रसादजी मिश्र, भू० पू० प्राचार्य, हिन्दूविश्वविद्यालय, काशी)

एकोनविंशत्यधिकैकोनविंशतिशततमे-ईशवीये वर्षे यदाहं षड्वर्षाणि प्रयागस्थश्रीधर्मज्ञानोपदेशसंस्कृतपाठशालां निषेव्य अधिकाशि श्रीहिन्दूविश्वविद्यालयस्य प्राच्यविद्याविभागे वैयाकरणकुलकुमुदकलाधराणाम् अन्तेवासिविकाशिताखिलदिशां महामहाविदुषां श्री १०८ पं० देवनारायणत्रिपाठिमहोदयानां वाराणसेयराजकीयमहाविद्यालये राजकीयैस्सत्कृत्य नियुक्तयनन्तरं रिक्तं तदीयं पदं पण्डितराजश्रीरामावतारशर्मणामध्यक्षतायामग्रहीषम् तदा "विश्वविद्यालये पदग्रहणावसरे प्रायः पण्डिताः प्रथमतस्तत्राध्यापनक्रियापराणां विशिष्टविदुषां दर्शनं कुर्वते" इति प्रथामनुरुन्धानोऽहमपि बहूनां दर्शनानन्तरं वेदकक्षां प्राविक्षम्, तदा प्रथमं दर्शनं श्रीविद्याधरमिश्रमहोदयानां जातम्। सुलभस्नेहासिक्तस्वान्तोऽयं महात्मा दृष्ट्वैव मां बाहुभ्यां परिष्वज्य "गोत्रं नो वर्धताम्" इति प्रसादवाक्यमुच्चैः साह्लादमवोचत् अपृच्छच्च "काश्यामिह कुत्र कुतो निवासः? अस्ति च तत्र सुखावहाऽऽवाससामग्री? किञ्चिदपेक्ष्यञ्चेद्विना संकोचं वक्तव्योऽहम्, यथाशक्ति सौविध्यं सम्पादयितुं यतिष्ये" विद्यालयस्य लेखकं कर्मकरञ्चाहूय मम पुरस्तादेव समादिक्षत् "एतस्य कृते यद्यदपेक्षितं भवेच्छीघ्रं सम्पादय, उपलक्ष्मीकुण्डं भृत्या गृहीते छात्रावासभवनेऽस्य संरक्षकपदे द्रुतं नियुक्तिर्भवितेति समितौ भृशं चर्चितं सदस्यैः। अतो यावन्नियुक्तिर्नास्ति तावदेतस्य निवासायापि प्रबन्धः पर्यालोचनीयः" इत्यादिमदीयहितकरं निखिलं निश्छलं व्यवहारं विलोक्य मनसैव मया चिन्तितम् अहो! अकारणबान्धवस्यास्य मयि कियती अनुकम्पा!! न मनागपि मया कदाचित् दृष्टपूर्वः, अतो न ममास्ति कश्चिदुपकारलेशोऽपि। प्रायो विद्वांसोऽपि ब्राह्मणा विजातीयपण्डितानेकव्यवसायव्यवसितमतीनालोक्य नातिप्रसन्ना निशाम्यन्ते, एष च मयि नितान्तं प्रीतिमानिति, मन्ये नित्यनैमित्तिकोपासनादिकर्मानुष्ठाननिर्मलीकृतान्तःकरणानां वेदविदामेतादृश्येव भवति चर्या असंस्तुतेष्वपि जनेष्विति मनसि चिन्तयन्नेतस्य महिमानं कथमपि तदनुमत्या स्वकक्षां प्राविशम्। उत्तरेद्युरपि प्रकृतिमधुरो दयापरवशान्तःकरणः स मदीयनिवाससौविध्यादिविषये लेखकादीनमन्त्रयत। समलपच्च मया सह विद्यालयविषयकं विविधं कार्यजातमाश्रित्य। निजगुणगौरवेण प्रतिभापटीयस्तया च प्रायः सर्वाभिर्विद्यालयकार्यकारिसमितिभिस्सदस्यत्वेनैष गृहीतपूर्व आसीत्। अकामयत च ममापि सम्पर्कं तास्विति विनैव ममोपरोधं परीक्षकसमितेः सदस्यतया शीघ्रमेव मामयोजयत्। एवमेव छात्रवृत्तिवितरणसमितेरपि सदस्यं व्यधत्त। व्याहरच्च विद्यालयस्य समितिद्वयीयं विशेषतः कार्यकारिणीति भवतां साहाय्यं कामयमानोऽहं भवतामुपरि भारमारोपयितुं विनाऽनुमतिं दुस्साहसमकार्षमिति। एतेनापि मदीयहितानुबन्धिव्यापारविशेषेण नितान्तं प्रमोदसन्दोहमन्वभूवम्। आगते छात्रवृत्तिवितरणसमये प्राच्यविद्याविभागधर्मविज्ञान-

विभागाभ्यां विभक्तेषु च्छात्रजनेषु स्वपरभिदामभजमान एव वृत्तिं व्यतारीत्। प्रायो वृत्तिवितरणे स्वापेक्षितेभ्यो वृत्तिलोभाय चेष्टमानाः कतिपये दृश्यन्ते, परन्त्वेष भावो विद्यावैभवभासुरेऽस्मिन् न कदापि लक्षितो मया लेशतोऽपि। एवं बहूनि वर्षाणि मया सहास्य सहयोगोऽजायत, यत्रावयोः स्नेहः परस्परमुपचीयमान एवादृश्यतोपासितगुरुजनैश्छात्रवृन्दैर्विद्यायशोभासुरमानसैर्विद्वद्भिश्चापि।

काशीस्थविद्वन्मण्डलीमण्डनायमानोऽयं वैदिकशिरोमणितया सहैव धर्मशास्त्रवैदुष्यधुरामपि दधान आसीत्। अत एव भारतीयास्ततोऽन्यत्र निवसतां भारताभिजनानाञ्च नानाविधा जटिला व्यवस्था अपि निर्णयाय एतत्सविधे आगता व्यलोक्यन्त। क्लिष्टा अनिर्णीताः केवलं कल्पनासाध्या बहुविधा व्यवस्थाः स्वयं निर्णीय व्यवास्थापयदिति पूज्यश्रीमालवीयमहोदयानामपि वात्सल्यमत्र प्रबलं प्रचुरञ्चासीत्। देशस्यास्य प्रधानतमनायकतया, संस्कृतवैदुष्येण, सिद्धान्तप्रियतया, स्वातन्त्र्यप्राप्तिप्रबललग्नतया च देशस्य सामाजिक-राजनीतिक-धार्मिक-साहित्यिकादिविविधविषयेष्वपि कार्त्स्न्येनाधीती पूज्यमालवीयमहोदयोऽपि विविधव्यवस्थानिर्णयपरः प्रतिदिनमासीत्। तद्यथा—ब्राह्मणानां हलग्राहिता, द्वादशाब्दात् परतरे वयसि कन्याविवाहः शास्त्रसम्मतो निषिद्धोऽविचारितो वेति। एवमेव षडक्षर-द्वादशाक्षरमन्त्रप्रदानेन अस्पृश्याः द्विजत्वं सच्छूद्रत्वं वा लभेरन्न वा? एवंविधानां प्रश्नानामुत्तराणि चिन्तयन् चिन्तयितुं प्रेरयंश्च तात्कालिकपण्डितजनान् निश्चितप्रज्ञो निश्चयपरो बभूव। अतः प्रतिदिनं प्रतिमासञ्च विषयमेनमाश्रित्य विदुषां परस्परविवादेन पूज्यश्रीमालवीयमहोदयैरपि समं विवादौ प्राभूतामेव। तस्मिन् काले पण्डितप्रकाण्डस्यास्य प्रभावं पाण्डित्यञ्च विलोक्य स्पर्धमाना अपि एतद्यशोभिः स्पर्धमाना एव अभूवन्। बहवस्तत्समकक्षविद्वांस एतदीयमतज्ञानात्पूर्वं स्वमतं प्रकाशयितुं कदापि न अचेष्टिषत। बहुत्र पूज्यश्रीमालवीयमहोदयानां स्वातन्त्र्यप्राप्तिपराणां मतेन भिन्नं मतं प्रकाशयत्सु पण्डितजनेष्वेतदीयं नाम प्रथममासीत्। अतो धर्मे दृढत्वं स्पष्टं प्रतिभासते, श्रीमालवीयमहोदयस्य धर्मप्रियस्य शास्त्रपरवशस्यापि स्वातन्त्र्यप्राप्त्यनन्तरं संस्कृतभाषाप्रसूताया वर्णाश्रमकल्पलताफलीभूताया भारतीयायाः संस्कृतेः शास्त्रीयपरिश्रमप्रजातप्रतिभासरिद्भिः सेचनं कृत्वा तद्रक्षापरा भवेमेत्येव मतिरासीन्नतु शास्त्रातिक्रमे। स श्रुतिं मातरमिव हितकारिणीं सर्वदा अस्मार्षीत्।

एकदाऽधिप्रयागं मकरस्थे भास्करे पूज्यश्रीमालवीयमहोदयैरायोजिते सदसि काशीस्थाः सर्वे वैदिकाः शास्त्रज्ञाश्च निमन्त्रिता आसन्। मकरे गङ्गास्नानफलेन प्रेरिता अपि बहवोऽगच्छन्। तत्र यागोऽपि कश्चित् प्रारभ्यत। पूज्यश्रीमालवीयमहोदयस्तदानीन्तनभारतीयदेशनायकेषु सर्वाधिकप्रभाववानासीत्। अतो यागीयदीक्षाग्रहणाय नासीदवसरः, मया पृष्टो महाराजोऽभ्यधात्—को ह्ययं संशयस्यावसरः पण्डितप्रकाण्डे, सदाचारपूते, पण्डितकुलप्रसूते, वेदविदां वरिष्ठे, मीमांसामांसलप्रज्ञे, बाल्येऽधीतव्याकरणतया उपस्कृतशब्दसुन्दरभाषिणि, पण्डितप्रवरे

श्रीविद्याधरे विद्यमाने। स एव यजमान आचार्यश्च भवत्विति प्रार्थयते मालवीयः।

एवमेवैकदा पण्डितगोष्ठीषु कश्चिद् वैयाकरणतल्लजः पण्डितप्रकाण्डमेनमप्राक्षीत्—"अनामिकाङ्गुष्ठाभ्यां मृदमुत्क्षिप्य" इति वाक्यं मुहुः पठन्ति वैदिकाः, 'परमिदमशुद्धमस्तीति। निशम्यैतत्त्वरितं महानुभाव एष व्याहार्षीत् "शुद्धमपि भवितुमर्हति, यद्यपि प्राण्यङ्गवाचकतयैकवद्भावेन नपुंसकत्वमेकत्वञ्च व्याकरणेन बोध्यते, तथापि एकवद्भावोत्तरम्भाविनमेकशेषं न कश्चिन्निषेद्धुं प्रभविष्यति" इति। तत्रत्याः सर्वे वैयाकरणा निशम्यैतादृशीं व्याकरणव्युत्पत्तिं धन्यवादान् व्याहरन्तो मुदिता अभूवन्।

एवमेव "अथैनं वासः परिधापयति" इति वाक्यस्य साधुतायां सन्दिहानानभिलक्ष्य "परिदधातेरुपरिदेशसंयोगानुकूलव्यापारे शक्तिं कल्पयित्वा गत्यर्थकतया समाधानं विधायापि" सर्वान् वैयाकरणांश्चकितचकितानतनोत्।

मीमांसाशास्त्रीया प्रौढा व्युत्पत्तिस्तु कात्यायनश्रौतसूत्रस्य सरलां टीकां पश्यतां पुरस्तात्पदे पदे प्रकाशत एव। अनया टीकया च पञ्चगौडानां वैदिकविदुषां परमुखापेक्षिता त्याजितेति विद्वन्मुखात्प्रतिदिनं श्रूयते। टीकाया अस्या भूमिकायां वेदविषयको विविधो विचारः प्रदर्शितः। यदीयाऽध्ययनेन वेदस्य नित्यत्वम् अपौरुषेयत्वं तल्लक्षणादिकं चातीव प्रामाणिकपद्धत्या पर्यालोचितं निर्दिष्टं भासते। स्वल्पेनैव कालेन बहून् विद्यार्थिनो वैदिकान् विधाय तेभ्यो वृत्तिं प्रदाप्य च वेदस्य धर्मशास्त्रस्य सनातनधर्मस्य च यावानुपकारोऽनेन पूतात्मना विहितस्तं स्मरंस्तद्वियोगव्यथितहृदयो विरमति।

महामहोपाध्यायश्रीविद्याधरगौडमहोदयाः

(पं० श्रीलक्ष्मीनाथजी झा, वेदान्तविभागाध्यक्ष-हिन्दू विश्वविद्यालय, काशी)

महामान्याः वदान्याः महाविद्वांसः महामहोपाध्यायपण्डितश्रीविद्याधरगौडमहोदयाः प्रख्यातप्रतिभाः सम्पूर्णभारतदेशनिष्ठविराजमानकीर्तिपताकापटाः कुलपरम्पराऽऽयातसंस्कृतशेमुषीसमाराधनलब्धानवद्यविद्यावैभवाः गौडकुलकमलभास्कराः, औदार्यमधुरसत्यवचोभिः अनेकेषां ग्रन्थानां निर्माणैः प्रकाशनैः लेखादिभिश्च सर्वेषामेव मदीयोऽयमिति बुद्धिमुल्लासयन्तः परमपूजनीयतामधृषत। युक्तमेवैतेषामेतत्सर्वम्, यदाहुः प्राञ्चो विपश्चितः—

विद्यया वपुषा वाचा वस्त्रेण विभवेन च।
नरः पूज्यत्वमाप्नोति वकारैः पञ्चभिर्युतः॥ इति।

एतदपीमेऽतिशेरते स्म, यत एते विद्याधरेति स्वनाम्न्यपि वकारं धारयन्तोऽतिपूज्यत्वप्रयोजकं षड्वकारवत्त्वमशिश्रियन्। एते च स्वकीयपितृचरणेभ्यः विद्वद्धौरेयेभ्यः महामहोपाध्यायश्रीप्रभुदत्तशास्त्रिभ्यः वेदकर्मकाण्डग्रन्थानन्यांश्च विद्याप्रकर्षकारकान् ग्रन्थान् श्रमक्रमाभ्यां सम्यगधीतवन्तः। काशीविश्वविद्यालये बहूनन्तेवासिनोऽध्याप्य प्रौढपाण्डित्यं समपादयन्, अत एतैर्बहवो विद्वांस उपकृताः, मैथिलाश्च विशेषतः स्नेहभाजोऽभूवन्। एतेषां महानुभावानामस्माभिरतिपरिचितानामपि गुणगणकीर्तने यथावत्स्वरूपाधिगमने च न सर्वथा वयं शक्नुम इत्युपरमाम इति शिवम्।

———

श्रद्धाञ्जलिः

(पं० श्रीगोपालशास्त्रीजी दर्शनकेसरी, आचार्य, ज्योतिर्मठ, बदरीनाथ)

वाराणस्यां महामहोपाध्यायपण्डितश्रीप्रभुदत्तशास्त्रिगौडमहोदया अग्निहोत्रिणः परमप्रसिद्धाः महावैदिका विद्वांस आसन्। एतेषां ज्येष्ठपुत्राः महामहोपाध्यायपण्डितश्रीविद्याधरशास्त्रिणोऽपि तथैव महाविद्वांसोऽभूवन्। पूज्यपादपण्डितश्रीपद्मनाभशास्त्रिमहोदया मत्पार्श्वे एतेषां कुलपुरुषाणां प्रशंसां कृत्वा कथयन्ति स्म "यत् पश्यतु कीदृग् हि पण्डितविद्याधरशर्मा काश्यामद्वितीयो वैदिको विद्वान् सरलस्वभावो विद्यते, यत्तस्य पार्श्वे अभिमानस्य लेशोऽपि नास्ति। स हि काशी-हिन्दूविश्वविद्यालयस्य धर्मविज्ञानविभागाध्यक्षो विद्यते। तस्य विशिष्टां विद्वत्तां निरीक्ष्य भारतभूषणमहामनःपण्डितश्रीमदनमोहनमालवीयोऽपि मुक्तकण्ठप्रशंसां करोति" इत्यादिगुणकीर्तनं श्रीविद्याधरशास्त्रिमहोदयस्य बहुधा सर्वेषां समक्षे कुर्वन्ति स्म।

प्रशस्तकुलानामेषां मया सह परिचयस्तु बाल्यकालादेवासीत्। मयापि स्वयं श्रीविद्याधरगौडमहोदयानां विशिष्टवैदुष्यस्य, शीलस्य, स्वभावस्य च बहुशोऽनुभवः कृतो विद्यते।

कार्यवशादस्माकं श्रीविद्याधरगौडमहोदयगृहे गमनं स्यात्तदा तत्र साक्षाद्वेदस्वरूपं श्रीगौडमहोदयं अग्निहोत्रहवनं कुर्वन्तं द्विजेभ्योऽग्निहोत्रभस्म ददतं स्वशिष्यानध्यापयन्तं वेदकर्मकाण्डादिविषयकं कमपि ग्रन्थं लिखन्तं कलिकाता-बम्बई-दिल्ली-कानपुर-नगरेभ्यः समागतानां पत्राणामुत्तरं लिखन्तं उपस्थितानां जिज्ञासूनाञ्च प्रश्नस्योत्तरं ददतं पारिवारिकजनान् शास्त्रीयं व्यावहारिकञ्च किञ्चिदुपदिशन्तं दृष्ट्वा मम मनसि महदाश्चर्यमुदपद्यत यद्यापि वाराणस्यां ईदृशा विद्वांसः सन्ति ये रात्रिन्दिवा केवलं "अध्यापनं अध्ययनम्" इति मन्वादिस्मृतिवचनं सार्थकं कुर्वन्ति। वस्तुतः श्रीविद्याधर-गौडमहोदयाः बृहस्पतितुल्या एव आसन्, येषां पार्श्वे विविधशास्त्राणां भाण्डार एव आसीत्, यस्य प्रभावेण समस्तभारतवर्षीयवैदिक-विदुषां मध्ये तेषां प्राधान्यमासीत्।

श्रीविद्याधरशास्त्रिमहोदयाः समस्ते भारते सर्वत्रैव श्रौत-स्मार्त-यज्ञानुष्ठातुं समाहूता आचार्यपदे प्रतिष्ठिता गच्छन्ति स्म। बहुषु यज्ञेषु धर्मोपदेशार्थं प्रायस्ते ममाह्वानं कारयन्ति स्म। तत्र चाहं तेषां विशिष्टं सम्मानं यजमानैः क्रियमाणं वीक्ष्य चकितचकितो भवामि स्म। यत्र समुपस्थिताः सर्वेऽपि विद्वांसः श्रेष्ठिनोऽपि बद्धाञ्जलयो यान् स्तुवन्ति स्वकीयं जीवनं च धन्यमामनन्ति च।

एकदा श्रीविद्याधरगौडमहोदयाः ममोपदेशकमहाविद्यालये स्वयं समागत्य प्रस्तावं कृतवन्तो यद् "वैदिका विद्वांसो धर्मोपदेशं सभायां समुत्थाय कुर्युरित्येवं भवान् शिक्षयतु। एतेन महान् प्रचारो भविष्यति धर्मस्येति। यतो हि वैदिकाः केवलं कर्मकाण्डिन एव भवन्ति, यदि ते धर्मोपदेशका अपि भविष्यन्ति तर्हि देशस्य समाजस्य धर्मस्य च महाँल्लाभः स्यात्।"

एकदा रुग्णावस्थायां ते मत्पार्श्वे पुरुषं सम्प्रेष्य स्वनिवासस्थाने मामाहूतवन्तः। यदा चाहं तत्र गतवान् तदा ते निद्रिता आसन्। तत्रत्यः परिचर्य्या-पुरुषो मामभ्यधात्—'इदानीन्तु ते सुनिद्रिताः सन्ति। वैद्यानामादेशो विद्यते यत्सुप्ते सति न जागरणीयम्। अतः भवान् श्वोदिने आयातु।' यदाऽहं पुनस्तत्र द्वितीये दिवसे गतवान् तदा तु श्रुतमधुनैव तेषां काशीलाभो जातः। मया सह तेषामन्तिमः संल्लापोऽभूदेव न हि। न जाने किं मनसि निश्चित्य ते मामाहूत-वन्त आसन्। तस्याद्यापि मम मनसि क्षोभ एवास्ति, यदन्तिमस्तेषामादेशो मया न श्रुत इति। इदन्तु सुस्पष्टं विद्यते यच्छ्रीविद्याधरगौडमहोदयानां निधनेन न केवलं काशीस्थविद्वत्समाजस्य, अपितु समस्तभारतवर्षीयविद्वत्समाजस्य महती क्षतिः सञ्जाता। अतस्तेषां महामहिमशालिनां सर्वतन्त्रस्वतन्त्राणां प्रशस्यगुणानां गौडमहोदयानां अभूतपूर्वगुणान् स्तुवतो स्मरतश्च मे "वाग्जन्मवैफल्यमसह्यशल्यं गुणाद्भुते वस्तुनि मौनिता चेत्" इति श्रीहर्षीयं

पद्यमेव स्मृतिपथमायाति। इत्येतैरेव कियद्भिः शब्दैस्तेभ्योऽचिन्त्यमहिमभ्यः श्रद्धाञ्जलिं वितीर्य विरमामि विस्तरादिति।

पण्डितप्रवराः म० म० श्रीविद्याधरशर्ममहाभागाः

(पण्डित श्रीबदरीनाथजी शुक्ल, प्रधानाचार्य, वाराणसेय संस्कृत विश्वविद्यालय)

विद्वन्मौलिमणयः प० श्रीविद्याधरशर्माणः सर्वप्रथमं मया काशी-हिन्दूविश्वविद्यालये दृष्टाः। तदानीन्तैस्तत्र धर्मविज्ञानविभागाध्यक्षपदं प्रसाध्यमानमासीत्। अहन्तदा तत्रैको लघुतमश्छात्र एवासम्, नासीन्मे मनागपि सामर्थ्यं तेषां गभीरं पाण्डित्यं परिज्ञातुम्। किन्तु भगवत्कृपया कतिपयेष्वेव दिनेषु तेषां सहज-स्नेहदृष्टिलाभेन निर्भयीभूय प्रायः प्रत्यहमेव तत्समक्षमुपतिष्ठता मयेदं प्रत्यक्षमन्वभावि यद् दृगारोहणमात्रक्रियमाणहर्षवर्षस्तदीयो वपुःप्रकर्षः स्नेह-विश्वासवर्षणप्रवणं तदीयं मनःकर्षणमीक्षणं प्रावृट्पयोदस्तनितप्रतिस्पर्धी तदीयो वेदध्वनिः विद्वद्विद्यार्थिनिवहेनाजस्रं जेगीयमानं तदीयं बहुमुखं वैदुष्यं च तत्समीपमागतान् महामहिम्नोऽपि जनान् प्रसभं तच्चरणप्रणिपातपरायणानकरोत्।

मम गुरुभिः वेदान्तविभागाध्यक्षैः म० म० प० श्रीबालकृष्णमिश्रैः न्यायविभागाध्यक्षैः शिवमयनिःश्वसितैः प० श्रीश्रीशङ्करतर्करत्नैश्च सह तदीय निरुपधिप्रीतिः महाविद्यालयाध्यक्षैः म० म० प० श्रीप्रमथनाथशर्मतर्कभूषणैः सोल्लासं क्रियमाणस्तदीयः सम्मानो विश्वविद्यालयकुलपतिभिर्महामनोभिः प० श्रीमदनमोहनमालवीयमहोदयैर्दीयमानः समादरो विश्वविद्यालयोपकुलपतिभिः प्राच्यप्रतीच्यविद्याऽवदातैः प० श्रीआनन्दशङ्करबापूभाईध्रुवमहानुभावैर्विज्ञाप्यमानो बहुमानो मीमांसाविभागाध्यक्षैः म० म० प० श्रीचिन्नस्वामिशास्त्रिभिः प्रदर्श्यमानो जिज्ञासुभावो व्याकरणविभागाध्यक्षैः प० श्रीकालीप्रसाद-मिश्रैर्विधीयमानो विनयव्यवहारश्च तेषां शीलसौजन्यबहुश्रुततात्रभृतीनां सद्गुण-सम्पदां साक्ष्यमकुर्वन्। ते सहयोगिविदुषां स्वच्छाः सुहृदोऽधिकारिणामसदृश-विश्वासभूमयो विद्यार्थिनां कल्पतरवो धार्मिकजनानां शरण्या वेदवेदाङ्गविद्यामसमाना आश्रयाश्चावर्तन्त। साधारण्येन समग्रे भारते विशेषेणोत्तरभारते च वेदविद्यानामध्ययनाध्यापनयोः या परम्परा कर्मकाण्डस्य याऽनुष्ठानपद्धतिश्च साम्प्रतं प्रचलति साऽमीभिरेव महाभागैः प्रतिष्ठापिताऽमीषां शिष्यप्रशिष्यैरेव परिचाल्यमाना च विद्यत इति प्रायो निर्विवादम्।

ईदृशानां स्वनामधन्यानामनुकरणीयचरितानां नैयायिकप्रवरश्रीशिवदत्त-मिश्रसदृशभ्रातृवैदिकप्रवरश्रीवेणीरामशर्मसदृशपुत्रभाजां कृतिकुलनायकपण्डित-श्रीप्रभुदत्तशर्मतनुजनुषां म० म० प० श्रीविद्याधरशर्ममहाभागानां स्मृतिग्रन्थ-प्रकाशनप्रसङ्ग एभिः कतिभिश्चित्पदैस्तद्गुणगणोद्धर्णनप्रभवपुण्येनाहमात्मानं पुनामीति सप्रश्रयं विज्ञापयति।

किमप्यलौकिकं सत्त्वम्

(पं० श्रीराजनारायणजी शास्त्री, प्रधानाचार्य, शास्त्रार्थ महाविद्यालय, वाराणसी)

अध्ययनार्थं वाराणसीमागतस्य मे सन्ध्यावन्दनादिकर्माङ्गभूताग्निहोत्रभस्मलिप्सा कदाचिदजायत। सतीर्थ्यैस्सह तद्व्याजेन सर्वप्रतिष्ठमग्निहोत्रशालं दिदृक्षुः सकरकन्दवीथ्यां गतोऽपश्यं साक्षाद् गणाधिपमिव विराजमानं भस्मोद्धूलितललाटं गभीरातिगभीरचिन्तनरतं देदीप्यमानमुखमण्डलं किमप्यलौकिकं सत्त्वम्। प्रणिपत्य तदीयचरणकमलयोः कञ्चिद् विलक्षणमेवानन्दमन्वभवम्। तदनु विविधा हि विचारा हृदयदरीं प्रविश्य तर्काकुलमकार्षुः। किमेष साक्षाद् भगवान् विश्वेश्वरः ? महाशयो विद्यानिधिर्गजाननः ? निखिलशास्त्रमूर्त्तिर्भगवान् बादरायणः ? नराकारेण वा साक्षादग्निदेवो विराजते ? महाभागाः कतिपयैः क्षणैरान्दोलितहृदयं मामालोच्यापृच्छन् मधुरातिमधुरया देवगभीरया गिरा परिचयार्थमहमुत्साहितः। कस्यचित् प्रसिद्धपण्डितपरम्पराप्रसूतस्य वाराणसीमध्ययनार्थमधिवसतो निवेदनमाकर्ण्य परमाह्लादव्यञ्जकस्मिताशिषा समबोधयन्। समुदसाहयंश्च विविधां विद्यां स्वपरम्परारक्षणक्षमामर्जयितुम्। 'ऋषीणाम्‌ पुनराद्यानां वाचमर्थोऽनुधावति' इति लब्धभूतपूर्वोपदेशस्य चेतसि कियदानन्दजातमुदपद्यतेति न शक्नोम्युपस्थापयितुम्। आहूय कञ्चन सेवकं भस्मपुटकमेकमानाय्य साशीर्वचनं मह्यम् प्रदाय पुनः पुनरागमनायोपादिशन्। तदाप्रभृति प्रतिसप्ताहं व्यासदर्शनमिवाकलय्य नियमतो जाता मे प्रवृत्तिरदसीयदर्शने। उत्तरोत्तरसम्पर्कात् मया हृदयेनानुभूतं यदेते भारतभुवो मुकुटालङ्कारभूता अनादिवेदविद्यावतारा अशेषशास्त्रविचारसारसर्वस्वचिन्तका वचसापि न लोकाहितचिन्तकाः पण्डितमण्डलमूर्द्धन्याः स्वनामधन्या विश्वविदितयशसो याज्ञिकसार्वभौमा वेदितव्यविद्या अन्वर्थविद्याधरा महामहोपाध्यायाद्यनेकविरुदभाजः पूज्यपादाः श्रीमन्तस्तत्रभवन्तो विद्याधरशास्त्रिणः सन्ति।

वेदमन्त्रपाठविषये, तदर्थविचारप्रसङ्गे, मीमांसाशास्त्रावगाहिततत्त्वार्थोपस्थापनसमये, वैदिकव्याख्यानसमये, धर्मशास्त्रादिव्यवस्थापने च तदीया गभीरा वाचोऽद्यापि स्मृतिपथमायाताः कर्णकुहरमान्दोलयन्ति।

सदसि विचारे प्रस्तुते किं नाम शास्त्रमेतैरस्पृष्टमिति नालोचकः कश्चन वक्तुमियेष। विविधविद्यानिधानत्वम् परहितसाधनैककल्पितविग्रहत्वम् विशालाकाराकारिताम् सुधासारसिक्तभाषिताम् लेशतोऽपि क्रोधमोहमदमात्सर्यादिसाहित्यविरहम् कर्मज्ञानोपासनाख्यकाण्डत्रयसमन्वयितां च दर्शं दर्शं किमप्यलौकिकं सत्त्वमिति निरचैषम्।

अनिर्वचनीयं सारल्यं विद्याविनयसम्पन्नेऽपरिचितेऽपि सहजस्नेहम्, दयनीयेष्वहैतुकीं कृपाम्, सुतनिर्विशेषं छात्रपोषणम्, सुरभारतीसेवकः को न जानीते महामनसामेषाम्। काशिकहिन्दुविश्वविद्यालयीय-संस्कृतमहाविद्यालये धर्मविज्ञान-

विभागाध्यक्षतामाजीवनं निर्वाह्यानेकशो वेदधुरन्धरा विद्वांसो दिशि विदिशि प्रतिष्ठापिताः, येऽद्याप्यासेतुहिमाचलं वेदविद्यां प्रचारयन्ति। महापुरुषाणामेषां सुयोग्यास्तनूजा वेदविद्यानदीष्णाः सहृदयहृदया याज्ञिकसम्राजः पं० श्रीवेणीराम-शर्माणः (वाराणसेय-गोयनकासंस्कृतमहाविद्यालये वेदप्राध्यापकाः) पं० श्री दौलतरामशर्माणः (वाराणसेयसंन्यासिसंस्कृतमहाविद्यालये वेदप्राध्यापकाः) अध्यापयन्तः परश्शतान् वैदिकाँश्छात्रान् सम्पादयन्ति। श्रीमाधवप्रसादमिश्रः श्रीदीनानाथमिश्रश्च पत्रकारितामङ्गीकृत्य नैकपत्रपत्रिकादिसम्पादनेन विशेषतो लोकप्रतिष्ठार्जनेन सौजन्यसम्मानपरम्परां कुलीनां परिवर्द्धयतः। इदन्तु तावन्निःशङ्कं वक्तुमिष्यते यदद्योत्तरभारते या वेदविद्या प्रचारपथमालक्ष्यते साऽस्यैव कुलस्य पराक्रमस्वरूपेति।

यद्यपि महामान्यास्तेऽद्य संसारासारताकवलिताः स्वर्गे विराजन्ते, तथापि स्वपितृपादानां विश्वविदितवैदुष्याणाम् स्व० महामहोपाध्यायपण्डितश्री प्रभुदत्ताग्निहोत्रिणां पदचिह्नानुसरणेन लब्धराजकीयमहामहोपाध्यायादिसम्मान-भाजः कीर्त्तिकल्पद्रुमा जीवन्त्येव। एतेषां प्रेयांसोऽनुजाः स्वपरम्परीणवेदविद्या-विशारदा अपि तर्ककर्कशविचारचातुरीधुरीणा न्यायवागीशाः पूज्यपादाः पं० श्रीशिवदत्तमिश्रमहोदयाः, लेखकगुरवः, वाराणसेयराजकीयसंस्कृतमहा-विद्यालयीयन्यायशास्त्रप्रधानाध्यापकतां नियतराजकालं महत्या प्रतिष्ठया निर्वाह्य दर्शनशास्त्रेषु निगूढतत्त्वाननेकशो ग्रन्थान् लोकोपकारधिया शास्त्र-प्रचारमालक्ष्य विरचय्य प्रकाश्य अहर्निशं शास्त्राध्यापनेन काशीं प्रकाशयन्ति।

वस्तुतः 'वेदोऽखिलो धर्ममूलम्', 'सर्वं वेदात्प्रसिध्यति' इति शास्त्रोक्तः सिद्धान्तसार एतेन सामान्यपण्डितकुलेन प्राधान्येनाङ्गीकृतः, तत्फलं च सर्वथा सम्पाद्य लोके प्रदर्शितमनुसरणीयतां गच्छति। किं बहुना शब्दैरेतैरेव स्मारकग्रन्थे ग्रन्थनीये स्वकीयं श्रद्धासुमाञ्जलिमर्पयन् विरमामि।

श्रद्धाञ्जलिः

(मीमांसक पण्डितप्रवर श्रीधर अण्णाशास्त्रीजी वारे, नासिक)

'स्वदेशे पूज्यते राजा विद्वान्सर्वत्र पूज्यते' इत्येष सर्वसम्मतः सुभाषितनि-नादितो घण्टाघोषोऽस्माकं श्रद्धेयानां विदुषां कृते यथार्थो भवति। निखिलविद्यापीठे सर्वतीर्थमूर्द्धन्ये पुण्यपावने श्रीकाशीक्षेत्रे बहोः कालादारभ्याद्यावधि विराजमान-सर्वविश्रुतगौडकुलललामभूतानां नानाविद्याविद्योतमानानां प्रातःस्मरणीयानां महाविदुषामाहिताग्नीनां महामहोपाध्यायपदभाजां स्व० श्रीप्रभुदत्तशास्त्रिणां तथा तत्पुत्ररत्नानां पण्डितप्रकाण्डानां नैकशास्त्रमर्मज्ञानां स्वर्गतानां महामहोपाध्यायपदवी-समलङ्कृतानां मान्यवराणां पण्डितप्रकाण्डानां श्रीविद्याधरशास्त्रिमहोदयानां

पन्नता—सिद्धान्तलक्षण—पञ्चलक्षणी—वेदान्तसाराद्यनेकदार्शनिकग्रन्थटीकाकाराणां पण्डितवरेण्यानां न्यायाचार्याणां श्रीशिवदत्तशास्त्रिमहाभागानां चास्माकमपूर्वदर्शनं प्रथमपरिचयश्च खानदेशप्रान्ते बहादुरपुरग्रामे शालिवाहनशके १८४४ तमे वत्सरे श्रीकालूराममिश्रमहोदयैः कारितश्रीबद्रीनारायणपञ्चायतनप्रतिष्ठाप्रसङ्गतः समजनि। स च परिचयः परस्परसुहृद्भावेनोत्तरोत्तरं वृद्धिमापद्यते स्म।

तत्र श्रीमतां प्रज्ञावदग्रगण्यानां श्रीविद्याधरशास्त्रिमहोदयानामस्माकं चान्योन्यदुष्प्राप्यग्रन्थानामादानप्रदानव्यवहारस्तथा प्रश्नप्रतिप्रश्नाभ्यां शङ्कासमाधानाय पत्रव्यवहारश्च सततमासीत्। तेषां वपुः शीलं सौजन्यं शालीनत्वं सुमधुरं भाषणं सरलः स्वभावः बहुश्रुतता सार्वजनीनं नानाशास्त्रपाण्डित्यं तलस्पर्शिमर्मज्ञं विषयावगाहनं चेत्यादयो गुणा मामकीनां स्मृतिं वारं वारमुद्बोधयन्ति।

एतैः काशीस्थहिन्दूविश्वविद्यालये धर्मविज्ञानविभागेऽध्यक्षपदमलङ्कृत्यानवरतविद्यादानं कृत्वा विद्यार्थिसार्थाः कृतार्थीकृताः। तथा एतैः संख्यावद्भिः कात्यायनश्रौतसूत्रीया सरला वृत्तिः कातीयशुल्बसूत्रीया सरला वृत्तिः स्मार्तप्रभुरित्यादयोऽनेके ग्रन्थाश्चापि प्रणीताः। तास्ता वृत्तयः स्वकीयं 'सरला' इत्येतन्नाम चरितार्थयन्तीति प्रतीतमेव विदुषाम्।

श्रीमदीयग्रन्थजातेन तत्तद्विद्याक्षेत्रे बहुमूल्या रत्नपूर्तिः सम्पादितेति को नाम विद्वान्नाभिमन्येत? तेभ्य एतेभ्यो दिगन्तविश्रान्तयशोवद्भ्यस्तत्रभवद्भ्योऽस्मन्मित्रवर्येभ्यः सूरिप्रवरेभ्योऽनन्तश्रिया विराजितेभ्यः श्रीविद्याधरशास्त्रिमहोदयेभ्यः सप्रश्रयं सादरं श्रद्धाञ्जलिरेष समर्प्यते।

विलक्षणता

(पण्डितप्रवर श्रीरामबालकजी शास्त्री, वाराणसी)

काशीयं सृष्टिमारभ्य अद्यावधि विद्याखनिस्तत्रापि वेदविद्यायास्तद्वैदिकानां च कृते तु वैदिकस्थलीति कथने नास्ति किमपि वैमत्यम्। तेषु वैदिकेषु दाक्षिणात्यानामेवासीत् प्राधान्यमिति सर्वविदितम्। शास्त्रस्य विविधविषयेषु बहवोऽभूवन् विद्वद्वरेण्याः पण्डितमूर्धन्याः कृतविद्याः पञ्चगौडेषु। किञ्च वेदविद्यायाः पाण्डित्यगाम्भीर्यार्जनं तदुद्घाटनं चाकरोत् सर्वप्रथमं महामहोपाध्यायः श्रीविद्याधरशास्त्री गौडमहोदय एव। यद्यपि शास्त्रिमहोदयस्यास्य वेदविद्यावैशारद्यं पैतृकसम्पत्तिरूपं स्वनामधन्यात् पितृचरणात् महामहोपाध्यायात् पण्डितप्रभुदत्तशास्त्रिमहोदयात् एव मिलितमासीत्, तथापि 'सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः' इत्यनुसारं महामहोपाध्यायपण्डितविद्याधरशास्त्रिमहोदयः वेद-

विद्यायाः निजपाण्डित्यवैलक्षण्येन अध्यापनकौशलेन च शतशः सहस्रशः वैदिक-कर्मकाण्डिनः शिष्यान् निजप्रतिनिधिरूपान् समुत्पाद्य स्थाने स्थाने च संस्थाप्य तदधिकमपि द्विगुणं त्रिगुणं वा यशोधनमर्जितवान्।

तदानीं वेदार्थज्ञानां वैदिकानां अभाव एव आसीत्। पण्डितविद्याधर-गौडमहोदयस्य वेदमन्त्रेषु यथाधिकारः आसीत् तथैव मन्त्रार्थेष्वपि। वेदस्य श्रौत-विषयः कियान् दुष्करः इति नास्ति तिरोहितं संस्कृतविदुषाम्। तस्य गम्भीर-पाण्डित्यबलेन घोरपरिश्रमेण च कात्यायनश्रौतसूत्रस्य 'विवृति'-टीकया भाष्यं कृत्वा शास्त्रिमहोदयः सर्वसाधारणानां संस्कृतविदुषां कृते सर्वसुलभमकरोत्। तेनायं संस्कृतसमाजः शास्त्रिमहोदयस्य निश्चितमेवाधमर्णः इति मन्ये।

सरस्वतीसमाराधकः संस्कृतपण्डितवर्गः लक्ष्मीकोपभाजनं भवति। तदानीं पण्डितविद्याधरमहोदयस्तादृशपण्डितानां कृते अर्थागारः (अर्थबैंक) इव आसीत्। कोऽपि अर्थेच्छया समागतः पण्डितः गौडगृहात् विमुखो नाभवत् इति काशीस्थपण्डितेषु प्रसिद्धिः। एते सर्वे गुणाः पितृचरणादेव मिलिताः आसन्, त एव गुणाः पण्डितविद्याधरमहोदयस्य सुपुत्रेषु विशेषतया वेदविद्यानिष्णाते श्रीवेणीरामगौडमहोदये समुल्लसन्ति, येन निजपितुः पण्डितविद्याधरगौड-महोदयस्य स्मृतिग्रन्थं प्रकाशयितुं प्रवृत्तः।

म० म० पं० श्रीविद्याधरजी गौडकी पुण्य-स्मृति

(पं० श्रीकमलाकान्तजी मिश्र, अध्यक्ष—गोयनका संस्कृत कालेज, काशी)

जिस समय मैं काशी में अध्ययन करता था उस समय कोडवार रियासत (जि० सुलतापुर) के कतिपय वैदिक छात्र भी मेरे साथ रहते थे। वे लोग स्वर्गीय महामहोपाध्याय वैदिकमूर्द्धन्य पण्डित श्री प्रभुदत्तजी अग्निहोत्री से वेदाध्ययन करते थे। उन वैदिक छात्रों से मुझे यदा कदा श्री प्रभुदत्तजी के सुयोग्य पुत्र पण्डित श्री विद्याधरजी गौड की विलक्षण कुशाग्र बुद्धि, प्रतिभा और विविध शास्त्रों के परिज्ञान का परिचय मिलता था। श्री प्रभुदत्तजी महाराज सुप्रसिद्ध श्रौतस्मार्त्तकर्मनिष्ठ महावैदिक थे। आपके यहाँ की धवल भस्म को प्रसिद्धि केवल काशी में ही नहीं, सर्वत्र व्याप्त थी। काशी के प्रायः सभी आस्तिक-वर्ग आपके यहाँ अग्निहोत्र की भस्म लेने जाते थे। मैं भी कभी-कभी अग्निहोत्री जी के घर भस्म लेने जाता था। आपके निवासस्थान में पहुँचकर कर्णकुहरों को आनन्दित करनेवाला वेदध्वनि का मधुर श्रवण, चित्त को आह्लादित करनेवाला सरस्वती देवी के भिन्न-भिन्न रत्नों का एक महान् भाण्डारस्वरूप विशाल

पुस्तकालय का दर्शन, पापों का क्षालन करनेवाला पुण्यप्रद अग्निहोत्रशाला का दर्शन, शरीर को पावन करनेवाला अग्निहोत्र के हवन का सुगन्धयुक्त धूम्रका आघ्राण, पुण्यप्रदा एवं दीर्घजीवनदायिनी विविध गोमाता के दर्शन और सर्वोपरि वेदस्वरूप वेदज्ञ परिवार का दर्शन करने से ऐसी अनुभूति होती थी, मानो यह साक्षात् 'देवलोक' है। इस देवलोक के अधिपति म० म० पं० श्री प्रभुदत्तजी अग्निहोत्री थे। श्री अग्निहोत्री जी महाराज के ज्येष्ठ पुत्र पण्डित श्री विद्याधरजी गौड केवल अवस्था में ही ज्येष्ठ नहीं थे, किन्तु विद्या और गुण में भी ज्येष्ठ थे।

'सर्वत्र जयमन्विच्छेत्पुत्रादिच्छेत्पराजयम्' इस उक्ति को श्री विद्याधरजी ने अपने विशिष्ट वैदुष्य से स्व-पितृचरणों को ऐसा प्रभावित और सन्तुष्ट कर दिया था कि वे अपने पुत्र की विशिष्ट विद्वत्ता से सन्तुष्ट होकर अपना जीवन सार्थक और धन्य समझते थे। और समय-समय पर वे अपने शिष्यों से साभिमान मुक्तकण्ठ से कह दिया करते थे कि—"अब तुमलोग विद्याधर से पढ़ा करो, वह मेरे से भी अधिक तुम्हारी तुष्टि करेंगे।" और कभी-कभी वे निम्नलिखित श्लोक भी कहा करते थे—

"आयोधनाग्रसरतां त्वयि वीर याते,
किं वा रिपूंस्तव गुरुः स्वयमुच्छिनत्ति।" (रघुवंश ५।७१)

उपर्युक्त दोनों उक्तियों के श्री विद्याधरजी गौड वस्तुतः एक अपूर्व दृष्टान्त थे।

श्री विद्याधरजी गौड ने इस भूमण्डल पर जन्म लेकर अपनी प्रखर प्रतिभा तथा प्रकाण्ड विद्वत्ता के कारण भारत के वैदिक विद्वानों में सर्वश्रेष्ठ स्थान प्राप्त किया था। आपको बाल्यकाल से ही प्रतिष्ठा का वरद हस्त प्राप्त था। आपकी लोकोत्तर विद्वत्ता और अध्यापन-पटुता आदि विशेषताओं का प्रकाश समूचे भारत में व्याप्त था। आप केवल वेदों के ही महार्णव नहीं थे, व्याकरण, साहित्य, मीमांसा, धर्मशास्त्र के भी पारदृश्वा थे। आपकी चातुर्दिक् विद्वत्ताको देखकर बड़े-बड़े विद्वान् कहा करते थे कि—श्री विद्याधरजी जैसा वेदज्ञ 'न भूतो न भविष्यति'।

श्री विद्याधरजी के सर्वतोमुख अपूर्व वैदुष्य के कारण उनकी विद्वत्समाज में अत्यधिक प्रशंसा और प्रतिष्ठा थी। आपका यशोवितान अति विस्तृत और सूर्य के प्रकाश के सदृश था, जो कि धार्मिक जनता के हृदयान्धकार को दूर करने में अत्यन्त तेजस्वी और ओजस्वी था। आप जैसे महावैदिक को पाकर समस्त विद्वन्मण्डल अपने को गौरवान्वित समझता था।

वस्तुतः वेदज्ञ वही कहे जा सकते हैं, जिन्हें वेद का मूलभाग अष्टविकृति-सहित गायत्रीवत् कण्ठस्थ हो, जिन्हें श्रौत-स्मार्तकर्म में पूर्ण अभिज्ञता हो और जिन्हें व्याकरणादि शास्त्रों के ज्ञान के साथ-साथ वेदार्थ का भी पूर्ण परिज्ञान

हो। स्वर्गीय श्री विद्याधरजी ऐसे ही सर्वाङ्गपरिपूर्ण वेदज्ञ थे। परन्तु दुःख के साथ लिखना पड़ता है कि मैंने जिस सर्वाङ्गपरिपूर्ण वेदविद्या का उज्ज्वल प्रकाश श्री विद्याधरजी में देखा था, वह उन्हीं के साथ लुप्त भी हो गया।

श्री विद्याधरजी के दर्शनमात्र से प्रतीत होता था कि आप साक्षात् 'वेदमूर्ति' हैं। आप जैसे प्रकाण्ड विद्वान् थे वैसे ही कट्टर धार्मिक, उदार और परोपकारी थे। आपने समय-समय पर धार्मिक समाज के सम्मुख जिस धार्मिकता, उदारता और परोपकारिता का परिचय दिया था, उससे सभी लोग परिचित हैं।

आपकी विशिष्ट उदारता का परिचय प्राप्त करने का अवसर मुझे भी एक बार मिला था, जिसका उल्लेख करना परमावश्यक प्रतीत होता है। काशीस्थ गवर्नमेन्ट संस्कृत कालेज के अध्यक्ष डा० श्री मङ्गलदेव शास्त्री एम्० ए०, डी० फिल्० के समय काशीस्थ राजकीय संस्कृत कालेज की प्राचीन पाठ्यनियमावली के स्थान में नूतन अवाञ्छनीय परिवर्तन किया गया था, जिससे भारत के विशिष्ट विद्वानों को अत्यन्त क्षोभ उत्पन्न हो गया था। हम लोगों ने अवाञ्छनीय परिवर्तन के निराकरणार्थ एक 'संस्कृताध्यापक संघ' तैयार किया। इस संघ को सुदृढ़ और सुव्यवस्थित बनाने के लिए हमलोगों को काशी के पण्डितप्रकाण्ड धार्मिक विद्वानों की सम्मति-सहित हस्ताक्षर की आवश्यकता हुई। हमलोग सर्वप्रथम महा-महोपाध्याय पण्डित श्री विद्याधरजी के पास पहुँचे और अपने अभिप्राय को उनसे कहा। श्री विद्याधरजी ने सहर्ष तत्क्षण बड़े आदर के साथ लिखा था कि—"प्राचीन पाठ्य-नियमावली के स्थान में जो अब नूतन परिवर्तन किया गया है, यह संस्कृत विद्या का महान् घातक है। निश्चित ही इस परिवर्तन से संस्कृत विद्या का ह्रास होगा।"

श्री विद्याधरजी की सम्मति प्राप्त कर हमलोग पूज्य महामना पं० श्रीमदनमोहन मालवीय तथा सर राधाकृष्णन् महोदय के पास पहुँचे। इन दोनों महानुभावों ने श्री विद्याधरजी की सम्मति देखकर प्रसन्नतापूर्वक अपने-अपने हस्ताक्षर कर दिये, जिससे हमारा 'संस्कृताध्यापक संघ' अत्यन्त प्रबल हुआ। पश्चात् हमलोग तत्कालीन शिक्षामन्त्री डाक्टर पन्नालाल महोदय से मिले। उन्होंने भी हमारे विचारों का समादर किया। इस प्रकार सभी की सहायता से हमलोग अपने कार्य में पूर्ण सफल हुए।

श्री विद्याधरजी ने अपने जीवनकाल में अनेक उच्चकोटि के ग्रन्थों का निर्माण कर वैदिक-साहित्य की अपूर्व सेवा की और अनेकों सुयोग्य विद्वानों को तैयार कर देश का कल्याण किया। मैं समझता हूँ जिन लोगों ने उनके चरणों में बैठकर वेदाध्ययन और कर्मकाण्ड की शिक्षा प्राप्त की, वे लोग धन्य हैं और वे सदा धन्य ही रहेंगे।

प्रायः विद्वानों में किसी न किसी विषय की अपूर्ति देखी जाती है, किन्तु पुण्य-शाली श्री विद्याधरजी ने इस अपवाद को भी अन्यथा कर दिया था। आपने

अपने पुण्यशाली श्री पिताजी के शुभाशीर्वाद और अपने पूर्व पुण्य के प्रभाव से गार्हस्थ्य-जीवन में ही समस्त सांसारिक वस्तुओं को आत्मसात् कर लिया था। श्री विद्याधरजी के महान् पुण्य का फल है कि आज भी उनके परिवार में वेदविद्या की अध्ययनाध्यापनपरम्परा जागृत है। श्री विद्याधरजी के पुत्र वेदाचार्य श्री वेणीराम शर्मा गौड अपने श्री पिताजी के जीवनकाल से ही काशी के सुप्रसिद्ध गोयनका संस्कृत महाविद्यालय में वेदाध्यापक हैं। आप भी अपने पितृ-पितामह की तरह सम्पूर्ण भारत में होनेवाले बड़े-बड़े यज्ञों के 'आचार्य' पद पर सम्मानपूर्वक आमन्त्रित किये जाते हैं। मुझे पूर्ण आशा है कि भविष्य में भी यह प्रख्यात वैदिकवंश वैदिकधर्म की रक्षा करता हुआ काशी में सर्वश्रेष्ठ वैदिकधर्म का ज्ञाता बना रहेगा।

'जातस्य हि ध्रुवो मृत्युः' इसके अनुसार सभी की मृत्यु अवश्यम्भावी है, किन्तु वे पुरुष अत्यन्त धन्य हैं, जो सदैव सरस्वती माता की उपासना करते हुए देहत्याग करते हैं। मेरी दृष्टि में श्री विद्याधरजी भी ऐसे ही धन्य पुरुषों में थे, जिन्होंने यावज्जीवन अपौरुषेय वेदों के अध्ययनाध्यापन तथा उसके प्रसार-प्रचार में अपने जीवन की आहुति समर्पित कर देश और समाज में स्थायी कीर्ति प्राप्त कर अमरत्व को प्राप्त किया। 'कीर्तिर्यस्य स जीवति।'

शास्त्रों में कहा है—आदर्श साधु-महात्मा और त्यागतपोनिष्ठ पण्डितप्रकाण्ड विद्वानों के यशोवर्णन करने से मनुष्य की अन्तरात्मा अत्यन्त स्वच्छ होकर अपूर्व ज्योति को प्राप्त करती है, पश्चात् वह आत्मसन्तोष (आत्मसाक्षात्कार) की भी प्राप्ति कर लेती है।

बाह्य मलादि के क्षालनार्थ मृज्जलादि अनेक साधन हैं, किन्तु आन्तरिक मलके क्षालनार्थ केवल त्यागतपोनिष्ठ विद्वानों के पावन चरित्र का वर्णन तथा स्मरण ही शरण है। उदात्तचरित स्वर्गीय महामहोपाध्याय पण्डित श्री विद्याधरजी गौड का पावन-चरित्र भी ऋषि-महर्षियों जैसा आदर्श रहा है। अतः मुझे विश्वास है कि जिस प्रकार मैं स्वर्गीय श्री विद्याधरजी गौड के पावन चरित्र का स्मरण कर अपनी आत्मा को क्षालित कर अपने में एक विशिष्ट ज्योतिका आनन्दानुभव कर रहा हूँ उसी प्रकार अन्य लोग भी आपके पावन चरित्र के स्मरण से विशिष्ट ज्योतिस्वरूपा सुख-शान्ति का अनुभव प्राप्त करेंगे।

———

हार्दिक श्रद्धाञ्जलि

(पं० श्रीमहादेवजी पाण्डेय, अध्यक्ष-प्राच्यविद्याविभाग, हिन्दू युनिवर्सिटी, काशी)

विद्वत्प्रवर सुगृहीतनामधेय प्रातःस्मरणीय श्रौतस्मार्त्तकर्मनिष्णात वैदिक-चक्रचूड़ामणि महामहोपाध्याय श्री विद्याधरजी गौड काशी हिन्दू विश्वविद्यालय के संस्कृत महाविद्यालय में थियालोजी विभाग के 'अध्यक्ष' थे। आप शुक्ल-यजुर्वेद की अष्टविकृतिसहित समस्त संहिता के पूर्णतया न केवल भारतप्रसिद्ध अभ्यासी थे, अपितु सर्वाङ्गीण अर्थतत्त्व के गभीर पारदृश्वा महाविद्वान् थे। आपकी व्याकरण-व्युत्पत्ति, साहित्य सौहित्य, मीमांसा का अभिज्ञतागौरव स्तुत्य था। आपका सौजन्यजन्य यश विश्वविश्रुत था। आप सुयोग्य भविष्णु विद्वानों के संग्रही तथा उनके परम उपकारी थे। आपकी भव्यमूर्ति दर्शनीय थी। आपकी विरचित अनेक पुस्तकें श्लाघनीय विविध व्याख्याएँ अध्ययन और अनुसन्धान के साधन हैं। आप अग्निहोत्री वैदिक थे और अनेक यज्ञों के अनुष्ठाता थे। आप के पूज्य पिता विद्वन्मूर्धन्य वैदिकमण्डलमण्डन म० म० श्री प्रभुदत्तजी महाराज को कौन नहीं जानता ?

पण्डितप्रवर श्री विद्याधरजी अग्निहोत्री के यवीयान् भ्राता तार्किकधुरन्धर पण्डितवर श्री शिवदत्तजी काशी के अलङ्कार हैं और उनके नव्य न्यायके ग्रन्थों पर सुग्रथित व्याख्यान मर्मज्ञों के विस्मयप्रद हैं। आपके पुत्रगण भी विभिन्न विषयों के सम्मानभाजन विद्वान् हैं और वे अध्यापन, ग्रन्थनिर्माण, पत्रकारिता प्रभृति सत्कार्यों के द्वारा अपने पूज्य पितामह तथा पिताके निर्मल कीर्तिप्रवाह को अग्रसारित कर रहे हैं।

प्रायः आजकल के लब्धप्रतिष्ठ वैदिक विद्वान् पूज्य श्री विद्याधरजी महाराज के ही शिष्य हैं। इस लेखक को भी सौभाग्यवश आपके चरणारविन्द के समीप उपस्थित होकर कुछ अध्ययन का गौरव प्राप्त हुआ है। अतः आप के पदपङ्कज में मैं श्रद्धावनत तथा चिरकृतज्ञ हूँ।

महामहिम म० म० श्रीविद्याधरजी गौड

(पं० श्रीनरदेवजी शास्त्री, कुलपति, गुरुकुल महाविद्यालय, ज्वालापुर, हरिद्वार)

संस्कृत क्षेत्र में महामहोपाध्याय श्री विद्याधरजी गौड का नाम किसको अविदित है ? आपका जन्म एक सर्वविश्रुत वेदज्ञ के यहाँ हुआ और उनके अपने भी पूर्व जन्म के तीव्र संस्कार थे। इसलिये अन्ततक वे वेदां के प्रचार-प्रसार की अध्ययनाध्यापनपरम्परा को स्थिर रख सके। पण्डितपरम्परा की कुछ ऐसी प्रवृत्ति हो चली है, कुछ ऐसी प्रवृत्ति रही है कि वे जिस शास्त्र से एक बार चिपट जाते हैं उसीसे चिपटे रहते हैं। जिन वेदों के परिज्ञान के लिये षडङ्ग बने हैं उन वेदों की ओर इनका ध्यान ही नहीं रहता। इसीलिये वैयाकरण, नैयायिक, मीमांसक आदि की संख्या बढ़ती गई। जब इस प्रथा को भी सुरक्षित न रख सके, तब वे साहित्यिक बनने लगे। वेदान्ती वेदान्त से चिपटे रहे। यह न सोचा कि वेदान्त की फलश्रुति वेदों में कहाँ है ?

वेदैर्विहीनाश्च पठन्ति शास्त्रं शास्त्रैर्विहीनाश्च पुराणपाठाः।
पुराणहीनाः कवयो भवन्ति भ्रष्टास्ततो भागवता भवन्ति ॥

जब वेदों का पठन-पाठन ढीला पड़ गया, तब वेदाङ्गों का जोर बढ़ा, जब उनका भी जोर घटा, तब पुराण आगे आये, काव्य आगे बढ़े, जब इनका भी जोर घटा, तब पण्डित लोग भागवत ले बैठे।

स्व० श्री विद्याधरजी ने निखिलशास्त्रनिष्णात रहने पर भी अपने वेदों को नहीं छोड़ा और वे अन्त तक वेदाभ्यास में निरत रहे। यह उनकी भारी विशेषता रही है। ऐसे गुणी विद्वान् स्व० महामना मालवीयजी की दृष्टि से कैसे बच सकते थे ? वे इनको हिन्दू विश्वविद्यालय में ले गये और इनको धर्मविज्ञान विभाग का 'अध्यक्ष' बना दिया।

गुरु की परीक्षा तो उसके शिष्यों से होती है। इनके प्रकाण्ड शिष्यगण प्रायः 'वेदाचार्य' ही हुए हैं, जो कि उत्तर भारत में सर्वत्र फैले हैं। समय-समय पर आप राजसम्मान के अधिकारी बने हैं। यद्यपि लोक में सरस्वती और लक्ष्मी का एकत्र सहवास कम दिखलाई पड़ता है, किन्तु स्व० श्री विद्याधरजी के यहाँ ये दोनों देवियाँ मेल से रहती थीं और स्व० श्री विद्याधरजी "पात्रवर्षी पर्जन्य" रूप बने रहे। विद्यामद, धनमद, अभिजन (कुलमद) आपको स्पर्श तक नहीं कर सका था। ऐसे वेदविद्या-परम्परा को सुचारु-रूप से सुरक्षित रखने वाले विबुधजनशिरोमणि महामहोपाध्याय श्री विद्याधर-नामक अन्वर्थ संज्ञाधारी को हमारा शतशः बार बार प्रणाम।

———

विनम्र श्रद्धाञ्जलि

(पं० श्रीबलदेवजी उपाध्याय, एम्० ए०, प्रो० हिन्दूविश्वविद्यालय, काशी)

वेद के माहात्म्य का यथार्थतः अंकन करना एक असाध्य नहीं तो दुःसाध्य व्यापार अवश्य है। हमारे महर्षियों के प्रातिभ चक्षु से साक्षात्कृत आध्यात्मिक तथ्यों से मण्डित जो शब्दराशि है वही 'वेद' के महनीय अभिधान के द्वारा संकेतित की जाती है। महर्षियों का जीवन पावनता तथा आध्यात्मिकता का प्रतीक था। तपःपुञ्ज से प्रदीप्त इन ऋषियों ने अपने समग्र जीवन का अध्यात्म के चिन्तन में तथा तपस्या के अर्जन में बिताया और दैवी प्रेरणा से जिन मन्त्रों का इन्होंने दर्शन किया वे ही वैदिक संहिताओं में संगृहीत हैं। भारतीय संस्कृति का पीठस्थानीय है वेद। भारतीय धर्म तथा दर्शन को मूल प्रेरणा देने वाला वेद संसार के साहित्य में सबसे प्राचीन ग्रन्थ है। उसके टक्कर का प्राचीनतम ग्रन्थ खोजने पर भी नहीं मिलता। आस्तिक विद्वान् तो वेदों को नित्य और अपौरुषेय मानते ही हैं और इसलिए उनके यहाँ वेद के कालनिर्णय की समस्या उठती ही नहीं। परन्तु पाश्चात्य पद्धति से भी अध्ययन करनेवाले विद्वानों तथा आलोचकों की दृष्टि में वेद कम से कम छ-सात हजार वर्ष पुराना अवश्य है। ऐसे सर्वमान्य ग्रन्थों के अध्ययन में जीवन यापन करने वाला विद्वान् सचमुच धन्य है।

वेदों को पठनशैली भी दो प्रकार की है। एक तो अष्टविकृति के साथ समस्त संहिताओं का पारायण और दूसरा है निरुक्त तथा सायणभाष्य आदि की सहायता से वेद के अर्थ का चिन्तन। पारायण की पद्धति के जानकार वैदिकों की कमी इस भारतवर्ष में नहीं थी। अपनी-अपनी शाखा का अध्ययन करना ब्राह्मणमात्र के लिए पवित्र कार्य था। पतञ्जलि का यह कथन यथार्थ है कि ब्राह्मण को बिना किसी कामना के षडङ्ग वेद का अध्ययन करना चाहिए और उसके अर्थ का ज्ञान करना चाहिए—'निष्कारणं ब्राह्मणेन षडङ्गो वेदोऽध्येयो ज्ञेयश्च।'

पतञ्जलिके पूर्वोक्त वाक्य में 'अध्येयः ज्ञेयश्च' ये दोनों शब्द बड़े ही महत्त्व के हैं। वे केवल वेद के अध्ययन पर ही आग्रह नहीं दिखलाते, प्रत्युत उसके ज्ञान पर भी अर्थात् वेद के मन्त्रों का शब्दतः अध्ययन तथा उनका अर्थतः ज्ञान दोनों वेदज्ञ के लिए आवश्यक कर्तव्य होते हैं। वह व्यक्ति अवश्य ही धन्य है जिसने वेद के मन्त्रों का शब्दतः अध्ययन किया है और साथ ही साथ उसके अर्थ का भी परिनिष्ठितरूप से ज्ञान प्राप्त किया है। क्योंकि बिना अर्थज्ञान के वेद का शाब्दिक पारायण विशेष महत्त्व नहीं रखता। निरुक्त आदि ग्रन्थों में इसीलिए अर्थज्ञ को भूयसी प्रशंसा की गई है—

'योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा।'

यह यास्क का वचन नहीं है, प्रत्युत सामवेदीय 'संहिता ब्राह्मण' का ही वचन है जिसे निरुक्त में उद्धृत किया गया है (निरुक्त १।१८)।

आचार्य श्री विद्याधरजी गौड ऐसी दुर्लभ वैदिक-मण्डली के एक उज्ज्वल रत्न थे। वे शुक्ल यजुर्वेदी थे और इसलिए उन्होंने माध्यन्दिन संहिता तथा तत्सम्बद्ध समस्त वैदिक ग्रन्थों का शब्दतः तथा अर्थतः गाढ़ अनुशीलन किया था। वेदविद्या में नैपुण्य के लिए उनका कुल सदा से प्रख्यात था। उनके पूज्य पिताजी श्री प्रभुदत्तजी अग्निहोत्री अपने समय के काशी के वैदिकों में शीर्षस्थानीय थे। उन्होंने वेद—कर्मकाण्ड का अभ्यास अपने पूज्य गुरुवर आचार्य श्री युगलकिशोरजी व्यास से किया था, जिसका निर्देश उन्होंने अपने ग्रन्थों में किया है। श्री विद्याधरजी ने अपने पूज्य पिताजी से वेद का तथा कर्मकाण्डका गम्भीर अध्ययन किया था, जिससे उनकी शेमुषी कर्मकाण्ड के विषय में विशेष प्रगल्भ थी। वे अन्य शास्त्रों, विशेषतः मीमांसा में भी बड़े निपुण थे। श्री विद्याधरजी के पास 'आचार्यमुष्टि' न थी। उन्होंने अपने सुचिन्तित वैदिक तत्त्वों को अपनी हथेली के भीतर दबा नहीं रखा, प्रत्युत उनका वितरण अपने छात्रों में अध्यापनद्वारा तथा अन्य जिज्ञासुजनों में अपने ग्रन्थों के द्वारा बड़ी सफलता के साथ किया। मैंने उनके द्वारा व्याख्यात 'कात्यायन श्रौतसूत्र' की प्रमेय-बहुला प्रस्तावना से विशेष लाभ उठाया है। उनका श्रौत-विषय का ज्ञान कितने ऊँचे दर्जे का था, इसका विशद परिचायिका है यह विस्तृत प्रस्तावना, जिसमें नाना यज्ञों का वर्णन बड़े विस्तार तथा वैशद्य के साथ किया गया है। श्रौत यागों का प्रयोग बहुत दिनों से उच्छिन्नप्राय है। ऐसी दशा में यज्ञों के रहस्यको समझना तथा उनके भेद-प्रभेदों के तारतम्य से परिचय रखना आज के युग में एक दुरूह व्यापार है, परन्तु श्री विद्याधरजी की यह प्रस्तावना इस दुरूह व्यापार को भी सुबोध बनाने की क्षमता रखती है। कातीय 'शुल्बसूत्र' की उनकी विवृति भी पर्याप्तरूपेण सुन्दर तथा विषयप्रतिपादक है। दुःख हमें इस बात का अधिक है कि उन्होंने अधिक आयु प्राप्त नहीं की, अन्यथा वे वेदसम्बन्धी अपने अगाध ज्ञान को अन्य ग्रन्थों में भी निबद्ध कर सकते थे। 'श्रेयसि केन तृप्यते ?' उनकी जो कुछ भी रचना है वह हमारे लिए वेदानुशीलन मार्ग का एक बहुमूल्य संबल है। यज्ञनारायण की अनुकम्पा से उनका यह पथ-प्रदर्शन अन्य वैदिकों के लिए स्फूर्ति और प्रेरणा का स्रोत बने, भगवान् से प्रार्थना है। आशा ही नहीं, पूरा विश्वास है कि आचार्य श्री विद्याधरजी गौड का आदर्श हमें इस मार्ग पर अधिकता से अग्रसर करता रहेगा।

———

श्रद्धाञ्जलि

(पं० श्रीसीतारामजी चतुर्वेदी, एम्० ए०, प्रिंसिपल, टाउन डिग्री कालेज, बलिया)

काशी की जिन विद्वद्-विभूतियों की भव्य-कथा ने काशी का महत्त्व और गौरव सम्बर्द्धित किया है उनमें श्रौत और स्मार्त कर्मकाण्ड के आचार्य तथा वेद के धुरन्धर विद्वान् महामहोपाध्याय पं० प्रभुदत्तजी शास्त्री तथा उनके आदरणीय एवं सुयोग्य आत्मज महामहोपाध्याय पं० विद्याधरजी गौड का नाम काशी के इतिहास में नहीं, भारत के इतिहास में अमर रहेगा।

मेरे पूज्य पिताजी पं० भीमसेनजी वेदपाठी ने म० म० पं० प्रभुदत्तजी शास्त्री से ही श्रौतस्मार्त कर्मकाण्ड तथा वेद की विद्या प्राप्त की थी और उन्हींके स्नेहपूर्ण आशीर्वाद तथा प्रेरणा से उन्होंने मुजफ्फरनगर में जाकर यश अर्जित किया। म० म० पं० प्रभुदत्तजी शास्त्री का दर्शन सर्वप्रथम मैंने अपने बचपन में किया था जब मैं संभवतः सात या आठ वर्ष का था। उन्हीं दिनों साक्षात् शिवस्वरूप पं० शिवकुमारजी शास्त्री का भी दर्शन करने का सौभाग्य प्राप्त हुआ। उस समय के इन दोनों परम आदरणीय महानुभावों का दर्शन और उनका स्वभाव सब प्रकार के सात्त्विक जीवन के लिए परम गंभीर प्रेरणा-स्रोत था। पहले ही दर्शन में पं० प्रभुदत्तजी शास्त्री ने मेरे हृदय पर अपने व्यक्तित्व की ऐसी अमिट छाप डाल दी कि धीरे-धीरे मैं उनकी ओर आकृष्ट होता चला गया। यह उनकी महती कृपा थी कि उन्होंने भी अपनी स्वाभाविक मृदुता, ऋजुता और उदारता से मुझे अपना वात्सल्यभाजन बना लिया। जब मैं काशी हिन्दू विश्वविद्यालय में इन्टर कक्षा में पढ़ने के लिए प्रविष्ट हुआ तब से तो मैं निरन्तर लगभग प्रति सप्ताह उनके दर्शन और उपदेश का सुयोग प्राप्त करने के लिए उनके सकरकन्द गली में स्थित आवास-पर जाकर उनके दिव्य दर्शन का लाभ उठाया करता था।

प्रारम्भ में मैंने भी रुद्री और कर्मकाण्ड का अभ्यास किया था, क्योंकि मुजफ्फरनगर के सेठ चैनसुखराम बड़े आस्तिक व्यक्ति थे। और उन्होंने मेरे पूज्य पिताजी से ही अग्निहोत्र ले रक्खा था। अतः अपने पूज्य पिताजी के साथ मैं भी अग्निहोत्र तथा दर्शपौर्णमासेष्टि में योग दिया करता था। स्वभावतः म० म० पं० प्रभुदत्तजी शास्त्री की कृपा प्राप्त करने के लिए मुझे भी उत्कण्ठा होती थी और फिर अपने पूज्य पिताजी के गुरुगृह के नाते तो मेरा वहाँ जाते रहना स्वाभाविक भी था।

मुझे भलीभाँति स्मरण है और मैं इस समय उनका मानस-दर्शन कर रहा हूँ कि बड़े से तकिए के सहारे वे बाँई करवट लेटे हुए हैं। उनका विशाल शरीर, चौड़ा माथा, उनकी संयत गुरु गंभीर वाणी आज भी मेरे मानस-दृष्टि-पटलपर प्रत्यक्ष दिखाई पड़ रही है। उनके आस-पास सदा अनेक विद्वान् और

छात्र बैठे रहा करते थे। और वे अपनी स्वाभाविक मन्द मुस्कान के साथ अत्यन्त सूक्ष्म शब्दों में सबकी जिज्ञासा तृप्त करते रहते थे और कुशल-मङ्गल पूछते रहते थे। उनकी भव्य आकृति साक्षात् वेद की प्रतिमूर्ति थी। उनके दर्शनमात्र से प्रतीत होता था कि विद्या का अक्षय भण्डार सम्मुख प्रस्तुत है।

म० म० पं० प्रभुदत्तजी शास्त्री का देशभर में बड़ा सम्मान था। प्रायः सभी रजवाड़े और देशभर के प्रसिद्ध धनी उनके परम भक्त थे। उनकी विद्वत्ता से प्रभावित होकर सरकार ने उन्हें 'महामहोपाध्याय' की उपाधि दी थी। महामना पं० मदनमोहन मालवीयजी भी उनका बड़ा आदर और सत्कार करते थे। वे उन्हें 'महर्षि' कहा करते थे और वे जब सामने आते, तो शास्त्रीजी के चरणों को स्पर्श करते थे। इतना ही नहीं, वे शास्त्रीजी के दर्शन के लिए उनके आवास पर भी यदा-कदा जाया करते थे और अपनी इस आदर की भावना को मूर्त्तरूप देने के लिए उन्होंने म० म० पं० प्रभुदत्तजी शास्त्री को काशी हिन्दू-विश्वविद्यालय के धर्म-विज्ञान विभाग का सर्वप्रथम 'अध्यक्ष' बनाया था। इस नाते वे काशी हिन्दू-विश्वविद्यालयकी सभी प्रधान प्रबन्ध-समितियों के 'सदस्य' थे। उन दिनों की एक घटना मुझे भलीभाँति स्मरण है। धर्म-विज्ञान विभाग की परीक्षा के लिए जब पाठ्यक्रम बनने लगा उस समय तत्कालीन रजिस्ट्रार परम आदरणीय श्री श्यामाचरणजी डे ने विश्वविद्यालय के अन्य विभागों के नियम के अनुसार यह प्रस्ताव किया कि इस परीक्षा में भी उत्तीर्णाङ्क तैंतीस प्रतिशत हो। उस समय म० म० पं० प्रभुदत्तजी शास्त्री ने कहा कि 'इसमें तो उत्तीर्णाङ्क शत-प्रतिशत होना चाहिए, अन्यथा तैंतीस प्रतिशत में उत्तीर्ण होनेवाले कर्मकाण्डी जो यज्ञ या कर्मकाण्ड करावेंगे उसमें यजमान का सर्वनाश हो जायगा। उनके अशुद्ध कर्मकाण्ड से विश्वविद्यालय की तो अप्रतिष्ठा होगी ही, साथ ही यजमान के इहलोक और परलोक दोनों की हानि होगी।' उनका मत था कि कर्मकाण्ड और आयुर्वेद में उत्तीर्णाङ्क शत-प्रतिशत होना चाहिए। उनकी अध्यक्षता के कारण हिन्दू-विश्वविद्यालय के धर्म-विज्ञान-विभाग की बड़ी प्रतिष्ठा हुई और काशी हिन्दू-विश्वविद्यालय को बहुत द्रव्य भी मिला। प्रसिद्ध बिड़ला परिवार को विशेषतः राजा बलदेवदासजी बिड़ला को महामना मालवीयजी के सम्पर्क में लाने का सारा श्रेय पं० प्रभुदत्तजी शास्त्री को ही है।

प्रातःस्मरणीय पूज्यचरण १०८ श्रीगुरुजी (म० म० पं० श्रीविद्याधरजी अग्निहोत्री) के विषय में कुछ लिखना सूर्य को दीपक दिखाना होगा। उनकी विद्वत्ता की प्रशंसा काशी के बड़े-बड़े विद्वान् करते हुए गद्गद हो जाते हैं। वे साक्षात् वेद-मूर्ति थे। भारत के वेदज्ञों में उनका सर्वश्रेष्ठ स्थान था। वे जिस प्रकार वेदशास्त्र के पूर्ण मर्मज्ञ थे, उसी प्रकार व्याकरण-साहित्यादि विषयों के भी पूर्ण मर्मज्ञ थे। उनका संस्कृत का लेख अत्यन्त सरल, सरस, सुन्दर और भावपूर्ण होता था। श्लोकरचना करने में भी वे अत्यन्त कुशल थे। उनके निर्मित श्लोक उनके वेद-कर्मकाण्ड के ग्रन्थों में यत्र तत्र प्राप्त होते हैं।

संभवतः सन् १९३७ में महामना पण्डित श्रीमदनमोहन मालवीयजी के होनेवाले अभिनन्दन-समारोह में पूज्य श्रीगुरुजी ने भी मालवीयजी महाराज का स्वरचित पद्यात्मक 'अभिनन्दन' किया था। वह अभिनन्दन इस प्रकार था—

अभिनन्दनम्

श्रीमतां तत्रभवतां श्रीसनातनधर्मधुरन्धराणाम्, भारतभुवो भूषणानां, सुयशःपटहप्रमाथिताशेष-वैधेयपटलानां, भुवनाभिरामहिन्दूविश्वविद्यालयसमुज्जीवनेन विधातृनिर्विशेषं भारतीय-सारस्वतलक्ष्मीं लालयतां, लोकोत्तरकीर्तिस्वर्गङ्गावगाहनधवलसुमनोमनोराजहंसानाम् महामान्य-महर्षि-श्रीमन्मदनमोहनमालवीयमहाभागानां महनीयसेवायाम्—

विश्वानि देव! सवितर्दुरितानि तानि
सद्यः परासुव जगद्भयकारणानि।
भद्रञ्च यद्भवतु नः शुभहेतुभूतं
शीघ्रं तदासुव हरे! निखिलान्तरात्मन्॥ १॥

क्षीणाः कालकरालदण्डनिहता यो धार्मिकाग्रेसरः
साङ्गा ब्रह्मवतोः श्रुतीः पुनरपि प्राचीकटद्भूतले।
तस्य श्रीलमतेः प्रभोः कुलपतेः कारुण्यवारां निधेः
कैः शब्दैः कतिभिः पदैर्गुणगणान् स्तोतुं क्षमा मादृशाः॥ २॥

देशं धर्मयुतं समाजमखिलं त्रातुं परैर्यः कृतान्
दुःखानां निवहान् सहेत सततं स्वातन्त्र्यचिन्ताश्रितः।
आचारः किल मूर्तिमान्, सुकृतभूः, श्रीमत्समः संसृतौ
कोऽद्यत्वे प्रथितप्रतापविभवो धर्मव्रती धीनिधिः॥ ३॥

सूर्यः प्रातरुदेति चारुकिरणो रात्रौ च चन्द्रो भुवि
ज्ञातुं विश्वविभूषणं धृतिमयं श्रीमालवीयोपमम्।
मन्येऽत्रैव कृतौ तयोरनुचरीभूतः स पुंस्कोकिलः
वासन्तेऽधिरसालपल्लवकले मत्तोऽसकृत्कूजति॥ ४॥

प्रेम्णा हार्देन भव्यां जगदुपकरणं धर्मविज्ञानकक्षां,
संस्थाप्यालङ्कृतोऽलं यमनियममयो विश्वविद्यालयोऽयम्।
नोपेक्ष्या दिव्यदिव्या ननु विबुधवराः! सर्वमान्याः समन्तात्
वृद्धिं प्राप्नोतु यस्याः सततमथ कृतिः सा विधेया भवद्भिः॥ ५॥

कल्याणामृतभाजनं विबुधतावल्लीप्रसूनाञ्चलः
ब्रह्मण्यः श्रुतिसम्मताचरणवान् सर्वार्थचिन्तामणिः।
पीयूषोत्तरमिष्टवाङ् मतिमतां सम्मानपात्रं चिरं
जीयात्सोऽयमशेषमङ्गलमयः श्रीमालवीयो महान् ॥ ६ ॥

धर्मविज्ञानविभागः
हि० वि० वि०, काशी ।

श्रीविद्याधरशर्मा
(प्रिन्सिपल)

पूज्य श्रीगुरुजी की अद्वितीया प्रतिभा, श्रौत-स्मार्त यज्ञ-यागादि कर्मकाण्ड की निपुणता, विविध शास्त्रों की अध्यापन-पटुता और शास्त्रीय जटिल विषयों के समाधान करने की क्षमता विचित्र थी ।

पूज्य श्रीगुरुजी केवल महापण्डित ही नहीं थे, वरन् महान् लेखक भी थे । कात्यायन-श्रौतसूत्र की अभूतपूर्व टीका लिखकर आपने श्रौतमार्ग–पथिकों का महान् कल्याण किया है । आपने कात्यायन–श्रौतसूत्र की जो 'भूमिका' लिखी है, वह अत्यन्त ही विद्वत्तापूर्ण और पठनीय है । आपकी कात्यायन-श्रौतसूत्र की भूमिका के विषय में देश-विदेशप्रसिद्ध विद्वान् महामहोपाध्याय डा० गङ्गानाथ झा एम्० ए०, डी० लिट्० (वाइस चान्सलर, इलाहाबाद युनिवर्सिटी) महोदय ने पूज्य गुरुजी के पास इस प्रकार पत्र लिखकर भेजा था—

श्रीः

इलाहाबाद
१३ । ८ । ३१

नमस्कार

श्रौतसूत्र की भूमिका मिली । बड़ा ही उपकारक ग्रन्थ हुआ है । मीमांसाध्यायियों के लिये तो पढ़ना अत्यावश्यक होगा ।

कृपाभिलाषी—
गङ्गानाथ झा

गुरुजी ने मृत्यु से कुछ वर्ष पूर्व अपना जीवन-बीमा चौदह हजार रुपये का करा लिया था । मृत्यु के बाद बीमा-कम्पनी ने रुपया देने में जब टाल-मटोल की बात की, तो गुरुजी के पुत्र वेदाचार्य पं० वेणीरामजी गौड महामना पं० श्रीमदनमोहन मालवीयजी महाराज की सेवामें पहुँचे और उनसे बीमाकम्पनी की रुपया न देने की बात कही । पूज्य मालवीयजी महाराज पूज्य गुरुजी को बहुत मानते थे । उन्होंने तत्काल एक सार्टिफिकेट देते हुए कहा—'इसको बीमा-कम्पनी

के पास भेज दो, वह तत्काल रुपया भेज देंगे। यदि रुपया भेजने में आना-कानी करें, तो फिर मेरे से मिलना। मैं रुपया दिलवा दूँगा।' पूज्य मालवीयजी का दिया हुआ पत्र बीमाकम्पनी के पास भेजा गया, जिसको पढ़कर बीमाकम्पनी ने तत्काल चौदह हजार रुपये भेज दिये।

महामना मालवीयजी महाराज ने जो सार्टिफिकेट दिया था, वह निम्नलिखित है—

Rector's Lodge,
Hindu University,
Benares.
5th Dece. 1943.

I know the late Mahamahopadhyaya Pt. Vidyadharjee Gaud, who was a professor and Principal of the College of Theology in the Benares Hindu University. I much respected him for his learning and character. He kept good health as long as he was professor. He resigned his service on the 30th April 1940. He breathed his last on the 5th Dece. 1941. that is nearly two years after his retirement.

Sd /- M. M. Malaviya.

अनुवाद

रेक्टर भवन,
हिन्दू युनिवर्सिटी, बनारस,
५ दिसम्बर, १९४३

मैं स्वर्गीय महामहोपाध्याय पण्डित विद्याधरजी गौड को जानता हूँ, जो बनारस हिन्दू युनिवर्सिटी में थियालोजी कालेज के प्रोफेसर और प्रिंसिपल थे। मैं उनकी विद्या और चरित्र का बहुत आदर करता था। वे जब तक यहाँ प्रोफेसर थे तब तक बड़े स्वस्थ थे। उन्होंने ३० अप्रैल सन् १९४० को अपने पद से त्यागपत्र दिया था। उनका ५ दिसम्बर सन् १९४१ को स्वर्गवास हो गया। हिन्दू विश्वविद्यालय से रिटायर होने के बाद वे लगभग दो वर्ष जीवित रहे।

(ह०) एम्० एम्० मालवीय

गुरूजी (म० म० श्रीविद्याधरजी) परमोपकारी थे। वे अपने शिष्यों को केवल विद्या-प्रदान ही नहीं करते थे, किन्तु अन्न, वस्त्र और द्रव्य भी देते थे। दीन-हीन विद्यार्थियों का उपकार करना उनका सहज स्वभाव था।

गुरूजी कट्टर सनातनधर्मी थे। धर्म के सम्मुख वे अर्थलाभ को नगण्य समझते थे। कई बार ऐसा अवसर आया कि उन्होंने धर्मरक्षार्थ विशिष्ट अर्थलाभ को ठुकरा दिया।

मैं श्रीगुरूजी को साक्षात् 'देवता' मानता था। गुरूजी की मुझ पर बड़ी ही कृपा रहती थी। मुझे अपने जीवन में गुरूजी जैसे पुत्रवत् स्नेह करनेवाले दूसरे कोई अध्यापक नहीं मिले। पूज्य गुरूजी के शुभाशीर्वाद से मैं अपनी जन्मभूमि सागर (मध्यप्रदेश) में प्रतिष्ठा के साथ जीवन-यापन करते हुए अपने ८२ वर्ष पूर्ण कर चुका हूँ। मैं प्रतिदिन प्रातःस्मरणीय पूज्य श्रीगुरूजी की मधुर मूर्ति का स्मरण करता रहता हूँ और उन पवित्र महान् आत्मा से प्रार्थना करता हूँ कि वे मुझे ऐसा शुभाशीर्वाद दें, जिससे इस शरीर को पुनः मोक्षपुरी काशी में पहुँचने का परम सौभाग्य प्राप्त हो और वहीं पर इस शरीर का विसर्जन होकर मानवजन्म सफलीभूत हो।

———

परिशिष्ट-भाग

[सन् १९४० में भारत सरकार—द्वारा 'महामहोपाध्याय' पदवी प्राप्त करने के उपलक्ष्य में सम्माननीय महानुभावों के द्वारा प्रदत्त बधाई के पत्र तथा विभिन्न संस्थाओं-द्वारा दिए हुए अभिनन्दन-पत्र]

बधाईके पत्र

(१)

गवर्नमेन्ट सरकार-द्वारा आप 'महामहोपाध्याय' की उपाधि से विभूषित किये गये हैं, यह जानकर अत्यन्त हर्ष हुआ। यह उच्च सम्मान आपके अनुरूप ही है।

मदन मोहन मालवीय

(२)

आपके पूज्य पिताजी जिस 'महामहोपाध्याय' की उपाधि से सम्मानित हुए थे, उसी 'महामहोपाध्याय' की उपाधि से आप भी सम्मानित किये गये हैं, यह विशेष गौरव की बात है। निश्चित ही आपके परिवार में वेद भगवान् की पूर्ण कृपा है।

प्रयाग,

गङ्गानाथ झा
(महामहोपाध्याय)

(३)

श्रीमन्तो महामहोपाध्यायपदव्यालंकृता भारतचक्रवर्तिना। उचिते स्थाने महत्याः पदव्या विनियोगः कस्य वा नानन्दमुदञ्चयेत्। सर्वदैवगुणैः श्रीमतः सुप्रसिद्धान् पितृपादाननुकुर्वन्तस्तत्रभवन्तः श्लाघ्यया पदव्यापि तत्साम्यमाप्नवन्त इति प्रमोदास्पदम्। आनन्दातिरेकेणाहमस्मिन्नवसरे तत्र भवतोऽभिनन्दामि। आशासे च तत्रभवतामनुपलमेधमानमभ्युदयमिति।

महाराजा-संस्कृत-कालेज,
जयपुर सिटी

भावत्को—
गिरिधरशर्मा चतुर्वेदः
(महामहोपाध्यायः)

(४)

पूर्वत एवास्माभिरभिलषितं यन्महामहोपाध्यायपदं भवद्भिः सङ्गतं तेन एतस्मै पदाय धन्यवादमर्पयामि।

हिन्दूविश्वविद्यालयः
काशी

भवदीयः—
बालकृष्ण मिश्रः
(महामहोपाध्यायः)

(५)

गवर्नमेन्ट सरकार ने श्रीमान्‌जी को 'महामहोपाध्याय' की पदवी से विभूषित कर संस्कृत-समाज के गौरव की महती प्रतिष्ठा की है। आप इस सम्मान के पूर्णरूप से अधिकारी हैं। एक ही घर में पिता और पुत्र दोनों को 'महामहोपाध्याय' की पदवी प्राप्त हुई हो, ऐसा आपके यहाँ ही देखने को मिला। मैं इस अवसर पर आपको हार्दिक बधाई देता हूँ।

काशी। } हरिहरकृपालु द्विवेदी
(महामहोपाध्याय)

(६)

सम्राट्-समर्पितदुराप-महामहोपा-
ध्यायाख्यभव्यपदवीपरिदीपितश्रीः !
विद्याधरो विजयते प्रभुदत्तजन्मा
शम्भोरलीकतिलकेन्दुरिवाकलङ्कः !!

सरस्वतीभवनम्
काशी } नारायणशास्त्री खिस्ते
(महामहोपाध्याय)

(७)

श्रीमत्सु गौड़वंशावतंसेषु वैदिकवाङ्मयप्राङ्गणरिङ्गणविहारिषु महामहोपाध्याय-श्रीविद्याधरशर्मशास्त्रिमहोदयानां चरणकमलेषु सप्रश्रयं प्रणतिततयः समुल्लसन्तुतराम्—

समाचारपत्रैः श्रीमतां महामहोपाध्याय-पदवीप्राप्तिं समाकलय्य सद्यः समविन्दममन्दमानन्दम्।

भवतामभिनवेनानेन गौरवेण गौरविता नो गौड़जातिः, सम्मानसीमामधिरूढः सनातनधर्मः, विश्ववन्द्यत्वमभजत् सद्वृत्तपरिष्कृतं ब्राह्मणत्वम्।

शुभावसरेऽस्मिन् सबहुमानं वर्धापनं समर्पयता मया प्रार्थ्यते जानकीजानिर्यद्धि भवादृशां विदुषां चैरायुष्येण वयमपि चिरजीविनः स्याम।

कौल (करनाल) } वशंवदो माधवाचार्यः

(८)

श्रीमदित्यादिगुणगणमण्डितपण्डितमण्डलसार्वभौमपण्डितश्रीविद्याधरगौडमहिममहानुभावमहोदयेषु सप्रेम सनति सादरञ्च निवेदयति वशंवदः—

श्रीमन् ! महोदार ! विशालबुद्धे !
निःशेषसच्छास्त्रसजीवमूर्ते !
विद्वद्वरेण्य ! प्रथितोरुकीर्ते !
वर्द्धापनम्मे कृपया गृहाण !!

भवदीयो—
बुलाकिरामः

(९)

सम्मान्य !

चिरकालसहावासात् ज्ञात्वा त्वद्गुणगौरवम् ।
हर्षोत्फुल्लमनाः किञ्चिद्वक्तुकामोऽस्मि साम्प्रतम् ॥१॥
महामहोपाध्यायस्त्वं शासकैः सत्कृतः कृतः ।
वृत्तान्तोऽयं सुखकरः सर्वेषां स्नेहिनां तव ॥२॥
वीरोऽसि वीरपुत्रोऽसि स्वधर्मैकपरायणः ।
चकास्ति संस्था त्वत्सङ्गात्ते शोभा नास्ति संस्थया ॥३॥
प्रभुदत्तसुतप्रेम्णा प्रभुदत्तो दिवं गतः ।
समयोग्यत्वमापन्नं त्वां सुतं वीक्ष्य हर्षितः ॥४॥
हरिरिव हरिरिव सततं यं देशं त्वं श्रयिष्यसे प्राज्ञ ।
तं तं निजभुजविजितं विधास्यसीसि दृढं नु विश्वसिमि ॥५॥
विद्याधरोऽप्यविद्याधर इति सिद्धं मनुष्यकायेन ।
विद्याधरोऽसि विद्याधर इति नाम्ना पङ्क्त्या च ॥६॥

हिन्दूविश्वविद्यालयः काशी । } श्रीमतां विश्वनाथशास्त्री भरद्वाजः, एम्० ए०

(१०)

अनन्तानवद्यविद्यासुधानिधिमथनसमुदितयशश्चन्द्रचन्द्रिकाचकासितजगतीतले शश्वच्छात्रव्रातसमभ्यर्चितपादतले वैदिकसाहित्यसमुद्धारधुरीणे प्रकाण्ड-पाण्डित्यचमत्कृतभारतसम्राट्समुपहृत 'महामहोपाध्याय' महोपाधिदेदीप्यमाने माननीय-जगद्वन्दित-श्रीविद्याधरशास्त्रिमहानुभावे सादरं सनमस्यं च निवेदयते—

अयि मनीषितल्लज !

न खलु जातु रमणीयो मणिः परतः परापतितेन द्योतेन विद्योतत इति प्रेक्षाव-च्चक्रवालातिललाममणिं स्वीयभासैव भृशं भासमानं तत्रभवन्तं भारतसम्राजा सब-हुमानं समुपहृतोऽपि 'महामहोपाध्याय' महोपाधिर्न लेशतोऽप्यतिशयितुमीष्टे यद्यपि, तथापि सोऽपि महोपाधिर्भवद्विधमेवागाधविद्यावारिधिमधिगत्य सार्थाभिधानः सम्पद्यत इति भवदुपाधिसमधिगत्या परं प्रमोदते पण्डितमण्डलः ।

वीराणां तनुजा भवन्ति भुवने वीरा इयं या परा
ख्यातिस्तां विदधद् गुणैरवितथां यः सद्व्रजे भ्राजते ।
विद्यावैभवभूरितोषित-महासम्राट्समाराधितं
श्रीविद्याधरशास्त्रिणं कृतिवरं भूम्नाऽभिनन्दामि तम् ॥

विश्वविद्यालय, लखनऊ । } भवदनुकम्पावाप्तिपरः झोपाह्वो घूटरः

(११)

आप 'महामहोपाध्याय' हो गये, यह सुनकर मुझे हार्दिक प्रसन्नता हुई।

राधाकृष्ण संस्कृतकालेज, खुरजा। } परमानन्दशास्त्री (प्रिन्सिपल)

(१२)

I Congratulate you on the title of Mahamahopadhyaya, which has been bestowed on you in the last Honour's list.

Yours truly,
J. L. Sathe I. C. S.
Allahabad

(१३)

I am extremely pleased to see that after all your great scholarship has been recognized by the conferment of the much coveted title of Mahamahopadhyaya on you, which you richly deserved. I hope you will continue to devote your time and attention to scholarship and research.

Pannalal I. C. S.

(१४)

I am so glad to learn that the title of Mahamahopadhyaya has been conferred on you. Please accept my heartiest congratulations on the same. I pray that may more titles follow this, I sincerely trust that this will find you in the very best of health. It is needless to say that the blessings of your revered father has brought you this high honour and I am sure that this is the forerunner of many more titles to follow.

Yours sincerely,
Madhoram Sand
(Rai Bahadur)
Benares

(१५)

I hasten to send you my most sincere and heartfelt congratulations on your getting the well-deserved...distinction and wish it will be forerunner of many higher ones.

Yours sincerely,
Kedarnath Goenka
Monghyr

(१६)

अखबारों को देखने से मालूम हुआ कि इस मर्तबा आपको गवर्नमेन्ट ने 'महामहोपाध्याय' का ख़िताब अता फर्माया है जिससे बहुत खुशी हुई। खुशी इस वजह से और भी हुई कि यह ख़िताब आपके वालिद साहब को भी गवर्नमेन्ट ने दिया और अब वही ख़िताब आपको मिला; गोया अब यह ख़िताब आपके घर का हो गया और उम्मीद है कि बड़े जी की जगह पर जो होगा उसको यह ख़िताब मिला करेगा। इसलिये इस ख़िताब के मिलने पर आपको तहे दिल से मुबारकबाद देता हूँ।

मुहम्मद मसीहुल्दीन
खाँबहादुर

(१७)

आपको 'महामहोपाध्याय' की उपाधि मिलने का संवाद सुनकर बहुत ही प्रसन्नता हुई। इसमें हमारे विश्वविद्यालय की गौरव-वृद्धि हुई और आपकी वंशमर्यादा अक्षुण्ण रही। ईश्वर आपको दीर्घ-जीवी करें और उत्तरोत्तर सम्मान बढ़ावें।

ज्ञानेन्द्रनाथ बसु
कलकत्ता

(१८)

यह जानकर अत्यन्त प्रसन्नता हुई कि ब्रिटिश गवर्नमेण्ट ने श्रीमान् को 'महामहोपाध्याय' की पदवी से विभूषित किया है। इस अवसर पर अपनी हार्दिक श्रद्धाञ्जलि अर्पित करता हूँ।

ललिता प्रसाद
लखनऊ। (रायसाहब)

(१९)

आपकी इस यशःप्राप्ति पर हार्दिक बधाई देता हूँ। आशा है कि इसी प्रकार आपका यशोवर्द्धन होता रहेगा।

ज्ञानपुर
(बनारस-स्टेट)

विजयीप्रसाद सिंह
मजिस्ट्रेट और कलक्टर

(२०)

'हिन्दुस्तान टाइम्स' में यह देखकर कि इस बार आपको 'महामहोपाध्याय' की डिगरी प्रदान कर गवर्नमेन्ट ने अपनी रुचि का अच्छा परिचय दिया। अतः विशेष प्रसन्नता हुई। इस अवसर पर मेरी भी श्रीचरणों में श्रद्धाञ्जलि स्वीकार हो।

स्टेट हाईस्कूल, बीकानेर

गौरीशङ्कर शर्मा
विद्याभास्कर

(२१)

इधर बहुत वर्षों से 'महामहोपाध्याय' की टाइटिल का यथार्थ सदुपयोग नहीं हो रहा था। इस बार आपको 'महामहोपाध्याय' की टाइटिल देकर अधिकारियों ने अपनी बुद्धिमत्ता और अधिकार का ठीक-ठीक परिचय दिया है।

महामहोपाध्याय की टाइटिल मिलने से आपकी शोभा नहीं, बल्कि 'महामहोपाध्याय' टाइटिल की शोभावृद्धि हुई है।

सम्पादक 'आज'
काशी।

बा० वि० पराड़कर

(२२)

सम्राट्ने आपके लिये जो उच्च सम्मान प्रदर्शन किया है वह आप जैसे महानुभाव के ही अनुकूल है। इससे हमें अत्यन्त आनन्द हुआ। आप हमारा हार्दिक धन्यवाद ग्रहण करें। यह आपके यहाँ कोई नई बात नहीं है। आपके पूज्य पिताजी भी इस उपाधि से विभूषित हुए थे। आशा है भविष्य में भी ऐसा होता रहेगा।

ईश्वरीप्रसाद गोयनका
कलकत्ता

(२३)

आज 'महामहोपाध्याय' की पदवी वास्तव में कृतार्थ हुई।

नारायणदत्त शास्त्री विद्यालङ्कार
बिडला हाईस्कूल, देहली

(२४)

हार्दिक बधाई स्वीकार कीजिये। गौड़-समाज के लिये यह अत्यन्त ही गौरव की बात है।

धन्नूलाल शर्मा
कलकत्ता

(२५)

पत्रों में यह पढ़कर बहुत आनन्द हुआ कि सरकार बहादुर ने आपको सर्वोच्च उपाधि देकर विशेष शोभायमान किया है, जिसके कि आप पूर्णरूप से अधिकारी हैं। एक ही घर में-पिता और पुत्र को यह सर्वोच्च मान्य प्राप्त हुआ हो, यह कहीं देखने में नहीं आता। यह सौभाग्य आपको ही प्राप्त हुआ है। हमारे लिये यह गर्व की बात है।

हीरालाल मुरारका
कलकत्ता

(२६)

आज के समाचार पत्रों में यह पढ़कर मुझे बड़ी ही प्रसन्नता हुई कि सम्राट् के जन्म-दिन को उपाधियों में आप 'महामहोपाध्याय' बनाये गए हैं। अपनी विद्वत्ता के कारण आप इस उपाधि के अच्छी तरह अधिकारी थे। मैं आपको हार्दिक बधाई देता हूँ। ईश्वर करे आपका मान उत्तरोत्तर बढ़ता ही जाय।

धन्नीराम भल्ला
लाहौर

———

❀ श्रीजानकीजानये नमः ❀

श्रीमतां तत्रभवतां भवतां निखिलनिगमागमप्राप्तवैभवानां वैदिकसाम्राज्य-
मधितिष्ठतां सर्वतन्त्रस्वतन्त्राणां विश्रुतदिग्दिगन्तप्रतिष्ठानां
गौडान्ववायालङ्काराणां सम्मान्यश्रीविद्याधरशास्त्रिमहोदयानाम्
महामहोपाध्यायपदोपलब्धिनिमित्तम्—

शुभाभिनन्दनम्

(१)

विद्वद्राजिशिखामणे ! तव गुणैर्वैदुष्यमुख्यैश्चिरं,
तोषं कञ्चन मानसं विशदयन् सम्राट् समायोजयत् ।
विख्यातेन सगौरवेण महता विद्वज्जनोपाधिना,
यत्तेनातितरां मुदा परिगताः सुस्वागतं ब्रूमहे ॥

(२)

आनेपालमहाचलं मलयजाक्रान्तं तथाऽऽसिंहलम्,
आपूर्वोदधिपश्चिमोदधि चिरख्याताय यच्छ्रीमते ।
आयातोऽयमुपाधिरङ्ग ! सुषमां स्वीयां समावर्धयन्,
शशाङ्की हि कला महेशशिरसाऽऽश्लिष्टा प्रणम्याऽभवत् ॥

(३)

औदार्यादिगुणा भवन्ति भवतः पार्श्वे कियत्सङ्ख्यकाः,
इत्येवं गणनारता नहि वयं तिष्ठामहे साम्प्रतम् ।
सिन्धौ वारि कियन्नभस्युत कियाँस्तारागणानां गणः,
कः सङ्ख्यातुमपीहते ननु जनः स्वीयं बलं चिन्तयन् ॥

(४)

मान्या वैदिकवैदुषी विपुलया ख्यात्या समेता चिराद्,
आयान्ती भवतः कुले सहचरीं लक्ष्मीं नयन्ती बलात् ।
एनां पण्डितवाञ्छनीयपदवीमप्यानिनाय स्वयं,
येनैषाऽपि कुलक्रमेण भवतः सेवासु सन्तिष्ठते ॥

(५)

यो विद्याधर एव तस्य विपुला विद्येति केयं कथा,
को ब्रूते मृगराज एष बलवान् हंहो मृगाणां पतिः ।
किंवाऽन्यत् कथयामहे ! दिवि तते सूर्ये नु का वर्णना,
मोदस्यावसरे नुता नु भवतो वर्धापनं कुर्महे ॥

ऋषिनन्दाङ्कभूवर्षे
कृष्णाष्टम्यामिषे शुभे

वाराणसेय—
श्रीसरयूपारीणपण्डितमण्डलसदस्याः ।

❀ श्रीमैथिली-विजयते ❀

गौडवंशावतंसश्रीमद्विद्याधरमिश्रमहानुभावानां महामहोपाध्यायपदाधिगमनोपलक्ष्ये कृतं

शुभाभिनन्दनम्

—०—

कीर्त्त्या यस्य सदा जगन्ति विशदीभूतानि सन्त्येव हि,
प्राज्यं प्रेम लसत्तरङ्गनिपतत्सर्वान्तरानन्दनम् ।
औदार्य्यञ्च परोपकारजनकं धैर्य्यं सदैव स्थिरम्
गाम्भीर्य्यं सुखदुःखयोः सममिदं कारुण्यमार्त्ते जने ॥१॥

विद्या हृद्यतमा च कर्म्मविषये प्राप्तं परं पाटवम्,
शीलं सर्वजनातिशायि च सदाचारः परं शोभनः ।
नैपुण्यं समशास्त्रतत्त्वकथने शिष्यान्तरस्याङ्कने,
जागर्त्येव सदा जनैः सुविदितो विद्वत्समाजादरः ॥२॥

तत्त्वानाञ्च निबन्धने निजकृतौ ख्यातं परं सौष्ठवम्,
विश्वेषाञ्च हितोपदेशवचने श्रद्धा च भक्तिस्तथा ।
दृष्टौ दृष्टियुगं श्रुतौ श्रुतियुगं रूपस्य वाचां तथा,
मूर्द्धा हस्तयुगं च पादपतने सर्वं सदा सस्पृहम् ॥३॥

इत्येवं गुणगौरवं सुविदितं विज्ञाय सम्राडपि
प्राप्तप्राज्यसुसम्भ्रमेण सहजप्रेम्णा च भक्त्यापि च ।
पादाब्जे समुपाहरन् पदमिदं विद्वज्जनप्रेप्सितं
लोकेऽस्मिन् स्वगुणज्ञतां प्रथितवान् राजाधिराजेश्वरः ॥४॥

सम्प्राप्तञ्च पदे शुभे पदमिदं श्रुत्वैव कर्णैर्निजै-
र्योग्ये योग्यमिदं वितीर्णमिति तु स्वर्णे सुगन्धो यथा ।
जातः सम्प्रति सत्वरं त्रिजगतामानन्दकन्दाङ्कुरः,
सोऽयं सम्प्रति राजते शिवपुरे विद्याधरः शङ्करः ॥५॥

एतल्लोकदृशा मयाप्यभिहितं नो जानता तत्त्वत-
स्तस्मात्सम्प्रति वस्तुतस्तु कथये विज्ञाय तत्त्वेन तु ।
कर्त्तुं पादयुगं क्षमं पदमिदं नालं स्वयं भूषितं,
सत्येवं सुमते कियानवसरो हर्षस्य नः कथ्यताम् ॥६॥

एतत्षट्कसुपद्यपुष्परचना मालेयमाविष्कृता,
संख्यासम्मितवादरायणमतप्राप्तप्रमाणान्विता ।
नामख्यापितधीरभावभवतः कण्ठे बुधैरर्पिता,
मोदायास्त्वभिनन्दनप्रतिनिधिश्चित्ते चिरं प्रार्थ्यते ॥७॥

बालबोधमिश्रः
(सभापतिः—मै० वि० स०, काशी)

अभिनन्दकाः—
काशीस्थमैथिलविद्वज्जन—
समितिसदस्याः ।

———

❋ श्री विश्वनाथश्शरणम् ❋

श्रीमतान्तत्र भवतां महामहिमशालिनां वेदविद्यावताराणां भारतप्रसिद्ध-विदुषां गौडकुलालङ्काराणां श्रीविद्याधरशास्त्रिमहोदयानां महामहोपाध्यायोपाध्युपलब्धिनिमित्तम्—

शुभाभिनन्दनम्

—:०:—

विज्ञान - शेवधि - समस्त - जगत्प्रसिद्ध-
श्रौतप्रपञ्च – शतपत्र - सहस्ररश्मिः ।
प्रौढ - प्रताप - विमलोद्भव—मञ्जलश्रीः
विद्याधरो गुरुवरः सुचिरं चकास्तु ॥ १ ॥

काशीसंस्कृत-पीठ-सत्प्रभुवरो विद्वज्जनेष्वग्रणीः
मर्मज्ञो निगमागमस्य विनयो, धीराशयो धीनिधिः ।
कोऽप्येषोऽमरभारतीहितकृतां कल्पद्रुमः सर्वथा
भास्वद्भारतवर्ष-हर्षणपरो राराज्यते राजवत् ॥ २ ॥

याते दिवं पितरि तत्तनयोऽपि तद्वल्
लोकोत्तरं पदमुपैतु ऋते भवन्तम् ।
विद्याधरीकृत—जगत्त्रय ! नो द्वितीयं
दृष्टान्तमस्ति किल भूवलये द्वितीयम् ॥ ३ ॥

श्रीगौर'गौड'कुलपङ्कज – चञ्चरीकः
शशाङ्क – भास्वर – समुज्ज्वलकीर्तिकान्तः ।
सारस्वतामृत – निधिः प्रभुदत्ततेजाः
विद्याधरो गुरुवरो विजयं तनोति ॥ ४ ॥

चूडामणिः सकल-भारत-वैदिकेषु
प्राप्ता प्रधानपदवी जगदेकधन्या।
श्रीमान् सदा जयतु देवगिरः प्रचारे
सुस्वागतं वयमिदं भवते वदामः ॥ ५ ॥

वाराणसी }

अभिनन्दकाः—
काशीस्थवैदिककर्मकाण्डमण्डलसदस्याः।

—:०:—

अभिनन्दनम्।

श्रीमन्माननीयानां महामहिमशालिनां श्रौतस्मार्त-धर्ममर्यादा-संरक्षण-विचक्षणानां गौडकुलालङ्काराणां महामहोपाध्यायादि-विविधोपाधि-विभूषितानां स्वर्गीयश्रीमत्प्रभुदत्तशर्म्मतनुजन्मनां वैदिकशिरोमणीनां भारत-प्रसिद्धविदुषामाहिताग्नीनां श्रीमद्विद्याधरशर्म्ममहोदयानां सादरं शुभाभिनन्दनम्।

अयि वैदिकशिरोमणयः!

तत्र भवतां कुलपरम्परया सम्प्राप्त-वैदुष्यवैभवानां, श्रौतस्मार्तकर्मानुष्ठाननिष्ठान्तःकरणानां, साङ्गवेदशास्त्र-परिशीलन-समधिगताशेषशेमुषीकाणां, साम्प्रतिकसंस्कृत-साहित्यसमाजे, भारतीय-संस्कृतिसंरक्षणसंवर्धननिदर्शनानां विविधवेदवेदाङ्गग्रन्थ-प्रणयनप्रकटितप्रतिभाप्रकर्षाणां वैदिकसम्राजां सर्वमाननीयानां श्रीमतां दिगन्तप्रसृतं वेदवैदुष्यं समीक्ष्य भारतीयसम्राट्प्रधानप्रतिनिधिभिः (वाइसरायमहोदयैः) साम्प्रतं सर्वमान्यं 'महामहोपाध्याय' इति पदं श्रीमद्भ्यः प्रदाय यद् रत्नकाञ्चन-संयोगन्यायश्चरितार्थितस्तेन तदीयसमुचितयोग्यायोग्यविवेकशीलतां प्रशंसन्ती प्रमुदितान्तःकरणेयं श्रीकाशीपण्डितसभा "पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति" इति भगवदुक्त्यनुसारं श्रीमतां प्रौढगुणग्रामाणां 'शुभाभिनन्दनं' विदधती श्रीकाशीविश्वेश्वरमभ्यर्थयते यत् स भवतामुत्तरोत्तरं समुन्नतिमभ्युदयञ्चिरायुष्यञ्च विदध्यादिति शम्।

सभाकार्य्यालय—
दर्शनविद्यालय, लक्ष्मीकुण्ड, काशी। }

मन्त्री—
श्रीकाशीपण्डितसभायाः।

महामहोपाध्यायपदम् ।

[काशीस्थ 'सूर्योदय' - मासिकपत्रस्य संपादकमहोदयेन सामयिकेऽङ्के तत्र भवतां अग्निहोत्रि-महोदयानां महामहोपाध्यायपदप्राप्त्यवसरे यत् प्रकाशितं तदविकलमिह प्रकाश्यते]

महामहोपाध्यायपदमिदानीं संस्कृतविद्वत्सु बहु प्रतिष्ठितं विद्यते। ये संस्कृतवाङ्मयमहार्णवे महान्तो विद्वांसो भवन्ति तेभ्य एवेदं पदं भारतसम्राट्प्रतिनिधिना वायसराय-महोदयेन समर्प्यते । बहूनीतराण्यपि सम्मानसूचकानि पदानि तत्तदधिकारिभ्यो वितीर्य्यन्ते। परन्तु तान्यन्ययोग्यतासूचकानीति न तादृशसमादरणयोग्यानि। पदमिदन्तु वैदुष्ययोग्यतासूचकमिति भारतीयैर्बहुसमादरणीयं विद्यते। भारते सर्वतोऽपि सरस्वत्याः समादरणं समधिकं भवति। यतो हि सर्वमान्येन विष्णुदेवेनापि सरस्वत्याः समादरः समधिकः कृतो दृश्यते। तथाहि उक्तञ्च श्रीहर्षेण सुकविना—

"स्वानुरागमनघः कमलायां वेदयन्नपि हृदि न्यसनेन।
गौरवं व्यधित वागधिदेव्याः श्रीगृहोर्ध्वनिजकण्ठनिवेशात् ॥"

अस्तु, सम्प्रति पदेनानेन काशीस्था वैदिकशिरोमण्योऽग्निहोत्रिणः श्रीमन्तः पण्डितश्रीविद्याधरगौडमहोदया विभूषिता इति संस्कृतज्ञानां विदुषां प्रमोदस्थानमस्माकम्। इमे हि गौडमहोदयाः सम्प्रति काश्यामद्वितीयाः श्रौतस्मार्तक्रियाकलापानुष्ठापने प्रवीणाः कर्मठाः सन्ति। इमे हि स्वभावतः सरलाः सुविद्वांस एतत्पदयोग्या अस्माकं बहुशो धन्यवादार्हाः। एतेषां पितृपादा अपि एतेन पदेनालङ्कृता आसन्निति विदुषां विशेषसमादरणीयमेतेषां वैदिकप्रवराणामिदं वंशपरम्परावैदुष्यसूचकं पदमिति भूयो भूयो धन्यवादराशिमेतेभ्यो वितरन्तो वयं विरमामो विस्तरात्। (स० सं०)

— :०:—

म० म० पण्डित विद्याधर गौडका जीवन-चरित समाप्त।

❀ इति ❀

महामहोपाध्याय-स्मारक-ग्रन्थः

द्वितीयखण्डः

महामहोपाध्यायपण्डितश्रीविद्याधरगौडलिखितलेखसंग्रहः

॥ श्रीः ॥

वेदस्याध्ययनम्

इह खलु सर्वोऽपि जन्तुरात्मनः सुखप्राप्तिं समीहते दुःखपरिहारं च। उभयमप्येतज्जन्यतामाश्रयते।

अखण्डब्रह्मानन्दात्मकं वर्जयित्वा नित्यसुखमन्यस्य सर्वस्यापि वृत्त्यात्मकस्य सुखदुःखादेर्जन्यतामेवाङ्गीकुर्वते वेदान्तिनोऽपि।

तस्यैतस्य वृत्तिरूपस्य सुखस्यावश्यं केनचित्कारणेन भवितव्यम्।

लोके हि जन्यमात्रं किञ्चन कारणमपेक्षते। अत एव प्रकृतयोः सुखप्राप्तिदुःखपरिहारात्मकयोः कार्ययोरपि यत्किञ्चित्कारणजन्यत्वनियमावश्यम्भावे सति किं तत्कारणमिति कारणगवेषणायां बुद्धिरुदेति। एवं विविधवैचित्र्यशालिनोऽस्य चराचरात्मकस्य जगतोऽपि न केवलं केनचित्कारणेन भाव्यम्; किन्तु तद्गतेन वैचित्र्येणाप्यवश्यं भाव्यमिति निश्चिनुते परीक्षकः परीक्षायां प्रवृत्तः।

तत्र च प्रथमं लौकिकैः प्रमाणैस्तत्परीक्षितुमीहमानस्तत्र तत्र प्रत्यक्षानुमानादिषु बहुशो दृष्टव्यभिचारः स्वप्रवृत्तौ वैफल्यमेव समश्नुते। एवं लौकिकेषु प्रमाणेषु विफलप्रयत्नोऽयमलौकिकं पुरुषबुद्ध्यगोचरं प्रमाणं किञ्चन मृगयते।

अन्विष्य च कञ्चन शब्दराशिमलौकिकार्थवेदकं पुरुषबुद्ध्यसंस्पृष्टं सर्वार्थवद्योतकमुपलभते। उपलभ्य च स्वस्थचित्तो भवति।

स्वस्थचित्तश्च तदुक्तेन पथा यथावदनुतिष्ठति। अनुष्ठाय च स्वेप्सितं प्राप्नोति पदम्, प्राप्तफलश्च सन्तुष्यति।

तत्र योऽयं शब्दराशिरलौकिकार्थवेदकतयाऽनेनोपलब्धः स एव वेदपदाभिधेयः। तत्प्रतिपाद्य एव चार्थो धर्मशब्देन व्यवहारं लभते। स एव चाद्यः पुरुषार्थः सर्वेषां पुरुषार्थानां मूलभूतः।

अत एव च त्रयोऽप्यन्ये पुरुषार्थाः प्रभवन्ति। स एव च सर्वस्यापि श्रेयसः सम्पादकः, दुःखस्य परिहारकश्च। अस्मिन्नेव च सर्वे लोकाः प्रतिष्ठिताः। उक्तं हि—

"धर्मो विश्वस्य जगतः प्रतिष्ठा धर्मेण पापमपनुदति" इति।

इममेव च धर्मं बहुप्रकारं स्वेतरप्रमाणाविषयं जनिमदनुग्रहाय अवबोधयितुं प्रवृत्ता वेदाः। अत एव च तेषां वेदत्वम्।

उपदिशन्ति हि वेदलक्षणमेवमार्याः—

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुद्ध्यते।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥" इति।

पूर्वोक्तस्य अलौकिकश्रेयःसाधनभूतस्य धर्मस्य प्रमाणान्तरेणैव जिज्ञासमानाः

तदर्थं बहु क्लिश्यन्तस्तत्र च प्रयत्नवैफल्यमवाप्य अन्ते भगवन्तं वेदमेव तद्विषये शरणीकुर्वाणा अस्मत्प्राचीनतमा महर्षयो मन्वादयश्च सर्वज्ञकल्पा अपि—"वेदो धर्ममूलम्" (गौ० ध० सू०), "उपदिष्टो धर्मः प्रतिवेदम्" (बौ० ध० सू०) "श्रुतिस्मृतिविहितो धर्मः" (वा० ध०), "वेदोऽखिलो धर्ममूलम्" (मनुस्मृतिः) इत्येककण्ठेन वेदस्यैव धर्ममूलतामवोचन् प्रथमम्। अनन्तरं च तदनुसारिणीनां स्मृतीनामपि तदनुसारेणैव प्रामाण्यमवोचन्। तदुभयानुसारिणश्च शिष्टाचारस्य।

एवं च स्मृतेः शिष्टाचारस्य वा यदुक्तं धर्मे प्रामाण्यं तद्वेदाविरोधेनैव।
यदि तु केनाप्यंशेन तयोर्वेदेन सह विरोधः प्रतिभायात्तदाऽग्राह्यतैव स्यात्।
अनेनैव चाभिप्रायेण—

"धर्मज्ञसमयः प्रमाणं तदलाभे शिष्टाचारः प्रमाणम्" (वा० ध०) इत्यादिकं महर्षयः प्राब्रुवन्। न हि धर्मस्य लौकिकप्रामाण्यग्राह्यं मूर्तिमद्वा स्वरूपं किञ्चिदस्ति।

अत एव च मीमांसकैरपि "चोदनालक्षणोऽर्थो धर्मः" (जै० सू०), "श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयते" (श्लो० वा०) इत्यादि जोघुष्यते।

यद्यपि च यागदानहोमादिक्रियास्वेव धर्मत्वं वदतां क्रियायाः प्रत्यक्षविषयतां चोरीकुर्वतां भाट्टानां मते धर्मस्यापि प्रत्यक्षविषयता प्रसज्ज्यते, तथापि न ते क्रियात्वेन रूपेण धर्मत्वं वदन्ति, किन्तु अलौकिकश्रेयःसाधनत्वेन रूपेण। तच्च स्वरूपं न प्रत्यक्षादिगम्यं किन्तु वेदैकसमधिगम्यं तदनुसारिस्मृत्यधिगम्यं तदनुशीलनैकसंस्कारपरिपक्वशिष्टबुद्धिबोध्यं चेति नान्यदस्ति किञ्चिद् धर्मस्वरूपपरिचायकम्।

इममेवाभिप्रायमनुसन्दधानो भगवान् महर्षिरापस्तम्बोऽपि—

"न हि धर्माधर्मौ चरत आवां स्व इति न देवगन्धर्वाः, न पितर इत्याचक्षतेऽयं धर्मोऽयमधर्म इति, यं त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मो यं गर्हन्ते सोऽधर्मः" (७।६-७) इति।

अरण्यसिंहन्यायेन तत्तादृशप्रमाणान्तरानधिगतधर्मस्वरूपावेदकत्वादेव वेदस्य प्रामाण्यं गौरवं च निरतिशयमनुसन्दधते प्रामाणिकाः परीक्षकाश्च। तादृशपुरुषबुद्धिदोषलेशाद्यसंस्पृष्टसर्वज्ञकल्पवेदबोध्यत्वादेव च धर्मे निरङ्कुशं गौरवमाबध्नन्ति। एतादृशमतिगहनवेदगम्यं धर्मस्वरूपं यथावदधिगन्तुमनीशानां मन्दमतीनामनुग्रहायैव, अर्थात् तेऽपि धर्मस्वरूपं यथावदवबुद्ध्य अनुष्ठाय स्वाभिलषितं फलं सुखविशेषं दुःखपरिहारं वा प्राप्य निर्वृतिं भजेयुः, तथा तदनुगृहीतमेव सर्वाण्यङ्गानि शिक्षाकल्पव्याकरणनिरुक्तज्योतिश्छन्दांसि, उपाङ्गानि पुराणन्यायमीमांसारूपाणि, किं बहुना समस्तमपि संस्कृतं वाङ्मयं भगवन्तं वेदपुरुषमवबुद्ध्यैव वेदार्थमुपबृंहितुं वेदप्रतिपाद्यं धर्मस्वरूपं सरलेन सन्दर्भेण विवरीतुमाख्यायिकोपाख्यायिकादिकथनपूर्वकं

तेषु तेषु धर्मेषु तत्तदधिकारिणो जनान् प्रवर्तयितुमेव च लोके प्रवृत्तम् ।

न केवलं संस्कृतवाङ्मयम्, भाषामया अपि ग्रन्था भारतदेशीयाः सर्वेऽपि तमेवार्थं विवृण्वन्ति वहुभिः प्रकारैः ।

इतश्च सर्वोऽप्यास्माकीनः शब्दसन्दर्भः साक्षात्परम्परया वा भगवतो वेदपुरुषस्य अवयवत्वमेव समश्नुत इति वस्तुतः पर्यालोच्यमाने भगवतः सर्वव्यापिनः सर्वशक्तिमतः परमेष्ठिनोऽपेक्षया भगवति तत्तादृशे वेदपुरुषेऽन्यूनां मतिं गौरवं चादधाना वयं मन्यामहे नानौचित्यभागियमस्माकं मतिरिति ।

एवं च सर्वेषां प्राणिनां साक्षात्परम्परया वा निखिलपुरुषार्थप्रापको धर्मः यथाधिकारम् ।

स च धर्मो यथावदवगन्तुं शक्यते वेदादेव । वेदादेव च तदनुसारिप्रमाणेभ्योऽवगतो यथानियममनुष्ठितश्च यथाविधि प्रयोजनाय कल्पते ।

स च वेदो विधिवदधीत एव स्वार्थमवबोधयन् फलत्यभिलषितं फलम् ।

नियमरहितेन सन्नधीतोऽपि वा सनियममध्ययनं विना (गुरुमुखोच्चारणानूच्चारणमत्राध्ययनमभिप्रेतम्) पुस्तकपाठादिना गृहीतः सुबह्वभ्यस्तोऽपि, कर्मणि यथाविधि प्रयुक्तोऽपि न किञ्चन फलं प्रसूते ।

अतो ये केचनेदानीं वेदाध्ययनाङ्गतया स्मृत्यादिविहितान् निखिलानपि नियमान् दूरीकृत्य यथाकथञ्चिद्रघुवंशादिकाव्यवत्कृतधारणास्तमेव च शब्दराशिं कर्मसु प्रयुञ्जाना निःसारेण तेन शब्दराशिना कर्मणि प्रयुक्तेन तदनुसारेण कृतेन प्रसूतं किमपि फलमपश्यन्तः कर्मण एव वैदिकस्य वैफल्यं, मन्त्राणां निःसारतां वाऽभिदधतः श्रद्धालून् जनान् मोहयन्ति; तदिदं तेषामात्मदोषाज्ञानमेव 'नैष स्थाणोरपराधो यदेनमन्धो न पश्यति' इति न्यायमनुसरताम् ।

प्रतिदिनमेषा दुर्दशा प्रवर्द्धते वैदिकस्य मार्गस्य । नूनमियं निरोद्धव्या धार्मिकैः श्रद्धालुभिर्वेदमार्गनिरतैः ।

एतावतेदमधिगतम्—यद् यथानियममधीतादेव वेदादर्थज्ञानं सम्पाद्य कर्माण्यनुष्ठेयानि । तादृशा एव मन्त्राः कर्मसु प्रयोक्तव्याः, तादृशान्येव च कर्माणि स्वं स्वं फलं दातुमीशते, नान्यथा ।

यथा अङ्कुरजननसमर्था शक्तिमात्मनि दधाना अपि व्रीह्यादयो देशकालसंस्कारादिरहिता नाङ्कुरं जनयन्ति, तद्वत् कर्मापि फलजननशक्तिसामर्थ्यविशिष्टं सदपि विगुणमनुष्ठितं चेन्नैव फलं ददाति । अतो धर्मतः फलं प्रेप्सुभिः पुरुषैः प्रथमतो वैगुण्यनिराकरणे यतितव्यम् । अतएवोक्तं शबरस्वामिना—

"स यथावदनुष्ठितः पुरुषं निःश्रेयसेन संयुनक्ति" इति ।

अतः पुरुषाभिलषितसर्वश्रेयःप्रापको धर्मः, स च वेदैकसमधिगम्यः । वेदोऽपि बहुधा विभिन्नो विध्यर्थवादमन्त्रनिषेधनामधेयात्मना सर्वांशेनापि धर्ममेवाभिवदति ।

विधिर्हि धर्मस्वरूपं तदङ्गं द्रव्यं देवतामन्यद्वा विदधाति । अर्थवादोऽपि तमेव स्तौति पुरुषस्य रुच्युत्पादनद्वारा तत्र तं प्रवर्तयितुम् । मन्त्रो हि अनुष्ठानकाले उच्चारितः सन् तमेव स्मारयति धर्मम् । निषेधोऽपि च अधर्मस्वरूपं ज्ञापयन्

तदितरस्य धर्मतामाक्षिपति। नामधेयमपि कर्मणः संज्ञारूपमितरस्माद् धर्मस्वरूपं व्यावर्तयत् सङ्कल्पव्यवहारादौ साहाय्यमाचरति।

अतएव च तत्र तत्र सूत्रकारो भगवान् जैमिनिः "तद्भूतार्थानां क्रियार्थेन समाम्नायः, आम्नायस्य क्रियार्थत्वात्, उक्तं समाम्नायैदमर्थ्यं स्यात्" इत्यादि बहुत्र वदति।

एवं च वेदस्य एकैकोऽप्यंशो धर्मप्रतिपादकतां न व्यभिचरति, तद्द्वारा पुरुषस्य श्रेयःप्राप्तिसम्पादनान्न हीयते। तेनैव चात्मानं कृतार्थं मनुते। अतएव भगवान्मनुरपि—

"वेद एव द्विजातीनां निःश्रेयसकरः परः।"

इति स्पष्टमूचे। अतः सर्वात्मना पुरुषनिःश्रेयसकरं वेदं यथावधीत्य यथानियमं च तदर्थं ज्ञात्वा यथाविधि यथाधिकारं च तानि तानि कर्माण्यनुष्ठाय जनाः स्वाभिलषितां सुखप्राप्तिं दुःखपरिहारं वा प्राप्नुयुरित्याशास्महे। सर्वमिदं कुक्षौ कृत्वैवाभिदधति स्मास्मदाचार्याः पूर्वतनाः—

"वेदोऽखिलो धर्ममूलम्" इति।

वेदापौरुषेयत्वम्

इदानीं स मन्त्रब्राह्मणात्मकः शब्दराशिर्वेदपदाभिधेयोऽस्मादृशैः पुरुषैः प्रत्यक्षादिप्रमाणैरगतानर्थान् परान् प्रत्याययितुं तदावेदकशब्दान् सङ्ग्रथ्य वेदात्मना विरचितः, उत सर्वज्ञेन सर्वशक्तिमता परमेश्वरेण विरचय्य लोके प्रख्यापितः। अथवा कालाकाशादिवत् नित्य एवायं शब्दराशिः केनापि नोत्पादित इति विचार्यते।

तत्र केचिदेवमाशेरतेऽधुनातनाः पाश्चात्याः पण्डिताः—(१) योऽयं मन्त्रब्राह्मणात्मना द्विधा विभक्तो ग्रन्थराशिरार्याणां धार्मिकेषु ग्रन्थेषु उच्चतमां कोटिमधितिष्ठति, स आर्यावर्तनिवासिभिः प्राचीनैर्बहुवेदिभिर्महर्षिभिरेव तात्कालिकीं परिस्थितिमपरोक्षीकृत्य तामेव च ग्रन्थारूढां कर्तुमारचितो ग्रन्थराशिरेव। अतएव यत्र ते न्यवात्सुः, तत्रत्यानां नदीनां पर्वतानां च नामानि बहून्युल्लिखितानि। तत्काले च या या देवतास्तेषां मनसि स्फुरिता आसन् तास्तास्तैः स्तुता मन्त्रेषु। त एव मन्त्रा एकत्र सङ्ग्रथीकृता ऋग्वेद इत्युच्यते। अयमेव ऋक्संहिता इति चोच्यते। सर्वापेक्षया प्राथमिकोऽयं ग्रन्थः। गच्छति च कस्मिंश्चन काले ततो यजुर्वेदस्तत्कुलीनैरेव कैश्चिन्महर्षिभिरारचित इत्यादि। तत्रापि च मन्त्रभागानां प्रथमं निर्माणम् पश्चाद् ब्राह्मणभागानाम्। एवं मन्त्रब्राह्मणयोर्महर्षि-

(१) मेकडानलप्रभृति।

प्रणीतत्वे सिद्धे कोऽसौ कालो भवितुमर्हति यत्र वेदाः प्रणीता इति जिज्ञासायां समुदितायाम् ईसवीयशताब्द्याश्चतुःसहस्रेभ्यो वर्षेभ्यः पूर्वं नैवासन् वेदाः। तदनन्तरमेव सर्वेऽपि वैदिका ग्रन्थाः समारचिताः। अतश्च ईसवीयाब्दारम्भात्पूर्वं चतुःसहस्र्यभ्यन्तरकाल एव रचनाय समारब्धो वेदराशिः क्रमशस्तैर्महर्षिभिरारचितः प्रवृद्धिं गतः। तादृशी च रचना ईसवीयशताब्द्यवधि किञ्चित्कालपर्यन्तमपि अनुवृत्ताऽभूत्। तत्रापि मन्त्राणां रचनं पूर्वं, ततो ब्राह्मणभागस्येति।

अत्रेदमार्यावर्तनिवासिभिः सूक्ष्मेक्षिकया विचारणीयम्। इतो वर्षसहस्र-द्वितयात्पूर्वं भगवान् पतञ्जलिरासीत् इति तैरेव पाश्चात्यपण्डितवर्यैर्निर्णीतं बहुत्र बहुभिः। ततोऽपि बहुप्राचीनकालं समलंकृतवान् महर्षिर्जैमिनिः। ततोऽपि प्राचीनतमः कश्चन मीमांसाचार्यः काशकृत्स्निरासीत् इति भगवत्पतञ्जलिभाष्या-लोकनेनैवावगम्यते। यत उक्तं तैः

"काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी" (पा० ४।१।१ आ०) इति।

पाणिनिसमकालिकेन महर्षिणा कात्यायनेनापि स्वग्रन्थेऽनूदितोऽयं काशकृत्स्निः।

"सद्यस्त्वं काशकृत्स्निः" (४।३।१७) इति।

पाणिनिकालश्च खिष्टजन्मतः पूर्वं सप्तमी शताब्दीति तैरङ्गीकृतम्। यद्यपीदं नास्मन्मनो रञ्जयति, यतः सत्यव्रतसामश्रमिणा निरुक्तालोचने कलेरष्टम्यामेव शताब्द्यां खिष्टजन्मतश्च प्राक् चतुर्विंशतिशताब्द्यामिममार्यावर्तं भूषयामास पाणिनिरिति बहुभिः प्रमाणैरुपपादितम्, तथापि पाश्चात्यपण्डितोक्तिपर्यालोचन-याऽपि इदं स्पष्टमवगम्यते—भगवान् काशकृत्स्निराचार्य इतो वर्षसहस्रत्रितयात्पूर्वं भूमिमिमामलञ्चकारेति। तेन च वेदानामपौरुषेयत्वं साधितमेव भवेदित्यप्यभ्यूह्यते।

यद्ययमभ्यूहः समञ्जसः स्यात्तदा तेनापि काशकृत्स्निना वेदकर्ता कश्चित् नैव श्रुतो न केवलम्, किन्तु अपौरुषेयत्वमेव तदानीं प्रथितमासीत् इत्यप्यभ्युपगन्त-व्यम्। यदि नाम तत्कालाद् वर्षसहस्रात्पूर्वं वेदा रचिता अभविष्यन्, तदा कथं नाम नास्मरिष्यन् तदानीन्तनाः पुरुषाः, विशेषतो महर्षिराचार्यः काशकृत्स्निः सर्वज्ञकल्पः? वयमल्पमतयोऽपि यदि नाम इतो वर्षसहस्रत्रितयात् वर्षसहस्रचतु-ष्टयाद्वा पूर्वकालिकमितिहासमनुमातुं शक्नुयाम, तर्हि को नाम तादृशो महान् प्रतिबन्ध एषामासीत् स्वपूर्वकालिकेतिहासपरिज्ञाने, येन ते सर्वथा तमपरिज्ञाय वेदेऽपौरुषेयत्वं साधयन्ति। अन्तेऽपि प्राचीनकालिकैस्तत्तच्छास्त्राणां प्रवर्तयितृभि-र्महर्षिभिः कैरपि वेदकर्ता न ज्ञात इति पूर्वोक्तैः प्रमाणैरवगम्यते। अतएव चात्र बहुपरिश्रान्तैर्मीमांसकैः प्राचीनैः सूत्रकारैस्ततः किंचिदर्वाचीनैर्भाष्यकारादिभिश्च वेदेऽपौरुषेयत्वस्वीकरणं विना नान्या गतिरस्तीति मत्वैव तदङ्गीकृतम्।

जैमिनिर्हि भगवान् पौरुषेयत्वखण्डनप्रस्तावे सूत्रयति—

"उक्तं तु शब्दपूर्वत्वम्" (१।१।२९) इति।

तस्यायमभिसन्धिः—वयं तावत्पश्यामः, ये नाम अधीयते वेदमिदानीन्तनाः,

सर्वेऽपि ते गुरुमुखादेवाधीयते, ये च तेषामध्यापयितारो गुरवस्तेऽपि स्वगुरोः सकाशादधीत्यैवाध्यापयन्ति, न पुस्तकादिकं स्वयं दृष्ट्वा। एवमेव सर्वदाऽपि इयमेवाध्ययनपरम्परा प्रचलति स्म इत्यनुमातुं शक्यते। इदमेव चानुमानमेतत्सूत्राऽभिप्रायभूतं विस्पष्टयति स्म वार्तिककारः—

"वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।
वेदाध्ययनसामान्यादधुनाऽध्ययनं यथा॥" (श्लो० वा० वाक्याधि० ३६६)

इत्यनेन वार्त्तिकेन।

एवं च न कदापि तादृशः काल आसीत् यत्र वेदा वा तदध्ययनं वा नासन्। किन्तु सार्वादिकोऽयं व्यवहारः प्रवर्त्तते स्म।

किञ्च वयं ग्रन्थराशिमिममध्ययनेनाध्यापनेन वा मात्रामात्रमप्यपरित्यज्य पालयामः। तत्तादृशैः सर्वैरीश्वरतुल्यतया संरक्ष्यमाणस्य पूज्यमानस्य ग्रन्थस्य यदि कर्ताऽपि कश्चित्स्यात् तर्हि कथं तं वयं प्रस्मर्तुमीश्महे परित्यक्तुं वेति।

केचिदाशेरते—पुरुषनिर्मितत्वाङ्गीकारे दौर्बल्यं मन्यमानैस्तत्र दार्ढ्य-सम्पादनायैव पौरुषेयत्वं जानद्भिरेव भवद्भिः स कर्त्ताऽपह्नुत इति।

नेदं प्रेक्षावतां बुद्धिमनुरञ्जयति। यतो वयं भारतीया धर्मलिप्सवोऽद्यापि भारत-भागवतादीन् ग्रन्थान् पुरुषकृतत्वेन निःसंशयं जानन्तोऽपि तत्र सुतरामादराति-शयमेव प्रकटीकुर्मः। पुरुषकृतत्वमभ्युपगच्छद्भिरपि व्यासवाल्मीकिप्रभृतिभ्योऽ-न्यूनमहिमभिरेव महर्षिभी रचितो वेदराशिरित्यभ्युपगन्तव्यं भवति। यद्येवं तादृशेषु महर्षिषु तत्र तेषु वा ग्रन्थेषु को नाम धार्मिकः पुरुषोऽनादरमाविष्कर्तुं प्रभवेत्, तानेकान्ततो विस्मरेद्वा। अतोऽवश्यं स्मर्तव्यानां पुरुषधौरेयाणां वेदकर्तॄणां कदापि यदा विस्मरणमद्यत्वे पूर्वतने वा नासीत्, तदा अस्य वेदराशेर्नास्त्येव कर्तेति निश्चय एव साधीयान्। कर्तुरुच्छेदो हि क्वचिद्देशस्यैवोच्छेदेन वा अध्येतृपुरुषाणां सर्वनाशेन वा भवितुमर्हति। न तदुभयमत्र संभाव्यते। यतो वयं तामेवानु-पूर्वीमक्षरराशिं च तादृशमेवेदानीमप्यधीमहे। तत्र कर्ता परं विस्मृत इति साहस-मात्रमिदम्। अत एव दृश्यादर्शनबाधितोऽयं वेदेषु कर्ता।

ये तावदस्मानेवोपहसन्ति—भवतामेव केचन तीर्थकारा वेदस्येश्वरकृतत्व-मुद्घोष्य पौरुषेयतां विस्पष्टं साधयन्ति, कथं भवद्भिरन्यो देशान्तरीय उपालभ्यतेऽस्मि-न्विषय इति, तान्प्रति इदमेव प्रतिवक्तुमभिलषामो वयम्, न तैस्तीर्थकारैः सहा-स्माकं विरोधः। नहि ते अस्मादृशपुरुषकृतत्वमर्वाचीनकालिकत्वं वा वेदस्याभ्यु-पगच्छन्ति। किन्तु सर्वज्ञस्य सर्वशक्तिमतः परमेश्वरस्यैव तदङ्गीकुर्वते। नैतावता पञ्चषसहस्रेभ्यो वर्षेभ्यः पूर्वं नासीद्वेदराशिरित्यवगम्यते। न वयं पाश्चात्या इव ततः पूर्वं जगदभाववादिनः। अस्माकं तु कल्पा बहवः, तेऽपि कल्पपूर्वाः। अतोऽ-स्मिन् कल्पे वेदराशिरयं प्रथमं निर्मित इति केन वा सूक्ष्ममतिनाऽपि वक्तुं शक्यते।

नत्परत्वमेकेरणं तावत् वेदभाग... ...भिन्ना ... ध्यायके—"वेदा

(जै० १।१।२७) इति प्रथमं सूत्रम् । एके नैयायिकादयीयते"

मन्यन्ते । यतस्ते पुरुषाणां कठकलापादीनां नाम्ना व्यव। पूर्वमन्वन्तरस्थितानुपूर्वी-

वेदभागस्य सर्वस्यापि पुरुषकृतत्वं पूर्वपक्षितम् । अन...मेव । अतो वेदराशेरीश्वर-

(जै० १।१।२८) इत्यपरं सूत्रम् । अनित्यानां जराम... मीमांसकेभ्यो नातिदूरं

दर्शनादपि वेदानामनित्यत्वमिति तदर्थः । अनेन सूत्रेण ... साधयितुं शक्यते । किन्तु

(तै० सं० ७।२) "कुसुरुविन्द औद्दालकिरकामयत" (शब्दराशेः तदानुपूर्व्या वा

ब्राह्मणवाक्यान्येवाभिसंहितानीत्यवगम्यते । तथैव च...त्वासंभवात् ईश्वरमेव

सर्वैरपि ।

यदि पूर्वसूत्रे जैमिनिर्भगवान् मन्त्रभागस्यैव वेदत्वम... ...कशब्दसन्दर्भस्य पुरुष-

... ...णभागसङ्ग्राहकमारचयिष्यत । "वेदसंयोगात्" (जै० ... ...मः । सर्वं तु प्रमाण-

स... ... निश्चेतुं शक्नुमः ।

लौ... तस्मात्सुवर्णं हिरण्यं भार्यं दुर्वर्णोऽस्य भ्रातृव्यो भ... तत्र सकर्तृकता-

मङ्गी... ...सुवर्णधारणस्य वेदेन सह संयोगोऽभिधीयते । अत्र ...निगोचरतामापादयि-

तुमीश्मह ... उत क्रत्वर्थत्वम् (२) इति सन्दिह्य वेदे 'आध्वर्यवभगतोऽर्थः स्वमनीषया

कल्पयितुं शक्य... =सम्बन्धात् तस्य चाग्निहोत्रादिधर्मविधा वैदिकशब्दे तदपोद्यत

इति कर्तारं निषेध... ...ति पूर्वपक्षाशयः । यदि ब्राह्मणभागस...दवगच्छामो, न

कृत्वा संबन्धं व्यवहा... ... सुवर्णधारणस्य कथं वेदसंयोग... ...द्यपि च विस्म-

रणमुपपद्येत तथापि न ... ...२), "वेदसंयोगान्न प्रकरणे... ...तपद्येमहि । यथा

विद्यमानस्याप्यनुपलम्भो भवतीति, ...देशं स्युः" (जै० ३।७ ... ...विना प्रमाणेन शशविषाणं

प्रतिपद्यामहे" (शा० भा० १।१।५) (१) इति ।

"येऽपि हि पौरुषेयतां मन्यन्ते तेऽपि नैव परम्परया तत्र कर्तृविशेष-स्मरणं शक्नुवन्ति वदितुम् । सामान्यतोदृष्टेन कर्तारमनुमाय स्वाभिमतं कर्तारं तत्र निक्षिपन्ति, केचिदीश्वरम्, अन्ये हिरण्यगर्भम्, अपरे प्रजापतिम् । न चायं नानाविधो विवादः परम्परया कर्तरि मन्वादिवत्स्मर्यमाणे कथंचिदवकल्पते । नहि मानवे भारते शाक्यग्रन्थे वा कर्तृविशेषं प्रति कश्चिद्विवदते । तस्मात्स्मर्तव्यत्वे सति अस्मरणाददृश्यादर्शनबाधितं सामान्यतो दृष्टं न शक्नोति कर्तारमवसाययितुम्" (शास्त्र दी० १।१।८) इति च (२) भाष्य-शास्त्रदीपिकादिग्रन्थैर्निपुणतरमुपपादितः । अतोऽस्मत्प्राचीनानामस्माकं च अद्य यावदयमेव निर्णयो—वेदः सर्वथा न कृत्रिम इति ।

---

(१) चौखम्भासंस्कृतसीरिजमुद्रितपुस्तके पृ० १२ द्रष्टव्यम् ।

(२) निर्णयसागरमुद्रितपुस्तके पृ० १६२ द्रष्टव्यम् ।

सर्वेऽपि ते गुरुमुखादेवाधीयते, ये च तेषामध्यापयितारो गुरवस्तेऽपि स्वगुरोः सकाशादधीत्यैवाध्यापयन्ति, न पुस्तकादिकं स्वयं दृष्ट्वा। एवमेव सर्वदाऽपि इयमेवाध्ययनपरम्परा प्रचलति स्म इत्यनुमातुं शक्यते। इदमेव चानुमानमेतत्सूत्राऽभिप्रायभूतं विस्पष्टयति स्म वार्तिककारः—

"वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।
वेदाध्ययनसामान्यादधुनाऽध्ययनं यथा॥" (श्लो० वा० वाक्याधि० ३६६)

इत्यनेन वार्त्तिकेन।

एवं च न कदापि तादृशः काल आसीत् यत्र वेदा वा तदध्ययनं वा नासन्। किन्तु सार्वादिकोऽयं व्यवहारः प्रवर्त्तते स्म।

किञ्च वयं ग्रन्थराशिमिममध्ययनेनाध्यापनेन वा मात्रामात्रमप्यपरित्यज्य पालयामः। तत्तादृशैः सर्वैरीश्वरतुल्यतया संरक्ष्यमाणस्य पूज्यमानस्य ग्रन्थस्य यदि कर्ताऽपि कश्चित्स्यात् तर्हि कथं तं वयं प्रस्मर्तुमीश्महे परित्यक्तुं वेति।

केचिदाशेरते—पुरुषनिर्मितत्वाङ्गीकारे दौर्बल्यं मन्यमानैस्तत्र दाढ्र्य-सम्पादनायैव पौरुषेयत्वं जानद्भिरेव भवद्भिः स कर्त्ताऽपह्नुत इति।

नेदं प्रेक्षावतां बुद्धिमनुरञ्जयति। यतो वयं भारतीया धर्मलिप्सवोऽद्यापि भारत-भागवतादीन् ग्रन्थान् पुरुषकृतत्वेन निःसंशयं जानन्तोऽपि तत्र सुतरामादराति-शयमेव प्रकटीकुर्मः। पुरुषकृतत्वमभ्युपगच्छद्भिरपि व्यासवाल्मीकिप्रभृतिभ्योऽ-न्यूनमहिमभिरेव महर्षिभी रचितो वेदराशिरित्यभ्युपगन्तव्यं भवति। यद्येवं तादृशेषु महर्षिषु तत्र तेषु वा ग्रन्थेषु को नाम धार्मिकः पुरुषोऽनादरमाविष्कर्तुं प्रभवेत्, तानेकान्ततो विस्मरेद्वा। अतोऽवश्यं स्मर्तव्यानां पुरुषधौरेयाणां वेदकर्तॄणां कदापि यदा विस्मरणमद्यत्वे पूर्वतने वा नासीत्, तदा अस्य वेदराशेर्नास्त्येव कर्तेति निश्चय एव साधीयान्। कर्तुरुच्छेदो हि कचिद्देशस्यैवोच्छेदेन वा अध्येतृपुरुषाणां सर्वनाशेन वा भवितुमर्हति। न तदुभयमत्र संभाव्यते। यतो वयं तामेवानु-पूर्वीमक्षरराशिं च तादृशमेवेदानीमप्यधीमहे। तत्र कर्ता परं विस्मृत इति साहस-मात्रमिदम्। अत एव दृश्यादर्शनबाधितोऽयं वेदेषु कर्ता।

ये तावदस्मानेवोपहसन्ति—भवतामेव केचन तीर्थकारा वेदस्येश्वरकृतत्व-मुद्घोष्य पौरुषेयतां विस्पष्टं साधयन्ति, कथं भवद्भिरन्यो देशान्तरीय उपालभ्यतेऽस्मि-न्विषय इति, तान्प्रति इदमेव प्रतिवक्तुमभिलषामो वयम्, न तैस्तीर्थकारैः सहा-स्माकं विरोधः। नहि ते अस्मादृशपुरुषकृतत्वमर्वाचीनकालिकत्वं वा वेदस्याभ्यु-पगच्छन्ति। किन्तु सर्वज्ञस्य सर्वशक्तिमतः परमेश्वरस्यैव तदङ्गीकुर्वते। नैतावता पञ्चषसहस्रेभ्यो वर्षेभ्यः पूर्वं नासीद्वेदराशिरित्यवगम्यते। न वयं पाश्चात्या इव ततः पूर्वं जगदभाववादिनः। अस्माकं तु कल्पा बहवः, तेऽपि कल्पपूर्वाः। अतोऽ-स्मिन् कल्पे वेदराशिरयं प्रथमं निर्मित इति केन वा सूक्ष्ममतिनाऽपि वक्तुं शक्यते।

...ीयते"

...। पूर्वमन्वन्तरस्थितानुपूर्वी-
...मेव । अतो वेदराशेरीश्वर-
... मीमांसकेभ्यो नातिदूरं
... साधयितुं शक्यते । किन्तु
...ब्दराशेः तदानुपूर्व्या वा
...त्वासंभवात् ईश्वरमेव

...कशब्दसन्दर्भस्य पुरुष-
...मः । सर्वं तु प्रमाण-
स... निश्चेतुं शक्नुमः ।
लौ... तत्र सकर्तृकता-
मङ्गी... ...ानगोचरतामापादयि-
तुमीश्मह... ...गतोऽर्थः स्वमनीषया
कल्पयितुं शक्य... वैदिकशब्दे तदपोद्यत
इति कर्तारं निषेध... ...ादवगच्छामो, न
कृत्वा संबन्धं व्यवहा... ...द्यपि च विस्म-
रणमुपपद्येत तथापि न ... ...तिपद्येमहि । यथा
विद्यमानस्याप्यनुपलम्भो भवतीति, ...विना प्रमाणेन शशविषाणं
प्रतिपद्यामहे" (शा० भा० १।१।५) (१) इति।

"येऽपि हि पौरुषेयतां मन्यन्ते तेऽपि नैव परम्परया तत्र कर्तृविशेष-स्मरणं शक्नुवन्ति वदितुम् । सामान्यतोदृष्टेन कर्तारमनुमाय स्वाभिमतं कर्तारं तत्र निक्षिपन्ति, केचिदीश्वरम्, अन्ये हिरण्यगर्भम्, अपरे प्रजापतिम् । न चायं नानाविधो विवादः परम्परया कर्तरि मन्वादिवत्स्मर्यमाणे कथंचिदवकल्पते । नहि मानवे भारते शाक्यग्रन्थे वा कर्तृविशेषं प्रति कश्चिद्विवदते । तस्मात्स्मर्तव्यत्वे सति अस्मरणाद्दृश्यादर्शनबाधितं सामान्यतो दृष्टं न शक्नोति कर्तारमवसाययितुम्" (शास्त्र दी० १।१।८) इति च (२) भाष्य-शास्त्रदीपिकादिग्रन्थैर्निपुणतरमुपपादितः । अतोऽस्मत्प्राचीनानामस्माकं च अद्य यावदयमेव निर्णयो—वेदः सर्वथा न कृत्रिम इति ।

---

(१) चौखम्भासंस्कृतसीरिजमुद्रितपुस्तके पृ० १२ द्रष्टव्यम् ।

(२) निर्णयसागरमुद्रितपुस्तके पृ० १६२ द्रष्टव्यम् ।

सति चैवं वेदे मन्त्रभागे …
मन्येषां वा पुरुषविशेषाणां …
तेषामुपपत्तिरिति सत्यमिदं …
सन्दधति - वेदे यानि ना …
केषांचिद्राज्ञां पुरुषविशेषाणां …
श्रुतिः संव्यवहारार्थं प्र …
स्म । तानि च वेदारूढानि …
नामत्वेन तदाचरितत्वेन …
साक्षात्प्रजापतिरेव । त …
एभिः स्वनामत्वेन परिव … ।

"वेदेन नाम …
"सर्वेषां तु … ।४
वेदशब्देभ्य … २।६२)

इत्याद्याः श्रुतिस्मृत …

यद्यपीदमाधुनिका …
विशेषाणां केषाञ्चन प … सर्गाकलितसंस्कार-
अत्र परिश्राम्यता म … । पदं निदधाति, तथापि
कमपि पूर्वाचार्येषु अ … ढो निश्चय आसीत्, यश्चास्मा-
वतां पुरतो निक्षिप्तो दृष्टः इतस्त … कम्पनीयोऽद्य यावद्वर्वर्त्ति, स प्रेक्षा-

ब्राह्मणभागस्यापि वेदत्वम्

अस्मत्प्राचीनतमा महर्षयः कल्पसूत्रादिकारास्तीर्थकृतश्च मन्त्रब्राह्मणयोरुभयोरपि वेदत्वं निःसंशयमभिदधति । भगवता बौधायनेन "मन्त्रब्राह्मणमित्याहुः" (बौ० गृ० २।६२) इति स्वकीये धर्मसूत्रे, "आम्नायः पुनर्मन्त्राश्च ब्राह्मणानि" (कौ० सू० १।३) इति कौशिकेन, आपस्तम्ब-कात्यायनाभ्यां च "मन्त्रब्राह्मणयोर्वेदनामधेयम्" (आप० यज्ञप० २४।१।३१, कात्या० प्रतिज्ञाप० १।१) इत्युभयोरपि भागयोर्वेदत्वमभ्युपगतम् । अतिगहने दुरधिगमानेकमार्गगभीरे अपरिमेयान्तःसारे वेदकान्तारे स्वच्छन्दं विहरता जैमिनिकेसरिणाऽप्ययमेवाशयः साधु सङ्घटितः स्वकीये मीमांसादर्शने । एतदुपोद्बलकानि कानिचन तदीयानि सूत्राण्युदाह्रियन्ते—अपौरुषे-

...करणं तावत् वेदभाग... ...ध्यायके—"वेदांश्चैके सन्निकर्षं पुरुषाख्याः" (जै० १।१।२७) इति प्रथमं सूत्रम्। एके नैयायिकादयो वेदान् सन्निकृष्टकालकृतान् मन्यन्ते। यतस्ते पुरुषाणां कठकलापादीनां नाम्ना व्यवह्रियन्ते इति तदर्थः। तत्र वेदभागस्य सर्वस्यापि पुरुषकृतत्वं पूर्वपक्षितम्। अनन्तरम्—"अनित्यदर्शनात्" (जै० १।१।२८) इत्यपरं सूत्रम्। अनित्यानां जरामरणवतां बबरादीनां पुरुषाणां दर्शनादपि वेदानामनित्यत्वमिति तदर्थः। अनेन सूत्रेण "बबरः प्रावाहणिरकामयत" (तै० सं० ७।२) "कुसुरुविन्द औद्दालकिरकामयत" (तै० सं० ७।२२) इत्यादीनि ब्राह्मणवाक्यान्येवाभिसंहितानीत्यवगम्यते। तथैव चोदाहृतं भाष्यकारादिभिः सर्वैरपि।

यदि पूर्वसूत्रे जैमिनिर्भगवान् मन्त्रभागस्यैव वेदत्वममंस्यत कथं सूत्रमिदं ब्राह्मणभागसङ्ग्राहकमारचयिष्यत। "वेदसंयोगात्" (जै० ३।४।२२) इति सूत्रेणापि "तस्मात्सुवर्णं हिरण्यं भार्यं दुर्वर्णोऽस्य भ्रातृव्यो भवति" इति वाक्यविहितस्य सुवर्णधारणस्य वेदेन सह संयोगोऽभिधीयते। अत्र हि सुवर्णधारणस्य पुरुषार्थत्वम् (१) उत क्रत्वर्थत्वम् (२) इति सन्दिह्य वेदे 'आध्वर्यवम्' इति समाख्याते (३) वेदभागे संयोगात्=सम्बन्धात् तस्य चाग्निहोत्रादिधर्मविधायकत्वात् तादृशकर्मधर्मएवेदं सुवर्णधारणमिति पूर्वपक्षाशयः। यदि ब्राह्मणभागस्य वेदत्वं नाभविष्यत् तादृशब्राह्मणवाक्यविहितस्य सुवर्णधारणस्य कथं वेदसंयोग उपापत्स्यत। एवं "वेदो वा प्रायदर्शनात्" (३।३।२), "वेदसंयोगान्न प्रकरणेन बाध्येत" (३।३।८), "वेदोपदेशात्पूर्ववद्वेदान्यत्वे यथोपदेशं स्युः" (जै० ३।७।५०), "संस्कारास्तु पुरुषसामर्थ्ये यथावेदं कर्मवद् व्यवतिष्ठेरन्" (जै० ३।८।३) इत्यादीनि सूत्राणि ब्राह्मणभागस्यापि वेदत्वं परिपोषयन्ति। एतेषामर्थो नात्र विस्तरभयाल्लिख्यते। स च शाबरभाष्यादिमीमांसाग्रन्थतोऽवगन्तव्यः। एवं सर्वैरपि सूत्रकारैर्महर्षिभिर्मन्त्रब्राह्मणयोरुभयोरपि वेदत्वं निःशङ्कमभ्युपगतम्।

अत्र केचिदेवं प्रत्यवतिष्ठन्ते—बौधायन-कात्यायनापस्तम्बादिमहर्षीणां तावत् मन्त्रब्राह्मणयोरुभयत्रापि वेदत्वमभिमतमासीत्, तन्मतानुयायिभिश्च सायणादिभिराचार्यैरपि तदेवोररीकृतम्। परन्तु केचिदाधुनिका ब्राह्मणग्रन्थेष्वेव "य एवं वेद" (तै० ब्रा० ३।८।६, श० ब्रा० १।६।३।१३) इति बहुत्र दर्शनाद् ब्राह्मणग्रन्थानामेव प्रथमं वेदपदाभिधेयता उपक्रान्ता। ततो गच्छति महति काले मन्त्रेष्वपि वेदशब्दः

---

(१) पुरुषाभिलषितफलजनकत्वं पुरुषार्थत्वम्।

(२) क्रत्वपेक्षितोपकारजनकत्वं क्रत्वर्थत्वम्।

(३) श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यारूपेषु षट्सु प्रमाणेषु अन्तिमं प्रमाणं समाख्या। सा च यौगिकशब्दरूपा।

प्रयोक्तुमुपक्रान्तः । अस्माभिस्तु मन्त्रभागस्य ... ...वेदपदवाच्यता । तत... ब्राह्मणेऽपि स प्रयुक्त आसीत्, यतो हि वेदशब्दो विद्यापरपर्यायः । मन्त्रभाग एव च सर्वासां विद्यानां निदानमासीत् । अतश्च कारणाद् विद्याऽपरपर्यायवेदशब्दवाच्यत्वं मन्त्राणामेवाभिप्रेयते । सूत्रकाले परं मन्त्रब्राह्मणयोरुभयत्रापि वेदशब्दः प्रयुक्त आसीत्—इति । तत्र च ददति च बहूनि प्रमाणानि "वेदेन रूपे व्यपिबत्सुतासुतौ" (शु० य. १९।७८), "यस्मिन्वेदा निहिता विश्वरूपाः' (अ० ४।७।६), "त्रयो-वेदा अजायन्त अग्नेर्ऋग्वेदो वायोर्यजुर्वेदः सामवेद आदित्यात्" (ऐ. ब्रा. २५।७), "वेदा वा एते अनन्ता वै वेदाः" (तै. ब्रा. ३।१०।११।४), "स होवाच ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमप्याथर्वणं चतुर्थम्" (छां. ७।१।२) इत्यादीनि । एवमुदाहृतेषु प्रमाणेषु श्रूयमाणो वेदशब्दस्त्रयीमन्त्रपरकः । अतश्च त्रय्यपरपर्यायो वेद-शब्दो मन्त्रभागमेवाभिधत्ते, न ब्राह्मणभागमिति तेषामभिसंहितम् ।

अत्रेदं विचार्यते प्रथमं तावदिदंवादिन एवं पृच्छामः—त्रयीशब्दो मन्त्रमात्र-परक इति कथमेभिरवगतमिति । यान्येभिरुदाहृतानि वाक्यानि "त्रयो वेदा अजा-यन्त" इत्यादीनि, तेषु वेदशब्दो मन्त्रब्राह्मणोभयपरको नेत्यत्र किं प्रमाणम् । इमान्येव वाक्यान्युदाहृत्य जैमिनिना द्वितीयाध्याये तृतीये पादे प्रथमाधिकरणे विचारितम्—"उच्चैर्ऋचा क्रियत, उपांशु यजुषा, उच्चैः साम्ना" (ऐ० ब्रा० ५।५।५) इत्यादि-वाक्यविहितानामुच्चैस्त्वादीनां ऋङ्मात्रधर्मत्वम्, उत ऋग्वेदादिविहितकर्मधर्मता ? इति । तत्र ऋगादिशब्दानामपि ऋग्वेदपरत्वं बहुत्र श्रुतमिति भाष्यकारेणोदाहृतम्—यथा "ऋगादयः शब्दाः शक्नुवन्ति वेदमभिवदितुमिति ऋग्भिः पूर्वाह्णे देव-ईयते, यजुर्वेदे तिष्ठति मध्य अह्नः, सामवेदेनास्तमये महीयते, वेदैरशून्यस्त्रि-भिरेति सूर्यः" (तै० ब्रा० ३।१२।९) इति द्वौ वेदौ संकीर्त्य ऋक्शब्दं च त्रिषु पादेषु, चतुर्थे पादे उपसंहरति बहुवचनेन, "वेदैरशून्यस्त्रिभिरेति सूर्य इति" (शा० भा० ३।३।२) (१) ।

अस्मिन्मन्त्रे प्रथमत 'ऋग्भिः पूर्वाह्णे' इति ऋक्शब्देनोपक्रम्य अनन्तर-मुभयत्र वेदशब्दं पठित्वा उपसंहारे च 'वेदैरशून्यस्त्रिभिः' इति वेदत्रयप्रतिपादनात् ऋक्शब्दस्यापि वेदपरकत्वमेवेति भाष्याभिप्रायः । एवं "त्रयी विद्याख्या च तद्विदि" (जै० ३।३।५) इति सूत्रस्थेन "यस्त्रीन् वेदानधीते स त्रयीविद्यः । ऋक्सामयजूंषि इति त्रयो वेदा उच्यन्ते । तद्विदि त्रयीविद्याख्या युज्यते" इति भाष्येण ऋगादिपदानां मन्त्रब्राह्मणात्मकवेदपरत्वं, त्रयीशब्दस्यापि च

(१) काशीचौखम्भासंस्कृतसीरीजमुद्रितपुस्तके पृ० १९१ द्रष्टव्यम् ।

तत्परत्वमेवेति सुस्पष्टमवगम्य… त्रयीशब्दस्य मन्त्रमात्रपरत्वं "त्रयो वेदा अजायन्त" (ऐ० ब्रा० २५ । ७) इति ब्राह्मणवाक्यस्थवेदशब्दस्य च भवदभिप्रेतमन्त्रात्मकत्रयीमात्रपरत्वं सूत्रकारेण भाष्यकारेण वाऽभिप्रेतं स्यात्, तर्हि सिद्धान्ते ऋग्वेदादिविहितकर्ममात्राङ्गत्वमुच्चैस्त्वादीनामिति कथं ताभ्यां सिद्धान्तितं सङ्गच्छेत ।

किञ्च यतो भाष्यकारेणोदाहृतमिदम्—"ऋग्भिः पूर्वाह्णे" इति, सोऽयमनुवाकः 'ऋचां प्राची महती दिगुच्यत' (तै० ब्रा० ३।१२।६) इत्यारभ्यते, तत्र इयमानुपूर्वी दृश्यते 'ऋचां प्राची महती दिगुच्यते । दक्षिणामाहुर्यजुषामपाराम् । अथर्वणामङ्गिरसां प्रतीची । साम्नामुदीची महती दिगुच्यते । ऋग्भिः पूर्वाह्णे दिवि देव ईयते । यजुर्वेदे तिष्ठति मध्य अह्नः सामवेदेनास्तमये महीयते । वेदैरशून्यस्त्रिभिरेति सूर्यः । ऋग्भ्यो जातं वैश्यं वर्णमाहुः । यजुर्वेदं क्षत्रियस्याहुर्योनिम् । सामवेदो ब्राह्मणानां प्रसूतिः' (तै० ब्रा० ३।१२।६) इति ।

तत्र प्रथमतः "ऋचाम्" "यजुषाम्" "साम्नाम्" इति ऋगादिशब्दान् प्रयुज्य "तत ऋग्भिः", "यजुर्वेदे" "सामवेदे" इति वेदशब्दसंयुक्ततया पठित्वा अन्ते 'वेदैरशून्यस्त्रिभिरि'ति वेदशब्दसंवलिततयैवोपसंहृतम् । तत्र पूर्वोत्तरसन्दर्भपर्यालोचनया यजुर्वेदशब्दस्येव ऋग्यजुरादिशब्दानामपि तत्तद्वेदपरत्वमेवेत्यकामेनाप्यभ्युपगन्तव्यं भवति । अत ऋगादिशब्दा ऋग्वेदपरका इत्यत्र इतः परं किमधिकमन्वेष्टव्यं प्रमाणम् । वेदशब्दश्च मन्त्रब्राह्मणोभयपरक इति च निरूपितमधस्तात् । मन्त्रश्चायं वेदत्रयसहचरितत्वं वेदत्रयात्मकत्वं वा भगवतः सूर्यस्याऽऽवेदयति इति निर्विवादम् । तैत्तिरीयान्तर्गतः "आदित्यो वा एष एतन्मण्डलं तपति" (तै० आ० १०।१३) इत्युपक्रान्तः सर्वोऽप्यनुवाकोऽमुमेवार्थं सुस्पष्टं निरूपयति । अतश्च 'ऋचां प्राची' इत्यनुवाकस्य अस्य चानुवाकस्य एकार्थतैव प्रतीयते इति तदनुवाकेन भगवतः सूर्यस्य ऋग्वेदादिसहचरितत्वप्रतिपादनात् अत्रापि तदेव प्रतिपादनीयम् । एतदनुवाकान्तर्गतं च वाक्यमेकं श्रूयते "सैषा त्रय्येव विद्या तपति य एषोऽन्तराऽऽदित्ये हिरण्मयः पुरुषः" (तै० आ० १०।१३) इति । वाक्यमिदं पूर्वोक्तार्थस्योपसंहारकम् । अतश्च मन्त्रब्राह्मणात्मकभागमेव त्रयीशब्दोऽप्यभिदधाति न मन्त्रमात्रमिति सुस्पष्टमेतत्प्रमाणेनावगम्यते । एवं बहून्यपि प्रमाणानि वेदादेवोदाहर्तुं शक्यन्ते यद्यपि, तथापि अतिविस्तरभयाद् दिङ्मात्रमिह दर्शितम् । अतो वेदशब्दः ऋगादिशब्दः त्रयीशब्दो वा मन्त्रब्राह्मणात्मकस्यैव भागस्याभिधायक इति प्रमाणेन सिद्ध्यति । यानि च तदुदा-

हृतानि साभिप्रायावष्टम्भकत्वेन प्रमाणानि, . तन्मतं पोषयितुं नेशत इति केवलस्य मन्त्रभागस्यैव वेदपदवाच्यत्वमभ्युपगच्छतां न किंचिदाग्रहादन्यत्प्रमाणं पश्यामः ।

स्वाध्यायोऽध्येतव्यः

उपनीतस्य माणवकस्य 'स्वाध्यायोऽध्येतव्यः' इत्यध्ययनं विहितम् । तत्र अध्यायशब्दः शाखापरः । तत्र स्वत्वस्य एकत्वस्य च विवक्षितत्वात् एकैव शाखा एकवेदसम्बन्धिनी स्वपरम्परागता अध्येतव्या "अनया त्रय्या विद्यया लोकं जयति", "वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम्" इत्यादिशाखापर्यालोचनया वेदान्तराध्ययनस्यापि कर्त्तव्यतावगमात् ऋग्वेदादिषु एकैकस्मिन्वेदे एकैका शाखा अध्येतव्या इति फलति । तत्रापि प्रथमं स्वशाखामधीत्य वेदान्तरगतशाखान्तराध्ययनं कर्त्तव्यम् । इदं सर्वं पूर्वमीमांसायां द्वितीयाध्यायस्य चतुर्थपादे शाखान्तराधिकरणे वार्तिकादौ स्पष्टम् । तत्रापि श्रौतानि कर्माणि, स्मार्तानि शान्तिकपौष्टिकानि च स्वशाखयैव कर्त्तव्यानि । स्वशाखाया लाभे तां परित्यज्य शाखान्तरपरिग्रहे प्रत्यवायस्मरणात् । अलाभे तु स्वशाखाऽविरुद्धं शाखान्तरोक्तमप्युपादेयम् । अत्र प्रमाणवचनानि वीरमित्रोदय-रुद्रकल्पद्रुमादावुक्तानि । तानि यथा—

पारम्पर्यगतां मुक्त्वा स्वां समाख्यादिबन्धिनीम् ।
शाखां शाखान्तरं युक्तं नाध्येतुं सदृशे श्रमे ॥
पारम्पर्यगतो येषां वेदः सपरिबृंहणः ।
तच्छाखीयैस्तु संस्कारैः संस्कृतो ब्राह्मणो भवेत् ॥
अधीत्य शाखामात्मीयां परशाखां ततः पठेत् ।
स्वेन पित्रादिभिर्वाऽपि यः कल्पादिः पुराऽऽदृतः ।
स तु नैव परित्याज्यः इति वेदानुशासनम् ॥
एकवेदेऽपि शाखानां मध्ये योऽन्यतमां श्रयेत् ।
स्वशाखां तु परित्यज्य शाखारण्डः स उच्यते ॥
यः स्वशाखां परित्यज्य पारक्यामधिगच्छति ।
स शूद्रवद् बहिष्कार्यः सर्वस्माद् द्विजकर्मणः ॥
आत्मशाखां परित्यज्य परशाखासु वर्त्तते ।
उच्छेत्ता तस्य वंशस्य रौरवं नरकं व्रजेत् ॥

स्वीया शाखोज्झिता येन ब्रह्मतेजोऽर्थिना स्वयम् ।
ब्रह्महैव परिज्ञेयः सर्वकर्मसु गर्हितः ॥
न जातु परशाखोक्तं बुधः कर्म समाचरेत् ।
आचरन् परशाखोक्तं शाखारण्डः प्रकीर्तितः ॥
यः स्वशाखोक्तमुत्सृज्य परशाखोक्तमाचरेत् ।
अप्रमाणमृषिं कृत्वा सोऽन्धे तमसि मज्जति ॥
स्वशाखाश्रममुत्सृज्य परशाखाश्रमं तु यः ।
कर्त्तुमिच्छति दुर्मेधा मोघं तत्तस्य चेष्टितम् ॥
अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः कर्मकारिणाम् ।
अक्रिया च परोक्ता च तृतीया चायथाक्रिया ॥
ऊनो वाऽप्यतिरिक्तो वा यः स्वशाखोदितो विधिः ।
तेनैव तनुयाद्यज्ञं न कुर्यात्पारशाखिकम् ॥
बहुलं वा स्वगृह्योक्तं यस्य यावत्प्रकीर्त्तितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥
यत्राम्नातं स्वशाखायां पारक्यमविरोधि यत् ।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ॥
परशाखोऽपि कर्त्तव्यः स्वशाखायां न नोदितः ।
सर्वशाखासु यत्कर्म एकं प्रत्यवशिष्यते ॥ इति ।

एवमाचार्यस्यापि कारयितुः स्वशाखीयस्य लाभे प्रथमं स एव शान्त्यादिकर्मसु वरणीयः। तेनाप्याचार्येण गुरुमुखात् यथावदधीतवेदेन सम्यक् ज्ञातकर्मकाण्ड-प्रक्रियेण च भाव्यम्। अन्यथाऽऽचार्यस्याध्ययनाद्यभावेऽनधीतानां मन्त्राणां फला-जनकत्वस्य तत्र तत्र शास्त्रकारैः समुद्घुष्यमाणत्वात् तादृशैर्मन्त्रैः कृतं कर्म न केवलं निष्फलं भवति, अपि तु "मन्त्रो हीनः स्वरतो वर्णतो वा" इति न्यायेन कर्मकर्तु-र्यजमानस्यानिष्टमपि सम्पादयति। अतश्च यद्याचार्यः अधीतवेदः स्वशाखीयो लभ्यते तदा स एव ग्राह्यः। यदि तादृशो न लभ्यते तर्हि अन्यशाखीयोऽपि यदि यजमानशाखां विधिवदधीत्य तच्छाखीयान् पदार्थांश्च सम्यग् जानाति, स एव कर्मसु नियोज्यः। न तु स्वशाखीय इति कृत्वा अनधीतवेदः अपरिज्ञातकर्मकलाप आचार्यो योजनीयः। एतदभिप्रायेणैव सर्व आचार्यो यजमानशाखीय एव। अन्यथाऽऽचार्यस्य यजमानशाखाध्ययनाभावे तच्छाखीयपदार्थानां निर्वाह एव न स्यात्। स्वशाखयाऽनुष्ठाने वैगुण्यं स्यात् इति प्रतिष्ठेन्दु-शान्तिकमलाकरादावुक्तम्। एवं च रुद्रकल्पद्रुमे—"रुद्राध्यायस्य च यजुर्वेदशाखास्वेव आम्नातत्वेन तदितरवेद-

शाखासु तदभावेन च यजुर्वेदभिन्नवेदशाखीयानां रुद्राध्ययनाभावेन तज्जपादौ तेषामनर्हत्वम्।" अत एव बह्वृचाश्छन्दोगा आथर्वणाश्च विप्रा रुद्रजपादावार्त्विज्ये वर्ज्याः। यथाह शाङ्खायनः—

"बह्वृचाः सामगाश्चैव तथा चाथर्वणा द्विजाः।
महारुद्रजपे नैव शस्तास्ते श्रुतिधर्मतः॥"

इति यदुक्तं तत् अनधीतरुद्राध्यायस्य आर्त्विज्यनिषेधपरतया नेयम्। न तु रुद्राध्यायिनोऽपि अन्यशाखीयस्य निषेधपरम्। अत एव च "बह्वृचाद्या अपि याजुषरुद्राध्ययनवन्तो रुद्रजपसमर्थास्तु वरीतव्या" इत्युत्तरत्र तत्रैव लिखितम्। एवं सर्वत्र यजमानसमशाखीया इति पद्धतिकाराणामभिप्रायो बोध्यः। यद्यपि—

"वेदैकनिष्ठं धर्मज्ञं कुलीनं श्रोत्रियं शुचिम्।
स्वशाखाढ्य-(ज्ञ) मनालस्यं विप्रं कर्मारमीप्सितम्॥"

इति श्लोके आचार्यस्वरूपनिरूपणपरे स्वशाखाढ्यमित्यस्ति पदम्। तेन च स्वशाखीय एव आचार्यः कर्तव्य इति प्रतिभाति, तथापि अन्यवाक्यस्य उपनयनप्रकरणस्थत्वात् उपनेतृस्वरूपमात्रनिरूपणपरत्वम्, न तु शान्तिक-पौष्टिकादि-सर्वकर्मसु अस्य वचनस्य प्रवृत्तिः सम्भवति। अन्यप्रकरणस्थस्य वचनस्य अन्यत्र गन्तुमसामर्थ्यात्। अत एव च सर्वैरपि निबन्धकर्तृभिर्वचनमिदमुपनेतुराचार्यस्य स्वरूपनिरूपणपरतयैव व्याख्यातम्, यथा-स्मृतिमुक्ताफले उपनयनकर्त्तारमाह व्यासः 'वेदैकनिष्ठ'मिति। वीरमित्रोदय-संस्काररत्नमालादावपि उपनेतृपरकत्वमेवास्य वचनस्योपवर्णितम्, न तु कारयितृपरकत्वमुक्तं कुत्रापि। लोकेऽपि च इदानीं यजुराद्येकशाखीयः स्वशाखां प्रथमतोऽधीत्य ततो वेदान्तर्गतं शाखान्तरमप्यधीयानः तद्वेदीयं हौत्रमौद्गात्रं च श्रौतेषु कर्मसु करोत्येव। शिष्टा अपि तत्कर्म सदाचारतया परिगृह्णन्त्येव! अतश्चेदं सिद्धं भवति प्रथमतः स्वशाखाध्यायी स्वशाखीय आचार्यत्वेन कर्मसु नियोक्तव्यः। तदलाभे अन्यशाखीयोऽपि यजमानशाखामधीतवाँश्चेत् सोऽपि नियोगमर्हति। प्रथमतः स्वशाखीयस्यैव प्रतीतेः; इतरशाखीयस्य विलम्बेन प्रतीतेश्च। प्रथमोपस्थित-परित्यागे कारणाभावाच्चेति शम्।

उपनयने गायत्र्युपदेशप्रकारः

सर्वस्मृतिपर्यालोचनया सर्वगृह्यपर्यालोचनया च उपनयने गायत्र्युपदेशे अयं क्रमः प्रतीयते। ओङ्कारपूर्वं व्याहृतिपूर्वं च आचार्यः प्रथमं पादं स्वयमुक्त्वा ततस्तं वाचयेत्। द्वितीयपादमर्द्धर्चमुक्त्वाऽथ वाचयेत्। यदि माणवकः पादं पादम् अर्द्धर्चमर्द्धर्चं सर्वां च वक्तुं न शक्नुयात् तर्हि यथाशक्ति तं वाचयेत्।

तृतीयस्मिन्वारे माणवकेन सहैव सर्वामृचम् आचार्यो ब्रूयात्, न तु पूर्वस्मिन्वारद्वये इव प्रथममाचार्यस्योक्तिः, अनन्तरं माणवकस्योक्तिः।

"अथास्मै सावित्रीमन्वाह पच्छोऽर्द्धर्चशः सर्वां च तृतीयेन सहानुवर्त्तयन्" इति पारस्करगृह्यात्।

तृतीयेनेति हेतौ तृतीया, न तु सहयोगे। तथा सति 'पुत्रेण सहागतः पिता'इत्यस्य यथा पुत्रेण सह पितुरागमनमर्थः तथा अत्रापि तृतीयस्यैवावर्तनं स्यात्। अतस्तृतीयस्मिन्वारे आचार्यो माणवकेन सहैव अनुवदेदिति सूत्रार्थः। अयमेवार्थः अत्र तु सहपाठो विशेष इति ब्रुवतां पद्धतिकाराणामपि अभिप्रेतः। अत्रापि यदि समग्रं मन्त्रमभिधातुं न शक्नुयात् माणवकस्तर्हि यथाशक्त्येवाभिधानम्। परन्तु उभाभ्यां सहैव वक्तव्यम्, न तु पूर्ववद्वचनानुवाचने। एवं सति ये प्रणवव्याहृतिरहितामेव गायत्रीमुपनयने उपदिशन्ति तृतीयस्मिन्नपि वारे प्रथमद्वितीयोपदेशवत् अनुवचनं च कुर्वन्ति न सहानुवचनम्, तेषामनुष्ठाने न किञ्चित्प्रमाणं पश्यामः।

अत्र प्रमाणमाश्वलायनगृह्ये—

"जान्वाच्योपसंगृह्य ब्रूयादधीहि भोः सावित्रीं भो अनुब्रूहीति। पाणिभ्यां च पाणी संगृह्य सावित्रीमन्वाह पच्छोऽर्द्धर्चशः सर्वां यथाशक्ति वाचयीत।"

आश्वलायनकारिकायाम्—

"ओंभूर्भुवःस्वःपूर्वान्तु सावित्रीं वाचयेदथ।
पादं पादं च सावित्र्याः स्वयमुक्त्वाऽथ वाचयेत्॥
ततस्त्वर्द्धर्चमर्द्धर्चं सर्वां तामथ वाचयेत्।
एवं वक्तुमशक्तं तु तं यथाशक्ति वाचयेत्॥"

आपस्तम्बसूत्रे—

"सावित्रीं भो अनुब्रूहीति तस्माऽअन्वाह तत्सवितुरिति पच्छोऽर्द्धर्चशस्ततः सर्वां व्याहृतीर्विहृताः पादादिस्थलेषु वा तदार्द्धर्चयोरुत्तमां कृत्स्नायाम्।"

पारस्करगृह्ये—

"अथास्मै सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय समीक्षिताय।", "पच्छोऽर्द्धर्चशः सर्वां च तृतीयेन सहानुवर्त्तयन्।"

गोभिलगृह्ये—

"तस्माऽ अन्वाह पच्छोऽर्द्धर्चश ऋक्श इति महाव्याहृतयश्च ओंकारान्ताः।" (२।१०।३९-४०)

लौगाक्षिः—

"ओं भूर्भुवः स्वरित्युक्त्वा तत्सवितुररिति सावित्रीं त्रिरन्वाह पच्छोऽर्द्धर्चशः सर्वामन्ततः।"

शौनकः—

"सावित्रीं स्वयमाचार्यः पूर्वं पच्छस्तथैव तम्।
शिष्यं च वाचयेत्पश्चादुच्चार्यार्द्धर्चशः स्वयम्॥
तथैव वाचयेच्छिष्यमथोक्त्वा तु कृतां स्वयम्।
पूर्वं तथैव शिष्यश्च वाचयेदित्ययं क्रमः॥
त्रिष्वप्येतेषु पद्येषु यथा शिष्यस्तु शक्नुयात्।
वक्तुं तथैव आचार्यो वाचयेदवधानतः॥"

यमः—

"ओङ्कारपूर्विकास्तिस्रः सावित्रीं यश्च विन्दति।
चरति ब्रह्मचर्यं च स वै श्रोत्रिय उच्यते॥"

तिस्रः व्याहृतीरिति शेषः।

स्मृत्यन्तरे—

"ओंपूर्वा व्याहृतीस्तिस्रः समस्तास्तु सकृद्वदेत्।
पच्छस्त्वर्द्धर्चशः सर्वां सावित्रीं त्रिर्वदेदथ॥"

अत्र सावित्रीं वाचयन् सन्धिकृतं वर्णविकारं नान्यथा कुर्वीतेति स्मृतिकौस्तुभे।

चौलोपनयनयोः शिखास्थापनविचारः

उपनयने उपनेयस्य माणवकस्य चूडाकर्मणि धृतां शिखां वर्जयित्वा वपनम् उत सशिखवपनम् इति विचारे इदमत्र प्रतिभाति—

चौले तावद् बौधायनापस्तम्बाश्वलायन-पारस्करादिमहर्षिभिः—

'अथैनमेकशिखस्त्रिशिखः पञ्चशिखो वा यथैवैषां कुलधर्मः स्यात् यथर्षि शिखां निदधातीत्येके।"(बौ० गृ० २। ४। १७।१७)

"यथर्षि शिखां निदधाति यथैवैषां कुलधर्मः स्यात्।" (आप० गृ० १।६।१५)

"यथामङ्गलं केशशेषकरणम्।"(पार० गृ० २। १। २१)

इत्यादिसूत्रैः शिखाधारणस्य आवश्यकता प्रतिपादिता।

"केशशेषं ततः कुर्याद्यस्मिन्गोत्रे यथोचितम्।
वासिष्ठा दक्षिणे भागे उभयत्रापि काश्यपाः॥

शिखां कुर्वन्त्यङ्गिरसः शिखाभिः पञ्चभिर्युताम् ।
परितः केशपङ्क्त्या वा मुण्डाश्च भृगवो मताः ॥"

इत्यादिस्मृत्या च कुमारस्यार्षसङ्ख्यया कुलधर्मतो देशविशेषे शिखारक्षणं विधीयते । उपनयनेऽपि—"कुमारं भोजयित्वा तस्य चौलवत्तूष्णीं केशानुप्य स्नातं शुचिवाससं बद्धशिखं यज्ञोपवीतं प्रतिमुञ्चन् वाचयति" (२।५।७)

इति बौधायनसूत्रे चौलवदिति चौलधर्मातिदेशाद् बद्धशिखमिति कुमारविशेषणाच्च मध्यशिखावर्जमेव उपनयने वपनमभिप्रेतमिति गम्यते । सशिखवपने पञ्चशिखमिति विशेषणं कथं सङ्गच्छेत ?

आपस्तम्बगृह्येऽपि "प्रतिदिशं प्रवपति" इति दिग्वपनस्यैव विधानं न तु सर्ववपनस्य । "पर्युप्तशिरसमलङ्कृतमानयन्ति" (२। २। ५) इति पारस्करगृह्येऽपि प्रतिदिग्वपनमेवाभिप्रेतमस्ति । अतएव संस्कारकौस्तुभे—"चौलकालधृतशिखानां मध्ये मध्यशिखेतरशिखानामुपनयनकाले वपनं कार्यम् ।

"मध्ये शिरसि चूडा स्याद्वसिष्ठानां तु दक्षिणे ।
उभयोः पार्श्वयोरत्रिकश्यपानां शिखा मता ॥"

इति वृद्धोदाहृतवचसि मध्यशिखाया निमित्तविशेषसंयोगं विना विहिताया नित्यत्वेन, सदा बद्धशिखेनेति नित्यविधिविषयत्वौचित्यादितरशिखानामनुपनीतधार्यत्वेन माधवोक्तेश्च" इत्युक्तम् । तासां मध्यशिखावर्जमुपनयने वपनं कार्यम् । 'रिक्तो वा एष यन्मुण्डस्तस्यैतदपिधानं यच्छिखा' इति श्रुतेरिति कमलाकरोऽप्याह ।

"केशश्मश्रु वपते वाऽशिखम्" (२ । १ । ६) इति कत्यायनीयश्रौतसूत्रे कर्काचार्योऽप्येवम् ।

किञ्च—'सदोपवीतिना भाव्यं सदा बद्धशिखेन च' इति भृगुस्मृतौ सदाशब्दश्रवणात् नित्यत्वप्रतीत्या नित्यानामकरणे प्रत्यवायापत्त्या—

"शिखां छिन्दन्ति ये मोहाद् द्वेषादज्ञानतोऽपि वा ।
तप्तकृच्छ्रेण शुद्ध्यन्ति त्रयो वर्णा द्विजातयः ॥"

इति हारीतेन शिखाविनाशे प्रायश्चित्ताभिधानात् ।

"अथ चेत्प्रमादान्निःशिखं वपनं स्यात्तदा कौशीं शिखां ब्रह्मग्रन्थिसमन्वितां दक्षिणकर्णोपर्याशिखाबन्धाद्धत्तिष्ठेत्" इति वीरमित्रोदये काठकगृह्ये शिखानाशे प्रतिनिधिविधानाच्च चौलप्रभृति यावज्जीवं शिखाया अवश्यधार्यत्वमवगम्यते । एवं पुरुषोद्देशेन विहितत्वात् पुरुषार्थस्यापि शिखाधारणस्य—

"विशिखो व्युपवीतश्च यत्करोति न तत्कृतम्"

इति पूर्वोक्तयैव स्मृत्या शिखां विना कर्मानुष्ठाने कर्मणो वैफल्यस्मरणात् शिखाधारणस्य सर्वकर्माङ्गत्वमवगम्यते। यद्यपि आर्षसङ्ख्याकशिखाविधानेन "गोत्रचिह्नं शिखाकर्म" इति शिखाधारणस्यैव गोत्रचिह्नत्वावगतेस्तस्य "वासिष्ठानां नाराशंसो द्वितीयः प्रयाजः" इत्यादौ गोत्रसाध्ये कर्मण्युपयोग इति गोत्रख्यापकत्वमात्रं दृष्टं फलमित्यवगम्यते, तथापि संस्कारेषु शिखाकर्मणोऽपि पाठात् इतरसंस्कारवत् अस्याप्यदृष्टार्थत्वमेव। गोत्रज्ञापनं तु आनुषङ्गिकं फलं न तु मुख्यम्; द्विजत्वचिह्नार्थं यज्ञोपवीतवत्।

तेन शिखाधारणस्य अदृष्टार्थत्वावगमात् अकरणे प्रत्यवायभिया अवश्यं धार्यैव शिखेति। सशिखकृतचौरमिति क्वाचित्कलेखनं तु श्रुतिस्मृतिसूत्राज्ञानमूलकं श्रुतिसूत्र-विरोधात् संस्कारभास्करादिग्रन्थेष्वनुपलम्भाच्चासङ्गतमेव। कौथुमराणायनादिच्छन्दोग-माणवकस्य तु प्राक् समावर्त्तनात् सशिखमेव वपनम्।

"केशश्मश्रुलोमनखानि वापयति शिखावर्जम्" (गो० गृ० सू० ३।४।२४)

इति गोभिलगृह्ये समावर्तने शिखारहितवपनोपदेशात् अर्वाक् सशिखवपनावगतेः।

"सशिखं वपनं कार्यमास्नानाद् ब्रह्मचारिणाम्" इति कर्मप्रदीपे कात्यायनोक्तेश्च।

"यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव" (शु० य० १७।४८) इति तु छन्दोगपरमिति निर्णयसिन्धौ।

इदं च विशिखा विगतशिखा मुण्डितमुण्डा इत्यस्मिन्नर्थे योज्यम्। विशिखपदस्य विविधशिखावत्त्वरूपमर्थमङ्गीकुर्वतां न्यायसुधा-मीमांसाकौस्तुभकारादीनां मते तु छन्दोगेतरपरमिदम्। वस्तुतस्तु विविधशिखायुक्तत्वमेवात्र विशिखपदार्थः। अन्यथा तस्मिन्मन्त्रे बाणैः सह कुमाराणां दृष्टान्तकरणस्यासङ्गत्यापत्तेः। यथैव विविधशिखाः कुमारा आगच्छन्ति एवं युद्धे अनेकबाज-(पत्र) युक्ता बाणा आगच्छन्तीति दृष्टान्तार्थः। यदि विविधशिखपदस्य मुण्डितशिरस्कत्वमप्यर्थोऽभिप्रेतस्तदा बाजयुक्तैर्बाणैः सह मुण्डितशिरस्कानां कुमाराणां कथं सादृश्यमुपपन्नं स्यात्।

अत एव यस्य माणवकस्य स्वगृह्ये उपनयने सशिखमुण्डनं कण्ठतोऽभिहितं तं वर्जयित्वा अन्यस्य कस्याप्युपनयने सर्वमुण्डनं न कार्यमेव। यत्र तु प्रायश्चित्तादौ सामवेदिमाणवकोपनयने सत्रे च सर्वमुण्डनं विशेषतोऽभिहितं तत्र सदोपवीतिनेति सामान्यशास्त्रस्याप्रवृत्त्या विशिखेन कर्मानुष्ठानेऽपि न प्रत्यवाय इति। अत्र प्रयोगदीपे विशेषः। तथा हि—

"अत्र सशिखं वपनं कारयन्ति वृद्धाः। तत्र वृद्धाचार एव शरणम्।"

"विशिखो व्युपवीतश्च यत्करोति न तत्कृतम्" इति विशिखस्य कर्मनिषेधात्। यत्तु मनुः—

"मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटः ।"

यच्च गौतमः—"मुण्डी शिखी वा" इति ।

यच्च कात्यायनः—

"सशिखं वपनं कार्यमास्नानाद् ब्रह्मचारिणः ।"

इति, तत्सामगविषयम् ।

तथा च विष्णुपुराणे लिङ्गम्—

"एते लूनशिखास्तस्य दशनैरचिरोद्गतैः ।
कुशकाशा विराजन्ते वटवः सामगा इव ॥" इति ।

न च 'पर्युप्तशिरसम्' इति 'परीति सर्वतो भावम्' (निरुक्त १।१।५) इति यास्कवचनाद् भविष्यतीति वाच्यम्; परितः समन्तादिति तस्यार्थः, पर्युह्य परिस्तीर्येत्यादौ तथा दृष्टत्वात् ।

किञ्च "अधिपरी अनर्थकौ" (पाणि० सू० १।४।९३) इति पाणिनिसूत्रेणानर्थकस्य परीत्यस्य कर्मप्रवचनीयसंज्ञा प्राप्नोति, अतोऽनर्थकोऽपि परिशब्दो दृश्यते। अत एव 'परित उप्तं मुण्डितं शिरो यस्य' इति कर्कादिभिर्व्याख्यातं, न तु 'परितः सर्वतः' इति व्याख्यातम्। कातीयश्चाशिखमेव वपनं कारयति । कथं वृद्धैः शाङ्खायनशाखिभिः 'सशिखं वपनं कार्यम्' इति मूलं न विद्म इति ।

उपाकर्मोत्सर्गनिर्णयः

उपाकर्मोत्सर्गविषये कर्तव्यपदार्थेषु, अग्नौ, अधिकारे च बहवो बहुधा विवदन्ते, अतस्तन्निर्णयार्थं यत्यते ।

उपाकर्मशब्दार्थः

तत्र प्रथमं तावत् उपाकर्म-शब्दार्थो निरुच्यते। सूत्रकारास्तावत् "अथातोऽध्यायोपाकर्म" (पार० गृ० सू० २।१०।१) इत्यादिना "अध्यायोपाकर्म" इत्यनेन कर्मेदं अध्यायोपाकर्म इति व्यवहरन्ति ।

मन्वादयोऽपि "अध्यायानामुपाकर्म" "वेदापाकरणे प्राप्ते" "छन्दसामुपाकरणम्" "अध्यायोपाकर्म" (आप० गृ० ५।१।२), "श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य" (आप० धर्म० १।३।१) इत्यादिपदेन व्यवहरन्ति। अत एव कर्मणोऽस्य "वेदोपाकरणम्" इति वा "अध्यायोपाकरणम्" इति वा मुख्यं नामधेयम्। 'उपाकर्म' इति तु एकदेशेन व्यपदेशः। अध्यायोपाकर्म—अधीयन्त

इत्यध्याया वेदाः। "स्वाध्यायोऽध्येतव्यः" इत्यत्र अध्यायशब्दस्य तथैव व्युत्पत्तेः शास्त्रेषु दर्शनात्। अध्यायानामुपाकर्म प्रारम्भोऽध्यायोपाकर्म। एवं च वेदाध्ययनारम्भ एव अध्यायोपाकर्मपदार्थ इति फलितम्। अत एव वीरमित्रोदयकारोऽपि "अधीयन्त इत्यध्याया वेदाः, तेषामुपाकर्म प्रारम्भः" इत्येवं व्याचख्यौ।

"उपाक्रियते प्रारभ्यते वेदस्याध्ययनं येन कर्मणा तदुपाकरणं नाम कर्मविशेषो विद्यासंस्कारकः" इत्युक्तं गोभिलगृह्यभाष्येऽपि।

"अध्यायो नाम वेदः स्यात्तस्योपाकरणं पुनः।
आरम्भणमिति प्रोचुर्भवनागादयः स्फुटम्॥" इति।

"उपाकरणशब्देन वेदारम्भणमुच्यते" इति च गृह्यकारिकायाम्। इदं च कर्म केवलेनोपाकर्मपदेनापि व्यवह्रियते ग्रन्थेषु।

"उपाकरणोत्सर्जने व्याख्यास्यामः" (आप० गृ० ५।१।१)
"प्रौष्ठपदीं० हस्तेनोपाकरणम्" (गो० गृ० ३।३।१)
"अथोपाकरणम्" (शां० गृ० ४।५।१)
"उपाकर्म न कुर्वन्ति क्रमात्सामर्ग्यजुर्विदः।"
"उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः।" इति।

उत्सर्जनशब्दार्थः

एवमुत्सर्जनपदार्थोऽपि श्रावण्यामारब्धस्य पौष्यां विवरणमेव। इदमपि च अध्यायोत्सर्ग-वेदोत्सर्गादिपदेन मुख्यतया व्यवहरणयोग्यमपि केवलोत्सर्जनपदेनापि व्यवह्रियते।

साङ्गस्यैवोपाकर्मणः कर्तव्यता

यद्यप्यत्रोपाकर्मणि वेदाध्ययनस्यैव विधेयत्वात् तस्यैव प्राधान्यं प्रतीयते, तथापि केवलस्य तस्य प्रधानमात्रानुष्ठानस्य क्वचिदर्थानुष्ठानादर्शनात् साङ्गस्यैव कर्त्तव्यताप्रतीतेः साङ्गमेवेदं कर्मानुष्ठेयम्।

पारस्करमतेनोपाकर्मणि कर्तव्यपदार्थानां निरूपणम्

तत्र पारस्करमते स्वगृह्योक्तविधानेन आज्यभागान्ते कर्मणि कृते प्रतिवेदं चतस्रो वेदाहुतयः, ततः सप्त अन्या आहुतयः, तत आचार्यकर्तृकास्त्रयोऽक्षतधानहोमाः, ततः समिद्धोमः, आचार्येण सर्वेषामध्यायादीनां मन्त्राणां पठनम्, तत उत्तरतन्त्रमित्येतावन्तः पदार्था उपाकर्मण्यनुष्ठेयाः।

उत्सर्जने कर्तव्यपदार्थाः

उत्सर्जने च उदकसमीपं गत्वा देवादीनां सन्तर्पणं सावित्र्याश्चतुर्वारमुच्चारण-

पूर्वकं "विरताः स्मः" (पा० गृ० सू० २) इति कथनम्, तत उपाकर्मवत्सर्वेषा-मध्यायादीनां मन्त्राणां पठनमित्येतावन्ति कर्माणि ।

गणस्नानर्षिपूजनयोरुपाकर्मोत्सर्जनाङ्गत्वम्

यद्यपि सूत्रकारमतपर्यालोचनया उपाकर्मण्युत्सर्गे च एतावन्त एव पदार्थाः कर्तव्यतया प्रतिभान्ति, तथापि स्मृत्यन्तरपर्यालोचनया गणस्नानमृषिपूजनं च उपाकर्मोत्सर्गाङ्गत्वेन विहितत्वात्कर्तव्यमेवेत्यवगम्यते-(ऋष्यादितर्पणं तूत्सर्जन एव) । तथा च कात्यायनस्मृतिः—

"वेदाश्छन्दांसि सर्वाणि ब्रह्माद्याश्च दिवौकसः ।
जलार्थिनोऽपि पितरो मरीच्याद्या महर्षयः ॥
उपाकर्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः ।
पिपासूननुगच्छन्ति संहृष्टा ह्यशरीरिणः ॥
समवायश्च यत्रैषां तत्रान्ये बहवो मलाः ।
नूनं सर्वे क्षयं यान्ति किमुतैकं नदीरजः ॥" इति ।

'उपाकर्मणि चोत्सर्गे रजोदोषो न विद्यते' इत्यादिना चोपाकर्मोत्सर्जनयोः स्नानस्याप्यवश्यकर्तव्यता ।

आचार्यः शिष्याश्च गणशः सम्भूय यत्स्नानं कुर्वन्ति तद् गणस्नानम्, ऋषीणां तत्तन्मन्त्रद्रष्टॄणां यत्पूजनं तदृषिपूजनम् । अनेनैव प्रमाणेन गणस्नानमृषिपूजनं चोपाकर्मोत्सर्जनयोरुभयोरप्यङ्गमित्यपि सिद्ध्यति ।

उपाकर्मोत्सर्जनयोः कालः

अनयोर्गृह्यान्तरे तत्तच्छाखिन उद्दिश्य विभिन्नाः काला विहिता यद्यपि, तथापि अस्माकं वाजसनेयिनां 'श्रवणेन श्रावण्यां पौर्णमास्याम् ।', 'श्रावणस्य पञ्चमीꣳ हस्तेन वा ।' (पार० गृ० सू० २ । ६ । २-३) इति सूत्राभ्यां उपाकर्मणः श्रावणी पूर्णिमा, श्रावणशुक्लपञ्चमी वा मुख्यकालतया विहिता ।

उत्सर्गस्य 'पौषस्य रोहिण्यां मध्यमायां वाऽष्टकायामध्यायानुत्सृजेयुः' (पार० गृ० सू० २ । १२ । १) इति सूत्रात् पौषकृष्णाष्टमी कालः । अतस्ते उभे अपि स्व-स्वकाले एवानुष्ठेये पृथक् पृथगिति मुख्यः पक्षः । यदि दैवान्मानुषाद्वा प्रतिबन्धात्पौषकृष्णाष्टम्यामुत्सर्गो नानुष्ठातुं शक्यते, तदा उपाकर्मदिन एव प्रथमत उत्सर्गमनुष्ठाय तत उपाकर्मानुष्ठेयम् ।

'पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेऽथवा' इति वचनात् ।

इदन्तु द्वितीयाद्युपाकर्मविषयम् । प्रथमोपाकरणस्तु ततः पूर्वमुपाकरणा-भावेनोत्सर्गस्याप्रसक्त्या तस्मिन्दिने केवलमुपाकर्मैवानुष्ठेयम् ।

केवलमुत्सर्गकर्मणोऽनुष्ठानस्य निर्मूलत्वम्

अनेनैव न्यायेन उपाकर्म अननुष्ठाय केवलमुत्सर्गकर्मणोऽनुष्ठानं क्वचिद् दृष्टं तन्निर्मूलमेवेति प्रतीमः ।

उत्सर्जनपदार्थो हि श्रावण्यामारब्धस्य वेदाध्ययनस्य परित्यागरूप इत्युक्तं प्राक्, यदि पूर्वमारम्भ एव न स्यात् तर्हि कस्योत्सर्गः क्रियेत, अत उपाकरणमुत्सर्गश्चेति द्वयं तदधिकारिभिः कार्यम्, नान्यदुपाकरणमात्रमुत्सर्गमात्रं वा। अत एव 'अधीत्योत्सृजेयुः' (पार० गृ० सू० २ । ११ । १०) इति भगवान् पारस्करोऽप्यवोचत्। किञ्च केवलोत्सर्गाचरणेऽप्युपाकर्माकरणे हेमाद्र्युक्तप्रायश्चित्तमपि न सङ्गच्छते। तथाहि—

"अकृत्वा ब्रह्मचारी वा द्विजो वा वेदसम्मतम् ।
एवं श्रावणकं होमं त्यक्त्वा यदिह वर्तते ॥
तप्तत्रयं व्रती कृत्वा गृहस्थोऽपि द्वयं चरेत् ।
कृत्वैतद्वार्षिकं प्रोक्तं शुद्धिमाप्नोति पूर्वजः ॥
प्रत्यब्दं यस्त्यजेत्कर्म श्रावणाख्यं पवित्रजम् ।
पतितः स तु विज्ञेयः सर्वधर्मबहिष्कृतः ॥" इति ।

उपाकर्मोत्सर्जनयोस्त्रैवर्णिकानां त्रयाणामाश्रमिणां साग्निकानां निरग्नीनां चाधिकारः

अत्र च त्रैवर्णिकानां वेदाध्ययनाधिकारिणां यथाऽधिकारस्तथा ब्रह्मचारि-गृहस्थ-वानप्रस्थानां त्रयाणामप्याश्रमिणामधिकारः;

"उपाकर्मोत्सर्जनञ्च वनस्थानामपीष्यते ।
धारणाध्ययनाङ्गत्वाद् गृहिणां ब्रह्मचारिणाम् ॥"

इति गोभिलवचनात्।

"वेदव्रतानि कृत्वैव विप्रो यश्चोद्वहेत्ततः ।
अधीयीत गृहस्थोऽपि नियमाद् ब्रह्मचारिणाम् ॥"

इति संस्कारगणपतौ वचनाच्च।

'समावृत्तो ब्रह्मचारिकल्पेन। यथान्यायमितरे। जायोपेयेत्येके' (३।४।११-१३) इत्याश्वलायनगृह्यसूत्रेषु गृहस्थानामपि ग्रहणाध्ययनविधानात् मन्वादावुपाकर्मणो गृहस्थधर्ममध्ये पाठाच्च ।

येन नियमविशेषेण युक्तो ब्रह्मचारी अधीयीत तेनैव नियमेन समावृत्तोऽप्यधीयीत । समावृत्तादितरे ब्रह्मचारिणस्तु यथान्यायं स्वविध्युक्तप्रकारेण-

धीयीरन्, तथा जायोपेतो गृहस्थोऽपि ब्रह्मचारिवन्नियमोपेतोऽधीयीत । न च समावृत्त-गृहस्थयोर्ग्रहणाध्ययनाधिकारे समाप्य 'वेदं समाप्य स्नायात्' (पा० गृ० सू० २ । ६ । १) इति विरुध्येतेति वाच्यम्; तस्य वचनस्य विद्यास्नातकविषयत्वात् । अतएव 'वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा' इति पक्षद्वयोपन्यासो दर्शितः । ये नाम गृहस्था ग्रहणाध्ययनं न कुर्वते तेषां धारणाध्ययनाङ्गत्वेनापि उपाकर्मानुष्ठानम् । पूर्वोक्ते कात्यायनवचने धारणाध्ययनाङ्गत्वस्यापि श्रवणात् । "एतच्च ग्रहणाध्ययनं गृहस्थानामपि" इति हेमाद्रिश्च ।

अधिकारिनिर्णयः

अत्राधिकारिविषये कर्काचार्या अन्यथैव मन्यन्ते । ते हि अध्ययनाङ्गत्वादुपाकर्मणः, तदन्तर्गतहोमानां गृह्याग्निसाध्यत्वात् यो नाम साग्निरध्यापयिता च स एवाचार्यः शिष्यैः साकमधिकारी, नान्योऽध्यापयन्नाप्यनग्निः, साग्निरप्यनध्यापयन् इत्यभिप्रयन्ति । इदं हि तेषां वचनम्—"अध्ययनमध्यायः तस्योपाकर्म स्वीकरणम्, तच्चाग्निमतोऽध्ययनप्रवृत्तस्यैव भवति, अतोऽध्यापयतोऽपि, निरग्नेः साग्नेरप्यनध्यापयतो नाधिकारः" इति । तदेवानुसृत्य अन्येऽपि केचन साग्नेरेवाधिकारं मन्वते । तत्र कर्मेदं लौकिकेऽग्नौ कर्तव्यं मा वा कर्तव्यमिति समनन्तरमेवाग्निनिर्णयनिरूपणावसरे निरूपयिष्यामः । सम्प्रति अनध्यापयतोऽधिकारोऽस्ति नवेत्येव विचारयामः ।

"प्रत्यब्दं यदुपाकर्म सोत्सर्गं विधिवद् द्विजैः ।
क्रियते छन्दसां तेन पुनराप्यायनं भवेत् ॥
अयातयामैश्छन्दोभिर्यत्कर्म क्रियते द्विजैः ।
क्रीडमानैरपि सदा तत्तेषां सिद्धिकारणम् ॥"

इति कात्यायनमहर्षिवचनेन तत्तत्कर्मविशेषे, ब्रह्मयज्ञादौ पठ्यमानानां मन्त्राणामयातयामत्वसिद्ध्यर्थं च उपाकर्मोत्सर्जनयोरवश्यकर्तव्यता प्रतीयते ।

"यावज्जीवमग्निहोत्रं जुहुयात्स्वर्गकामः"
"यावज्जीवं दर्शपूर्णमासाभ्यां यजेत" इतिवत् ।

प्रत्यब्दमिति वीप्साश्रवणाच्च यावज्जीवं नित्यवत्कर्तव्यताऽपि प्रतीयते । स्मृतावस्यामाचार्यपदाश्रवणात् अधीतानां छन्दसाम्, तत्क्रियादिषु पठ्यमानानां च मन्त्राणां वीर्यतमत्वसिद्ध्यर्थमेव प्रतिवत्सरमुपाकर्मोत्सर्जनयोरविशेषेण विधानप्रतीतेर्यावज्जीवं केनाप्याचार्यसमीप एव वस्तुमशक्यत्वात् स्वतन्त्रेणापि पुरुषेणो-

पाकर्मोत्सर्जनाख्यमिदं कर्मद्वयं कर्तुं शक्यमित्यवगम्यते। तथैव सार्वदेशिकः शिष्टाचारोऽपि दृश्यते। न चाविशेषश्रुताया अस्याः स्मृतेः कर्कवचनेन सङ्कोच इति वाच्यम्; स्मृतिवचनस्य भाष्यवचनेन सङ्कोचानुपपत्तेः। अतएव "उपाकर्मोत्सर्जने ब्रह्मचारि-समावृत्त-वानप्रस्थ-गृहस्थैः सर्वैः कर्तव्ये", "त्रयाणामपि वर्णानां ब्रह्मचारि-गृहस्थान्यतराश्रमिणामपि ग्रहणाध्ययनाङ्गतया धारणाध्ययनाङ्गतया वाऽनुष्ठेयम्, वानप्रस्थाश्रमिणामपि धारणाध्ययनाङ्गतयाऽनुष्ठेयम्" इति धर्मसिन्धु-स्मृतिकौस्तुभकारादयः। "प्रतिवर्षमेतत्कर्मद्वयं भेदेन तन्त्रेण वा विद्याकामैः सर्वैरप्यनुष्ठेयमेव" इति संस्कारगणपतौ च।

"अयातयामतां पूजां सारत्वं छन्दसां तथा।
इच्छन्त ऋषयोऽपश्यन्नुपाकर्म ततो बलात्॥
तस्मात्षट्कर्मनित्येनात्मनो मन्त्रस्य सिद्धये।
उपाकर्तव्यमित्याहुः कर्मणां सिद्धिमिच्छताम्॥"

इत्यादिवचनं चात्रानुकूलम्।

अत्र "कस्मिन्नग्नावुपाकर्मोत्सर्जने कर्तव्ये" इति विचारोऽवशिष्यते। तच्चाग्निमतोऽध्यापनप्रवृत्तस्येति वचनात् कर्काचार्याणामावसथ्येऽग्नावनुष्ठानमभिप्रेतम्, एतस्यायमाशयः—उपाकर्मणः सूत्रकारेण गृह्यमध्ये पाठात् गार्ह्याणां च कर्मणां गृह्याग्निसाध्यत्वात् उपाकर्मणोऽपि गृह्याग्निसाध्यत्वमेव। किञ्च कात्यायनेनापि छन्दोगपरिशिष्टे—

"न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम्।
स्वगर्भसत्क्रियार्थाश्च यावन्नासौ प्रजायते॥"

इति समिदाहुतेः स्वाग्न्यधिकरणकान्यकर्तृकहोमविषयनिषेधे समिदाहुतेरविषयत्वकथनात् "मुक्त्वैकां समिदाहुतिम्" इति सामान्यतः समिदाहुत्युपादानेऽपि अन्यस्याः कस्याश्चित् समिदाहुतेरप्रसिद्धत्वादुपाकर्मान्तर्गताया आचार्याग्न्यधिकरणिकायाः शिष्यकर्तृकसमिदाहुतेरेव ग्राह्यत्वावसायात्, उपाकर्मणस्तत्तद्बलादाचार्यावसथ्याग्नावेव कर्तव्यताप्रतीतेर्गृह्याग्निमात्रसाध्यमिदं कर्म, न तु निरग्नेरधिकार इति। इदमेव कर्कमतमवलम्बमाना धर्मसिन्धु-वीरमित्रोदय-रेणुकारिका-गृह्यकारिकाकारादयः। कात्यायनैस्तु—

"आवसथ्येऽग्नावेव होतव्यं न लौकिकाग्नौ" (धर्मसिन्धौ)

"उपाकर्मणि आचार्यस्याग्नौ समिदाहुतिर्यस्मात्। तेनाध्यापयतोऽपि निरग्नेः साग्नेरप्यनध्यापयतो नाधिकारः" (वीरमित्रोदये)

"अग्निमानधिकारीह नेतरः कर्कसम्मतिः ।
सम्यगध्ययने सोऽपि प्रवृत्तस्तस्य तत्क्रिया ॥"
(रेणुकारिकायाम्)

"अध्यायोपाकृतिं कुर्यात्तत्रौपासनवह्निना ।" इति ।
"कर्मद्वयमिदं केचिल्लौकिकाग्नौ प्रकुर्वते ।"
(गृह्यकारिकायाम्)

इति सुस्पष्टं साग्नेरेवाधिकारं समर्थयन्ते ।

एतद्वचनबलादेव लौकिकेऽग्नावनुष्ठानस्य अद्य यावत् शिष्टाचारपरिगृहीतस्याचारमूलकत्वं मन्यमानाः "यत्तु लौकिकेऽग्नौ तदनुष्ठानं तत्राचारमात्रं मूलम्" इति लिखन्ति हरिहरादयः ।

अग्निनिर्णयः

अत्र प्रसङ्गादग्निनिर्णय उच्यते । तत्र मनुः (३। ६७)—

"वैवाहिकेऽग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि ।
पञ्चयज्ञविधानञ्च पक्तिं चान्वाहिकीं गृही ॥" इति ।

अत्र गृह्यशब्दो गृह्यसूत्रोक्तकर्मपरः । अत एव—

"स्मार्तं वैवाहिके त्वग्नौ श्रौतं वैतानिकाग्निषु ।
कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही ॥
दायकालाहृते वाऽपि श्रौतं वैतानिकाग्निषु ॥"

इत्यादिव्यास-याज्ञवल्क्यवचनगतः स्मार्तशब्दो गृह्यकर्मपर इत्यपरार्कोऽपि 'स्मार्तं गृह्योक्तं कर्म प्रत्यहं नित्यस्मार्तहोम-पार्वणश्राद्धहोमादिरि'ति व्याचख्यौ । एतेन वचनजातेनेदं सिद्धं भवति श्रौतान्यग्निहोत्र-दर्शपूर्णमास-चातुर्मास्य-सोमयागादीनि श्रौताधाननिष्पन्नेष्वग्निषु कर्तव्यानि, गृह्योक्तानि च अष्टकादीन्यावसथ्याग्नावेव कर्तव्यानि । यानि च पौराणिकानि ग्रहयज्ञ-महारुद्र-शतचण्डी-विनायकशान्त्यादीनि शान्तिक-पौष्टिकानि कर्माणि तानि साग्नेरपि लौकिकेऽग्नावेव कार्याणि । एवं च सति "नौपासनश्रुतेः" (१।१।१६) इति कातीयश्रौतसूत्रव्याख्यानावसरे देवयाज्ञिकैः "भार्यादिरग्निर्दायादिर्वा तत्र गृह्याणि" इति गौतमधर्मसूत्रमुदाहृत्य तत्रत्यगृह्यपदस्य "गृहाय हितं गृह्यम्, गृह्यशब्दो दम्पतिपरः, अतो यद्दम्पत्योर्हितं दम्पतिसमवेतफलजनकं तत्सर्वमावसथ्याग्नौ कर्तव्यम्, नान्यद् गृह्योक्तमपि कर्म नामकरणादि स्वाग्नावनुष्ठातुं शक्यते । अत एव—

"न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम् ।
स्वगर्भसत्क्रियार्थांश्च यावन्नासौ प्रजायते ॥

अग्निस्तु नामधेयादौ होमे सर्वत्र लौकिकः ।
न हि पित्रा समानीतः पुत्रस्य भवति क्वचित् ॥"

इति कात्यायनोऽपि । अत्र "न स्वेऽग्नौ" इत्यनेन दम्पतिगामिफलककर्मातिरिक्तानि कर्मणां स्वेऽग्नौ निषेधे प्राप्ते "मुक्त्वैकाम्" इत्यादिना तस्य प्रतिप्रसवः क्रियते । उपाकर्मणि शिष्यकर्तृका या समिदाहुतिः, सीमन्तोन्नयनादिका ये गर्भसंस्काराः, ते तु वचनात् जातेष्टिवत् स्वेऽग्नावेव कर्तव्याः । मुक्त्वैतानि कर्माणि अन्यद् गृह्योक्तमपि यजमानगामिफलकं न चेत् न स्वेऽग्नावनुष्ठेयानि" इत्यभिहितम्, तन्न युक्तिसहम् । दम्पतिशब्दस्य गृह्यवाचकस्य क्वचिदप्यश्रवणात् । सीमन्तोन्नयनादीनां पारस्कराचार्येण "पञ्चसु बहिः शालायाम्" (पार० गृ० सू० १।४।२) इत्यादिना शालातो बहिरेव विधानात् तेषामावसथ्याग्निसाध्यत्वे विना वचनमावसथ्याग्नेः स्वायतनबहिर्भावस्य निषिद्धत्वात् । अन्यथा "औपासनमरण्यं हृत्वा" (पा० गृ० सू० ३ । ८ । ३) इति शूलगवे बहिःशालायां प्रणयनविधानस्य वैयर्थ्यापत्तेः । अतः साग्नेरपि सीमन्तोन्नयनादिकं लौकिकाग्नावेव । न स्वेऽग्नाविति वचनं तु छन्दोगपरिशिष्टान्तर्गतत्वाच्छन्दोगपरमित्येवास्थेयम् । समिदाहुतिस्त्वन्यविषयैव । तेषामुपाकर्मणि समिदाहुतेरभावात् । एवञ्च तत्प्रतिप्रसवबलात् उपाकर्मण आवसथ्याग्निसाध्यत्वं प्रतीयते । इदमेव च कर्काचार्याणामुपाकर्मण आवसथ्याग्निकथने मूलम् । किञ्च यानि गृह्योक्तानि कर्माणि तेषां सर्वेषां विशेषविधिविमुक्तानामावसथ्याग्निसाध्यत्वमेवाभिप्रेतम्, विशेषवचनमपि सूत्रकारेणैव यल्लिखितं स्यात्तदेवाचार्यैर्गृह्यते नान्यत्स्मृत्यन्तरोक्तमपि । यथा—उतूलपरिमेहादौ, तेषु हि "दावाग्निमुपसमाधाय" (पा. गृ. सू० ३।७।३) इत्यादिना सूत्रकारेणैव दावाग्न्यादिसाध्यत्वमुक्तम् । अत एव च श्राद्धस्यापि पार्वणादेः स्मृत्यन्तरेण लौकिकाग्निकर्तव्यतायां प्रतीयमानायामपि सूत्रकारानभिहितत्वात् स्मृत्यन्तरवचनमनादृत्य साग्नेरेव तत्राधिकारमभिप्रयन्ति कर्काचार्याः । परन्त्विदानीं निरग्नेरपि श्राद्धकर्मण्यधिकारः सर्वैरङ्गीक्रियते । खण्डितं च कर्कमतं गदाधर-निर्णयसिन्धुकारादिभिः । तद्वदेव उपाकर्मणोऽपि लौकिकाग्निसाध्यत्वमप्यङ्गीकर्तव्यम् । अत एव "औपासनवह्निना" इति तु "कर्मद्वयमिदं केचिल्लौकिकाग्नौ प्रकुर्वते" इति गृह्यकारिकोक्तलौकिकाग्निना विकल्प्यते । तत्र "अथाध्याप्यैरन्वारब्धः" इति सूत्रात् सशिष्यत्वे तदधिकारिकस्याचार्याग्नौ नान्यस्याग्नावन्यो जुहुयादिति निषेधाल्लौकिक एव । तदभावे तु स्मार्त्त इति निगर्वः, इति निर्णयसिन्धावुक्तम् । वस्तुतस्तु यजुर्वेदित्वेऽपि, यथा तैत्तिरीयाणां साग्नीनामपि उपाकर्मोत्सर्जने लौकिकाग्नावेव कर्तव्ये इति नियमः शास्त्रविहितः, एवमेव कातीयानामपि इति भ्रमो मा भूत्, किन्तु यो नाम साग्निकः स नियमेन आवसथ्याग्नावेवोपाकर्मोत्सर्जने कुर्यात्, निरग्निस्तु लौकिकाग्नौ कुर्वन्न निवार्यते इत्येतत्तात्पर्यकं कर्कवचनमिति युक्ततरं प्रतीमः ।

तदयं निर्गलितोऽर्थः। कात्यायनीयानां साग्निकत्वे स्वेऽग्नावुपाकर्मानुष्ठेयम्, निरग्नित्वे तु "प्रत्यब्दं यदुपाकर्म" इत्यादिना नित्यत्वश्रवणात् नित्यस्य परित्यागे प्रत्यवायोत्पत्तेस्तत्परिहारार्थं पार्वणश्राद्धादिवत् लौकिकेऽग्नावपि कर्त्तव्यमेव न तु परित्याज्यम्। एवमुत्सर्गेऽपि। बह्वृचादीनां तु उपाकर्मणि एकानेककर्तव्यता-विधानात् यदा एक एव करोति तदा स्वेऽग्नौ, यदा तु आचार्यः शिष्या इत्यनेके मिलित्वा कुर्वन्ति तदा साग्नेरपि लौकिकाग्नावेव। उक्तञ्च स्मृतिकौस्तुभकारैः— "ब्राह्मणोऽपि यदाऽन्यैः सह कर्म कुर्यात्तदा लौकिकाग्नौ, अन्याग्नौ क्रियमाणेन कर्मणाऽन्येषां फलासम्भवात्। यदा त्वेकः कुर्यात्तदा स्वगृह्याग्नौ कुर्यात्। बाधकाभावे गृह्यकर्मणां तत्रैवानुष्ठानौचित्यात्।" इति।

अतो निरग्निभिरपि अनध्यापयद्भिरपि स्वे स्वे जपादौ तत्तत्कर्मसु च प्रयुज्य-मानानां मन्त्राणामयातयामत्त्वसिद्ध्यर्थं वीर्यवत्त्वसम्पत्त्यर्थं च प्रत्यब्दमुपाकर्मो-त्सर्जने अवश्यमनुष्ठेये एवेति सिद्धम्।

—:०:—

हरिहरयाग-मीमांसा

पवित्रतमोऽयं भारतदेशो देशान्तराण्यतिशय्य विराजत इति न केवल-मस्माभिरुच्यते, किन्तु देशान्तरस्थैरपि निर्विचिकित्समभ्युपेयते। तत्कस्य हेतोः? देशान्तरेषु हि द्वितीय-तृतीयपुरुषार्थयोरेवार्थकामयोः प्राधान्यमवलम्बमाना-स्तत्रत्याः स्व-स्व-समाजस्य सभ्यतायाश्च विवृद्धये प्रयतमाना यथावत्स्वस्व-समीहितं साधयितुं न प्रभवन्ति। य एव हि देशः विलासितायामत्यन्तं निमग्नः धर्ममार्गाच्च विमुखः, तस्याचिरादेव नाश इत्यत्र सुलभान्युदाहरणानि। अस्माकं भारतदेशः पुनरा च परमेष्ठिनः प्रथमायास्सृष्टेः आ चैतन्निमेषात् धर्मोत्तर एवाव-तिष्ठत इति देशान्तरापेक्षया उत्कृष्टत्वे निदानम्। धर्मपथं विहाय स्वेच्छाचारेण वर्तमानानां जनानां पशुभिस्सह तुल्यतैवेत्यत्र न संशयः कस्यापि, प्रत्युत पशव एव श्रेयांसः, यतश्च ते प्रत्यवायभागिनो न भवन्ति। अत एवोक्तम्—

'पशुतैव वरं तेषां प्रत्यवायाप्रवर्तनात्।' इति।

पशुप्रायवृत्तयश्च देशान्तरस्थाः, भारतनिवासिनश्च न तथा। एकैकस्यापि जनुष्मतो भारतीयस्य यथारूपं स्व-स्व-धर्मेऽभिरतिर्नियता आसीदिति प्राचीनेति-हासतोऽवगच्छामः। अतएव प्राञ्चस्सुमतयो महर्षयः वेदाम्नायाद्यपरपर्यायां भगवतीं श्रुतिं सेवमानास्तत्र सञ्जातसमधिकगौरवाः—

सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते।
न वेदाच्च परं शास्त्रं न दैवं शङ्करात्परम्॥

इत्युद्घोषयन्तः, तदुदितधार्मिकपदार्थानां जगत्कल्याणाधायकानां प्रचाराय सुपरिश्रम्य नैकविधान् धार्मिकान् स्मृतिपुराणग्रन्थान् प्रवर्तयाम्बभूवुः। एवं ग्रन्थ-प्रवर्तनेऽमीषां प्राचीनानामपरोऽभिप्रायः—यदुक्तं भारतवर्षस्योत्कर्ष आध्यात्मिकाधिदैविकशक्त्यधीनः, आध्यात्मिकशक्तिराधिदैविकशक्तिश्च धर्मानुष्ठानाधीने। अतो धर्मप्रचारोऽत्यावश्यक इति। अतएव चोभे अपीमे शक्ती उत्सृजन्तो देशान्तरीया आधिभौतिकीमेव शक्तिं समाश्रित्य परस्परं निधनमुपयन्तीत्यनुमातुं शक्यते। पूर्वोक्तशक्तिद्वयविवृद्धये निदानभूतस्य धर्मस्य वेदोदितस्य स्वरूपं विवरीतुमेव दर्शनानि न्यभान्त्सुर्व्यास-जैमिनिप्रभृतयो महर्षयः।

तत्र धर्मस्य स्वरूपं वेदवोधितश्रेयस्साधनमिति कथयन्तः शास्त्रकारा न केवलं याग-दान-होम-द्रव्यगुणानामेव धर्मत्वमभिप्रयन्ति, किन्तु 'अयन्तु परमो धर्मः यद्योगेनात्मदर्शनम्' इत्यादि-याज्ञवल्क्यस्मृतिप्रमाणजातेनात्मज्ञानस्यापि धर्मत्वमाशेरते।

एवं वदतां ग्रन्थकाराणामयमाशयः प्रतिभाति यद् वेदे कर्मज्ञानोपासनारूपेण विभक्तानां काण्डानां प्रतिपाद्यविषयेषु सत्यपि भेदे तेषां परस्परमस्ति महान् सम्बन्ध इति। अतएव कर्मणां ज्ञानस्य भक्तेश्च धर्मशव्देन व्यवहारस्तत्र तत्र ग्रन्थकाराणां सङ्गच्छते।

तत्र कर्माण्याधानसिद्धगार्हपत्याहवनीयदक्षिणाग्निरूपत्रेताग्नि-साध्याग्निहोम-दर्शपूर्णमास-चातुर्मास्य-ज्योतिष्टोमादीनि श्रौतान्यनन्तानि, वैवाहिकाग्नि- (औपासनाग्नि) साध्यान्युपनयन-विवाहप्रभृतीनि बहूनि, कुशकण्डिकादिसंस्कारसंस्कृताग्निसाध्यानि पौराणिकानि रुद्र-विष्णु-चण्डी-हरिहरात्मकयागरूपाणि विविधानि यदा चाग्रे श्रौतानां स्मार्तानां वा कर्मणामनुष्ठाने लोकानां श्रद्धाया न्यूनता भविष्यतीत्यपश्यन् ज्ञानचक्षुषो महर्षयः, तदा पुराणाभिहितकर्मानुष्ठानेन स्वस्वाभिलषितं सम्पादयन्तु लोका इति मनीषया तानि प्रवर्तयाम्बभूवुः। यैव देवता समाराध्यत्वेन स्वसमीहितफलप्रदत्वेन वा येन निश्चीयते यथा केनचन रुद्रः, अपरेण विष्णुः, अन्येन देवी, इतरेण हरिहरात्मको देवः स तां तां देवतां कर्मभिः सन्तोष्य फलभोक्ता भवत्विति पुराणप्रवर्तकानामृषीणामाशयः प्रतिभाति।

तत्र हरिहरात्मक-यागानुष्ठाने केषाञ्चनैवं शङ्का भवति—'हरिहरनामको यागः' क विहितः, कथं वेदं नाम प्रसिद्ध्यति, देवताद्वयस्यैकस्मिन् कुण्डे आहुतयः केन प्रमाणेन हूयन्ते, किं वास्य फलम्, के वात्र मन्त्राः, कथञ्च तेषां विभागः, का वेतिकर्तव्यता ? इति।

अत्र ब्रूमः—पौराणिकानां यागानां श्रौत-स्मार्तकर्मणामिव प्रत्यक्षविधिबलादेवानुष्ठानमिति न नियमः। श्रौतेष्वपि कर्मसु बहुत्र प्रत्यक्षविध्यभावेऽपि कल्पितविधिबलादनुष्ठानं स्वीक्रियते। यथा दर्शपूर्णमासयोः आग्नेययागस्य। तस्य चोत्पत्तिवाक्यम्—'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति'

इति। अत्र न यागबोधकः शब्दः, नापि कापि विधिविभक्तिः, सत्यप्येवं विधिं परिकल्प्य यागोऽनुष्ठीयत इति सम्प्रतिपन्नमिदं सर्वेषाम्। एवंप्रायाण्युदाहरणानि श्रौतेषु कर्मसु "अग्निहोत्रं जुहोति, सूक्तवाकेन प्रस्तरं प्रहरति, यस्य पर्णमयी जुहूर्भवति, यस्य खादिरः स्रुवो भवति, अक्ताश्शर्करा उपदधाति, तां चतुर्भिरभ्रिमादत्ते" इत्यादीनि बहूनि। एषां वर्त्तमानकालबोधकलकारघटितानामपि कल्पितविधिद्वारा विधायकत्वमिष्यते शास्त्रकारैः। क्वचनार्थवादवाक्यानामेवानर्थक्यानुपपत्त्या विधिकल्पकत्वमिष्टं शास्त्रकाराणाम्। यथा—'औदुम्बरो यूपो भवति ऊर्ग्वा उदुम्बरः, ऊर्क्, पशवः, ऊर्जैं वास्मा ऊर्जं पशूनाप्नोति, ऊर्जोऽवरुध्यै' इत्यस्य समुदितस्य स्तावकत्वपक्षेऽविहितस्य स्तुत्यनुपपत्तेरौदुम्बरविधायकत्वं वाक्यानां परिकल्प्यते। तेन च यदौदुम्बरत्वं विहितं, तदनेन समस्तेन वाक्येन स्तूयत इति मीमांसकानां सिद्धान्तः।

एवञ्च 'हरिहरदेवतया यजेत' इति वाक्यश्रवणाभावेऽपि हरिहरदेवतायाः स्तुतिबोधकैर्वाक्यैः हरिहरदेवताकर्मविधायकवाक्यं परिकल्प्य तस्यानुष्ठानं न विवादाय कल्प्येत। अन्यथा देवतास्तावकानां वाक्यानां पुराणेषु तत्र तत्रोपलभ्यमानानामानर्थक्यमेव स्यात्। तत्तद्देवतासमाराधनेन जपेन ध्यानेन पूजया तर्पणेन होमेन च भवतीति कर्मकाण्डिकानामविप्रतिपन्नमिदम्। हरिहरदेवताविषयकं ध्यानं पूजनं च कूर्मपुराणादिषु समुपलभ्यते। इदञ्च विलोक्यास्मत्पूर्वजाः शिष्टाः कतिपये हरिहरात्मकयागमपि स्वीयाविगीताचारेण प्रवर्तयाञ्चक्रुः। ये हि हरिं हरञ्चोभयात्मिकां देवतामभिन्नां समुपासते, तेषामिदमनुष्ठानं कथमिव निन्दाविषयः स्यात्, एवं च पुराणादिषु समुपलभ्यमानहरिहरविषयकध्यान-स्तुति-पूजनप्रतिपादकैः श्लोकैः हरिहरात्मकयागविधायकवाक्यं परिकल्प्यते, हरिहरात्मकयागेन स्वसमीहितं सम्पादयेदिति, अथवा शिष्टाचारेणानुमीयते तादृशो विधिः। यावच्च शिष्टाचारविघातकं स्मार्तं श्रौतं वा प्रमाणं नोपलभ्यते तावत्स आचारः प्रमाणमिति शास्त्रोन्नीतः पन्थाः। न क्वापि स्मृतिषु पुराणेषु वा 'हरिहरात्मकयागं न कुर्यात्' इति निषेधः समुपलभ्यते। नापीदं कर्म केनापि दृष्टेन कारणेन गर्हितं प्रतीयते।

किञ्च यावन्तः सम्प्रति पौराणिका यागा अनुष्ठीयन्ते, अनुष्ठाप्यन्ते वा रुद्रविष्णु-चण्डीप्रभृतीनाम्, अमीषाञ्च विधानं पौराणिकवचनेभ्यः कल्पितैरेव विधिवाक्यैः स्वीकर्तव्यम्, स्मृतीनां पुराणानाञ्च श्रुतिमूलकत्वेनैव प्रामाण्यात्। न हि कापि प्रत्यक्षो विधिः समुपलभ्यते 'रौद्रेण यजेत', 'वैष्णवेन यजेत' इति येन प्रत्यक्षश्रुतिमूलकत्वममीषां स्यात्। यद्यपि 'शतरुद्रियं जुहोति' इति विधिः उपलभ्यते, तथापि यादृशपद्धत्या साम्प्रतं रुद्रादयो यागा अनुष्ठीयन्ते, तेषां तन्मूलकत्वमेवेति वक्तुं न शक्यते, किन्त्वनुमितश्रुतिमूलकत्वमपीति स्वीकर्तव्यम्। तथा च हरिहरदेवतास्तावकपुराणवचनेभ्योऽनुमितं यद्विधिवाक्यं, तदेव शिष्टैरनुष्ठितहरिहरात्मकयागस्य मूलमिति सिद्ध्यति।

यागस्यास्य नामविषये एवं प्रष्टारो भवन्ति—केन प्रमाणेनास्य 'हरिहर' इति नामेति। तत्रेदमुच्यते—मीमांसायां निमित्तचतुष्टयान्नाम्नः सिद्धिरभिहिता मत्वर्थलक्षणाभीत्या 'उद्भिदा यजेत पशुकामः' इत्यादिषु, वाक्यभेदभीत्या 'चित्रया यजेत पशुकामः' इत्यादिषु, तत्प्रख्यशास्त्रात् 'अग्निहोत्रं जुहोति' इत्यादिषु, तद्व्यपदेशात् 'श्येनेनाभिचरन् यजेत' इत्यादिषु, एवं श्रौतेषु कर्मसु सत्यपि नियमे 'सोमयागः', 'आग्नेययागः' 'उपांशुयागः'—इत्यादीनि कर्मनामानि याज्ञिका व्यवहरन्ति। इमानि च नामानि न पूर्वोक्तप्रमाणैः साधयितुं शक्यन्ते। ज्योतिष्टोमशब्दस्य तत्प्रख्यशास्त्रान्नामत्वं साधयितुं शक्यते, न 'सोमशब्दस्य', तथा सति 'सोमेन यजेत' इत्यत्र विनैव मत्वर्थलक्षणया शाब्दबोधः स्यात्। एवमेव 'यदाग्नेयोऽष्टाकपालः' इत्यत्रापि मन्त्रवर्णरूपतत्प्रख्यशास्त्रेणाग्नेः प्राप्तिमङ्गीकृत्याग्नेयशब्दस्य नामत्वं यद्युच्येत, तर्हि 'आग्नेय' शब्दस्याग्नेयाधिकरणे गुणसमर्पकत्वसिद्धान्तो भग्नः स्यात्। अत एवमादिनामव्यवहारस्य मूलं याज्ञिकानां प्रसिद्धिरित्येव वक्तव्यम्। सोमद्रव्यकत्वात् सोमयागः, अग्निदेवताकत्वात् आग्नेययागः, उपांशुक्रियमाणत्वात् उपांशुयागः, इत्येवं याज्ञिकप्रसिद्धेरुपपत्तिः। एवमेव 'रुद्रयागः' इति नाम रुद्रदेवताकत्वात्। न चात्र तत्प्रख्यशास्त्रेणैव नाम्नः सिद्धिरिति वक्तुं शक्यते, तत्प्रख्यशास्त्रत्वेनाभिमतरुद्रमन्त्रे रुद्रशब्दवत् शङ्कर-मयस्करादिशब्दानामपि सत्त्वात् 'शङ्करयागः', 'मयस्करयागः' इत्यपि व्यवहारापत्तेः। तत्तु नेष्यते, व्यवहाराभावस्य तत्र प्रतिबन्धकत्वात्। अतो रुद्रदेवताकत्वात् 'रुद्रयागः' इति प्रसिद्धिः। एवमेव विष्णुदेवताकत्वात् 'विष्णुयागः' इति, तथैव हरिहरदेवताकत्वात् 'हरिहरात्मको यागः' इति नामापि सिद्ध्यति। एवञ्च क्वचन द्रव्यमादाय, कुत्रचिद् देवतामादाय क्वचनान्यगुणमादाय याज्ञिकव्यवहारस्योपपत्तिः सिद्ध्यति, न तु मीमांसाभिहितप्रमाणचतुष्टयेनैव। एतेन 'पुरोडाशयागः', 'पशुयागः' इत्यादिव्यवहारोऽपि व्याख्यातः।

वस्तुतस्तु मीमांसादृष्ट्या यदि पर्यालोच्यते, तर्हि साम्प्रतं क्रियमाणानां रुद्रादिदेवताकानां कर्मणां यागशब्देन व्यवहारोऽसङ्गत एव, अमीषां यजतिचोदनाचोदितत्वाभावात्। अत्र च वैदिकानां प्रसिद्धिरेव शरणीकरणीया। न हि वैदिका मीमांसका वोपनयने विवाहे च क्रियमाणान् होमान् सत्यपि तेषूद्देशत्यागे यागशब्देन व्यवहरन्ति 'उपनयनयागः', 'विवाहयागः' इति। श्रौतस्यापि कर्मणोऽग्निहोत्रस्य देवतोद्देशेन द्रव्यत्यागरूपयागपदार्थविशिष्टस्य 'अग्निहोत्रयाग' शब्देन व्यवहारो न केषामपि सम्मतः। अतश्चैवमादिषु स्थलेषु 'रुद्रयागः', 'विष्णुयागः' इत्यादीनां यथोपपत्तिस्तथैव 'हरिहरात्मको यागः' इत्यस्याप्युपपत्तिरिति न नामधेयस्यासङ्गतिरिति सिद्धम्।

एकस्मिन् कुण्डे हरिहरात्मकयागस्यानुष्ठानं कथम् ? हरिर्यदा होमेन समाराध्यते, तदा पुरुषसूक्तमन्त्रेण, हरश्च यदा होमेन समाराध्यते, तदा रुद्राध्यायमन्त्रेण । तथा रुद्रयागो विष्णुयागश्च स्याताम् । तयोश्चैककुण्डानुष्ठेयत्वं कथं भवेदिति केचनाक्षेप्तारो भवन्ति ।

अत्र वदामः—दर्शपूर्णमासयोराग्नेययागोऽस्ति, स च प्रकृतिः । यद्यस्य विकृतिरप्यग्निदेवताका तदा आग्नेययागीययाज्यापुरोनुवाक्यामन्त्रैरेव वैकृताग्नेये क्रियमाणे दार्शपूर्णमासिकाग्नेयः कृत इति व्यवहारः किं कस्यापि सम्मतो वा ? न कोऽप्येवं व्यवहरति । तथैव प्रकृतमपि हरिहरात्मकं कर्म रुद्राध्यायेन पुरुषसूक्तेन च क्रियमाणं न रुद्रयागो विष्णुयागो वा भवेत्, किन्तु ततो विलक्षणमेवेदं कर्म । तथा सत्येककुण्डानुष्ठेयत्वमस्य कथं नाम न भवेत् ? विभिन्नदेवतयोरेकस्मिन् कुण्डे कथं होमो भवितुमर्हतीति न शङ्कितुं शक्यम् ; पौर्णमास्यां दर्शे वा नानादेवतानामेकस्मिन्नाहवनीये होमानां सम्पद्यमानत्वात् । अत्र हरिहरयोर्देवतात्वस्य व्यासज्यवृत्तित्वादग्नीषोमादिवन्नानुपपत्तिः काचन ।

इयांस्तु विशेषः—श्रौतेषु कर्मसु विधिप्रतिपाद्या देवता स्वीक्रियते । क्वचित्तद्धितेन देवताया विधिः, क्वचिच्च चतुर्थ्या, क्वचिच्च मान्त्रवर्णिकदेवताया विधिः । नैतादृशविधानं हरिहरयोरुपलभामहे, किन्तु हरिहरक्षेत्रादिषु हरिहरात्मकदेवतायाः प्रसिद्धत्वात्, तस्याश्च पूजनादिकस्य वर्त्तमानत्वात् तदाराधनाय यागोऽपि शिष्टैः प्रवर्तित इति हरिहरयोर्देवतात्वस्य व्यासज्यवृत्तित्वं स्वीक्रियते । यद्येतादृशं देवतात्वं नाभविष्यत्, तर्हि **हरिहरमण्डलम्**, **हरिहरध्यानम्**, **हरिहरस्तुतिः**, **हरिहराष्टोत्तरशतनामावलिः**—इत्यादिकमपि नाभविष्यत् । सर्वतोभद्र-लिङ्गतोभद्रादिवत् हरिहरमण्डलमेव हरिहरयोर्व्यासज्यवृत्तिदेवतात्वमवगमयति ।

किञ्च मीमांसका इव याज्ञिका न देवतास्वरूपमभ्युपयन्ति । मीमांसका हि शब्दैकसमधिगम्यं देवतात्वं स्वीकुर्वन्तः देवतानां करचरणाद्यवयववत्वं नाभ्युपगच्छन्ति, नापि तासां फलप्रदातृत्वशक्तिं वा स्वीकुर्वन्ति । याज्ञिकास्तु देवतानां विग्रहादिमत्त्वं फलप्रदातृत्वञ्च स्वीकृत्य स्वस्वाभिलषितफलप्राप्तये तां तां देवतां जप-होमादिभिस्तपर्यन्ति । अतश्च मीमांसकानां मते विधिविहितस्यैव देवतात्वम्, याज्ञिकानां तु विधितदतिरिक्तप्रमाणगम्यस्य देवतात्वमिति सिद्ध्यति । एवञ्च हरिहरयोर्व्यासज्यवृत्त्यैव देवतात्वं स्वीकृत्यैकस्मिन् कुण्डे रुद्राध्यायेन पुरुषसूक्तमन्त्रेण च हरिहरात्मकयागे क्रियमाणे न कोऽपि दोष इति सिद्धम् ।

किञ्च **'फलकर्मदेशकालद्रव्यदेवतागुणसामान्ये'** (का० श्रौ० सू० १।७।३) **'तद्भेदे भेदः'** (का० श्रौ० सू० १।७।४) इति कात्यायनश्रौतसूत्राभ्यां फलकर्मादीनां भेदे कर्मणो भेदः, तदभेदे चाभेद इत्युक्तम् । प्रकृते च हरिहरयोर्विद्यमानस्य देवतात्वस्यैकत्वात् भेदाभावाच्चैककुण्डानुष्ठेयत्वे न कस्यापि विप्रतिपत्तिः ।

कस्मिंश्च कर्मणि हरिहरयोस्तन्त्रेण कथमनुष्ठानमिति प्रश्नस्येदमुत्तरम्- तन्त्रं हि

नामानेकोद्देशेन सकृदनुष्ठानम्। यथा दर्शपूर्णमासयोरनेकान्याग्नेयादिषट्-प्रधानान्युद्दिश्य प्रयाजानुयाजादीनां सकृदनुष्ठानं तत्तत्पर्वणि भवति। तत्र सम्भवतामङ्गानां तन्त्रमसम्भवत्त्वावृत्तिरिति न्यायोन्नीतः पन्थाः।

यदुच्यते कैश्चित् 'अपवृत्तकर्मा लौकिकोऽर्थसंयोगात्' (का० श्रौ० सू० १।३।२८) इति कात्यायनीयं सूत्रमादाय प्रकृतिकर्मणि रुद्राध्यायेन होमे समाप्ते पुनः पुरुषसूक्त-होमकरणेऽग्नेर्लौकिकत्वमापाद्यत इति। तत्र ब्रूमः—हरिहरात्मकयागप्रयोगस्यासमाप्त-त्वात्कथमप्रवृत्तकर्मा जातः? हरिहरयोर्व्यासक्तदेवतात्वेऽपि तथाविधमन्त्राणामनु-पलम्भाद् रुद्र-विष्णुयागीयमन्त्रान् तदङ्गानि चात्रातिदिश्यायं प्रयोगः कर्तव्यः इत्यस्मत्पूर्वजानामेतत्कर्मानुष्ठातॄणां शिष्टानामाशयः।

तत्र रुद्रहोमे समाप्तेऽपि प्रकृतप्रयोगस्यासमाप्तत्वादग्नेर्लौकिकत्व कथमापादयितुं शक्यते?

किञ्च—

"शृणु देवि महाभागे यागं हरिहरात्मकम्।
कुर्वन् सिद्धिमवाप्नोति पुत्र-पौत्रप्रदायकम्॥"

इत्यादितन्त्रान्तरवचनाद् हरिहरात्मकयागस्य तत्रानुष्ठानप्रतीतेः कथं कात्यायनश्रौत-सूत्रस्य प्रकृते प्रवृत्तिः?, तस्मात् हरिहरात्मकयागस्य निर्दुष्टत्वात्, शास्त्रीयत्वात्, शिष्टाचारपरिगृहीतत्वात्, स्वस्वाभिलषितसाधकत्वाद्, अगर्हितत्वाच्च स्वीकर्तव्यत्व-मुचितमेव।

ये हि हरिहरावुभावेकेनैव प्रयोगेण सन्तोष्य स्वस्वसमीहितं सर्वमपि फलं साधयितु-मभिलषन्ति, तेषां समभावेन देवताद्वयमेकीकृत्य समाराधयतां सौकर्याय शिष्टैः प्रवर्त्तितस्य हरिहरात्मकयागस्यौचित्यं प्रतीयते।

'न हि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति' इति न्यायमनुसृत्य हरिहरयागस्यानुष्ठानेऽनुष्ठापने चानुष्ठातॄणामनुष्ठापयितॄणाञ्च सद्गतिरेव स्यादिति निश्चप्रचमेव।

कन्यादान-मीमांसा

इदमत्र विचार्यते। कन्यादाने दातुः स्व-स्वत्वनिवृत्तिर्भवति नवेति। केचिदत्रैवमा-शेरते—'गोदानादौ इमां गां तुभ्यमहं सम्प्रददे' इत्युक्त्वा ततः स्वस्वत्वनिवृत्ति-बोधकं 'न मम' इति पदद्वयमपि उच्चार्यते, अतस्तत्र स्वस्वत्वनिवृत्तिर्जायते। कन्यादाने तु 'इमां कन्यां तुभ्यमहं सम्प्रददे' इत्येवोक्त्वा विरम्यते, न तु 'न

मम' इति पदद्वयमुच्चार्यते। अतश्च गोदानवत् नात्र स्व-स्वत्वनिवृत्तिर्भवति। अतएव सकृद्दत्ताऽपि पुनर्दातुं शक्यत इति। ते तावत्प्रष्टव्याः, आस्तां तावत् 'न मम' इति पदद्वयम्, कन्यादानेऽपि गोदानवत् दाधातुरुच्चार्यते नवेति। यदि चेदोमिति ब्रूयुस्तर्हि तत्रोच्चार्यमाणस्य दाधातोः कोऽर्थ इति 'स्वस्वत्वनिवृत्तिपूर्वक-परस्वत्वापादानरूपो व्यापारो दाधात्वर्थः' इति शास्त्रकारैः सर्वत्राङ्गीकृतः। "दानं चापुनर्ग्रहणाय स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनम्" इति 'कर्मणा यमभिप्रैति स सम्प्रदानम्' (अष्टा० १।४।३२) इति सूत्रे तत्त्वबोधिनीकारः।

शास्त्रदीपिकायामपि पार्थसारथिमिश्रैः चतुर्थेऽध्याये द्वितीयपादे द्वादशेऽधिकरणे यागहोमादीनां भेदकथनावसरे "देवतोद्देशेन स्वद्रव्यपरित्यागो यागः, स एव प्रक्षेपाधिको होमः, स्वीयस्य परकीयत्वापादनं दानम्' इत्युक्तम्। 'सम्प्रदान-स्वत्वापादको द्रव्यत्यागो दानपदार्थः' इति च तत्रैव भाट्टदीपिकायाम्। एवं च सति दाधातुरेव स्वस्वत्वनिवृत्तिं परस्वत्वापादानं च कथयति इति यत्र दाधातुः प्रयुज्यते तत्र स्वस्वत्वनिवृत्तिरपि जायत एवेति किमवशिष्यते यत् 'न मम' इति पदद्वयेन बोध्यते।

स्मृतिकारैः परं स्पष्टप्रतिपत्त्यर्थं दाधातुकार्थीया एव स्वत्वनिवृत्तेर्न ममेति पद-द्वयेनापि अनुवादः कार्य इति मत्वैव 'न ममेति स्वसत्ताया निवृत्तिमपि कीर्तयेत्' इत्युक्तम्। अतश्च सर्वत्र दानस्थले 'न मम' इति कथनमनुवादरूपमेवेति तदनुक्तावपि स्वत्वनिवृत्तिर्जातैवेति मन्तव्यम्। अत एव गोदानादावपि क्वचिद् देशे 'न मम' इति शिष्टा नोच्चारयन्ति। यागादौ परम् इदमग्नय इत्यादिचतुर्थीमात्र-प्रयोगात् दाधातोरप्रयोगेण चतुर्थ्या च त्यज्यमानद्रव्योद्देश्यत्वमात्रकथनात् तत्र स्वत्वनिवृत्तेस्तयाऽप्रतीतेस्तत्प्रतीत्यर्थं 'न मम' इति पदद्वयमुच्चारणीयमेव। किञ्च यदि कन्यादाने न स्वत्वनिवृत्तिर्जायते तर्हि पुत्रदानेऽपि कथं सा जायते? यदि चेष्टापत्तिः—"गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः" इत्यादिगोत्ररिक्थनिवृत्ति-बोधकानां शास्त्राणां का वा गतिः? कथं वा स पुत्रः प्रतिग्रहीतरि मृते पुनरन्यस्मै न दातुं शक्यते? कथं वा कन्या पुत्रैः साकमंशहरा न भवेत्? अतो यथा दत्तकहोमा-नन्तरं पुत्रो जनकगोत्राद् भ्रश्यति तस्य चास्य च जन्य-जनकभावसम्बन्धमन्तरा नान्योऽस्ति कश्चित्सम्बन्धः। एवं वैवाहिकसप्तपद्यनन्तरं कन्यायाः पितुश्च तादृशं सम्बन्धमन्तरा नान्यः सम्बन्धः कश्चिदस्ति। अत एव च कन्यां परकीयद्रव्यन्यासरूपां समामनन्ति। "प्रत्यर्पितन्यास इवान्तरात्मा" (शकुन्तलानाटक, ४।२४) इति महर्षिः कण्वः कथयति।

'कन्यादानं त्रिः कार्यम्' इति शौनकोक्तिस्तु प्राथमिकदानेऽपि दानसम्पत्तौ सत्यां पुनर्वारद्वयमदृष्टार्थं शब्दोच्चारणं कार्यमित्येवमर्थिका। यथा मधुपर्के सकृदुच्चा-

रणेनापि सिद्धे कार्ये 'मधुपर्को मधुपर्को मधुपर्कः' इति वारत्रयमुच्चार्यते। यथा वा सोमयागे दीक्षाप्रकरणे दीक्षितावेदनसमये 'दीक्षितोऽयं ब्राह्मणः' (का० श्रौ० सू० ७।४।११) इति सकृदुच्चारणेनापि कार्यसिद्धौ "त्रिरुपांश्वाह त्रिरुच्चैः" इति विधानमदृष्टार्थम् तद्वत्।

अयमत्र निष्कर्षः—गोदानवत् कन्यादानेऽपि दाधातुप्रयोगात् स्वत्वनिवृत्तिर्भवत्येव। 'न मम' इति शब्दोच्चारणं भवतु मा वा। अत एव च गोदानेऽपि क्वचित् 'न मम' इति न प्रयुज्यते, कन्यादानेऽपि क्वचित्प्रयुज्यते।

क्वचिद् देशे 'प्रजासहत्वकर्मभ्यः प्रतिपादयामि' इत्येव प्रयुज्यते। तत्र प्रतिपादनमपि दानापरपर्यायमेव। अतो दानानन्तरकालिकवैवाहिकसप्तपद्यामेव कन्यायाः पितृगोत्रनिवृत्तेः पितुस्तस्याश्च पितृत्वकन्यात्वरूपसम्बन्धं विना अन्यस्य स्वत्वादेरभावात् न सा कन्या पुनरन्यस्मै केनापि कारणेन दातुं शक्येति।

—※—

विवाहस्यानादिता

विवाहशब्दस्तु—विपूर्वकवहधातोर्भावे घञि प्रत्यये कृते निष्पन्नो विशिष्टं वहनमभिदधाति। विशिष्टं वहनं च कन्याया अन्यदीयायाः स्वीयत्वापादनपूर्वकं संस्काराधानम्। स्वीयत्वापादनं च अन्यदीयस्य वस्तुनः प्रतिग्रहमूलकम्। प्रतिग्रहश्च दानमूलकः। अतश्च कन्यापित्रादिना कन्याया दाने कृते तां प्रतिगृह्य स्वीयामापाद्य पाणिग्रहणादिहोमसंस्कारैः संस्कृतत्वसम्पादनमेव विवाह-पदार्थ इति सिद्धयति। एवं च विवाहे दानम्, प्रतिग्रहः, पाणिग्रहणम्, होमादिः, इति पदार्थचतुष्टयं प्राधान्येन परिगणनीयं भवति, अन्यत्सर्वमङ्गतया। तत्र दानं कन्यापितरं प्रति, अन्यद्वरं प्रतीति विवेक्तव्यम्।

अयं च विवाहः स्त्रिया भार्यात्वापादकवत् पुरुषस्य पतित्वापादकोऽपि। अतश्चोभयसंस्कार एवायम्, न स्त्रीमात्रसंस्कारो, नापि पुरुषमात्रसंस्कारः। यथा च उपनयनं माणवकस्य अध्ययनयोग्यतारूपसंस्काराधायकम्, एवं विवाहः स्त्रीपुंसयोरन्याधानाग्निहोत्रपाकयज्ञादि-श्रौतस्मार्त्तकर्मानुष्ठानयोग्यताधायकः। नह्यविवाहिता स्त्री पुमान्वा क्वचित् श्रौते स्मार्त्ते वा कर्मण्यधिक्रियते। अत एव विवाहः स्त्रिया एव संस्कारको नित्यः, पुरुषस्य तु काम्य ऐच्छिक इति ये केचिद्वदन्ति तेषामुक्तिर्गगनकुसुममवलम्बते। स्त्रीसंस्कार इव पुरुषसंस्कारेऽपि युक्तितौल्यात्। अत एव गौतमादिभिः अष्टाचत्वारिंशत्संस्कारैः संस्कृत इत्यारभ्य तन्मध्ये विवाहस्यापि सहधर्मचारिणीसंयोग इति पुरुषसंस्कारमध्ये परिगणनं कृतम्। अतश्च यथाऽऽधानाग्निहोत्रादीनां नित्यत्वम् (अवश्यानुष्ठेयत्वम्) उभयसंस्कारकत्वं च, तद्वत् विवाहस्यापि

नित्यत्वमुभयसंस्कारकत्वं चाविरुद्धम् । द्वितीयादिविवाहस्तु पुंसः काम्यः; स्त्रियस्तु नास्त्येव ।

विवाहस्य सत्यपि रतिसम्पादकत्वे पुत्रोत्पत्तिसाधनत्वे च देशान्तरवत् नास्माकं भारतीयानां तदर्थत्वमात्रे तस्य पर्यवसानमिष्टम्, किन्तु मुख्यतया धर्मार्थत्वमेव, पुत्रोत्पत्तेरपि च नित्यत्वमेवास्माकं मते । यस्यैव अनिष्टयज्ञस्य मोक्षेच्छायां दोषश्रवणम्, एवमनुत्पादितपुत्रस्यापि दोषः श्रूयते स्मर्यते च । अत एव च अध्ययनयजनसुतोत्पादनानां नित्यत्वं श्रुतिर्बोधयति—"जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येणर्षिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी ।" (तै० सं० ६।१।११)
इत्यत्र ऋणरूपत्वमेव अवश्यापाकरणीयत्वं च पूर्वोक्तैव श्रुतिरवबोधयति—

"अनृणा अस्मिन्ननृणाः परस्मिन् तृतीये लोके अनृणाः स्याम ।
ये देवयानाः पितृयाणाश्च लोकाः सर्वान् पथो अनृणा आक्षियेम ।"
(अथर्व० ६।११।७।३)

एतच्छ्रुत्यवलम्बेनैव जैमिनिरपि त्रयाणामेषां नित्यत्वं सूत्रयति—"ब्राह्मणस्य सोमविद्याप्रजमृणवाक्यसंयोगात्" (६ । ३) । एतेन देवर्णात् पितृऋणाच्च आनृण्यसम्भवेऽवश्यकर्तव्यो दारसंग्रहः । कृते तस्मिन् आनुषङ्गिकतया रत्युत्पत्तिः इति न तस्य मुख्यफलत्वमभिमतमस्मदाचार्याणाम् ।

वैवाहिकी प्रथा कदाप्रभृति अस्माकं देशे प्रचलिता इति केषांचिद्विचारशीलानां प्रश्नस्य इदमेवोत्तरं नित्यैवेयमिति । वैदिकानामस्माकं मते मीमांसकानामिव—

"वाचा विरूपनित्यया" (तैत्ति० सं० १०)

"अजान् ह वै पृश्नीन् तपस्यमानात् ब्रह्मस्वयम्भ्वेवाभ्यानर्षत्"
(तैत्ति० ब्रा० ११)

"अनादिनिधना वेदवागुत्सृष्टा स्वयंभुवा ।" (महाभारत, शान्तिपर्व, २३३।२४)

इत्यादिश्रुति-स्मृति-पुराणादिभिर्वेदस्यानादित्वमेव, नतु पुरुषकृतत्वरूपं पौरुषेयत्वम् । अतश्च ऋग्वेदादयः सर्वेऽपि वेदाः क्रमं विना सार्वकालिका एवेति सिद्ध्यति । तत्र च ऋग्वेदे अष्टमाध्याये—

"गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथाऽऽसः ।"

"तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतु ना सह ।
पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥'

"पुनः पत्नीमग्निरदादायुषा सह वर्चसा ।
दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् ॥" (ऋ० १०।८५)

"समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ।"

इत्यादयो बहवो मन्त्राः पाणिग्रहणरूपविवाहार्थं प्रवृत्तास्तमेवाभिवदन्ति।

"इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम्।
क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे॥" (ऋ० १०।८५।४२)

"आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा।
अदुर्मङ्गलीः पतिलोकमा विश शं नो भव द्विपदे शं चतुष्पदे॥"
(ऋ० १०।८५।४३)

इत्यादयो वधूवरयोराशीरूपं फलं वदन्ति। एवम्—

"सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु॥" (ऋ० १०।८५।४६)

एवं सर्वेष्वपि वेदेषु विवाहमन्त्राः सुप्रसिद्धा एव। न चेदमत्र शङ्कनीयम्—मन्त्रा इमे यागादौ क्वचित् क्रियाङ्गत्वेन प्रवृत्ता विवाहेऽपि सूत्रकारेण विनियुक्ता अङ्गारकादिमन्त्रवत्, अतश्च नैतेषां मन्त्राणां विवाहैकान्तिकत्वं वक्तुं शक्यत इति; एतेषां विवाहं परित्यज्य अन्यत्र कुत्रापि विनियोगादर्शनात्। तेषां मन्त्राणां तत्र तत्र तांस्तानितरान् मन्त्रान् तत्तत्कर्माङ्गत्वेन तत्तत्क्रत्वङ्गभूतशास्त्राद्यङ्गत्वेन वा विनियुञ्जानोऽपि माधवाचार्य इमान् मन्त्रान् पाणिग्रहण एव विनियुङ्क्ते।

विवाहे कन्याग्रहणे गृभ्णामीत्येषा—सूत्रितं च "गृभ्णामि ते" इति। 'उदीर्ष्वातः" इति मन्त्रं च विवाहस्तावकत्वेन व्याख्याति। अत्रेदं भाष्यम्—'आभिर्नृणां विवाहः स्तूयते' इत्यादि।

एवं च प्रकरणमिदं साक्षात्परम्परया वा विवाहाङ्गभूतं मन्त्रसमुदायसन्दब्धम्। तत्रैव सर्वे मन्त्रा विनियुक्ता नान्यत्र क्वचिदपि।

एवं बहुत्र सहस्रशो वेदेषु पतिपत्नीसम्बन्धः श्रुतः, स सर्वोऽपि विवाहमूलक एव प्रसिद्ध्यति इति सुविदितमेव। किञ्च चतुर्ष्वपि वेदेषु उपासना-ज्ञानकाण्डे मुक्त्वा अन्यः सर्वोऽपि भागो यज्ञार्थमेव प्रवृत्त इति तु निश्चप्रचम्। यज्ञानुष्ठानं तु प्रायशो दम्पतिकर्तृकम्। दाम्पत्यं तु विवाहैकसाध्यम्। अतश्च यज्ञादिकं विदधद्भिर्वेदभागैः स्वसिद्ध्यर्थं विवाहोऽप्याक्षिप्यत इत्यनादिरियं वैदिकी प्रथाऽस्मद्देशे।

ये नाम वेदानां पौरुषेयत्वमर्वाचीनकालिकत्वं वाऽभिप्रयन्ति यज्ञैकान्तिकत्वं वा नेच्छन्ति, तेषां मते यत्किञ्चित्सिद्ध्यतु। परन्तु अयमपि पक्षोऽस्माभिः कात्यायनश्रौतसूत्रभूमिकायां निपुणतरमुपपाद्य निरस्तस्तत एवावगन्तव्यः।

एवं विवाहस्यानादित्वे धर्ममूलत्वे नित्यत्वे (अवश्यकर्तव्यत्वे) वेदादेव सिद्धे ये नाम केचित् महाभारतस्य श्वेतकेतूपाख्यानादिना विवाहस्य सादित्वं स्त्रीणां यथेष्टाचारत्वं सर्वोपभोग्यत्वं च साधयन्ति ते कुशकाशावलम्बना एव। तथा हि एवं ते प्रष्टव्याः—

भारतादीनां वेदमुपजीव्यैव प्रामाण्यमुत स्वातन्त्र्येण ? यदि स्वातन्त्र्येण इति कथयन्ति तेन ते वन्ध्या एव । सर्वेषां स्मृतिपुराणेतिहासादीनां वेदमूलत्वेनैव प्रामाण्यमभ्युपगच्छतामस्माकं न ततो वहिर्भूतैरन्यैः सह संव्यवहारो युज्यते ।

यदि वेदमूलत्वेन तर्हि वेदेनैव अनादितया सिद्ध्यन्तं विवाहं वेदोपजीवकं भारतं कथं वा प्रतिसिषेधे । प्रतिषेधद्वा कथं प्रामाण्यमाप्नुयात् ?

अतश्च उपाख्यानस्यास्य अन्यपरतैव वर्णनीया । युक्तं चैतत् । तत्र हि महर्षिशापेन निवारितसंभोगः पाण्डुः स्वपत्न्यां पुत्रोत्पत्तिमभिलषन् तां तदर्थमन्यत्र नियोजयामास, तदनिच्छन्ती सा—

एवमुक्त्वा महाराज कुन्ती पाण्डुमभाषत ।
कुरूणामृषभं वीरं तदा भूमिपतिं पतिम् ॥ १ ॥
न मामर्हसि धर्मज्ञ वक्तुमेवं कथञ्चन ।
धर्मपत्नीमभिरतां त्वयि राजीवलोचने ॥ २ ॥
त्वमेव मुनिशार्दूल मय्यपत्यानि भारत ।
वीर वीर्योपपन्नानि धर्मतो जनयिष्यसि ॥ ३ ॥
स्वर्गं मनुजशार्दूल गच्छेयं सहिता त्वया ।
अपत्याय च मां गच्छ त्वमेव कुरुनन्दन ॥ ४ ॥
नह्यहं मनसाऽप्यन्यं गच्छेयं त्वदृते नरम् ।
त्वत्तः प्रतिविशिष्टश्च कोऽन्योऽस्ति भुवि मानवः ॥ ५ ॥
(१।१२०। महा० भा० ५)

इत्यादिना निराचकार ।

एवं व्यभिचारदोषात् अतीव विभ्यतीं तां पुत्रगृध्नुः पाण्डुस्तद्भयापाकरणार्थं तत्र प्रवृत्तिसिद्ध्यर्थं च श्वेतकेतूपाख्यानादिकं किञ्चित्कथयति स्म । अतः पाण्डुवचनस्य नोपाख्याने तात्पर्यं किन्तु तस्याः प्रवर्तने ।

उक्तं हि कुमारिलभट्टेन तन्त्रवार्तिके—"एवं भारतादिवाक्यानि व्याख्येयानि ।' तेषामपि हि "श्रावयेच्चतुरो वर्णान्" इत्येवमादिविध्यनुसारेण पुरुषार्थत्वान्वेषणादक्षरादिव्यतिक्रम्य धर्मार्थकाममोक्षा धर्मानर्थदुःखसंसारसाध्यसाधनप्रतिपत्तिरूपादानपरित्यागाङ्गभूताः फलम् । तत्रापि तु दानराजमोक्षधर्मादिषु केचित् पुनः परकृतिपुराकल्परूपेणार्थवादाः । सर्वोपाख्यानेषु च तात्पर्ये सति श्रावयेदिति विधेरानर्थक्यात्कथञ्चिद् गम्यमानस्तुतिनिन्दापरिग्रहः । तत्परत्वाच्च नातीवोपाख्यानेषु तत्वाभिनिवेशः कार्य इति ।

अनेन अन्येऽपि ये केचन एतादृशानन्यार्थस्तावकत्वेन प्रवृत्तान् उपाख्यानरूपानर्थवादानवलम्ब्य यं कञ्चन स्वार्थं साधयितुमीहन्ते तेऽपि प्रत्युक्ताः । अनेन नैवं

मन्तव्यम्, अस्माकं भारतादिगतानामुपाख्यानानां सर्वेषामसत्यतैवाभिप्रेतेति। असति प्रबलप्रमाणविरोधे तेषामपि प्रामाण्यं स्वीकुर्म एव। परन्तु अनन्यपरैर्बलवत्तमैर्वेदभागैः सिद्धयन्तमर्थमेतादृशानि वेदापेक्षया दुर्बलप्रमाणकान्युपाख्यानानि न कम्पयितुमीशत इति। अतः सिद्धं प्रथेयं वैवाहिकी भारतीयानामस्माकमनादिसिद्धेति।

यज्ञोपवीत-संस्कारस्यावश्यकता

उपनयनशब्दोऽयमुपपूर्वकनीधातोर्ल्युंप्रत्यये कृते निष्पद्यते। एवं च उप=आचार्यसमीपे नयनं=विद्यार्थं प्रापणमुपनयनम्। अतश्च पित्रादिः स्वं पुत्रादिकं विद्याध्ययनार्थं कस्यचिदाचार्यस्य समीपं यत् प्रापयति स एवोपनयनशब्दार्थः।

यद्यपि शब्दत एतावानेवार्थो लभ्यते तथापि शास्त्रकारैरेतत्पूर्वोत्तराङ्गतया बहवः पदार्थाः विहिताः, तैः सर्वैरेव सहितमुपनयनमित्युच्यते। ते सर्वे पदार्था उपनयनपद्धतितोऽवगन्तव्या भवन्ति।

सत्स्वपि संस्कारेषु षोडशसु तदधिकेषु वा अस्यैव प्राधान्यादितरापेक्षयाऽभ्यर्हितत्वं सर्वैरपि धर्मशास्त्रकारैरैककण्ठ्येनोररीकृतम्।

यतो हि अयमेव संस्कारो यथावदनुष्ठितस्तत्तज्जातिवाचकशब्दव्यवहार्यतां तत्तज्जात्युक्तकर्माधिकारितां च सम्पादयति। अन्यथा पतितो न कस्मैचित्कर्मणे ऐहिकायामुष्मिकाय वा कल्पते जनः।

अनुपनीतस्य न विवाहादौ सन्ध्या-तर्पणादौ श्रौतेषु स्मार्तेषु वा कर्मस्वधिकारः। न केवलं तेषु कर्मसु, सर्वस्मादपि द्विजकर्मणः सहपङ्क्तिभोजनादावप्यधिकारो नास्त्येव। अत उपनयनाख्यमिदं द्विजत्वस्य ख्यापकमुत्तेजकं वा त्रैवर्णिकैरवश्यं स्वस्वकालमनतिक्रम्य कर्तव्यम्।

तत्र केचित् सर्वं कालमतीत्य विवाहेन सहैवोपनयनं कुर्वन्ति। केचिच्च यज्ञोपवीतधारणमेवोपनयनसंस्कारं मन्वाना यत्र कुत्रचिद् विन्ध्यपर्वतादौ गत्वा विनैव कमपि संस्कारं यज्ञोपवीतमेव स्वबालकान् धारयन्ति।

देशेऽस्मिन् ब्राह्मणकुलेष्वेवोपनयनसंस्कारस्तथा लोपमापन्नो यं स्मृत्वैवास्माद‍ृशां मनः कम्पते। इदमेव चेदानीं त्रैवर्णिककुलेषु परिदृश्यमानानां सर्वेषामनर्थानां सर्वासां दुःखपरम्पराणां च परमं निदानमिति सखेदं ब्रूमः।

अत आत्मानं त्रैवर्णिकं वदद्भिः सर्वैरास्तिकवर्यैः स्वबालका अवश्यं यथावदुपनेयाः, येन स्वकुलस्य स्वजातेर्ब्राह्मतेजसश्च पुनरुत्कर्षो यथावत्प्राप्य विराजेत। येन चास्माकीनमिदं भारतवर्षं स्वं तेजः प्राप्य समुल्लसेत्।

इतरेषां संस्काराणां यथावदनुष्ठातुमशक्तावपि सर्वस्यापि मूलभूतोऽयं संस्कारो विधेय एव। यत इतरेषां संस्काराणां गृह्याद्युक्तानां परम्परया श्रुतिमूलत्वेऽपि अयमुपनयनसंस्कारः साक्षात् श्रुतिविहित इति स्वयमेव कथयति भगवानापस्तम्बः—"उपनयनं विद्यार्थः श्रुतितः संस्कारः" इति।

यद्यप्यत्र विद्यार्थ इत्युक्तं तथापि द्विजमात्रस्य स्वीयं द्विजत्वं रिरक्षिषतोऽयं संस्कार इति सर्वेषां स्मृतिकाराणां दुन्दुभिनिर्घोषः। अस्य श्रुतिबोधितत्वमथर्ववेदे उक्तम्।

तद्यथा—

"ब्रह्मचारीष्णंश्चरति रोदसी उभे तस्मिन् देवाः संमनसो भवन्ति।
स दाधार पृथिवीं दिवं च स आचार्यं तपसा पिपर्ति ॥ १ ॥
ब्रह्मचारिणं पितरो देवजनाः पृथग् देवा अनुसंयन्ति सर्वे।
गन्धर्वा एनमन्वायन् त्रयस्त्रिंशत् त्रिशताः षट्सहस्राः सर्वान्त्स
देवांस्तपसा पिपर्ति ॥ २ ॥
आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।
तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ॥ ३ ॥
इयं समित्पृथिवी द्यौर्द्वितीयोतान्तरिक्षं समिधा पृणाति।
ब्रह्मचारी समिधा मेखलया श्रमेण लोकांस्तपसा पिपर्ति ॥ ४ ॥
पूर्वो जातो ब्रह्मणो ब्रह्मचारी धर्मं वसानस्तपसोदतिष्ठत्।
तस्माज्जातं ब्राह्मणं ब्रह्म ज्येष्ठं देवाश्च सर्वे अमृतेन साकम् ॥ ५ ॥
ब्रह्मचार्येति समिधा समिद्धः कार्ष्णं वसानो दीक्षितो दीर्घश्मश्रुः।
स सद्य एति पूर्वस्मादुत्तरं समुद्रं लोकान्त्संगृभ्य मुहुराचरिक्रत् ॥ ६ ॥
ब्रह्मचारी जनयन् ब्रह्मापो लोकं प्रजापतिं परमेष्ठिनं विराजम्।
गर्भो भूत्वाऽमृतस्य योनाविन्द्रो ह भूत्वाऽसुरांस्ततर्ह ॥ ७ ॥
आचार्यस्ततक्ष नभसी उभे इमे उर्वी गम्भीरे पृथिवीं दिवं च।
ते रक्षति तपसा ब्रह्मचारी तस्मिन् देवाः संमनसो भवन्ति ॥ ८ ॥
इमां भूमिं पृथिवीं ब्रह्मचारी भिक्षाम जभार प्रथमो दिवं च।
ते कृत्वा समिधावुपास्ते तयोरार्पिता भुवनानि विश्वा ॥ ९ ॥

(अथर्ववेद का० ११। सू० ५। मन्त्र १-९)

ब्रह्मचर्येण तपसा राजा राष्ट्रं वि रक्षति।
आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते ॥१७॥

(अथर्ववेद का० ११। सू० ५। म० १७)

ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत।
इन्द्रो ह ब्रह्मचर्येण देवेभ्यः स्वराभरत ॥१९॥

ओषधयो भूतभव्यमहोरात्रे वनस्पतिः ।
संवत्सरः सहर्तुभिस्ते जाता ब्रह्मचारिणः ॥२०॥
पार्थिवा दिव्याः पशव आरण्या ग्राम्याश्च ये ।
अपक्षाः पक्षिणश्च ये ते जाता ब्रह्मचारिणः ॥२१॥

(अथर्ववेद का० ११ । सू० ५ । मन्त्र १९-२१)

एवं शतपथ-गोपथ-ब्राह्मणादिभिरुपनीतस्य ब्रह्मचारिणो नियमान् विस्तरशो विदधानैः सम्यगाविष्कृतमेतस्य श्रुतिबोधितत्वम् ।

शतपथब्राह्मणे (११ । ५ । ४)—

"ब्रह्मचर्यमागामित्याह", "अथास्य हस्तं गृह्णाति", "इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवासाविति", "अथैनं भूतेभ्यः परिददाति प्रजापतये त्वा परिददामि देवाय त्वेत्यादि", "ब्रह्मचार्यसीत्याह", "अपोऽशान", "कर्म कुरु", "मा सुषुप्थाः", "वाचं यच्छ", "समिधमाधेहि", "अथास्मै सावित्रीमन्वाह", "तां वै पच्छोऽन्वाह", "आग्नेयो वै ब्राह्मणः सद्यो वा अग्निर्जायते", "न ब्रह्मचारी सन्मध्वश्नीयात्" इत्यादि ।

गोपथब्राह्मणे (पू० प्र० २ खं० ५-६)—

"तमुपसंगृह्य पप्रच्छाधीहि भो किं पुण्यमिति ब्रह्मचर्यमिति, किं लौक्यमिति ब्रह्मचर्यमेवेति, तस्मा एतत्प्रोवाचाष्टाचत्वारिंशद्वर्षं ब्रह्मचर्यं द्वादश वर्षाण्यवरार्द्धमपि स्नास्यंश्चरेद्यथाशक्त्यपरम् । ब्रह्म ह वै प्रजा मृत्यवे सम्प्रयच्छत्, ब्रह्मचारिणमेव न सम्प्रददौ, तस्माद् ब्रह्मचार्यहरहः समिध आहृत्य सायं प्रातरग्निं परिचरेत्, तस्मात् ब्रह्मचारिणेऽहरहर्भिक्षां दद्यात्, समिद्भैक्षे सप्तरात्रमाचरितवान् ब्रह्मचारी पुनरुपनेयो भवति ।"

एवं ब्रह्मचारिधर्मा अपि सर्वैः सूत्रकारैर्गोपथब्राह्मणादेवोद्धृत्य स्व-स्वग्रन्थे निवेशिताः । तद्यथा—"नोपरिशायी स्यान्न गायनो न नर्तनो न सरणो न निष्ठीवेत् न श्मशानमातिष्ठेत्" इत्यादि (गो० ब्रा० पूर्वा० द्वि० प्र० खं० ७) ।

युक्तं चैतत्—श्रौताः स्मार्ताश्च सर्वाः क्रियास्तमेवोपनयनसंस्कारमुपजीव्य यतः प्रवृत्ताः । यथैवाऽन्याधानमन्तरा श्रौतेषु स्मार्तेषु वा कर्मसु नाधिकार इत्याधानमवश्यं विधेयमासीत् । अत एव च सर्वसंस्कारापेक्षयाऽस्य श्रेष्ठत्वमवगम्यते स्वीक्रियते च धर्मज्ञैः ।

अत्र न केवलं यज्ञोपवीतधारणेन गायत्र्युपदेशमात्रेण वोपनयनं सिद्ध्यति,

किन्तु साङ्गस्यानुष्ठानेन तत्स्वरूपसिद्धिः। तत्र समन्त्रकं माणवकस्योपनयनं गायत्र्युपदेशश्च प्रधानम्, इतरत्सर्वमङ्गम्।

अत्रोपनयनदिन एव वेदारम्भं समावर्तनं च केचिदनुतिष्ठन्ति, केचिच्छाखिन उपनयनदिने उपनयनमात्रम्, उपाकर्मदिने वेदारम्भम्, विवाहात्पूर्वदिवसे समावर्तनमनुतिष्ठन्तो दृश्यन्ते। केचिच्चोपनयनदिने वेदारम्भमननुष्ठाय तस्मिन्नेव दिने समावर्तनमनुतिष्ठन्ति।

तत्र शाखान्तरीयाणां स्व-स्वशाखानुसारेण सत्यपि तथाऽनुष्ठानेऽस्माकं वाजसनेयिनामुपनयनदिने एव वेदारम्भ-समावर्तनानुष्ठाने न कमपि दोषमुत्पश्यामः। यतो हि हरिहरप्रभृतिभिर्व्याख्यानावसरे उपनयनपद्धतिपरिसमाप्त्यनन्तरमुपनयनदिन एव वेदारम्भकर्तव्यतोक्ता। अत उपाकर्मदिन एव वेदारम्भ इति प्रमाणाभावात् "एतदेव व्रतादेशनविसर्गेषु" (पा० गृ० सू०) इति वेदारम्भहोमस्य पृथग्विधानाच्च उपनयनदिने वेदारम्भो युक्तः।

यद्यपि तस्मिन्नेव दिने समावर्तनं न कर्तव्यतयोक्तम्, तथापि ब्रह्मचारिधर्माणां स्मृत्युक्तानां यथावत्परिपालने दुःशकत्वम्, अपरिपालने च पातित्यं पश्यन्तोऽस्मत्प्राचीनास्तस्मिन्नेवोपनयनदिने समावर्तनमप्यनुष्ठितवन्तः। स एवाचारोऽद्य यावत्प्रतिष्ठितः प्रचलितश्च वर्तते। अतोऽविरुद्धत्वात् प्राचीनसम्प्रदायानुवर्तितत्वाच्च त्रितयमपि एकस्मिन् दिनेऽनुष्ठीयते माध्यन्दिनैः।

इतरशाखिनां तु उपनयनदिने वेदारम्भस्याविधानात् उपाकर्मदिने विधानात् तैरुपाकर्मदिने एव वेदारम्भः क्रियते नोपनयनदिने।

उपाकर्मपर्यन्तं यैर्वेदो न पठ्यते तैर्गायत्र्या ब्रह्मयज्ञोऽनुष्ठीयते। परं तैरपि समावर्तनं वेदारम्भात्पूर्वमेवानुष्ठीयते तद्युक्तमयुक्तं वेति विचारणीयम्। यतस्तेषां सूत्रेऽप्युपाकर्मानन्तरं समावर्तनविधिरस्ति। अतस्तैरपि कालापकर्षं कृत्वा यथाकथञ्चिदुपनयनदिने वेदारम्भं विधायैव समावर्तनं कर्तव्यमिति समीचीनः पन्थाः।

ब्रह्मचर्यधारणपक्षे उपनयनाग्नेर्यावद् ब्रह्मचर्यधारणं तत्रैव च समिदाधानादीत्येकः पक्षः। लौकिकाग्नौ समिदाधानादीति पक्षान्तरम्। अस्मिन् कल्पेऽपि त्रिरात्रमुपनयनाग्निर्धार्य इति बौधायनादयः। सद्यः समावर्तनपक्षेऽसद्यः समावर्तनपक्षे वा समावर्तनानन्तरं त्रिरात्रव्रतानुष्ठानं कार्यमेव। "तिस्रो रात्रीर्व्रतं चरेत्" (पा० गृ० सू० २।८।१) इत्यनेन तथाविधानात्। अतः समावर्तनानन्तरं त्रिरात्रमध्ये विवाहो न कार्यः। 'त्रिरात्रं स्त्रीदर्शननिषेधाच्च' (पा० गृ० सू० २)।

अतएव वङ्गदेशे समावर्तनानन्तरं त्रिरात्रं ब्रह्मचारिणाऽवगुण्ठनं क्रियते। पारस्करगृह्यपरिशिष्टेऽप्येवमेवावगुण्ठनविधिरस्ति।

अस्योपनयनस्य ब्राह्मण-क्षत्रिय-विशां क्रमेण अष्टौ, एकादश, द्वादश वर्षाणि मुख्यः कालः। ततः षोडश, द्वाविंशतिः, चतुर्विंशतिर्वर्षाणि गौणः कालः। तत्र मुख्यकालातिक्रमे गौणकालेऽप्यनादिष्टप्रायश्चित्तं कृत्वोपनयनं भवति। गौणकालातिक्रमे तु व्रात्य-

स्तोमं प्रायश्चित्तं कृत्वोपनयनम्। पतितसावित्रीका व्रात्या उच्यन्ते। व्रात्यकर्तृको यज्ञो व्रात्यस्तोमः।

तत्र व्रात्याश्चतुर्विधा भवन्ति। हीनाचाराः, पापाध्यारोपेण जातिबहिष्कृताः, युवावस्थायामेव ज्ञातिबहिष्कृताः, अपगतप्रजननेन्द्रियसामर्थ्या वृद्धव्रात्याः। एतैः शुद्ध्यर्थं क्रियमाणो यज्ञो व्रात्यस्तोमोऽपि चतुर्विधः। एषु द्वितीय उक्थ्यसंस्थः। इतरेऽग्निष्टोमसंस्थाः।

अयं च गणयज्ञः। अतोऽयं नैकेन व्रात्येन कर्तुं शक्यते। व्रात्यस्तोमोऽयं लौकिकेऽग्नौ भवति (का० श्रौ० सू० १।१।१४)। व्रात्यस्तोमयज्ञविधिः कात्यायनश्रौतसूत्रे (२२।४) द्रष्टव्यः।

अस्य यज्ञस्य पाशुकत्वाद् गणयज्ञत्वाच्च नास्मिन् युगेऽनुष्ठानम्। अतः स्मृत्युक्तेन प्रत्याम्नायेन शुद्धिः संपाद्या। प्रत्याम्नायोऽपि गोनिष्क्रयदानमेव प्रत्याम्नायान्तरापेक्षया सुकरः। तत्र ब्राह्मणस्य द्वादशाब्दम्, क्षत्रियस्य नवाब्दम्, वैश्यस्य षडब्दम्। एषु क्रमेण ३६०, २७०, १८० गावस्तन्निष्क्रया वा दातव्या भवन्ति।

कलौ उपनयनयोग्यक्षत्रिय-वैश्ययोरभावान्न तयोरुपनयनमिति नागोजिभट्टप्रभृतयो दाक्षिणात्याः। सर्वेषु देशेषु अयं ब्राह्मणः, अयं क्षत्रियः, अयं वैश्यः, इत्यविगीतव्यवहारस्य जातिनिर्णायकस्य विद्यमानत्वात् स्व-स्वजात्युचितधर्माचरणरहितानामपि तत्तज्जात्युचितधर्माचरणशीलैः सह भोजनादिव्यवहारस्य दर्शनात् वणिज इत्याद्यनभिचरिताविगीतव्यवहाराच्च अगरवालाः सर्वेऽपि तृतीयवर्णाः प्रायेणोपनयनादिसंस्कारभाजः शिष्टैः परिगृहीता भवन्ति। अतः सर्वेऽपि प्रायश्चित्ते कृते उपनयनार्हा भवन्ति। तत्र त्रिपुरुषं पतितसावित्रीका एवोपनयनार्हा नतु दशविंशतिपुरुषपर्यन्तमस्मर्यमाणोपनयना अपीति केचन दाक्षिणात्याः।

बहुकालतोऽस्मर्यमाणोपनयनानामपि क्षत्रिय-वैश्यानामुपनयनार्हत्वं प्रायश्चित्तेन निष्कण्टकमिति सर्वं। इति शम्।

चूडाकरणे शिखास्थापनविचारः

वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च॥
गार्भैर्होमैर्जातकर्म-चौड-मौञ्जी-निबन्धनैः।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते॥

(मनु० २।२६-२७)

इत्यादिवचनजातबलाद् द्विजानां स्वशरीरसंस्कारकं जातकर्मादि अवश्यमनुष्ठेयमित्यवगम्यते। तत्संस्कृत एव च पुरुषः कर्मण्यो भवति। तेषु च कर्मसु चूडाकरणमपि मुख्यं कर्म। यस्यानुष्ठानं प्रथमादिषु उपनयनकालान्तेषु अयुग्मवर्षेषु अनुष्ठेयतया गृह्यकाराः सर्वेऽपि कथयन्ति। इदं च चूडाकरणं शिखास्थापनार्थं द्विजातिभिरवश्यमनुष्ठेयं कर्म। अतश्चूडानिधानायैवेदं कर्म कर्तव्यतया विहितम्।

यतो हि "यथर्षि शिखां निदधाति, यथैवैषां कुलधर्मः स्यात्"

(आप० गृ० सू० १।६।१५)

"यथाकुलधर्मं केशवेषान् कारयेत्" (आश्व० गृ० सू० १।१६।१६)

"यथामङ्गलं केशशेषकरणम्" (पा० गृ० सू० २।१।२१)

इति भगवान् पारस्करः अन्येऽपि च सूत्रकाराः शिखानिधानमेव विदधति तत्तत्कुलधर्मानुसारेण। हरिहर-गदाधरादयोऽपि "केशानां शेषकरणं शिखास्थापनं यथाकुलाचारव्यवस्थापनम्", "केशानां शेषकरणं शिखारक्षणं स्थापनं कर्तव्यम्" इति स्व-स्वभाष्ये—"वपनं कुर्वन् केशशेषरक्षणं करोति", "यथामङ्गलं शिखास्थापनं नापितः करोति" इति पद्धतावपि शिखास्थापनं लिखन्ति, न सर्वमुण्डनम्। नात्र संशयितव्यं "यथामङ्गलं केशशेषकरणम्", "यथाकुलाचारव्यवस्थामनतिक्रम्य" इत्यादिभिः स्व-स्व-कुलाचारोऽप्यनुक्रान्तः। एवं च येषां कुले सर्वमुण्डनाचारोऽस्ति तैः स्वकुलाचारानुसारेण सर्वमुण्डनमेव कर्तव्यमित्यप्यस्मादेव ग्रन्थात् प्रतीयत इति, यतः कुलाचारशब्दं त एव भाष्यकारा अग्रे विवृण्वन्ति।

कुलाचारश्च बहुधा। तद्यथा लौगाक्षिः—"दक्षिणतः कम्बुजवसिष्ठानाम्, उभयतोऽत्रिकश्यपानाम्, मुण्डा भृगवः, पञ्च चूडा आङ्गिरसः, वाजसनेयिनामेका, मङ्गलार्थं शिखिनोऽन्ये" इति।

अत्र च वचने येषां शाखिनां यो य आचारः स स्पष्टमुपात्तः। तत्र "मुण्डा भृगवः" इति भृगुगोत्राणामेव सर्वमुण्डनम्। अस्माकं तु वाजसनेयिनाम् "एका" इत्यनेन एकशिखानिधानमेव विहितम्। एवं तदुपात्तायां कारिकायामपि —

कम्बुजानां वसिष्ठानां दक्षिणे कारयेच्छिखाम्।
द्विभागेऽत्रिकश्यपानां मुण्डाश्च भृगवो मताः॥
पञ्च चूडा अङ्गिरस एका वाजसनेयिनाम्।
मङ्गलार्थं शिखिनोऽन्य उक्तश्चूडाविधिः क्रमात्॥

इत्येकशिखानिधानमेव वाजसनेयिनां विहितम्। अतश्च यथाकुलाचारमित्यस्य शिखानिधानमेवास्माकं शास्त्रसम्मतमिति अस्मत्पूर्वाचार्याणां हरिहर-गदाधर-प्रभृतीनामभेद्यः सिद्धान्तो न तु सर्ववपनम्।

इदं च शिखारक्षणम्—

सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ॥

इति भृगुस्मृतिवचनबलादवश्यमेव कर्तव्यम्। शिखां विना अनुष्ठितानां कर्मणां वैफल्यबोधनात्। यद्यपि "गोत्रचिह्नं शिखाकर्म" इति वचनात् गोत्रचिह्नत्वं प्रतीयतेऽस्य, तथापि संस्कारगणमध्ये पाठात् अवश्यं कर्तव्यमेव। एवमवश्यकृतस्य शिखाकरणस्य गोत्रचिह्नत्वमपि भवत्यानुषङ्गिकं फलम् । अतएव कुमारिलपादा अपि—"गोत्रचिह्नं शिखाकर्म" । तत्राप्याचारनियमस्यादृष्टार्थत्वान्न तावन्मात्रमेव प्रयोजनम्। तेनान्य एवाभिप्रायः। कर्माङ्गभूतं तावच्चतुरवत्तपञ्चावत्ततादिविभागसिद्ध्यर्थमवश्यं स्मर्तव्यम्। अतश्च तच्चिह्नार्थमपि तावच्छिखाकल्पस्मृतेः प्रामाण्यमस्तु—इति गोत्रचिह्नत्वस्यानुषङ्गिकफलत्वमेवाभिप्रयन्ति तन्त्रवार्त्तिके, यथोपनयनमध्येऽवश्यकृतस्योपनयनधारणस्य त्रैवर्णिकत्वपरिचायकत्वम्।

एवमिदं शिखाकर्म न केवलं स्मार्त्तम्, किन्तु श्रुतिप्रतिपाद्यमपि—"यशसे श्रियै शिखा" (शु० य० १९।९१) इत्यादिना शिखाधारणस्य श्रीप्रभृतिश्रेयस्सम्पादकत्वकथनात्।

"यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव" (शु० य० १७।४८) इति श्रुतिरपि शिखासत्तामेव प्रतिपादयति कुमाराणाम्। न ह्यत्र विशिखपदस्य शिखारहितत्वमर्थः। पूर्वमीमांसायां (१।३) स्मृतिप्रामाण्याधिकरणे "शिखाकर्म कर्तव्यम्" इति स्मृतिवाक्यमुदाहृत्य तदुपष्टम्भकतयाऽस्य वाक्यस्य भगवता शबरस्वामिनोदाहरणात्।

"विशिखा विविधशिखा विकीर्णशिखा वा" इत्येव व्याख्यातृभिर्व्याख्याकरणाच्च ।

एवं च सति ये नामेदानीं केचन वाजसनेयिनामस्माकं चौलकर्मणि सर्ववपनं कुर्वन्ति कारयन्ति च तद् दृष्ट्वा केचिदिममशिष्टाचारं पद्धत्यादावपि आरोपयन्ति, तां च प्रमाणं मन्यमाना अनुष्ठापयन्ति च तत्सर्वं सूत्रकारविरुद्धं हरिहर-गदाधर-प्रभृतिभाष्यपद्धत्यादिकर्त्रस्मत्पूर्वाचार्यमतविरुद्धमस्मत्पितृ-पितामहाद्यनुष्ठितप्राचीनाचारविरुद्धं च। लौगाक्षिवचने भृगूणां सर्वमुण्डनविधानाच्छन्दोगानां स्वगृह्ये तद्विधानाच्च तेषामुभयेषामेव चौले सशिखं सर्ववपनम्। इतरेषां सर्वेषामपि शिखाऽवश्यं निधापनीया।

ये नाम स्वकुलानुरोधेन स्वकुलदेवतायै केशदानं प्रतिजानते कुर्वन्ति च तैरपि चूडाकरणात्पूर्वमेव तत्कर्तव्यम्, न ततः परम्। चूडाकरणे शिखाऽवश्यं रक्षणीया। तस्याश्च प्रायश्चित्तविशेषं विना कर्तनं लोपनं वा न कदापि कार्यम्। अतो यथाऽयं संस्कारो यथावदनुष्ठितो भवेत् यथा च प्राचीनां शास्त्रीयां रीतिमनुल्लङ्घ्य चूडाकरण

एव शिखां निधाय तद्युता यावज्जीवं स्व-स्ववर्णोक्तानि कर्माणि अनुतिष्ठन्तस्तज्जनितं समग्रं फलं सर्वश्रेयोरूपं प्राप्नुयुर्धार्मिका जना इति। अतः सर्वान् सनातन-धर्मावलम्बिनः सविनयं प्रार्थये यच्छास्त्रसम्मतिं स्वमनीषयाऽपि च युक्तायुक्तत्वं विचार्य यथोचितं कुर्युरिति।

याग-पदार्थनिरूपणम्

देवतोद्देशेन अग्नौ प्रक्षेपविशिष्टो द्रव्यत्यागो यागः। सर्वत्र हि यजति-चोदना-चोदितस्थले अर्थात् 'सोमेन यजेत' इत्यादौ यजिधात्वर्थः कश्चित्प्रतीयते। तस्मिन्नेव वाक्ये तदुद्देशेन किञ्चिद् द्रव्यमपि विधीयते। वाक्यान्तरेण च देवताया अपि विधानमस्ति। तत्र तां देवतामुद्दिश्य तस्य द्रव्यस्य यस्त्यागः 'इदमिन्द्राय न मम' इत्यादिरूपो मानसिकव्यापारः स एव यागपदार्थः। स च त्यागरूपत्वाद्यजमानेनैव कर्तव्यो न तु ऋत्विगादिभिः। तेषां यजमानद्रव्ये स्वत्वाभावेन त्यागकरणेऽ-सामर्थ्यात्।

ते च यागाः प्रकृतिभूता विकृतिभूताश्च सन्ति। तत्र यस्य कर्मणः सन्निधाने तदपेक्षितं सर्वमप्यङ्गजातं पठितम् अन्यतश्चाङ्गापेक्षा नास्ति सा प्रकृतिः। अथवा यतो विकृतिरङ्गानि गृह्णाति सा प्रकृतिः। यथा दर्शपूर्णमासौ। तत्र हि अन्वाधानादि-ब्राह्मणतर्पणान्तानि सर्वाण्यङ्गानि स्वसन्निधान एवाम्नातानि। नान्यतोऽङ्गान्यागच्छ-न्ति। अस्मादेव सर्वास्विष्टिषु धर्मा अतिदेशेन गच्छन्ति, अतो दर्शपूर्णमासयागः सर्वासामिष्टीनां प्रकृतिरुच्यते। इयं प्रकृतिर्द्विधा– मूलप्रकृतिः, अवान्तरप्रकृतिश्च। यत्कर्म सर्वथा स्वाङ्गविषये कर्मान्तरं नापेक्षते स्वापेक्षितसर्वाङ्गविशिष्टमेव पठितं सा मूलप्रकृतिरित्युच्यते, यथा दर्शपूर्णमासादिः। यत्तु कर्म स्वाङ्गविषये किञ्चित्कर्मा-न्तरमपेक्षते साऽवान्तरप्रकृतिरित्युच्यते। यथाऽग्नीषोमीयः पशुः। अयं च [1]प्रयाजा-

---

१. प्रयाजाः—समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति इति पञ्चभिर्वाक्यैर्विहिताः समिदादिसंज्ञकाः पञ्च यागाः प्रयाजा इत्युच्यन्ते। इमे च दर्शपूर्ण-मासप्रकरणे पठितास्तदङ्गभूताः। तत्र दर्शपूर्णमासयोः पञ्चैव प्रयाजाः। विकृतौ क्वचिन्नव प्रयाजा इज्यन्ते। 'एकादश प्रयाजान् यजति' इत्यादिना संख्याधिक्यमपि यत्र विहितं तत्र एतेषामेव पञ्चानामावृत्त्या संख्याधिक्यं सम्पादनीयम्। अत्र समित्, तनूनपात्, इट्, बर्हिः, इति चत्वारि चतुर्णां प्रयाजानां नामधेयानि तानि च तन्नामकदेवतासम्बन्धं निमित्तीकृत्यैव प्रवृत्तानि। अत एव तादृशेषु चतुर्षु प्रयाजेषु समिदादयः क्रमेण देवताः, पञ्चमे परप्रयाजे वक्ष्यमाणदेवतानां स्वाहाग्निमित्यादिनामसंकीर्तनात् ता एव देवताः। यत्र तु संख्याधिक्यं तत्र देवताभेदः।

[1]नुयाजाद्यङ्गविषये दर्शपूर्णमासावपेक्षते । सवनीयादीनां पशुयागानां यूपादिविषये अपेक्षा भवति । तत्र तिस्रो मूलप्रकृतयः—दर्शपूर्णमासौ, अग्निहोत्रम्, अग्निष्टोमसंस्थाको ज्योतिष्टोमश्च । एषु च न कुतश्चित्कर्मणोऽङ्गान्यतिदिश्यन्ते ।

विकृतिः—यत्र कानिचिद्देवाङ्गानि पठितानि इतराणि तु अपेक्षितानि अन्यत आनीयन्ते सा विकृतिः । यथा "सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' इति विहिता सौर्येष्टिः । तत्र हि स्वसन्निधाने न समग्राङ्गोपदेशः, किन्तु 'प्रयाजे-प्रयाजे कृष्णलं जुहोति' इत्यादिकतिपयानामेवाङ्गानाम् । इतराणि तु दर्शपूर्णमासत एवानीयन्ते ।

त्यक्तस्य हविषो विहितदेशे आहवनीयादौ यः प्रक्षेपः स होम इत्युच्यते । स द्विविधः—प्रधानहोमः, अङ्गहोमश्चेति । 'अग्निहोत्रं जुहोति' इत्यादयः प्रधानहोमाः तत्तत्फलोद्देशेन विहिताः । तत्र न प्रक्षेपमात्रं धात्वर्थः, किन्तु प्रक्षेपः, उद्देशः, त्याग इति त्रितयमपि ।

यद्यपि एतदंशत्रयं यागेऽप्यविशिष्टं देवतोद्देशेन द्रव्यत्यागस्य प्रक्षेपविशिष्टस्यैव यागपदार्थत्वात्, होमेऽपि देवतोद्देश्यकद्रव्यत्यागस्य सत्त्वात् । तथापि त्रयाणामंशानां समप्राधान्यं होमस्थले, यागस्थले तु प्रक्षेपस्याङ्गत्वम्, इतरयोः समप्राधान्यमिति विशेषः । अयमेव प्रक्षेपो यागाङ्गभूतोऽङ्गहोम इत्युच्यते । अयमेव प्रभेदः सूत्रकारेण जैमिनिना 'यजतिचोदना द्रव्यदेवताक्रियं समुदायं कृतार्थत्वात्', 'तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात्' (जै० सू० ४।२।२८, २६) इति सूत्राभ्यां प्रकटीकृतः । 'यज्ञं व्याख्यास्यामः', 'द्रव्यं देवतात्यागः' (का० श्रौ० सू० १।२।१-२) इति कात्यायनोऽपि ।

याग-होमयोर्भेदनिरूपणम्

यागहोमयोः को भेद इति विचारे प्रथमं तावदिदं निर्णीयते—यत्र यजेतेति यजधातुना क्रियाभिधानं जुहोतीति हुधातुना च होमविधानम्, तत्र उभयत्रापि अंशत्रयमस्ति । उद्देशांशः, त्यागांशः, प्रक्षेपांशश्च । यत्र देवतामुद्दिश्य 'इदं न मम' इति द्रव्यं त्यज्यते तत्र देवतागत उद्देशांशः, द्रव्यगतस्त्यागांशः, देवतामुद्दिश्य त्यक्तस्य द्रव्यस्य कुत्र प्रक्षेप इत्याकाङ्क्षायां "यदाहवनीये जुहोति" (तै० ब्रा० १०।१०।१०) इत्यादिना आहवनीयादिष्वग्निषु यः प्रक्षेपः क्रियते स प्रक्षेपांशः । एतत् त्रितयमपि यागे होमे च विद्यत एव, तथापि प्रक्षेपांशस्य अङ्गत्वम्, उद्देशांश-

१. अनुयाजाः—दर्शपूर्णमासयागे त्रयोऽनुयाजाः । अत्र समिदादिवत् न त्रयाणां नाम श्रुतं किन्तु मन्त्रवर्णबोध्याया एव देवताया अत्रापि स्वीकारात्, तन्नाम्नैव बर्हिः, नराशंसः, स्विष्टकृत्, इति नाम्ना व्यवह्रियन्ते । इमेऽनुयाजा अपि प्रयाजवद्विकृतौ नवैकादशादिसंख्याविकल्पं भजन्ते तत्रापि प्रयाजवदेव देवतान्तरं बोध्यम् ।

त्यागांशयोः प्राधान्यं च यत्रास्ति स यागपदार्थः। उद्देशांशत्यागांशप्रक्षेपांशानां यत्र समं प्राधान्यं स होमपदार्थः। अयं च विभागो याज्ञिकैः जैमिन्यादिभिः सूत्रकारैश्चाङ्गीकृतः। अत एव जैमिनिः—

'यजति चोदनाद्रव्यदेवताक्रियं समुदाये कृतार्थत्वात्, तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात्' (४।२।२७।२८) इति सूत्रयामास।

व्याख्यातारश्च "देवतोद्देश्यद्रव्यत्यागप्रक्षेपेषु समप्रधानेषु जुहोतिपदप्रयोगः। अतश्च प्रक्षेपाङ्गकक्रियाद्वयवृत्तिजातिर्यागत्वम्, क्रियात्रयवृत्तिजातिश्च होमत्वम्" इति (भाट्टदीपिकायां ३।४।१८) स्पष्टमूचिरे।

अतश्च यजिधातुना विहितो यागः, स च एतादृशस्वरूपः। हुधातुनाऽभिहितश्च होमः, स च एवंरूप इति फलितम्। एवं च यत्र शान्तिक-पौष्टिकादिषु कर्मसु यजिधातुना विधानाभावः, तत्र यागत्वं नास्ति इति शतरुद्रियादौ जुहोतिचोदनाचोदितत्वात् होमत्वमेव तेषाम्, इति तत्र सङ्कल्पादौ होमपदस्यैवोल्लेखः कार्यः, न तु याग पदस्य। अत एव अग्निहोत्रे प्रातरग्निहोत्रं 'होष्यामि' इत्येवोल्लेखः, न तु 'यक्ष्ये' इति।

एवं च नवग्रहहोमादिषु होमस्यैव विशेषतोऽभिधानात्तेषां होमत्वमेव, न तु यागता। अत एव शान्तिक-पौष्टिकादिहोमेषु नवग्रहधर्मातिदेशोक्तिस्तत्र तत्र ग्रन्थकृतां सङ्गच्छते। यदि नवग्रहहोमस्य यागत्वं स्यात्तर्हि यागीयानां धर्माणां होमे अतिदेशाभावकथनं विरुद्ध्येत। निर्णीतं हि पूर्वमीमांसायाम् (४।२) यागहोमयोः वैसादृश्यं परस्परं धर्मानतिदेश इति।

एवं च नवग्रहहोमादिषु मख-यज्ञादिशब्दप्रयोगो गौणः। यथा—**'स एष यज्ञः पञ्चविधः-अग्निहोत्रम्, दर्शपूर्णमासौ, चातुर्मास्यानि, पशुः, सोमः'** इति (ऐत० ब्रा०)। अग्निहोत्रेऽपि यज्ञशब्दप्रयोगो गौणः तद्वत् इति।

ग्रहहोम-निर्णयः

प्रतिष्ठाभास्कर-प्रतिष्ठासरण्यादिमते—अर्कादिसमित्, तिलाः, चरुः, आज्यं चेति चत्वारि हवनीयद्रव्याणि। मयूखे तु—समित्, चरुः, आज्यमिति द्रव्यत्रयमेव विहितम्, न तिलाः। अतो मयूखमनुसरद्भिर्द्रव्यत्रयेणैव होमः कार्यः। साम्प्रदायिकास्तु द्रव्यचतुष्टयमेव जुह्वति।

अथैककुण्डीपक्षे ग्रहहोमक्रमः। तत्र द्रव्यत्रयेण होमपक्षे त्रयो होतारः, द्रव्यचतुष्टयेन होमपक्षे चत्वारो होतारः सूर्यादिनवग्रहेभ्यः प्रतिदैवतं अर्कादिसमिच्चर्वाज्यैः, पक्षे अर्कादिसमित्तिल-चर्वाज्यैः प्रतिद्रव्यमष्टाष्टसङ्ख्यया अष्टवारंसावृत्तैर्नाममन्त्रैस्तत्तदावाहनमन्त्रैर्वा जुहुयुः। यदा षट् होतारस्तदा चतुरावृत्तमन्त्रै-

र्होमः। द्रव्यचतुष्टयपक्षे अष्टौ होतारस्तदापि चतुरावृत्तैरेव मन्त्रैर्होमः। अस्मिन् पक्षे स्रुवाहुतिद्वयम्, पात्रासादने स्रुवद्वन्द्वस्यासादनादिकार्यम्। ततस्तावन्त एव होतारस्तावद्भिरेव द्रव्यैश्चतुश्चतुःसङ्ख्यया अधिदेवताभ्यः प्रत्यधिदेवताभ्यः जुहुयुर्नाममन्त्रैस्तत्तदावाहनमन्त्रैर्वा चतुर्वारमावृत्तैः। ततस्तावन्त एव होतारस्तावद्भिरेव द्रव्यैः प्रतिद्रव्यं द्विद्विसङ्ख्यया विनायकादिलोकपालान्तेभ्यः (लोकपालाश्चाष्टौ दश वा) देवताभ्यो जुहुयुर्द्विवारमावृत्तैर्मन्त्रैः।

पञ्चकुण्डीपक्षे—अष्टाहुतिपक्षे ग्रहहोमक्रमः। पञ्चसु कुण्डेषु द्रव्यत्रयपक्षे त्रयस्त्रयो होतारः, द्रव्यचतुष्टयपक्षे चत्वारश्चत्वारो होतारः सूर्यादिनवग्रहेभ्यः प्रतिदैवतमर्कादिसमिच्चर्वाज्यद्रव्यैः (पक्षे—अर्कादिसमित्-तिल-चरु-आज्यैः) प्रतिद्रव्यमष्टाष्टसङ्ख्यया प्रथमावृत्तौ पञ्चसु कुण्डेषु, द्वितीयावृत्तौ आचार्यादिकुण्डत्रये जुहुयुस्तत्तदावाहनमन्त्रैः। द्वितीयावृत्तौ पश्चिमोत्तरकुण्डयोर्न होमः, किन्तु तयोः कुण्डयोर्होतारस्तूष्णीमासीनाः स्युः। ततः पञ्चसु कुण्डेषु तावन्त एव होतारस्तावद्भिरेव द्रव्यैः प्रतिद्रव्यं चतुश्चतुःसङ्ख्यया अधिदेवताभ्यः प्रत्यधिदेवताभ्यश्च जुहुयुराचार्यादीनां चतुर्षु कुण्डेषु। उत्तरकुण्डे अधिदेवता-प्रत्यधिदेवतानां न होमः। ततः पञ्चसु कुण्डेषु तावन्त एव होतारस्तावद्भिरेव द्रव्यैः प्रतिद्रव्यं द्विद्विसङ्ख्यया विनायकादिलोकपालान्ताभ्यो देवताभ्यः प्रतिदैवतमाचार्यकुण्डे पूर्वकुण्डे च जुहुयुः। दक्षिणादिकुण्डत्रये विनायकादिलोकपालान्तानां न होमः, लोकपालाश्चाष्टौ दश वेत्युक्तं प्राक्। इत्यष्टाहुतिपक्षे होमक्रमः।

अष्टाविंशत्याहुतिपक्षे तु—पञ्चभिरावृत्तिभिः पञ्चसु कुण्डेषु हुत्वा षष्ठावृत्तकुण्डत्रये जुहुयुर्नवग्रहेभ्यः। षष्ठावृत्तौ पश्चिमोत्तरकुण्डयोर्न होमः। अधिदेवताभ्यः प्रत्यधिदेवताभ्यश्चास्मिन्पक्षे अष्टाष्टसङ्ख्यया होमः, तेन प्रथमावृत्तौ पञ्चसु कुण्डेषु, द्वितीयावृत्तौ आचार्यादिकुण्डत्रये होमः। पश्चिमोत्तरकुण्डयोरधिदेवता-प्रत्यधिदेवतानां न होमो द्वितीयावृत्तौ। विनायकादिलोकपालान्तेभ्यश्च चतुश्चतुःसङ्ख्यया होमः आचार्यादिकुण्डचतुष्टये। उत्तरकुण्डे विनायकादीनां न होमः। इत्यष्टाविंशत्याहुतिपक्षः।

अथाष्टोत्तरशतपक्षः। अष्टोत्तरशतपक्षे तु पञ्चसु कुण्डेषु एकविंशत्यावृत्तिभिर्होमः। द्वाविंशावृत्तौ आचार्यादिकुण्डत्रये एव होमो नवग्रहाणाम्, न पश्चिमोत्तरकुण्डयोः। ग्रहाणामष्टोत्तरशताहुतिपक्षे अधिदेवताभ्यः प्रत्यधिदेवताभ्यश्च अष्टाविंशत्यष्टाविंशतिसङ्ख्यया होमः। तेन पञ्चसु कुण्डेषु पञ्चभिरावृत्तिभिर्होमं कृत्वा षष्ठावृत्तौ आचार्यादिकुण्डत्रये एव होमः कार्यः, न पश्चिमोत्तरकुण्डयोः। विनायकादिलोकपालान्तेभ्यस्तु अष्टाष्टसङ्ख्यया होमोऽस्मिन्पक्षे। सोऽपि होमः प्रथमावृत्तौ पञ्चसु कुण्डेषु, द्वितीयावृत्तौ तु कुण्डत्रय एवेति सङ्क्षेपः। एवमष्टोत्तरसहस्रपक्षेऽप्यूह्यम्। इत्यष्टोत्तरशतपक्षः।

नवकुण्डीपक्षे—अष्टाविंशत्याहुतिहोमपक्षे ग्रहहोमक्रमः। नवकुण्ड्यामष्टाहुतिपक्षो नास्तीत्युक्तं प्राक्। तत्र नवसु कुण्डेषु त्रयस्त्रयो होतारः। अर्कादिसमिच्चर्वाज्यैः प्रतिद्रव्यं सूर्यादिनवग्रहेभ्यः प्रतिदैवतं प्रथमावृत्तौ द्वितीयावृत्तौ तृतीयावृत्तौ च जुहुयु-

मन्त्रैः। चतुर्थावृत्तौ तु आचार्यकुण्ड एव त्रयो होतारो जुहुयुः। अन्येष्वष्टसु कुण्डेषु न होमः, इत्थमष्टाविंशतिसङ्ख्यो होमो निष्पद्यते। ततः आचार्यादीनामष्टसु कुण्डेषु त्रयस्त्रयो होतारः समिच्चर्वाज्यैरेव प्रतिद्रव्यं अधिदेवता-प्रत्यधिदेवताभ्यः प्रतिदैवतमष्टाष्टसङ्ख्यया जुहुयुः। ईशानकुण्डे अधिदेवतानां प्रत्यधिदेवतानां च न होमः। ततः त्रयस्त्रयो होतारः तैरेव द्रव्यैः प्रतिद्रव्यं चतुश्चतुःसङ्ख्यया विनायकादिलोकपालान्तदेवेभ्यः आचार्यादीनां चतुर्षु कुण्डेषु जुहुयुः। नैर्ऋत्यादिकुण्डेषु विनायकादीनां न होमः। इत्यष्टाविंशतिहोमपक्षः।

समित्तिलचर्वाज्यैरिति द्रव्यचतुष्टयपक्षे तु चत्वारश्चत्वारो जुहुयुः सर्वत्रेति विशेषः।

अष्टोत्तरशतपक्षे तु—नवसु कुण्डेषु त्रयस्त्रयश्चत्वारश्चत्वारो वा होतारः द्रव्यत्रयेण द्रव्यचतुष्टयेन वा द्वादशावृत्तिभिः नवग्रहेभ्यो जुहुयुः। अधिदेवताभ्यः प्रत्यधिदेवताभ्यश्च तावन्त एव होतारस्तैरेव द्रव्यैः प्रतिद्रव्यमष्टाविंशत्यष्टाविंशतिसङ्ख्यया नवसु कुण्डेषु आवृत्तित्रयेण जुहुयुः। चतुर्थावृत्तौ तु—आचार्यकुण्डे एव होमः। अन्येष्वष्टसु कुण्डेषु अधिदेवता-प्रत्यधिदेवतानां न होमश्चतुर्थावृत्तौ। ततः विनायकादिलोकपालान्तेभ्यस्तावन्त एव होतारस्तैरेव द्रव्यैः प्रतिद्रव्यमष्टाष्टसङ्ख्यया आचार्यादीनामष्टसु कुण्डेषु जुहुयुः। ईशानकुण्डे विनायकादीनां न होमः। इत्यष्टोत्तरशतहोमपक्षः। एवमष्टोत्तरसहस्रपक्षेऽप्यूह्यमिति।

शान्तिक–पौष्टिकहोमनिर्णयः

प्रतिष्ठायां शान्तिक-पौष्टिकहोम आचार्यकर्तृकः। अतोऽयं होमः पञ्चकुण्डीपक्षे नवकुण्डीपक्षे च आचार्यकुण्डे एव भवति, नान्यकुण्डेषु। तेन शान्तिक-पौष्टिकहोमो विभागरहित एव, विभागोक्त्यभावात्। न च "आचार्यः क्रमेण पलाश-उदुम्बर-अश्वत्थ-अपामार्ग-शमीसमिधो द्वादशसहस्र-षट्सहस्र-त्रिसहस्र-अष्टोत्तरसहस्र-अष्टोत्तरशतान्यतमसङ्ख्यया स्वकुण्डसमीपे संस्थाप्य शान्तिक-पौष्टिकमन्त्रैर्यथाविभागं सऋत्विग् जुहुयात्" इति ग्रन्थेन मयूखे यथाविभागंसर्त्विक् इति विभागेन होमविधानाद् विभागप्राप्तिरिति वाच्यम्; समिधां द्वादशसहस्रादिकं कुण्डसमीपे पलाशादिक्रमेण संस्थाप्य षड्भिः शान्तिक-पौष्टिकमन्त्रैः द्वादशसहस्रादिसंख्या यथा सम्पन्ना स्यात्तथा ऋत्विग्भिः सह स्वकुण्डे जुहुयात् इति तदर्थात्। न च "दैशिको मूर्तिपैः सह" इत्यधिवासनहोमवत् ऋत्विक्साहित्यं हवनक्रियायामस्ति, अतः सर्वेषु कुण्डेषु होमः स्यादिति वाच्यम्; तत्र प्राग्वदिति विशेषवचनात्। यत्र च कुण्डेषु होमोऽभिप्रेतो भवति तत्र प्राग्वत् (ग्रहवास्तुवत्) "कुण्डसङ्ख्यया विभज्य", "कुण्डेषु विभज्य वा जुहुयात्" इत्युच्यते तथात्रानुक्तत्वाच्च। अतः शान्तिक-पौष्टिकहोमे विभागोक्तिः समित्परा, न कुण्डपरा। अतश्च पलाशादिसमित्पञ्चकमध्ये एकैकया समिधा षड्भिर्मन्त्रैः षडावृत्तिर्होमः

कार्यः। तेन प्रतिमन्त्रेण अष्टादशाष्टादशसङ्ख्यया होमे अष्टोत्तरशतमष्टोत्तरशतं होमाः प्रतिद्रव्यं स्युः। समिधां द्वादशसहस्रपक्षे एकैकेन मन्त्रेण द्विसहस्रहोमैः षड्भिर्मन्त्रैर्द्वादशसहस्रमाहुतयः। अत्रैकैकस्याः समिधो द्वादशसहस्रादिहोम इति प्रागुक्तं न विस्मर्तव्यम्। षट्सहस्रपक्षे प्रतिमन्त्रेण एकसहस्रमाहुतयः। द्विसहस्रपक्षे प्रतिमन्त्रं प्रतिद्रव्यं पञ्चाशतमाहुतयः। अष्टोत्तरसहस्रपक्षे प्रतिमन्त्रं प्रतिद्रव्यम् अष्टषष्ट्युत्तरशतमाहुतय इति बोध्यम्। अनेकेषां स्थापनायामपि एक एवायं होमः, स्थाप्यदेवतापरत्वाभावात्। अत्रेदमपि बोध्यम्—ग्रहहोमानन्तरं सर्वे होमा विभागरहिता एव, विभागोक्त्यभावात्। विभागस्तु वास्तुहोमे ग्रहहोमे च नान्यत्रेति।

वेदस्य चतुर्धा विभागनिरूपणम्

तत्र विधिः प्रमाणान्तराज्ञातफलवति कार्ये पूर्वमप्रवृत्तं पुरुषं यः प्रवर्त्तयति स विधिरित्युच्यते। अतएव प्रवर्तना, प्रेरणा, प्रैष इत्यादयो विधेः पर्यायशब्दाः। अज्ञातज्ञापकोऽप्रवृत्तप्रवर्तकश्च विधिरिति च न्यायविदः। स च लोके आचार्यादिपुरुषनिष्ठोऽभिप्रायविशेषः। लोके हि आचार्यादिः स्वशिष्यं भृत्यं वा क्वचित्कर्मणि प्रेरयितुमिच्छन् लिङ्घटितं वाक्यमुच्चारयति तच्छ्रुत्वा च शिष्यादिः तस्मिन् कार्ये झटिति प्रवर्तते, प्रवृत्तश्च केनचित्पृष्ट आचार्यप्रेरितोऽहमिदं करोमि इति वदति। सोऽपि आचार्यादिरहमेनमस्मिन्कार्ये प्रवर्त्तयामि इति अभिमनुते। अनेन व्यवहारेण आचार्यादिप्रेरकनिष्ठोऽभिप्रायविशेष एव विधि-प्रेरणादिशब्दाभिधेय इत्यवगम्यते। वेदे च स धर्मविशेषो विध्यादिशब्दनिष्ठ एवेति वेदस्यापौरुषेयत्वमभिदधतां मीमांसकानां सिद्धान्तः। ईश्वरकर्तृकत्वं तु वेदस्याङ्गीकुर्वतां नैयायिकादीनां मते ईश्वरेच्छैव स इति सिद्ध्यति। तत्तत्क्रियाजन्यमपूर्वमेव नियोगशब्दाभिधेयं विधिशब्दवाच्यं मन्यन्ते मीमांसैकदेशिनः प्राभाकराः। विधेयधात्वर्थादिनिष्ठमिष्टसाधनत्वमेव विधिरिति मण्डनमिश्रप्रभृतयः केचित्। वैयाकरणा अपि मण्डनमिश्राशयमेवानुरुन्धते।

इष्टसाधनत्वम्, बलवदनिष्टाननुबन्धित्वम्, कृतिसाध्यत्वम्—इति त्रितयमपि विधिः इत्यपि केचन नैयायिकाः। एवं प्रेरणादिपदार्थस्य लिङ्बोध्यस्यैव मुख्यतो विधित्वेऽपि तद्घटितवाक्यस्य विधिरिति व्यवहारः क्रियते लोके वेदे च। तादृशो विधिश्चतुर्विधः। उत्पत्तिविधिः, विनियोगविधिः, प्रयोगविधिः, अधिकारविधिश्चेति।

तत्रोत्पत्तिविधिः

येन विधिना इदं कर्म कर्तव्यम् इत्यवबोध्यते स उत्पत्तिविधिः। उत्पत्तिरत्राज्ञातज्ञापनम्, एतद्वाक्याभावे प्रमाणान्तरेण केनापि एतत्कर्मस्वरूपं नावगमितम्, अतश्च अनेनैव विधिना कर्मस्वरूपं कर्तव्यतया अवबोध्यत इति कर्मस्वरूपमात्र-

बोधकस्य विधेरुत्पत्तिविधिरिति व्यवहारः। यथा—'अग्निहोत्रं जुहुयात्', 'सोमेन यजेत' इत्यादयः।

विनियोगविधिः

उत्पन्नस्य कर्मणः अर्थात् प्रमाणान्तरेणावगतस्य द्रव्यदेवतादेर्वा लोकावगतस्य अन्याङ्गतो बोधको विधिर्विनियोगविधिः। यथा - 'दध्ना जुहोति' अत्र लोकावगतस्य दध्नः अग्निहोत्राङ्गत्वमनेन विधिना बोध्यत इति, अयं विधिर्विनियोगविधिरित्युच्यते। एवं 'यदग्नये च प्रजापतये च सायं जुहोति' इत्यादावपि लोकावगताऽग्न्यादिदेवताया होमाङ्गत्वमवगम्यत इत्ययमपि विधिर्विनियोगविधिरित्युच्यते। विनियोगोऽङ्गत्वबोधनम्, तत्सम्बन्धी विधिर्विनियोगविधिरित्यर्थः।

प्रयोगविधिः

दर्शपूर्णमासादिप्रकरणेषु पृथक् पृथक् श्रुतानां प्रधानविधीनामङ्गविधीनां च एकवाक्यतासम्पादनेन अनुष्ठानस्य यथावत्सिद्धये यो विधिः कल्प्यते स प्रयोगविधिः। यथा—दर्शपूर्णमासप्रकरणे एव 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति प्रधानविधिः श्रूयते, तत्रैव 'समिधो यजति' इत्यादयोऽङ्गविधयोऽपि। तेषां क्रमेणानुष्ठानसिद्धये 'समिदाद्यङ्गविशिष्टाभ्यां दर्शपूर्णमासाभ्यां स्वर्गं सम्पादयेत्' इति यो विधिः कल्प्यते स प्रयोगविधिः। प्रयोगोऽनुष्ठानम्, तद्बोधको विधिः प्रयोगविधिः।

अधिकारविधिः

विहितस्य कर्मणः फलसम्बन्धो येन विधिना बोध्यते सोऽधिकारविधिः। अधिकारः फलभोक्तृत्वम्, तत्सम्बन्धबोधको विधिरधिकारविधिरित्यर्थः। यथा - 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति। यः स्वर्गं कामयते स तत्सम्पादनाय अग्निहोत्रहोमं कुर्यादिति। एवं च अस्य कर्मण इदं फलमिति यो विधिर्बोधयति सोऽधिकारविधिरिति फलितम्। स विधिः पुनस्त्रिविधः—अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्चेति।

अपूर्वविधिः

एतद्विधिप्रवृत्तेः पूर्वं यः पदार्थः प्रमाणान्तरेण सर्वथाऽज्ञातः तादृशार्थबोधको विधिरपूर्वविधिः। यथा 'व्रीहीन् प्रोक्षति', 'अग्निहोत्रं जुहोति' इत्यादिः। अत्र हि एतद्विध्यभावे प्रोक्षणादि केनापि प्रमाणान्तरेण न प्राप्तं तादृशमर्थमवबोधयत्येष विधिः।

नियमविधिः

एतद्विधिप्रवृत्त्यभावेऽपि विधेयार्थस्य यत्र विकल्पेन (पाक्षिकतया) प्राप्तिः तत्र यः प्राप्यमाणस्य अप्राप्तांशः तादृशांशप्रापको विधिर्नियमविधि। यथा 'व्रीहीनवहन्ति' अत्र एतद्विध्यभावेऽपि अवहननस्य प्रमाणान्तरेण प्राप्तिरस्ति। कथमिति चेत् ? 'यदाग्नेयोऽष्टाकपालः पुरोडाशः पौर्णमास्याममायां चाच्युतो भवति' इति वाक्येन

पुरोडाशद्रव्यको यागो विहितः, तेनैव पुरोडाशसम्पादनमर्थप्राप्तम् । पुरोडाशश्च पिष्टपिण्डरूपः, पिष्टानि च तण्डुलैः सम्पाद्यानि, तण्डुलाश्च विमुक्ततुषा व्रीहय उच्यन्ते, वितुषीभावश्च अवहननेन सम्पाद्यते, एवं च अवहननमन्तरा वितुषीभावस्यासम्भवाद् अवहननं पुरोडाशान्यथानुपपत्तिरूपया अर्थापत्त्या अन्वयव्यतिरेकाभ्यां चावगम्यत एव । तथापि अवघातस्य वितुषीभावसाधनत्वेनैव प्राप्तेर्वक्तव्यत्वाद् वितुषीभाव-साधनानां नखविदलनादीनामपि प्राप्तिः कदाचिद् भवतीति, तत्पक्षे अवहननस्य प्राप्तिर्नास्ति । अतश्च अवहननस्य पाक्षिकी एव प्राप्तिरिति । नखविदलनदशायां या अप्राप्तिरस्ति तादृशाप्राप्तांशपूरकत्वाद् विधिरयं नियमविधिरित्युच्यते । नियमोऽ-प्राप्तांशपूरणम्, तद्बोधको विधिर्नियमविधिरित्यर्थः ।

परिसंख्याविधिः

उभयोः साधनयोः प्राप्तौ इतरव्यावृत्तिफलको विधिः परिसंख्याविधिः । परि-संख्या व्यावृत्तिः, तद्बोधको विधिः परिसंख्याविधिरित्यर्थः । यथा—'पञ्च पञ्च-नखा भक्ष्याः' अत्र शशादिपञ्चनखपञ्चकस्य तदतिरिक्तपञ्चनखस्य च भक्ष्यत्वेन प्राप्तौ सत्यां पञ्चातिरिक्तपञ्चनखभक्षणव्यावृत्तावेव विधेस्तात्पर्यमिति परिसंख्या-विधिः । शशादीतरपञ्चनखभक्षणव्यावृत्तिरनेन विधिना क्रियत इति विधिरयं परिसंख्याविधि । नियमविधेरप्राप्तांशपूरणं व्यापारः, इतरनिवृत्तिस्तु आर्थिकी । परिसंख्याविधौ तु इतरनिवृत्तिरेव व्यापार इति तयोर्भेदः ।

मन्त्रः

अनुष्ठेयक्रियादिस्वरूपप्रकाशका मन्त्रा इत्युच्यन्ते । विधिना हि तत्तत्कर्म-कर्तव्यतया विहितम् । अनुष्ठेयस्य कर्मणोऽप्रमादायानुष्ठानकाले स्मरणमपि अवश्य-कर्त्तव्यतया समापतति, तच्च स्मरणं तदर्थबोधकैर्मन्त्रैः क्रियत इति मन्त्राणां प्रयोग-समवेतार्थस्मारकत्वं सिद्ध्यति ।

यद्यपि उपायान्तरेणापि स्मरणं कर्तुं शक्यते, तथापि अन्येनोपायेन स्मरणे कारिते तत्तत्प्रकरणपठिता मन्त्रा निरर्थका भवेयुः । नह्यन्यत् प्रयोजनं तेषामुपपाद-यितुं शक्यते । अतस्तदानर्थक्यभिया मन्त्रैरेव स्मरणमुपादेयम्, नान्येनोपायेनेति नियमः क्रियते । नियमस्वरूपं तु नियमविधिस्वरूपनिरूपणावसरे निरूपितम् । ते च मन्त्रा अनेकप्रभेदभिन्ना अपि प्राधान्येन चातुर्विध्यभाजः । करणमन्त्रः, क्रियमाणानुवादिमन्त्रः, अनुमन्त्रणमन्त्रः, जपमन्त्रश्चेति ।

करणमन्त्रः

तत्र पूर्वं मन्त्रमुक्त्वा मन्त्रान्ते यत्र कर्म क्रियते स करणमन्त्रः । यथा—याज्या-पुरोऽनुवाक्यादयः । तत्र हि यद्देवताकं हविरग्नौ प्रक्षेप्तुमिष्यते तद्देवताकां याज्यां पठित्वा याज्यान्ते वषट्कारे कृते हविरग्नौ प्रक्षिप्यते । अतः प्रक्षेपपूर्वभावित्वात् मन्त्रोऽयं करणमन्त्र इत्युच्यते ।

क्रियमाणानुवादी मन्त्रः

यत्र मन्त्रोच्चारणकाल एव कर्म क्रियते स क्रियमाणानुवादी मन्त्रः, क्रियमाणस्य कर्मणोऽनुवादकरणात्। यथा—यूपपरिव्याणमन्त्रः। स हि त्रिवृता रशनया अध्वर्युणा यूपे परिवेष्ट्यमाने तत्काल एव 'युवा सुवासा' इति मन्त्रोऽध्वर्युणा पठ्यते। अतः क्रियमाणकर्मसमकालमेव मन्त्रपाठात् मन्त्रोऽयं क्रियमाणानुवादी-इत्युच्यते।

अनुमन्त्रणमन्त्रः

हविःप्रक्षेपाद्यनन्तरं यो मन्त्रः पठ्यते सोऽनुमन्त्रणमन्त्रः। यथा—'एको मम एका तस्य योऽस्मान् द्वेष्टि यं च वयं द्विष्मः त्विषिमान् भूयासम्' इति। स हि अध्वर्युणा हविःप्रक्षेपे कृते स्वेनापि 'इदमग्नये न मम' इति उद्देश्यत्यागरूपे यागेऽनुष्ठिते समनन्तरमेव यजमानेन पठ्यते। अतः अनु = यागानन्तरं मन्त्र्यते = उच्चार्यते इत्यनुमन्त्रणमन्त्र इति व्युत्पत्त्याऽनुमन्त्रणमन्त्रत्वमस्य।

जपमन्त्रः

केवलमदृष्टार्थमपि जपरूपत्वेन ये पठ्यन्ते ते जपमन्त्राः। 'मयीदमिति यजमानो जपति' इत्येवमादिः। अत्र पूर्वोक्तानां त्रयाणां प्रयोगसमवेतार्थस्मारकविधयाऽदृष्टार्थत्वम्। अन्तिमस्य तु केवलमदृष्टार्थत्वमिति केषाञ्चिन्मतम्। जपमन्त्रस्यापि अर्थस्मारकविधमेव प्रयोजनवत्त्वमिति केचित्। एतेषामृग्यजुःसामरूपेण पुनस्त्रैविध्यम्। तत्र पादबद्धा अर्थात् छन्दोबद्धा मन्त्रा ऋचः, प्रश्लिष्टतया संहितारूपेण पठिता मन्त्रा यजूंषि, ऋचामुपरि क्रियमाणो गीतिविशेषः साम इत्युच्यते।

अर्थवादः

विधिसमीपे विधेयार्थस्तावकतया प्रवृत्तं वाक्यमर्थवादः। विधिर्हि यं कञ्चनार्थं विदधाति तत्र पुरुषाणां प्रवृत्तिसिद्धये तद्विषयिणीं स्तुतिमपेक्षते। अर्थवादश्च तादृशमर्थं स्तौति। यथा लोके इयं गौः क्रेतव्येत्युक्ते तावन्मात्रेण पुरुषाणां प्रवृत्तिर्न जायते। इयं बहुक्षीरा जीवदपत्या साध्वी इत्यादिस्तुतौ कृतायां समनन्तरमेव प्रवृत्तिर्जायते पुरुषाणाम्। वेदेऽपि विधिमात्रेण पुरुषाणां प्रवृत्त्यनुदयात् तत्सिद्ध्यर्थं स्तुत्या कयाचन भाव्यम्। तादृशी स्तुतिरर्थवादेन क्रियते। एवं निषेधस्थलेऽपि निषेध्यादर्थात् पुरुषाणां निवृत्तिसिद्धये निषेधोऽपि निषेध्यस्य निन्दामभिलषति। सा निन्दा च तत्सहितेनार्थवादेन क्रियते। एवं च अर्थवादस्य विधिसन्निहितस्य प्रवृत्तिजनकत्वम्, निषेधसन्निहितस्य निवृत्तिजनकत्वमिति भेदोऽपि फलितः। अस्य च चातुर्विध्यमुपलभ्यते वेदे निन्दा-प्रशंसा-परकृति-पुराकल्पभेदात्। निन्दाप्रशंसयो स्वरूपमधुनैवोपवर्णितम्। यत्रैककर्तृकमुपाख्यानं श्रूयते सा परकृतिः। यत्र त्वनेककर्तृकमुपाख्यानं स पुराकल्पः। इतोऽप्यधिकतया भेदा उपात्ता भाष्यादौ—

"हेतुनिर्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना॥
उपमानं दशैते तु विधयो ब्राह्मणस्य तु॥" इति।

ते च भेदाः पूर्वोक्तेषु चतुर्ष्वेवान्तर्भूताः।

वस्तुतस्तु अर्थवादानां स्तुतिनिन्दान्यतरबोधकत्वेनैव फलवत्त्वस्याप्यङ्गीकरणीयतया स्तुतिनिन्दान्यतरबोधकं वाक्यमर्थवाद इति लक्षणमनुगमय्य तेषां द्वैविध्याङ्गीकरणमेवोचितं प्रतीयते। इति दिक्।

अङ्गताबोधकश्रुत्यादिप्रमाणषट्कनिरूपणम्

अत्राङ्गत्वनिर्णायकानि श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्या रूपाणि षट् प्रमाणान्युक्तानि, तान्यपि सुखावबोधाय उदाह्रियन्ते।

तत्र श्रुतिर्नाम

अङ्गत्वबोधने प्रमाणान्तरापेक्षां विना स्वातन्त्र्येण यः समर्थः शब्दः स श्रुतिरित्युच्यते। इयं श्रुतिस्त्रिविधा—विधात्री, अभिधात्री, विनियोक्त्री चेति। तत्र यः प्रवर्तनारूपविधिबोधकः शब्दः स श्रुतिः विधात्रीत्युच्यते। स च लिङ्-लेट्-लोट्-तव्यप्रत्ययादिः, तस्यैव हि विधायकत्वं शास्त्रकारैरभिमतम्, यथा—यजेत, यजानि, यष्टव्यमित्यादि।

शक्त्या स्वार्थाभिधायकः शब्दः (श्रुतिः)अभिधात्रीत्युच्यते। यथा—'व्रीहीनवहन्ति' इत्यत्र व्रीहिपदं सतुषद्रव्यव्रीहिरूपस्वार्थाभिधायकम्। यद्यपि इयं श्रुतिर्लिङ्गप्रमाणेऽन्तर्भूतैवाभाति शब्दगतस्यार्थप्रतिपादनसामर्थ्यस्यैव लिङ्गत्वात्, तथापि मन्त्रघटकीभूतपदानां यत् सामर्थ्यं तल्लिङ्गमित्युच्यते। विधिवाक्यगतस्य तस्यैव सामर्थ्यस्य श्रुतित्वमिति बोध्यम्। अङ्गत्वबोधने या प्रमाणान्तरं नापेक्षते सा विनियोक्त्री श्रुतिस्तृतीया, यथा -'दध्ना जुहोति' इत्यत्र दधिपदोत्तरं तृतीया श्रूयते, सा च 'कर्तृकरणयोस्तृतीया' (पा० सू० २।३।१८) इत्यनेन करणत्वे कर्तृत्वे च विहिता। करणत्वं च -'साधकतमं करणम्' (पा० सू० १।४।४२) इत्यनेन यत्क्रियानिर्वृत्तौ अन्तरङ्गं साधनं तदेवोच्यते। एवं च दध्नेति तृतीयया श्रुतमात्रया स्ववाक्योपात्तहोमं प्रति स्वप्रकृत्यर्थस्य दध्नः साधकतमत्वरूपकरणत्वं बोध्यते। नात्र प्रमाणान्तरमपेक्ष्यते। तच्च करणत्वमेव अङ्गत्वापरपर्यायम् इति व्यवह्रियते। इयं द्वितीया-तृतीयादिविभक्तिः श्रुतिरित्युच्यते। अत एव 'निरपेक्षो रवः श्रुतिः' इति लक्षणमुक्तं मीमांसकैः। इयं विभक्तिरूपा श्रुतिः। अत्र सत्यपि सर्वासां विभक्तीनां विभक्तित्वे समाने न सर्वासां श्रुतित्वम्, किन्तु द्वितीया-तृतीया-चतुर्थी-पञ्चमी-सप्तमीरूपाणां पञ्चानामेव विभक्तीनां श्रुतित्वम्। षष्ठ्यास्तु सम्बन्धमात्रबोधिकाया न श्रुतित्वम्। प्रथमाविभक्तेस्तु केषाञ्चिन्मते श्रुतित्वं केषाञ्चिन्मते न। अत्र द्वितीयाश्रुतेरुदाहरणं 'व्रीहीन् प्रोक्षति' इति। तृतीयाश्रुतेः 'दध्ना जुहोति', 'व्रीहिभिर्यजेत' इत्यादि। चतुर्थीश्रुतेः 'विप्राय गां ददाति', 'आत्रेयाय हिरण्यं ददाति' इत्यादि। पञ्चमीश्रुतेः 'अग्नेस्तृणान्यपचिनोति', 'धान्याद् गां वारयति' इत्यादि (लोके)। सप्तमीश्रुतेः 'यदाहवनीये जुहोति', 'पदे जुहोति' इत्यादि।

कर्मषष्ठ्या अपि अङ्गत्वं केचनेच्छन्ति—यथा 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यत्र इन्द्रियकामस्येति द्वितीयार्थे षष्ठी। दध्ना इन्द्रियं भावयेदिति हि तदर्थः। श्रुतेरस्या विनियोक्त्र्या अन्ये अपि द्वे विधे स्तः, समानाभिधानरूपा, एकपदरूपा चेति। तत्र यः शब्दः प्रकृतिप्रत्ययाद्यात्मना अविभाज्यः सन् अनेकधर्मविशिष्टः तत्तद्धर्मावच्छिन्नत्व-पुरस्कारेणानेकमर्थमभिदधाति स समानाभिधानश्रुतिरित्युच्यते—यथा 'रामेण' इत्यत्र रामप्रातिपदिकोत्तरं श्रूयमाणा एकैव विभक्तिः, सा च विभागानर्हा, परन्तु तत्र विभक्तित्वम्, एकवचनत्वम्, पुंल्लिङ्गत्वमिति धर्मत्रयमस्ति। तत्र विभक्तित्व-धर्मपुरस्कारेण करणत्वं ब्रूते, एकवचनत्वधर्मपुरस्कारेण एकत्वम्, पुंल्लिङ्गत्व-पुरस्कारेण च पुंस्त्वमभिधत्ते। एतेषां त्रयाणामर्थानामभिधायक एक एव शब्दः समान एवेति समानाभिधानश्रुतिरित्युच्यते। एवं यजेतेत्याद्याख्यातस्थलेऽपि बोध्यम्। तत्रापि लिङ्त्वावच्छिन्नेन तेन प्रवर्तनायाः, आख्यातत्वावच्छिन्नेन तेन आर्थीभावनायाः, एकत्वावच्छिन्नेन एकत्वसंख्यायाश्च बोधनात्। अनेकेषामर्थानामभिधायकस्य शब्दस्य समानत्वात् समानाभिधानश्रुतिरिति।

यत्प्रकृतिप्रत्ययरूपेण एकं पदं सत् प्रकृत्यात्मना कञ्चिदर्थम्, प्रत्ययात्मना च कञ्चिदर्थमवबोधयति सा एकपदश्रुतिः। यथा 'यजेत' इत्यत्र प्रकृत्या यागोऽभिधीयते, प्रत्ययेन च एकत्वम्। तत्र एकत्वात्मिकायाः संख्याया यागाङ्गत्वं तदेकपदश्रुत्या। इयं समानपदश्रुतिरित्यपि क्वचिदभिधीयते। अत्र विनियोक्त्र्या एव श्रुतेस्त्रिविधाया अङ्गत्वे प्रामाण्यम्। इतरयोस्तु प्रकारान्तरेण प्रमाणमङ्गीकृतं मीमांसकैः। इयं च श्रुतिरङ्गत्वबोधिका पूर्वमीमांसायां द्वितीयेऽध्याये निरूपिता। अन्या च काचित्पञ्च-माध्यायगोचरा। साऽनुष्ठेयपदार्थानां क्रमबोधिका, 'अथ ततः प्रथमं कृत्वा परिवीय' इत्येवमादिरूपा। यथा—'अथैष ज्योतिः', 'ततो होतारं वृणीते', 'वषट्कर्तुः प्रथम-भक्षः', 'वेदं कृत्वा वेदिं करोति', 'यूपं परिवीय सवनीयं पशुमुपाकरोति', अत्र पूर्वं किञ्चिदनुष्ठाय अनन्तरं कर्तव्यत्वेन बोधनीये पदार्थे 'अथ', 'ततः' इत्यादिशब्दः प्रयुक्तः। एवं च आनन्तर्यक्रमरूपबोधको यः शब्दः स श्रुतिपदवाच्यः पाञ्चमिकः। अतश्च तृतीयाध्यायनिरूपिता श्रुतिरङ्गत्वबोधिका। पञ्चमाध्यायगता चानन्तर्यरूप-क्रमबोधिकेत्यवगन्तव्यम्।

लिङ्गम्

तत्तत्पदार्थगतं सामर्थ्यं लिङ्गमित्युच्यते। तथा चोक्तं 'सामर्थ्यं सर्वभावानां लिङ्ग-मित्यभिधीयते'। एवं च यस्य यत्सामर्थ्यं तल्लिङ्गम्; यथा खनित्रस्य मृत्खनने साम-र्थ्यम्, कुठारस्य वृक्षच्छेदने सामर्थ्यमित्यादि।

तच्च द्विधा विभक्तं शब्दगतम्, पदार्थगतं चेति। पदार्थगतं सामर्थ्यं च अनन्तरोदाहृतम्। शब्दगतं सामर्थ्यं च तत्तदर्थप्रकाशनरूपम्—यथा 'अग्निर्मूर्द्धादिवः' (शु० य० ३।१२) इति मन्त्रः अग्निं प्रकाशयति। 'इमं मे वरुण' (शु० य० २१।१) इति मन्त्रो वरुणं प्रकाशयति। एवं च तत्तत्पदार्थगतं स्वमर्थमालोच्य तत्तत्कार्ये तेषां तेषां यो विनियोगः क्रियते स लिङ्गात्। यथा खनित्रस्य खननसामर्थ्यं पर्यालोच्य

खनने विनियोगः क्रियते। यथा वा 'हस्तेनावद्यति' इत्यत्र हस्तस्य कठिनद्रव्यावदान एव सामर्थ्यमवगम्य चरुपुरोडाशरूपहविरवदान[1] एव विनियोगः क्रियते, न तु मांसाद्यवदानेऽपि। एवं 'स्वधितिनावद्यति' इत्यत्र स्वधितेः सामान्यतोऽवदानाङ्गत्वश्रवणेऽपि मांसावदाने एव तस्य सामर्थ्यं दृष्ट्वा तत्रैव तस्याङ्गत्वं प्रकल्प्यते, न तु चरुपुरोडाशाद्यवदानेऽपि। इदमेवार्थगतं लिङ्गमित्युच्यते।

शब्दगतं तु लिङ्गमर्थप्रकाशनरूपसामर्थ्यं पूर्वमुक्तम्। तेन तत्तन्मन्त्राणां तेषु तेषु कार्येषु अङ्गत्वं बोध्यते—यथा 'बर्हिर्देवसदनं दामि' (मै० सं० १।१२) इति मन्त्रस्य बर्हिर्लवनप्रकाशकत्वरूपं सामर्थ्यं बुद्ध्वा अनेन मन्त्रेण दर्शपूर्णमासाङ्गभूतबर्हिर्लवनं कर्तव्यमिति बर्हिर्लवने विनियुज्यते। एवं सत्यपि लिङ्गस्य द्वैविध्ये शब्दगतस्यैव सामर्थ्यस्य लिङ्गत्वमित्यभिप्रयन्त्यर्थसंग्रहकारादयः 'सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते' इति वाक्यमुदाहरन्तः। परन्तु शब्दगतार्थगतयोरुभयोरेव सामर्थ्ययोर्लिङ्गत्वं ग्रन्थकारैरुक्तम्, तदेव युक्तमित्युत्पश्यामः।

वाक्यम्

'समभिव्याहारो वाक्यम्' इति सामान्यतो वाक्यलक्षणं कथयन्ति। समभिव्याहारश्च एकस्मिन्वाक्ये अङ्गित्वेन अङ्गत्वेन च अभिमतयोः पदार्थयोरुपादानम्—यथा 'औदुम्बरो यूपो भवति' इत्यत्र यूपः अङ्गित्वेनाभिमतः, औदुम्बरत्वं चाङ्गत्वेन। तयोरौदुम्बरो यूपो भवतीत्येकस्मिन्वाक्ये सहोपादनमेव वाक्यम्। अत्र च लक्षणे अङ्गत्वबोधकद्वितीयातृतीयाद्यभावे सतीति निवेशनीयम्। अन्यथा 'दध्ना जुहोति' इति श्रुतिविनियोगस्थानेऽपि वाक्यविनियोगः प्रसज्येत। यद्यप्यत्रापि समभिव्याहारोऽस्त्येव, तथापि तत्र दध्नेति तृतीयाविभक्तेः श्रवणात् तस्याश्च श्रुतिरूपत्वात् श्रुतेश्च सर्वापेक्षया प्रबलत्वात् 'प्रधानेन व्यपदेशो भवति' इति न्यायेन श्रुतेरेवोदाहरणमिदं न तु वाक्यस्य। एवं च श्रुतिवाक्यस्थलयोरुभयत्रापि एकवाक्योपादानरूपसमभिव्याहारसत्त्वेऽपि तत्र यदि द्वितीयातृतीयादिसंयोगस्तदा श्रुत्या विनियोगः, तदभावे तु वाक्यीयो विनियोग इति ध्येयम्। यत्तु 'एकतिङ् वाक्यम्' इत्यपि वाक्यस्य लक्षणं क्रियते वैयाकरणैः, 'पदसमूहो वाक्यम्' इति तु नैयायिकाः, तत्सर्वमर्थावबोधकस्य लौकिकस्य वाक्यस्य लक्षणम्, न तत्राङ्गाङ्गिभावावबोधनमस्ति। पूर्वोक्तं तु वाक्यमङ्गत्वबोधकप्रमाणेष्वन्तर्गतं मीमांसकैरभिधीयते।

एकवाक्यम्

एकवाक्यस्य लक्षणम्—"अर्थैकत्वादेकं वाक्यं साकाङ्क्षञ्चेद्विभागे स्यात्" (जै०सू० २।१।४६) इति जैमिनिनोक्तम्। तस्यायमर्थः—वाक्यत्वेनाभिमतानां पदसमूहानां मध्ये एकस्य द्वयोस्त्रयाणां वा ततो विभागे यदि पदान्तराणि साकाङ्क्षाण्येवावतिष्ठन्ते न कञ्चनार्थमवबोधयितुं शक्नुवन्ति, सर्वाणि पदानि मिलितानि च सन्त्येकमेवार्थ-

---

१. अवदानं नाम समुदायरूपेण तत्तद्यागसिद्धये सम्पादितानां हविषां स्रुवहस्तादिना हवनार्थं यद् ग्रहणं तदुच्यते।

मवबोधयन्ति तदेकं वाक्यमिति, यथा 'देवस्य त्वा०....गृह्णामि' (शु० य० १, १०)। अत्र सर्वाणि पदानि मिलित्वा निर्वापरूपमेकमर्थं प्रतिपादयन्ति । देवस्यत्वेत्यादि-निर्वपामीत्यन्तेषु पदेषु मध्ये कस्यापि पदस्य विभागे सति इतराणि पदानि साकाङ्क्षाण्येव सन्ति, न च कञ्चनार्थमवबोधयन्ति, समुदितान्येव हि निर्वापरूपार्थप्रतिपादकानि । अतः साकाङ्क्षत्वे सति एकार्थप्रतिपादकत्वरूपमेकवाक्यत्वं सर्वैरपि शास्त्रकारैरङ्गीक्रियते ।

प्रकरणम्

'उभयाकाङ्क्षा प्रकरणम्' उभयोरङ्गभावेन अङ्गिभावेन चाभिमतयोर्वस्तुनोर्या परस्पराकाङ्क्षा सा प्रकरणमित्युच्यते । तथाहि दर्शपूर्णमासप्रकरणे—'आग्नेयोऽष्टाकपालः पुरोडाशः' इत्यादिवाक्यैराग्नेयादयो यागा विहिताः, तेषां च 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्येन स्वर्गरूपफलार्थत्वमवगमितम्—दर्शपूर्णमासशब्दवाच्यैराग्नेयादिभिर्यागैः स्वर्गं सम्पादयेदिति । तेषां च आकाङ्क्षा उदेति कथं स्वर्गः सम्पादनीय इति । यथा हि लोके कुठारेण छिनत्तीत्येतावदुक्ते यो नाम छेदनप्रकारं न जानाति तस्य आकाङ्क्षोदेति 'कथमनेन कुठारेण द्वैधीभावः सम्पादयितुं शक्यते' इति तद्वदत्रापि । अत्र लोके कुठारं हस्ताभ्यामुद्यम्य कुठाराग्रभागं काष्ठोपरि पातयेत्, एवं बहुवारं निपातने कृते द्वैधीभावः सम्पद्यत इति वक्तव्यं भवति। एवमुक्ते तत्प्रकारमभिज्ञाय तथैव कुर्वन्पुरुषः काष्ठे द्वैधीभावरूपं फलं प्राप्नोति। एवं कथमेभिः स्वर्गः सम्पादयितुं शक्यत इत्याकाङ्क्षायामुदितायामन्वाधानादीनि ब्राह्मणतर्पणान्तान्यङ्गानि एवमेवानुष्ठेयानि, एवमनुष्ठितेषु तेषु तैरुपकृता आग्नेयादयो यागाः स्वर्गरूपं फलं जनयन्ति—इत्युक्ते अन्वाधानादीन्यङ्गान्यनुष्ठातुमुद्यतः पुरुषः यथोक्तमनुतिष्ठन् तदुपकृतैर्दर्शपूर्णमासयागैः स्वर्गरूपं फलं प्राप्नोति । अतश्च दर्शपूर्णमासयागानां कथम्भावाकाङ्क्षायाः सत्त्वाद् अन्वाधानादीनां क्रियाणां प्रयोजनाकाङ्क्षायाश्च सत्त्वाद् उभयाकाङ्क्षा वर्तते । अनया चोभयाकाङ्क्षया परस्परं सम्बन्धो भवति अन्वाधानादिभिरङ्गकलापैर्दर्शपूर्णमासोपकारं भावयेत्। तदुपकृतैर्दर्शपूर्णमासयागैः स्वर्गं सम्पादयन्ति । एवं च या दर्शपूर्णमासयागानामन्वाधानादीनां च कर्मणां परस्पराकाङ्क्षा सैवोभयाकाङ्क्षारूपं प्रकरणं तेन च उभयेषामङ्गाङ्गिभावः सिद्ध्यति । इदं च प्रकरणं द्वेधा कथ्यते मीमांसकैः—महाप्रकरणम्, अवान्तरप्रकरणं चेति । तत्र प्रधानयागस्य तदङ्गानां च या परस्परमुपकार्योपकारकभावविषयिणी आकाङ्क्षा सा महाप्रकरणमित्युच्यते—यथा दर्शपूर्णमासप्रयाजयोः परस्पराकाङ्क्षा । दर्शपूर्णमासाः प्रधानानि प्रयाजाश्चाङ्गानि, तेषां च याऽऽकाङ्क्षा सा महाप्रकरणम्। तदङ्गानां च या परस्परमाकाङ्क्षा सा अवान्तरप्रकरणम्—यथा प्रयाजा दर्शपूर्णमासाङ्गभूताः, तेषां तदङ्गानामभिक्रमणादीनां च याऽऽकाङ्क्षा साऽवान्तरप्रकरणम् । अभिक्रमणं नाम—प्रयाजहोमकाले. एकैकामाहुतिं प्रति किञ्चित् किञ्चिदग्रे पदनिक्षेपणरूपं गमनम् । इतिकर्तव्यता नाम—कथमिदं कर्तव्यमित्याकारिका याऽऽकाङ्क्षा सोच्यते । 'पचेत्' इत्युक्ते कथमहं पचेयमित्याकाङ्क्षोदेति ।अस्या

एवेतिकर्तव्यतायाः कथम्भावाकाङ्क्षा, इत्थम्भावाकाङ्क्षा, प्रकरणविशेषाकाङ्क्षा इत्यादि व्यवहार इति।

स्थानम्

अन्यतराकाङ्क्षा स्थानम्। अङ्गत्वेनाङ्गित्वेन च सम्बन्धयोग्ययोः पदार्थयोरन्यतरस्य स्वापेक्षितोपकारकलाभेन उपकार्यलाभेन वा निवृत्ताकाङ्क्षत्वे सति अन्यतरस्य तादृशाकाङ्क्षासत्त्वे इतरस्यापि आकाङ्क्षामुत्थाप्य यः परस्परं सम्बन्धः स स्थानमित्युच्यते—यथा 'अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेत् स्वर्गकामः' इत्यनेन काचनेष्टिः नक्षत्रेष्टिसंज्ञिका विहिता। सा च औषधद्रव्यका दर्शपूर्णमासविकृतिः। तस्याश्च साध्याकाङ्क्षायां स्ववाक्योपात्तं स्वर्गादिकं साध्यत्वेनान्वेति। साधनाकाङ्क्षायां समानपदोपात्तो धात्वर्थः करणत्वेनान्वेति। तत इतिकर्तव्यताकाङ्क्षोदेति। उदितायां च तस्यां तच्छामकत्वेन स्वप्रकृतिभूताद् दर्शपूर्णमासयागात् प्रयाजादयो धर्मा अतिदिश्यन्ते। यद्यपि सौर्ययागसन्निधावपि उपहोमसंज्ञकाः केचन होमाः पठिताः। ते च सौर्ययागेन सह इतिकर्तव्यतया सम्बद्धुं शक्नुवन्ति। तथापि सौर्ययागो न तान् प्रथमतः स्वाकाङ्क्षाशामकत्वेन परिगृह्णाति, तेषां प्रथमतया स्वसन्निधावेव पठितत्वेन ततः पूर्वं कचिदपि तैरुपकाराजननात्, स्वापेक्षितोपकारजननेऽनिश्चितत्वात् निश्चिततया कृतोपकाराणि प्रयाजादीनि प्राकृतान्येव स्वोपकारजनकत्वेनापेक्षन्ते, तेषां तु प्रकृतावुपकारसम्पादनेन कृतार्थत्वाद् आकाङ्क्षा विनिवृत्ता। शान्ताकाङ्क्षाणामपि तेषां पुनराकाङ्क्षामुत्थाप्य सौर्ययागेन साकं सम्बन्धः सम्पाद्यते। अतश्च सौर्ययागस्य साकाङ्क्षत्वात् प्रयाजादीनां च निराकाङ्क्षत्वाद् अन्यतराकाङ्क्षैव वर्वर्ति, नोभयाकाङ्क्षा—इति विकृतिप्राकृताङ्गयोर्योऽङ्गाङ्गिभावेन सम्बन्धः सोऽन्यतराकाङ्क्षारूपस्थानप्रमाणेनैव। एवं प्राकृताङ्गसम्बन्धेन विनिवृत्ताकाङ्क्षायां प्रकृत्यां तस्याः पुनराकाङ्क्षामुत्थाप्य स्वसन्निधिपठिताङ्गैः साकं यः सम्बन्धः क्रियते सोऽप्यन्यतराकाङ्क्षयैव। विकृतिसन्निधौ पठितान्युपहोमादीनि अनन्यप्रयोजनानि स्वप्रयोजनलाभार्थं विकृतिसम्बन्धमपेक्षन्ते। विकृतिस्तु प्राकृतैरङ्गैर्निराकाङ्क्षा तिष्ठति। एवं निराकाराकाङ्क्षया प्रकृत्या सह साकाङ्क्षाणामुपहोमानां विकृतेराकाङ्क्षामुत्थाप्य यः सम्बन्धः सोऽप्यन्यतराकाङ्क्षारूपस्थानप्रमाणेन।

एवं च यत्राङ्गाङ्गिनोरुभयोरपि स्वारसिक्येवाकाङ्क्षा प्रकरणम्। यत्र तु द्वयोरन्यतरत्र प्रकारान्तरेण शान्ताकाङ्क्षत्वम्, अन्यतरस्य च साकाङ्क्षत्वम्, तत्र यो निराकाङ्क्षस्यापि आकाङ्क्षामुत्थाप्य इतरेण सम्बन्धः स स्थानमिति। इदमेव च क्रम इत्यप्युच्यते। इदमङ्गत्वग्राहकेषु प्रमाणेषु पञ्चमं प्रमाणम्। इदमेव सादेश्यमित्युच्यते। सादेश्यं च समानदेशवत्त्वम्। समानदेशश्च पाठतोऽपि संभवत्यनुष्ठानतोऽपि। अत इदं पाठसादेश्यमनुष्ठानसादेश्यमिति द्विधा विभक्तम्। तत्र पाठतः सादेश्यं यथा 'दैव्याय कर्मणे शुन्धद्ध्वं देवयज्यायै' (शु० य० १।१३) इति मन्त्रः सान्नाय्ययागसन्निधौ पठित इति कृत्वा सान्निध्यपाठात् सान्नाय्यपात्राङ्गं भवति। अनुष्ठानेन ययोः पदार्थयोरेकस्मिन्काले एकस्मिन् देशे वाऽनुष्ठानं तयोरङ्गाङ्गिभावोऽ-

नुष्ठानसादेश्यात् । यथा सोमयागाङ्गभूतोऽग्नीषोमीयपशुयागो द्वितीयदिनकर्तव्यस्य सोमक्रमस्य सन्निधौ पठितः, तथापि तत्र पाठे औपवसथ्याख्ये चतुर्थेऽहनि अनुष्ठानं तस्य विहितम्, तद्दिनकर्तव्यताङ्गमध्ये उपाकरणनियोजनादयः पदार्थाः पठिताः, तेषां च तद्दिन एवानुष्ठानं कर्तव्यम् । तस्मिन्नेव च दिनेऽग्नीषोमीयः पशुरनुष्ठेय इति तेषां पदार्थानामग्नीषोमीयपशुयागाङ्गत्वमनुष्ठानसादेश्यात् समानदेशेऽनुष्ठानात् । अत्र देशशब्देन कालोऽभिधीयते, एकस्मिन्काले चतुर्थेऽहनीति यावत् । पाठसादेश्यमपि द्विधा विभक्तम्—यथाक्रमपाठः, सन्निधिपाठश्चेति । यथाक्रमपाठः—प्रथमं पठितस्य यागस्य प्रथमपठितो मन्त्रोऽङ्गम्, द्वितीयं पठितस्य यागस्य द्वितीयपठितो मन्त्रोऽङ्गमित्येवं रीत्या । सन्निधिपाठस्तूदाहृत एव ।

समाख्या

इदमङ्गत्वबोधने षष्ठं प्रमाणम् । समाख्या संज्ञा । सा च यौगिकी गृह्यते, तयाऽप्यङ्गत्वं बोध्यते—यथा आध्वर्यवम्, औद्गात्रम्, हौत्रमित्यादिसंज्ञया तत्तद्भागपठितेषु मन्त्रेषु पदार्थेषु वाऽध्वर्य्वादीनां कर्तृतयाऽङ्गत्वम् । रूढसंज्ञा तु लिङ्गेऽन्तर्भवति । इत्यलं विस्तरेण ।

दर्शपूर्णमासवेदिनिर्माणप्रकारः

गार्हपत्यमध्यादाहवनीयस्य मध्यपर्यन्तं मध्येऽन्तरमष्टौ, एकादश, द्वादश वा प्रक्रमाः । गार्हपत्यमध्यं केन्द्रत्वेन परिकल्प्य सार्धत्रयोदशाङ्गुलमितरज्ज्वा वृत्तं कार्यम् । इदं गार्हपत्याग्नेः स्थानम् । आहवनीयस्थानमायामतो विस्तारतश्च हस्तमितम् । गार्हपत्याहवनीयान्तरस्य द्वादशपदपरिमितत्वपक्षे तदन्तरस्य षड्ढस्तात्मकत्वात् षड्ढस्तां तदीयषष्ठभागेन हस्तात्मकेन संयोज्य अर्थात् सप्तहस्तां रज्जुं गृहीत्वा तस्या अन्तयोः पाशौ कृत्वा, मध्ये च तृतीये तृतीये भागे चिह्नं कृत्वा, एकं पाशं गार्हपत्यमध्यशङ्कौ आसज्य, द्वितीयपाशमाहवनीयमध्यशङ्कौ आसञ्जयेत् । रज्जुमध्यवर्तिनोर्द्वयोश्चिह्नयोः पश्चिमचिह्नस्थाने रज्जुं गृहीत्वा दक्षिणत आकर्षयेत्, यत्र तच्चिह्नं पतति तत्र तच्चिह्नं कृत्वा तस्मात्स्थानाद् उत्तरतः सार्धनवाङ्गुलव्यवहिते देशे शङ्कुर्देयः । शङ्कुस्थानं केन्द्रत्वेन परिकल्प्य यवाधिकोनविंशत्यङ्गुलमितरज्ज्वा वृत्तं कार्यम् । वृत्तमध्ये केन्द्रसंलग्ना परिधिपूर्वभागमादाय परिधिपश्चिमं यावत्सरलरेखा कार्या । रेखात उत्तरभागस्य त्यागः कार्यः । वृत्तस्य दक्षिणार्धं दक्षिणाग्निस्थानम् । पूर्वोक्तयोश्चिह्नयोः पूर्वचिह्नस्थाने रज्जुं गृहीत्वा उत्तरत आकर्षणे यत्र चिह्नं पतति तदुत्करस्थानम् । आहवनीयमध्यशङ्कुसकाशात् पश्चिमतस्त्र्यरत्निव्यवहिते देशे शङ्कुर्देयः । आहवनीयप्राचीशङ्कुसकाशात् सार्धारत्निव्यवहिते देशे दक्षिणत उत्तरतश्च शङ्कुर्देयः । चतुर्षु कोणस्थशङ्कुषु

सूत्रार्पणादविषमचतुरस्रं भवति । प्राचीशङ्कुमारभ्य पश्चिमशङ्कुपर्यन्तं कोणद्वय-वेष्टनेन सूत्रं प्रदेयम् । तत्सूत्रार्धपरिमितेन सूत्रेण प्राचीशङ्कुमारभ्य दक्षिण-कोणस्थशङ्कुवेष्टनेन दक्षिणतः, उत्तरकोणस्थशङ्कुवेष्टनेन उत्तरतश्च शङ्कुर्देयः । ताभ्यां शङ्कुभ्यां पूर्वार्धचतुर्थांशेन वेदिमध्ये सङ्ग्रहौ कार्यौ । द्वादशाङ्गुलं पदम् । अष्टयवमङ्गुलम् । चतुर्विंशत्यङ्गुलो हस्तः । (का० शु० प० १।२६-३०) इति ।

चातुर्मास्यवेदिनिर्माणप्रकारः

चातुर्मास्ययागे पूर्वस्यां दिशि वेदिद्वयं निर्मातव्यम् । तत्र दक्षिणस्यां प्रतिप्रस्थातुः, उत्तरस्यामध्वर्योः । प्रतिप्रस्थातुर्वेदिर्दर्शपूर्णमासवद्भवति । अत्र गार्हपत्य-दक्षिणाग्नी न भवतो नाप्युत्करः । अध्वर्योर्वेदिरपि दर्शपूर्णमासवदेव भवति, परन्तु तत्र पूर्वपश्चिमयोर्दैर्घ्यं सप्तारत्निमितं षडरत्निमितं वा भवति । विस्तारस्तु दर्शपूर्णमासवदेव । अत्र संग्रहौ न भवतः । आहवनीयस्थाने द्वात्रिंशदङ्गुलदीर्घा तावद्विस्तारा समचतुरस्रा चतुरङ्गुलोच्चा उत्तरवेदिः कर्तव्या । तन्मध्ये प्रादेशदीर्घा तावद्विस्तारा एकाङ्गुलोच्चा नाभिर्भवति । पश्चाद्भागे उभयोर्वेद्योरन्तरालं प्रादेशमितं भवति । उत्करो दर्शपूर्णमासवत्पूर्वतृतीये वेद्या बहिर्भवति । स च षडङ्गुलवृत्तभ्रामणेन द्वादशाङ्गुलवृत्तो द्व्यङ्गुलखातश्च निष्पाद्यः । उत्करात्पूर्वस्यां दिशि द्वात्रिंशदङ्गुलमितं देशं त्यक्त्वा द्वात्रिंशदङ्गुलदीर्घस्तावद्विस्तारोऽष्टाङ्गुलषडङ्गुलान्यतरपरिमाण-खातवान् चात्वालनामको गर्तो निष्पादनीयः । अध्वर्युवेदेः पश्चिमदिशि अरत्निद्वय मुक्त्वा गार्हपत्यखर एकचत्वारिंशमितहस्तेन अष्टचत्वारिंशाङ्गुलमितहस्तेन वा दर्शपूर्णमासवत् सम्पादनीयः । दक्षिणाग्निखरश्च पश्चिमवितृतीये देशे दक्षिणस्यां दिशि गार्हपत्यात् सपादहस्तद्वयमितमन्तरालं त्यक्त्वा सम्पादनीयः । दक्षिणाग्नेः पश्चिमदिशि द्व्यङ्गुलमितमन्तरालं मुक्त्वा प्रतिप्रस्थातृवेदिमध्यस्य समानसूत्रा प्राकृती वेदिः सभ्यावसथ्यगार्हपत्यदक्षिणाग्निसंग्रहोत्कराहवनीययुता कार्या । प्राकृत्या एतद्वेद्याः सम्बन्धिनो दक्षिणाग्नेर्हस्तमितमन्तरालं मुक्त्वा दक्षिणस्यां दिशि दक्षिणाग्निमध्यसमसूत्रा पितृयज्ञवेदिर्दर्शपूर्णमासवत् कार्या । इयं वेदिर्दक्षिणस्यां त्र्यरत्निविस्तारा उत्तरस्यां चतुररत्निविस्तारा त्र्यरत्निदीर्घा मध्ये दक्षिणाग्नियुता भवति । अत्र गार्हपत्याहवनीयसंग्रहोत्करा न भवन्ति । एवमुत्तरस्यां दिशि चतुष्पथे वा त्र्यम्बकेष्ट्यर्थं प्राकृती वेदिराहवनीययुता प्रकृतिवत् कार्या । इयं वेदिरुत्तरस्यां दिशि त्र्यरत्निविस्तारा दक्षिणस्यां चतुररत्निविस्तारा त्र्यरत्निदीर्घा भवति । गार्हपत्य-दक्षिणाग्निसंग्रहोत्कराणामभावोऽत्रेति । इति दिक् ।

सौमिकवेदिनिर्माणप्रकारः

आदौ यागयोग्यां भूमिं निश्चित्य तत्र पश्चिमभागे द्वादशभिर्दशभिर्वा अरत्निभिः परिमितं चतुरस्रं मण्डपमनुदग्द्वारं प्राग्वंशं पञ्चहस्तमितैश्चतुर्भिः स्तम्भैर्युतं सर्वत उपरि च समाच्छादितं निर्मिमीते। उपरि दक्षिणोत्तरं तृणबलिकादिनिधानम्। अयं मण्डपः प्राचीनवंशशब्देन विमितशब्देन च व्यपदिश्यते। प्राचीनः प्रागग्रो वंशो मध्यवलो यस्येति। अरत्निद्वयविस्ताराणि द्वाराणि सर्वत्र। विमितस्य पूर्वस्मादन्ताद् द्व्यरत्निव्यवहिते देशे शङ्कुर्देयः, स आहवनीयमध्यः। आहवनीयस्थानमायामतो विस्तारतश्च हस्तमितम्। तस्मात्पश्चात् सप्तारत्निव्यवहिते देशे शङ्कुर्देयः, स गार्हपत्य-मध्यः। तत्र सार्धत्रयोदशाङ्गुलमितरज्ज्वा वृत्तं कार्यम्, स गार्हपत्यः। चतुरङ्गुलविस्तारा द्वादशाङ्गुलोत्सेधा मेखलाः सर्वत्र। आहवनीयमध्यशङ्कोरारभ्य गार्हपत्यमध्यं याव-द्वर्तमानस्य भूभागस्य सप्तारत्निपरिमितत्वात् सप्तारत्निपरिमितां रज्जुं गृहीत्वा तदीयसप्तमभागेन अरत्न्यात्मकेन संयोज्य, अर्थादष्टहस्तां रज्जुं गृहीत्वा तस्या अन्तयोः पाशौ कृत्वा, मध्ये च तृतीये तृतीये भागे चिह्नं कृत्वा, एकं पाशं गार्हपत्य-मध्यशङ्कौ आसज्ज्य, द्वितीयपाशमाहवनीयमध्यशङ्कौ आसञ्जयेत्। रज्जुमध्यवर्तिनोर्द्वयो-श्चिह्नयोः पश्चिमस्थाने रज्जुं गृहीत्वा दक्षिणत आकर्षयेत्। यत्र तच्चिह्नं पतति तत्र तच्चिह्नं कृत्वा तस्मात्स्थानादुत्तरतः सार्धनवाङ्गुलव्यवहिते देशे शङ्कुर्देयः। शङ्कुस्थानं केन्द्रत्वेन परिकल्प्य यवाधिकोनविंशत्यङ्गुलमितरज्ज्वा वृत्तं कार्यम्। वृत्तमध्ये केन्द्र-संलग्ना परिधिपूर्वभागमादाय परिधिपश्चिमं यावत् सरलरेखा कार्या। रेखात उत्तरस्य भागस्य त्यागः कार्यः। वृत्तस्य दक्षिणार्धं दक्षिणाग्निस्थानम्। पूर्वोक्तयो-श्चिह्नयोः पूर्वचिह्नस्थाने रज्जुं गृहीत्वा उत्तरत आकर्षणे यत्र तच्चिह्नं पतति स उत्कर-मध्यः। तत्र त्र्यङ्गुलेन भ्रमणं कार्यम्, एकाङ्गुलो गर्तश्च कार्यः। आहवनीयमध्य-शङ्कोः पश्चात् त्र्यरत्निव्यवहिते देशे शङ्कुर्देयः। तस्माद्दक्षिणत उत्तरतश्च द्व्यरत्नि-व्यवहिते देशे शङ्कू देयौ, ते श्रोणी। आवहनीयपूर्वशङ्कोर्दक्षिणत उत्तरतश्च सार्धारत्नि-सार्धारत्निव्यवहिते देशे शङ्कू देयौ तावंसौ। चतुर्षु कोणस्थशङ्कुषु सूत्रार्पणाद् विषमचतुरस्रं भवति। वेदेर्दक्षिणकोणमारभ्य दक्षिणपार्श्वे द्वात्रिंशदङ्गुले देशे शङ्कुर्देयः, स सङ्ग्रहमध्यः। तत्र एकोनविंशत्यङ्गुलमितकर्कटेन वेदिमध्येऽर्धवृत्तं कार्यम्, स सङ्ग्रहः। एवमुत्तरतोऽपि सङ्ग्रहः कार्यः। त्र्यङ्गुलखाता वेदिः। अखातौ सङ्ग्रहौ मतौ। गार्हपत्यस्योत्तरेऽवकाशं विहाय गार्हपत्यवत् सभ्यायतनं कर्तव्यम्। एवमाहवनीयस्योत्तरे आवसथ्यायतनं गार्हपत्यवत्। अयमेव प्राकृतिको विहारः। विशे-षस्तु गार्हपत्यमध्यशङ्कोरुदक् सार्धद्व्यरत्निव्यवहिते देशे शङ्कुर्देयः, स खरस्य मध्यः। तत्र चतुर्विंशत्यङ्गुलमितं द्व्यङ्गुलोत्सेधं चतुरस्रं मृदा कुर्यात् स खर इत्युच्यते। एवमेवाहवनीयस्योत्तरतो द्वितीयः खरः कर्तव्यः। विमितस्य पश्चादुत्तरतश्च पञ्चारत्नि-परिमितं परिवृत्तद्वयं कर्तव्यम्। तत्रैकं पत्नीशाला, अपरं दीक्षास्नानस्थानम्, घर्मपात्र-पाकस्थानं च। परिवृत्तद्वयेऽपि उत्तरे द्वारं कार्यम्। विमितपूर्वद्वारमध्यशङ्कोः सकाशात्

पूर्वस्यां दिशि द्विपदात्मकप्रक्रमत्रयव्यवहिते देशे शङ्कुर्देयः, सोऽन्तःपात्यः। सोमे द्विपदप्रक्रमेणैव मानम्। पदं तु दशाङ्गुलम्, द्वादशाङ्गुलम्, पञ्चदशाङ्गुलं वेति। दशाङ्गुलपदपक्षे सदोमानमरत्निनैव कार्यम्। अन्तःपात्याद्दक्षिणत उत्तरतश्च पञ्चदशसु पञ्चदशसु प्रक्रमेषु शङ्कू देयौ, ते महावेदेः श्रोणी। अन्तःपात्यशङ्कोः सकाशात् पूर्वस्यां दिशि द्विपदात्मकषट्त्रिंशत्प्रक्रमव्यवहिते देशे शङ्कुर्देयः, तस्माद्दक्षिणत उत्तरतश्च द्वादशसु द्वादशसु प्रक्रमेषु शङ्कू देयौ, तावंसौ। अन्तःपात्यशङ्कोः पूर्वस्यां दिशि द्विपदात्मकसार्धप्रक्रमव्यवहिते देशे शङ्कुर्देयः, स सदसः पश्चिमप्रान्तः। तस्माद्दक्षिणत उत्तरतश्च नवारत्निव्यवहिते देशे शङ्कू देयौ, ते सदसः श्रोणी। सदसः पश्चिमशङ्कोः पुरस्तान्नवारत्नि-नवारत्निव्यवहिते देशे शङ्कुर्देयः, स सदसः पूर्वप्रान्तः। तस्माद्दक्षिणत उत्तरतश्च नवारत्निव्यवहिते देशे शङ्कू देयौ तावंसौ सदसः। सदसः पश्चिमे पूर्वे च द्वारे कार्ये। अन्तःपात्यात्पूर्वस्यां दिशि षट्सु प्रक्रमेषु शङ्कुर्देयः, तस्माद्दक्षिणतः पञ्चारत्निव्यवहिते देशे शङ्कुर्देयः, तदौदुम्बरीस्थानम्। षट्प्रक्रमान्ते निहितशङ्कोः पूर्वस्यां दिशि एकविंशत्यङ्गुले शङ्कुर्देयः, तद्दक्षिणत एकोनत्रिंशदधिकशताङ्गुलेषु शङ्कुर्देयः, स प्रशास्तृधिष्ण्यमध्यः। एवं पृष्ठ्यात उत्तरतो नवाङ्गुले शङ्कुर्देयः, स होतृधिष्ण्यमध्यः। वेदिमध्ये वर्तमाना प्राचीरेखा पृष्ठ्या। तस्मादुत्तरतः षट्त्रिंशदङ्गुलान्तराश्चत्वारः शङ्कवो निखेयाः। ते ब्राह्मणाच्छंसि-पोतृ-नेष्टृच्छावाकधिष्ण्यानां मध्याः। शङ्कुषु अष्टादशाङ्गुलानि चतुरस्राणि चतुरङ्गुलोच्चानि स्थण्डिलानि मृदा कर्तव्यानि, तानि धिष्ण्यान्युच्यन्ते। यूपावटदेशात्पश्चिमतः पदं त्यक्त्वा शङ्कुर्देयः, तस्मात् पश्चिमतः पञ्चारत्निव्यवहिते देशे शङ्कुर्देयः, तस्माद्दक्षिणत उत्तरतश्च सार्धद्व्यरत्नि-सार्धद्व्यरत्निव्यवहिते देशे शङ्कू देयौ, ते उत्तरवेदेः श्रोणी। एवं पूर्वस्मादंसौ। इयं दशपद्योत्तरवेदिः कार्या, सा च चतुरङ्गुलोच्चा हस्तोन्नता वा। उत्तरवेदेः पश्चात् पदद्वयात्मकप्रक्रमव्यवहिते देशे हविर्धानपूर्वद्वारमध्ये शङ्कुर्देयः। तस्मात्पश्चाद्दशसु प्रक्रमेषु पश्चिमद्वारमध्यशङ्कुः। द्वारशङ्कोर्दक्षिणे उत्तरे च पदद्वयात्मकपञ्च-पञ्चप्रक्रमव्यवहिते देशे शङ्कुचतुष्टयं देयम्। एवं कृते दशप्रक्रममितश्चतुरस्रश्चतुस्तम्भो हविर्धानमण्डपः सम्पद्यते। हविर्धानमण्डपे समप्रमाणानि चत्वारि कोष्ठकानि भावयित्वा, आग्नेयकोष्ठस्य मध्ये चतुर्विंशत्यङ्गुलमितं समचतुरस्रं प्रकल्प्य. तस्य चतुर्षु कोणप्रान्तेषु प्रादेशमात्रविस्तारान् प्रादेशान्तरालान्बाहुमात्रनिम्नान् गर्तान् खनेत्। तेषामुपरि वारणानि फलकानि भूसंलग्नानि स्थपुटयेत्। एते गर्ता उपरवशब्देन व्यपदिश्यन्ते। हविर्धानस्य वायव्यकोणादुत्तरे समसूत्रतया पदद्वयात्मकचतुःप्रक्रमव्यवहिते देशे शङ्कुर्देयः, स आग्नीध्रीयस्य नैर्ऋत्यकोणः। तस्मादुत्तरतः पञ्चारत्निव्यवहिते देशे शङ्कुर्देयः, स आग्नीध्रीयस्य वायव्यकोणः। तयोः शङ्क्वोरार्जवेन पुरस्तात् पञ्चारत्निव्यवहिते देशे शङ्कू देयौ। तौ आग्नेयैशानौ। पञ्चारत्निपरिमितं चतुरस्रमाग्नीध्रीयं कार्यम्। तस्य दक्षिणे पूर्वे च द्वारे कर्तव्ये। एवमेव दक्षिणे आग्नीध्रीयस्य समसूत्रतया मार्जालीयागारं पूर्वद्वारवर्जमुदग्द्वारमाग्नीध्रीयवत्कर्तव्यम्। उभयोर्मध्येऽष्टादशाङ्गुलपरिमिते धिष्ण्ये कर्तव्ये। महावेदेरुत्तरांसादुदक् त्रिंशदङ्गुले शङ्कुर्देयः।

तस्मात्प्रत्यक् चतुस्त्रिंशदङ्गुलव्यवहिते देशे शङ्कुर्देयः, स चात्वालमध्यः। द्वात्रिंशदङ्गुल-परिमितश्चतुरस्रश्चात्वालः कार्यः। उत्तरांसात्पश्चाद् द्वादशसु प्रक्रमेषु पृष्ठ्याया उत्तरतश्च चतुर्दशसु प्रक्रमेषु उत्करमध्यः। तत्र षडङ्गुलेन भ्रमणं कार्यम्, चतुरङ्गुलो गर्तश्च कार्यः। चात्वालादुत्तरतः पूर्वद्वारं पञ्चारत्निमितं शामित्रम्। हविर्धानमण्डपस्योपरि च्छदिस्त्रयेण, सदसो नवभिश्छदिर्भिरुदगग्रैराच्छादनम्। सदोमण्डपे कोणेषु स्तम्भचतुष्टयम्। महावेद्या अवशिष्टांशस्य आच्छादनं भवेन्न वा। उत्तरवेद्यास्तु आच्छादनं क्रियते। सदोहविर्धानयोः परितोऽपि च्छादनम्। त्र्यङ्गुलखाता महावेदिः। इति सङ्क्षेपः।

यज्ञकालनिर्णयः

अथेदानीमिदं विचार्यते यदेकं कर्म एकस्मिन् समारब्धमपरस्मिन् पक्षे समापयितुं शक्यते न वा? तत्र श्रौतेषु कर्मसु पर्यालोच्यमानेषु स्पष्टं निर्णेतुं शक्यते। शुक्लपक्षे कृष्णपक्षे वा प्रारब्धं कर्म तदितरस्मिन् पक्षे समापयितुं शक्यत इति। इष्टिपशुसोमरूपेण विभक्तानां क्रतूनां "य इष्ट्या पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेत" इत्यनेन वाक्येन पर्वकालानुष्ठेयत्वं बोध्यते। तत्रेष्टयः द्व्यहकालाः सद्यस्कालाश्चेति द्वेधा विभक्ताः। दर्शेष्टिः द्व्यहकाला, सौर्यादिविकृतयः सद्यस्काला अपि भवन्ति। दर्शेष्टिरिति सा व्यवह्रियते, या अमावास्यानन्तरं शुक्लपक्षप्रतिपदि क्रियमाणेष्टिः। तत्र अमावास्यायामेव तदीयानि कानिचनाङ्गानि प्रारभ्यन्ते सायं दोहशाखाहरणवत्सापाकरणादीनि। अवशिष्टानि चाङ्गानि प्रधानानि च प्रतिपदि समाप्यन्ते। एतेनेदं निश्चितं भवति 'यदेकस्मिन् पक्षे एकं कर्म उपक्रम्यापरस्मिन् पक्षे समापयितुं शक्यते' तथैव ज्योतिष्टोमः पञ्चदिनसाध्यः। "य इष्ट्या" इति वाक्यबलेन स यागः कस्मिंश्चन पक्षे एकादश्यां प्रारभ्यते, समाप्यते च पर्वकालस्यार्धरात्रे। अवभृथस्नानं न समाप्तम्, तर्हि प्रतिपदि प्रातस्तत्कर्म समाप्यते। एवं क्रियमाणमिदं कर्म विगुणं भवति, फलप्रदं न भवति, इति च मीमांसका याज्ञिका वा नाङ्गीकुर्वते। एवमेव नक्षत्रेष्टिः सप्तविंशतिदिनेषु सम्पत्स्यते। तत्र चावश्यं पक्षद्वयसाध्यत्वं, तस्य कर्मणः स्वीकर्तव्यमिति को वा नाङ्गीकुर्यात्? एवमेव द्वादशाहमारभ्य सहस्रसंवत्सरपर्यन्तं साध्यानि यान्यसंख्येयानि कर्माणि तेषामेकस्मिन्नेव पक्षे समाप्तिः कथं भवेत्? अत्र चावश्यं भिन्न-भिन्नपक्षानुष्ठेयत्वं स्वीकर्तव्यमिति कः सन्दिहीत? एतान्युदाहरणान्यादाय स्मार्तकर्मसु रुद्र-विष्णु-सूर्ययागादिष्वपि व्यवस्था कर्तुं शक्यते। यच्छुक्लपक्षे कृष्णपक्षे वा रुद्रादियागमुपक्रम्य तदितरस्मिन् पक्षे समापयितुं शक्यत इति। कश्चन यजमानः रुद्रादियागे लक्षसंख्याका आहुतीश्चिकीर्षति, अपि चाल्पसंख्याकानेव ऋत्विजोऽवृणोत्, स कथमिव तावत्संख्याका आहुतीः एकस्मिन् पक्षे समापयितुं प्रभवेत्? रुद्रयागादिविधायकवाक्येषु कुत्रापि नायं विशेषः कथितः—

यदेकस्मिन्नेव पक्षे समापनीया इमे यागा इति। प्रारम्भदिनान्येव तत्र तत्र निर्दिष्टानि, समापनदिनानि तु ऐच्छिकान्येवेति प्रयोगविधितोऽवगन्तव्यं भवति। प्रयोगविधिर्हि सर्वत्र श्रौतेषु स्मार्तेषु वा कर्मसु अविलम्बेन पदार्थाननुष्ठापयति। तत्र तत्र श्रौतकर्मणां नियतदिनानुष्ठेयत्वं विधिना बोधितम्। तथा स्मार्तयागविधायकवाक्येष्वश्रवणात् कथमिव वक्तुं शक्यते, यदेकस्मिन्नेव पक्षे समारब्धं कर्म परिसमापनीयमिति। अतः स्मार्तकर्माणि रुद्रयागप्रभृतीनि एकस्मिन् पक्षे प्रारभ्यापरस्मिन् पक्षे समापयितुं शक्यन्त इति बोध्यम्।

यज्ञादौ आचार्यप्रतिनिधित्वविचारः

यज्ञादौ आचार्यस्य प्रतिनिधिर्भवितुमर्हति न वेति विषये महती विप्रतिपत्तिर्दरीदृश्यते। आदौ आचार्यशब्देन कोऽर्थो विवक्ष्यते, तस्य कुत्र शक्तिः? कुत्र लक्षणा? इति विषयो विचारमर्हति। विषयेऽस्मिन् शास्त्रकाराणां कीदृशोऽभिप्राय इति च किञ्चित् प्रस्तूयते। तथा हि आचार्यशब्द एवं निरुक्तः मन्वादिभिर्महर्षिभिः—

उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥

अनेनाचार्यलक्षणमुच्यत इत्यविप्रतिपन्नं समेषां विदुषाम्। तथा वाचस्पतिमिश्रोऽपि सूत्रे प्रसङ्गात् समन्वयप्राचीनसम्मतमाचार्यलक्षणमुपावर्त्तयत् तदुपोद्बलकत्वेन—

"आचिनोति हि शास्त्रार्थमाचारे यस्मात्स आचार्य उदाहृतः।"

इतीदं वाक्यमुदाहार्षीत्। एवमेवान्यैरपि प्राचीनैः महर्षिभिः स्वेषु स्वेषु ग्रन्थेष्वाचार्यलक्षणं प्रणायि। तत्राचार्यशब्दो मुख्य इति।

एवं कर्मकाण्डे वैदिकैः कर्मादौ "सकलकर्मकर्तारमाचार्यं त्वामहं वृणे (वृणीमहे)" इति पठ्यते। अतः वैदिकप्रक्रियायामाचार्यशब्दः सकलकर्मकर्तृबोधनतात्पर्येण प्रयुज्यत इति सम्प्रधार्यते, पूर्वोक्तावाचार्यौ नाभिप्रेतौ, किन्तु अयमेवाचार्यः सम्मत इति। आचार्यवरणानन्तरं च ऋत्विजो वृणीते। तदनन्तरं च यजमान एवं सङ्कल्पयते "एषां वृतानां ब्राह्मणानामन्योन्यसाहाय्येनाचार्यमुखेन च इदं कर्म कारयिष्ये" इति। अतः यथा ऋत्विजः दक्षिणया परिक्रीयन्ते, एवं सकलकर्मकर्त्ता आचार्योऽपि। तस्य विशिष्य दक्षिणाम्नानात्। अयं क्रियमाणस्य कर्मणः न्यूनातिरेकादिकृतं दोषं परिहाय कर्म सगुणं साङ्गोपाङ्गतया च सुष्ठु सम्पादयतीति वैदिके कर्मणि दर्शपूर्णमासादावध्वर्युरिव प्रधानभूतः सन् आचार्यः इत्यभिधीयते। तस्माद्दक्षिणया परिक्रीतत्वादस्य ऋत्विक्त्वं न विहन्यते। अत एव प्रधानभूतऋत्विगित्यप्युच्यते। उपक्रमे विषयोऽयं प्रस्तुतः यत् कर्मकाण्डे कर्मस्वरूप-

सम्पादकस्य चाचार्यपदवाच्यस्य भवति प्रतिनिधिर्नवेति। तत्राचार्यस्यापि प्रतिनिधिरस्तीति सोपपत्तिकमुपपादयामः। तथाहि कर्मणः द्रव्यदेवतामन्त्रऋत्विगादिना साध्यत्वेन श्रुतद्रव्याद्यपचारे अन्यस्य प्रतिनिधिरस्ति न वेति विचारः पूर्वमीमांसादर्शनाधिकारलक्षणे प्रतिनिधिपादे कृतः। तत्र केषां नेति विचिकित्सायां देवतायाः प्रतिनिधिर्न भवति, आहवनीयाद्यग्नीनां प्रतिनिधिर्भवति न मन्त्रस्य, न वा अदृष्टार्थस्य प्रयाजादेः। अयमभिप्रायः—देवतादीनां शास्त्रैः समधिगम्यत्वेनाग्निदेवतया यददृष्टमुत्पद्यते, तदेवादृष्टं सूर्यदेवतया समुत्पद्यत इत्यत्र प्रमाणाभावात् देवतादीनां प्रतिनिधिर्न भवति। तथा च जैमिनिसूत्रम्—"**न देवताग्निशब्दक्रियादृष्टार्थत्वात्**" इति। तथा यजमानस्यापि प्रतिनिधिर्न भवति। यजमानस्यापि प्रतिनिधित्व-स्वीकारे प्रतिनिहितोऽपि स्वयमेव यजमानः स्यात्, न तु प्रतिनिधिरिति। तस्माद्यजमानस्य प्रतिनिधिर्न भवतीति। तथा चोक्तं जैमिनिना—"**तथा स्वामिनः फलसमवायात् फलस्य कर्मयोगित्वात्**" इति। अतः एतेषां पूर्वोक्तानां प्रतिनिधिर्न भवतीति। ऋत्विजां तु प्रतिनिधिर्भवत्येव, तेषां कर्मकरत्वात्। आचार्योऽपि "ऋत्विग्जातीयः" इत्युक्तम्। ऋत्विजस्तु प्रत्यक्षमेव कर्मस्वरूपं सम्पादयन्तीति न तेषामदृष्टार्थत्वम्, अपि तु दृष्टार्थत्वमेवेति समधिगतमीमांसा-न्यायतत्त्वानां पुरतः न किञ्चित् पिष्टं पिष्यते। अत्र दैवान्मानुषाद्वा अपराधात् रोगादेर्वा यदि वृतोऽप्याचार्यः कर्ममध्ये उपरमेत तदानीं प्रारब्धस्य कर्मणः अवश्यपरिसमापनीयत्वेन अन्याचार्यः वरणीय एव। अन्यथा "**कर्मणः फलजनकत्वासम्भवात्**"। तस्मादन्यस्याचार्यस्य प्रतिनिधित्वेन वरणं शास्त्रीयमेवेति न किञ्चिद्वक्तव्यमवशिष्यते विदितवेदितव्यानां पुरस्तात्। अपि च एवं बहुषु स्थलेषु व्याध्यादिना उपपीडितमाचार्यं परित्यज्य शिष्टसम्प्रदाये बहुधा चाचार्यान्तरवरणं दृष्टमिति। शिष्टाचारोऽप्यमुमेवार्थं द्रढयतितराम्। जैमिनिरपि उपक्रान्तस्य काम्यस्य कर्मणः नित्यस्य वा अवश्यपरिसमापनीयत्वेन विहितद्रव्यऋत्विगाद्यपचारे अन्यः आगमयितव्य इति सुस्पष्टं प्रत्यपीपदत्—"**आगमो वा चोदनार्थाविशेषात्**" इति। अन्यशेषः प्रतिनिधेयस्य ऋत्विगादेरिति। तस्मादाचार्यस्य प्रतिनिधित्वे न किञ्चिद् दुष्यति। अपि च मीमांसकेश्वरः जैमिनिः—अस्मिन्नेव प्रकरणे "**अन्यमागमयेद् वैगुण्यात्**" इति सूत्रयामास। अस्यायमर्थः—'यदा वृतानां मध्ये अन्य ऋत्विगाचार्यपदवाच्यः प्रधानऋत्विग्वा यद्युपचरेत् केनचिन्निमित्तेन तदानीं कर्मणो वैगुण्यपरिहारार्थं साङ्गोपाङ्गतासिद्ध्यर्थं चान्यः प्रतिनिधेय इति' अन्यथा वैगुण्यापत्तेरिति। तस्मादयमर्थः पर्यवस्यति—ऋत्विज आचार्यस्य वा केनचिन्निमित्तेनापचारे अन्यः कश्चन प्रतिनिधेयः, स च प्रतिनिहितः लौकिकेन शास्त्रीयेण वा वरणेन संस्कृतः न स्वयं प्रत्यवैति, न वा यजमानं प्रत्यवायेन योजयति, अभिमतेन फलेन च सङ्गमयतीति समेषां वैदिकविदुषां निश्चप्रचोऽर्थः। तस्माद् वयमिदमेवान्ते प्रतिपादयिष्यामः यद् यजमानस्य प्रतिनिधिर्न भवति, आचार्यादेस्तु वरणेन संस्कृतस्यापि दैवान्मानुषादपरा-

धादपचारे अन्यः प्रतिनिधेयः। स च शास्त्रीयेण लौकिकेन वा वरणेन सामिधेनी-प्रवचनकाले होतृवत्संस्कृतः साङ्गोपाङ्गतया कर्मसाद्गुण्यं सम्पादयितुं प्रभवति। स न दुष्यति, न वा यजमानः प्रतिनिहितेनाचार्येण समनुष्ठितात्कर्मणः प्रत्यवायं भजते। अपि तु समीहितेन फलेनात्मानं संयुनक्तीति सोपपत्तिकं प्रतिपादयितुमुचितम्।

यज्ञादौ स्त्रीणामधिकारविचारः

रुद्रयाग-विष्णुयागादौ पुरुषवत् स्त्रीणामप्यधिकारो भवति नवेति विचारे—यद्यपि स्त्रीणां वेदाध्ययननिषेधेन विद्याभावान्मन्त्रग्रहणासम्भवाच्च मन्त्रसाध्येषु श्रौतेषु कर्मसु स्वातन्त्र्येणाधिकारो नास्तीति जैमिनि-कात्यायनादिभिर्महर्षिभिर्निर्णीतम्। तथापि स्मार्तेषु रुद्रयागादिष्वधिकारो भवितुमर्हति। यथा हि वैदिकमन्त्रसाध्येषु श्राद्धादिषु स्त्रीणां स्वतो मन्त्रोच्चारणनिषेधेऽपि ऋत्विग्द्वारा श्राद्धादिकरणेऽधिकारोऽस्त्येवेति निर्णीतं निबन्धकृद्भिः।

"विधवा स्वयं सङ्कल्पं कृत्वा, अन्यद् ब्राह्मणद्वारा यज्ञादि कारयेत्" इति निर्णयसिन्धौ। यथा शान्तिक-पौष्टिक-वास्तु-तडागोत्सर्गादिषु स्मार्तकर्मसु वैदिकमन्त्रसाध्येष्वपि ऋत्विक्कर्तृकमन्त्रोचारणपूर्वकं स्वातन्त्र्येण स्त्रीणामधिकारः स्थापितो दानकमलाकरादौ। तथा हि गृह्यसूत्राद्युक्तहोमाङ्गकुशकण्डिकाद्यङ्गापेक्षेषु तुलादानादिषु तदध्ययनाभावे कथं स्त्रीणामधिकार इति चेद् न। गृह्योक्ताङ्गज्ञानस्योपदेशादिना सम्भवात् वरणाम्नानेन ऋत्विक्कर्तृकहोमे वैदिकमन्त्रो भवत्येव इति दानकमलाकरे। एवमेव रुद्रयागादावपि ऋत्विग्भिरेव मन्त्रपठनात् स्त्रीणां केवलं द्रव्यत्यागस्यैवानुष्ठेयतया तदनुष्ठाने निषेधाभावात् स्त्रीणामपि ऋत्विग्द्वारा स्मार्त्त-रुद्रविष्णुयागाद्यनुष्ठानेऽधिकारो भवत्येवेति युक्तमुत्पश्यामः।

यत्तु रुद्रकल्पद्रुमकारैः स्त्री-शूद्रानुपनीतानां वैदिकमन्त्रयुक्तकर्मस्वध्ययनाद्यभावेन साक्षाद्वचनाभावेऽनधिकार इत्युक्तम्, तत्रेदं द्रष्टव्यम्—यदि वैदिकमन्त्रसाध्यतया स्त्रीणामनधिकारः तर्हि श्राद्ध-तुलादानादीनामपि वैदिकमन्त्रसाध्यतया तत्र कथमधिकारः स्त्रीणामृत्विग्द्वाराऽपि? यदि ऋत्विग्द्वाराऽनुष्ठाने दोषो नास्तीत्युच्यते, तर्हि अत्राप्यनुष्ठाने कुतो नाधिकारः? अतश्च स्त्रीणां वैदिकमन्त्रोच्चारणनिषेधात्तत्राधिकाराभावेऽपि ऋत्विग्द्वारा रुद्रयाग-विष्णुयागाद्यनुष्ठाने न दोष इति।

—:०:—

यज्ञादौ स्वाहाकारनिर्णयः

सर्वैरपि पद्धतिकारैः पुरुषसूक्तस्य समग्रस्य अन्ते नाममन्त्रेण संयुतस्यैकमन्त्रत्व-मुक्तम्। अतो मन्त्रादावेवोङ्कारः प्रयोक्तव्यः, एवं यत्र यत्र ऋचोऽन्ते नाम-मन्त्रस्यापि संयोजनं विहितं तत्र सर्वत्रापि नाममन्त्रसहितस्यैव ऋगादेः असति बाधके एकमन्त्रत्व-प्रतीत्या "मन्त्रान्तैः कर्मादिः सन्निपात्योऽभिधानात्" इति सूत्रकारवचनेन मन्त्राणां प्रयोगसमवेतार्थस्मारकत्वमिति मीमांसान्यायेन च मन्त्रैकत्वावसानात्। मन्त्रभेदाङ्गीकारे विकल्पापत्त्या मन्त्रादावेवोङ्कारः पठनीयो न तु तन्मध्ये नाम-मन्त्रादौ। तथा च "ॐ सहस्रशीर्षा॰ साध्याः सन्ति देवाः नारायणाय स्वाहा" इत्युक्त्वा होमः कार्यः, न तु 'नारायणाय स्वाहा' इत्यस्य पूर्वम् ओङ्कारः पठनीयः। तथात्वे मन्त्रभेदापत्त्या पूर्वोक्तदोषापत्तेः। यत्र तु ऋगन्ते द्वादशाक्षरमन्त्रस्य संयोजनं विहितं तत्र ओङ्कारघटितस्यैव द्वादशाक्षरसम्पत्त्या ओङ्कारः पठनीय एव। यथा "ॐ सहस्रशीर्षा॰ सन्ति देवाः ॐ नमो भगवते वासुदेवाय स्वाहा" इति। एवं यत्र ऋगन्ते नाममन्त्रसंयोजनं विहितं तत्र ऋगन्ते चतुर्थ्यन्तनाम पठित्वा तदन्ते स्वाहाकारन्नियोज्य होमः कार्यः। यथा—"ॐ सहस्रशीर्षा॰ दशाङ्गुलम् विष्णवे स्वाहा"इति। एवं केवलनाममन्त्रेण यत्र हवनमुक्तं तत्रापि चतुर्थ्यन्तन्नाम पठित्वा तदुपरि स्वाहाकारं संयोज्य हवनं कर्तव्यम्। यथा "अग्नये स्वाहा" इत्यादि। एवमेव सर्वेषु सूत्रेषु विधिरस्ति। न तु नाममन्त्रान्ते 'नमः' शब्दं संयोज्य तदुपरि स्वाहाकारं संयोज्य "अग्नये नमः स्वाहा" इति होमः समुचितः। किन्तु "अग्नये स्वाहा"इत्येव। यत्र तु मन्त्रादौ नमोऽन्तस्यैव मन्त्रत्वमुक्तं तत्र परं "नमः" शब्दं पठित्वा तदुपरि स्वाहाकारो योजनीयः। यथा "अग्नये नमः स्वाहा" इति। नैतावता सर्वस्यापि नाम्नोऽन्ते "नमः" शब्दं पठित्वा स्वाहाकारो योजनीयः। यत्र स्वाहान्तस्यैव मन्त्रत्वं तत्र तावतैव होमो न तु तदुपरि अन्यः स्वाहाकारः, यथा "वेट् स्वाहा" इत्यादौ।

श्रुतिषु च 'वाजाय स्वाहा" इत्यादि स्पष्टलिखितत्वान्नास्ति सन्देहलेश इति। ये तु "नमः" शब्दोत्तरं "स्वाहा" शब्दं पठन्ति तत्र मूलमन्वेष्यम्। तस्मान्नमः-शब्दरहितेनैव नाममन्त्रेण होम इत्युद्योतरत्नादाविति प्रतिष्ठेन्दुः।

[1]स्पृश्यास्पृश्य-विवेकः

(अस्पृश्यस्पर्शने मूर्तिस्पर्शने च निर्णयः)

अस्पृश्या द्विविधाः--शुचयः अशुचयश्च। तत्र 'स्नात्वा शुचिः कर्माणि कुर्वीत' इति स्मृतिबलात् ये स्नानादिकमनुष्ठाय शुचयः सन्ध्यातर्पण-देवपूजादिकमनुतिष्ठन्ति ते परैरशुचिभिरस्पृश्याः। यदि मोहादन्येन वा कारणेन तेऽशुचयस्तान् स्पृशेयुस्तदा ते अशुचिसंस्पृष्टाः सन्तः स्वयमप्यशुचयो भवन्ति। अशुचिसम्बन्धेन शुचेरप्यशुचित्वस्मरणात्।

बौधायनधर्मसूत्रे (१।६।१३) लिखितमस्ति—

"शुचिमध्वरं देवा जुषन्ते। शुचिकामा हि देवाः शुचयश्च। तदेषाऽभिवदति—शुची वो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचिभ्यः। ऋतेन सत्यमृतसाप आयंच्छुचिजन्मानः शुचयः पावकाः।" इति।

एवञ्च देवपूजादिकं कुर्वन्तो न कैरप्यस्पृश्यैरशुचिभिर्वा पुरुषैरशुचिभिर्वा वस्तुभिः स्पर्शमर्हन्ति।

अशुचयोऽस्पृश्या अपि द्विविधाः। केचिद् ब्रह्महत्यादिनिषिद्धपापकर्तारः स्वकर्मभिरस्पृश्याः, अन्ये च प्रतिलोमजाश्चाण्डालादयो जन्मना ह्यस्पृश्याः।

तत्र प्रथमे तावत् यावत्प्रायश्चित्तानुष्ठानं न शुद्ध्यन्ति तावत्पर्यन्तमस्पृश्या एव। कृतप्रायश्चित्तानामपि येषां व्यवहार्यता स्मृतिपूक्ता तैः स्पर्शनादिसंव्यवहारो भवितुमर्हति।

येषां कृतप्रायश्चित्तानामपि संव्यवहारो निषिद्धस्तैरपि सह संस्पर्शादिव्यवहारो न कर्तुं शक्यते। ते च यथा—

"अथ भ्रूणहा श्वाजिनं खराजिनं वा बहिर्लोम परिधाय पुरुषशिरः प्रतीपानार्थमादाय (प्रतीपानर्थानादाय)। खट्वाङ्गं दण्डार्थे कर्मनामधेय' प्रब्रुवाणश्चङ्क्रम्येत को भ्रूणघ्ने भिक्षामिति। ग्रामे प्राणवृत्तिं प्रतिलभ्य शून्यागारं वृक्षमूलं वाऽभ्युपाश्रयेत् 'न हिम आर्यैः सह संप्रयोगो विद्यते।' एतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत्। नाऽस्यास्मिंल्लोके प्रत्यापत्तिर्विद्यते। कल्मषं तु निर्हण्यते।" (आप० ध० सू० प्र० १, क० २८, २९)

---

१. स्पृश्यास्पृश्यविषयमधिकृत्य धर्मप्रवीरेण गोयनकाभिधेन स्व० श्रीगौरीशङ्करश्रेष्ठिना कतिषुचित् प्रश्नेषु पृष्टेषु महामहोपाध्यायपदवीभाजा स्व. पण्डितश्रीविद्याधरशर्मगौडमहोदयेन वैदुष्यपूर्णं यदुत्तरितं तदध्येतृलाभाय उपस्थाप्यते। —सम्पादकः।

इत्यादिना पापनिवृत्तिरेवोक्ता। तैरपि सह संस्पर्शादिव्यवहारो न कर्तुं शक्यते। परन्तु ते-"अथाऽभिशस्ताः समवसाय चरेयुर्धार्म्यमिति सांशित्येतरेतरयाजका इतरेतराध्यापका मिथो विवहमानाः।" (आप० ध० सू०, प्र० १, क० २६, सू० ८)।

इति शास्त्रात्परस्परं विवाहादिकं संव्यवहारं च कुर्युः। द्वितीये च ये प्रतिलोमजाश्चाण्डालदयस्ते चतुर्भिरपि वर्णैरस्पृश्या एव। तेषां स्पर्शने तु 'स्पृष्ट्वैवाशुचिर्भवति' इति स्पृष्ट्वा यावत्सचैलं न स्नाति तावदशुचिरेव। अतश्च एतेषां स्पर्शने स्प्रष्टुरेव कर्मानुष्ठानयोग्यताऽपैति। पूर्वापेक्षया इदमत्र वैलक्षण्यम्। पूर्वत्र स्पृश्योऽशुचिर्भवति, अत्र स्प्रष्टा अशुचिर्भवति। सत्यप्येषामस्पृश्यत्वे पूर्वत्रोत्तमत्वबुद्ध्या स्पर्शो निषिध्यते।

ते चास्पृश्याः मागध-क्षत्ता-चण्डाल-वैदेहक-सूत-अनुलोम-प्रतिलोम-श्वपाक-वैण-पुल्कसप्रभृतयो बौधायनेनोक्ताः—"शूद्राद्वैश्यायां मागधः, क्षत्रियायां क्षत्ता, ब्राह्मण्यां चण्डालः। वैश्यात्क्षत्रियायामायोगवो ब्राह्मण्यां वैदेहकः। क्षत्रियाद् ब्राह्मण्यां सूतः। तत्राम्बष्ठोग्रयोः संयोगे भवत्यनुलोमः। क्षत्तृवैदेहकयोः प्रतिलोमः। उग्राज्जातः क्षत्त्र्यां श्वपाकः। वैदेहकादम्बष्ठायां वैणः। निषादाच्छूद्रायां पुल्कसः। शूद्रान्निषाद्यां कुक्कुटः। वर्णसङ्करादुत्पन्नान् व्रात्यानाहुर्मनीषिणः।" (बौ० ध० सू० १।६।१७)।

ते चापि बाह्यान्सुबहूंस्ततोऽप्यधिकदूषितान्।
परस्परस्य दारेषु जनयन्ति विगर्हितान्॥
यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते।
तथा बाह्यतरं बाह्यश्चातुर्वर्ण्ये प्रसूयते॥
प्रतिकूलं वर्तमाना बाह्याबाह्यतरान् पुनः।
हीना हीनान्प्रसूयन्ते वर्णान्पञ्चदशैव तु॥

(मनु० १०।२६-३१)

चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च।
वसेयुरेतेऽविज्ञाना वर्तयन्तः स्वकर्मभिः॥
चण्डालश्वपचानान्तु बहिर्ग्रामात्प्रतिश्रयः।
अपपात्राश्च कर्तव्या धनमेषां श्वगर्दभम्॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम्।
कार्ष्णायसमलंकारः परिव्रज्या च नित्यशः॥

न तैः समयमन्विच्छेत्पुरुषो धर्ममाचरन् ।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ॥
अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने ।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥
दिवा चरेयुः कार्यार्थं चिह्निता राजशासनैः ।
अबान्धवं शवं चैव निर्हरेयुरिति स्थितिः ॥
वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया ।
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च ॥

(मनु० १०।५०-५६)

इत्यादिवचनैस्तेषां सर्वबाह्यत्वमेवावगम्यते । एभिरेव वचनैस्तज्जातानां तत्पुत्रपौत्रप्रभृतीनां सर्वेषामपि तद्बाह्यत्वम्, क्वचित् ततोऽपि बाह्यतरत्वं हीनतरत्वं चावगम्यते । अत एव ये इदानीमस्माभिरुपलभ्यन्ते चाण्डालादयस्ते तत्सन्ततिजा एवेत्यस्माभिः परम्परयाऽवगम्यमानत्वादेतेषामपि बाह्यत्वमधमत्वं चेति सिद्ध्यति ।

एतेन ये कथयन्ति यदद्यत्वे परिदृश्यमाना न सदृशाश्चण्डाला इति न तेषां बाह्यत्वं सिध्यति–ते प्रत्युक्ताः । यद्येतेषां न चाण्डालादावन्तर्भावस्तर्हि कुत्रान्तर्भावः ? इमे तु न सच्छूद्रकोटौ परिगण्यन्ते, न तैः सह व्यवहारः क्रियते पारस्परिक इति तु विदितमेव । अतश्चैतेषां सच्छूद्रेऽनन्तर्भावः सिद्ध्यति । अतएव चैतेषां बहिर्भाव एव ततोऽवगन्तव्यः । तत्र च प्रमाणं व्यवहार एव । यद्येवं नाङ्गीक्रियते तर्हि भवदुक्तौ वा किं प्रमाणम् ? किं चास्माभिः पारस्परिकं शिष्टाचाररूपं व्यवहारं प्रमाणीकृत्य अद्यतनानां चण्डालानां चण्डालत्वमुच्यते । भवद्भिस्तु निर्मूलं यथेष्टं प्रमाणलेशं विनैव स्वबुद्ध्या किञ्चित्परिकल्प्यते ।

किञ्च स्मृतिकाराः आ च मनोः आच निबन्धकारेभ्यः सर्वेऽप्यद्य परिदृश्यमानां जातिमेव परम्परया कृतप्रत्यभिज्ञां चण्डालजातिं व्यवहरन्ति । अतो मूलभूतो यश्चण्डालजातेरुत्पन्नोऽयमपि सङ्करजातिश्चण्डालजातिरेवेत्यत्र नास्ति संशयः ।

एवं श्रुतिस्मृतिसिद्धचण्डालजातीयानां पुरुषाणां मन्वादिभिः सर्वत्र बाह्यत्वश्रवणात् वेदवैदिकविद्यासु चतुर्दशसंख्यास्वष्टादशसंख्यासु वा सर्वथा न तेषामधिकारः, अतस्ता विद्या न तेभ्यो देयाः । यदि मोहाल्लोभाद्वा कश्चिदध्यापयति तेनाध्यापयिताऽपि पतति ।

[1]संवत्सरेण पतति पतितेन समाचरन् ।
याजनाध्यापनाद्यौनान्न तु यानासनाशनात् ॥

(बौ० ध० सू० २।१।३५)

१. संवत्सरेण पतति पतितेन सहाचरन् ।
याजनाध्यापनाद्यौनान्न तु यानासनाशनात् ॥ (मनु० ११।१८०)

अत्र गोविन्दस्वामिव्याख्या—"यानासनाशनैः संवत्सरेण पतति, न तु याजनादिभिः संवत्सरेण, किन्तु संबन्धमात्रेण सद्य एव पततीत्यर्थः, अन्तरङ्गत्वाद्याजनादीनां, बहिरङ्गत्वाच्च यानादीनाम्" इति।

एवमध्येताऽपि चाण्डालादिः स्वानधिकृतविद्याध्ययनात् न केवलं तज्जन्यैहिकामुष्मिकफलं न प्राप्नोति, किन्तु महादोषभागपि भवति। अतो ये नाम कथयन्ति एतद्विद्याध्ययनेन तेषामुपकारो जायत इति न तद्युक्तियुक्तं शास्त्रीयं च। तेषां नरकपतनं विना कश्चन ऐहिकामुष्मिको वा उपकारो भवतीति न वयं विजानीमः। अतश्च येऽध्यापयितारस्तेषां न केवलमध्यापनजन्यं पातित्यम्, किन्तु चाण्डालादीनामनर्हकर्मप्रवर्तनरूपोऽपि दोष एतान् स्पृशतीति पापद्वयभागिनस्ते।

पूर्वोक्तवचनबलादेव चाण्डालादिभिः साकं ये नाम अस्मदीया बालका एकस्मिन् आसनादावुपविश्याध्ययनादिकं कुर्वन्ति पाठशालासु तेऽपि संवत्सरेण पतन्त्येव।

एकशय्यासनं पङ्क्तिर्भाण्डपङ्क्त्यन्नमिश्रणम्।
याजनाध्यापने योनिस्तथा च सह भोजनम्॥
नवधा सङ्करः प्रोक्तो न कर्तव्योऽधमैः सह।
संलापस्पर्शनिःश्वाससहयानासनाशनात् ॥
याजनाध्यापनाद्यौनात्पापं संक्रमते नृणाम्।
संवत्सरेण पतति पतितेन सहाचरन्॥

अतोऽस्मदीयबालकानां चण्डालबालकानां चात्यन्तहिंसाकरं कार्यमिदं कूटहिंसेत्यत्र कः सन्देहः?। अनेनैव न्यायेन एतेषां मन्दिरप्रवेशनमपि कूटहिंसैव। यतः प्राचीनमन्दिरेषु महर्षिभिः सिद्धकल्पैः प्रत्यक्षीकृतधर्मभिर्मन्त्रेण दैवीः कला आकृष्य मूर्तिषु प्रतिष्ठापिताः।

अधुनाऽपि वैदिकैर्वेदोक्तमार्गेण यथाविधि मन्त्रैरेव सर्वत्र देवता आकृष्य स्थाप्यन्ते। अतो मन्त्राकृष्टा देवताकलाः पतितादिचण्डालादिसम्बन्धेऽवश्यमपसरन्त्येवेति।

क्वचिन्मन्दिरे यदि चण्डालादिर्गच्छेत् तर्हि अवश्यं तदुचितं प्रायश्चित्तं कर्त्तव्यम्। स्पर्शने तु पुनः प्रतिष्ठैव समुचिता। अतो मन्दिरादौ चण्डालप्रवेशनादिकमिति यत्तत् तत्रत्यदेवतोपरोधकं पूजकानां पूजायामधिकृतानामशुचित्वापादनद्वाराऽनधिकारित्वापादकं चण्डालादीनामप्यनधिकारिणामकार्यकरणे प्रवर्तनमिति सर्वथा कूटहिंसारूपेयं चेष्टा।

१—अत्रायं निष्कर्ष उपलभ्यते यत्-अस्पृश्यानां वर्णाश्रमविहितकर्मसु अधिकारो नास्ति। एषां मन्दिरप्रवेशेन देवकला विनश्यति, मन्दिरञ्चापि भ्रष्टं भवति। अतस्ते देवतात्वनाशजन्यस्य मन्दिरभ्रष्टताजन्यस्य च पातकस्य भागिनो भवन्ति। पाठशालासु च एतेषां प्रवेशेन तथा एतैः सह व्यवहारेण महान् दोष उपजायते।

एवंविधैः पतितकर्मभिः पापवृद्ध्या न तेषां केवलं विशेषहानिः; अपितु-अभ्युदयोऽप्यवरुध्यते ।

२—श्रुतिस्मृतिपुराणादिप्रतिपादितास्पृश्यत्वनिवारणे या प्रवृत्तिस्तया अस्पृश्यता नापैति, अस्पृश्योद्धारश्चापि न जायते, प्रत्युत स्पृश्या अपि अस्पृश्यसम्बन्धादस्पृश्या भवन्ति, ताडिताश्च भवन्ति । एषा महती कूटहिंसाऽस्ति ।

३—यस्मिन् विद्यालये मन्दिरे वा अस्पृश्याः विधि-निषेधावुल्लंघ्य बलात्प्रविशन्ति, प्रवेश्यन्ते वा, तस्मिन् विद्यालये मन्दिरे वा स्पृश्यैः कथमपि न प्रवेष्टव्यमिति ।

---

[1]बदरिकाश्रम-गयाश्राद्धयोर्विचारः

शिरः कपालं यत्रैतत्पपात ब्रह्मणः पुरा ।
तत्रैव बदरीक्षेत्रे पिण्डं दातुं प्रभुः पुमान् ॥
मोहाद् गयायां दद्याद्यः स पितॄन् पातयेत् स्वकान् ।
लभते च ततः शापं नारदैतन्मयोदितम् ॥

इति सनत्कुमारसंहितावचनेन बदर्यां कृतश्राद्धस्य यद्यपि गयायां श्राद्धकरणं निषिद्धमिव आपाततः प्रतीयते, तथापि नेदं निषेधकं वचनम् ।

गयाभिगमनं कर्तुं यः शक्तो नाभिगच्छति ।
शोचन्ति पितरस्तेषां वृथा तस्य परिश्रमः ॥
तस्मात्सर्वप्रयत्नेन ब्राह्मणस्तु विशेषतः ।
प्रदद्याद् विधिवत् पिण्डान् गयां गत्वा समाहितः ॥

इत्यादिवचनेन गयाश्राद्धस्य पितृऋणापाकरणरूपेण नित्यत्वश्रवणात् अकरणे प्रत्यवायश्रवणात् जीवता शक्तेन पुरुषेण गयाश्राद्धस्यावश्यकर्तव्यता प्रतीयते, कैरपि निबन्धकृद्भिर्बदरीश्राद्धानन्तरं गयाश्राद्धाकरणस्यालेखनाच्च । अतोऽत्र श्लोकद्वये **'मोहात्', 'शापम्'** इत्यादि शब्दद्वयं बदरीश्राद्धानन्तरं न गयाश्राद्धनिषेधप्रतिपादकम्,

---

१. महामनीषिणा त्याग-तपोमूर्तिना स्वर्गीयपण्डितश्रीमदनमोहनमालवीयमहोदयेन साग्रहं पृष्टे बदरिकाश्रम-गयाश्राद्धविषयकप्रश्ने काशीस्थहिन्दूविश्वविद्यालयीयधर्मविज्ञानविभागाध्यक्षेण दिवङ्गतेन महामहोपाध्यायेन पण्डितप्रवरेण श्रीविद्याधरगौडमहोदयेनाभिव्यक्ता शास्त्रानुगतविचारसरणिर्यथातथं प्रकाश्यते । - सम्पादकः ।

किन्तु बदरीश्राद्धप्रशंसाबोधकम् "न हि निन्दा निन्द्यं निन्दितुं प्रवर्तते. किन्तु विधेयं स्तोतुम्" इति न्यायेन। यथा वा "अपशवो वा अन्ये गो अश्वेभ्यः पशवो गो अश्वाः" इत्यनेन गवाश्वयोर्विधानार्थमितरेषां पशूनामपशुत्वं बोध्यते तद्वत्। तत्र हि पशुत्वं प्रत्यक्षमेव अजादिषु, तच्च नापह्नोतुं शक्यते। अतश्च गवाश्वौ स्तोतुमेव तदितरेषामजादीनां निन्दा। सा च गवाश्वस्तुतावेव पर्यवस्यति, तद्वत्प्रकृतेऽपि बदरीश्राद्धं स्तोतुमेव गयानिन्दा, न तु गयाश्राद्धनिवृत्तौ तात्पर्यम्। इयमेव व्यवस्था वार्षिकमहालयादिश्राद्धादावप्यवगन्तव्या।

"पित्र्यमानिधनात्कार्यं विधिवद्दर्भपाणिना।" (मनु० ३।२७९)

"मृताहं समतिक्रम्य चाण्डालः कोटिजन्मसु।"

इत्यादिवाक्यैः जीवता पुरुषेण यावज्जीवमवश्यकर्तव्यता बोधनादतिक्रमे प्रत्यवायश्रवणाच्च गयां गतेन कृतबदरीश्राद्धेनापि तत्र श्राद्धमनुष्ठेयमेव।

—:०:—

मन्त्र-ब्राह्मण-सूत्र-स्वरसञ्चारविचारः

यजुर्वेदमन्त्रेषु असंयुक्तस्य रेफहकाराभ्यामृकारेण पदादियकारस्य द्वित्वयकारस्य च सर्वत्र जकारोच्चारणं भवति। उपसर्गपरस्य यकारस्य तु न जकारोच्चारणम्। एवं "न यत्" (शु० य० २०।८१), "वि यत्" (शु० य० १२।३४), "स योजते" (शु० य० १४।३३) इत्यादौ तथा "यज्ञुषे, यजुषे" (शु० य० १।३०) इत्यादावपि न जकारोच्चारणम्, विशेषविधानात्। एवमाम्रेडितेऽपि न जकाराद्युच्चारणम्। "अनु योज" (शु० य० ३।५२), "अभि यज्ञम्" (शु० य० २६।२१) इत्यादौ तु उपसर्गपरस्यापि पदादियकारस्य जकारोच्चारणं भवति, विशेषविधानात्।

एवं पदादिवकारस्य सर्वत्र द्वित्वोच्चारणम्। "वा, वाम्, वः, वै" एषु न द्वित्ववकारोच्चारणं भवति। रेफस्य असंयुक्तान्यहला ऊष्मणा ऋकारेण च संयुक्तस्य सर्वत्र रेकारोच्चारणं भवति। ऋकारस्यापि सर्वत्र रेकारोच्चारणं भवति। एवं लृकारस्यापि ऊष्मणा संयुक्तस्य लेकारोच्चारणं कार्यम्। षकारस्य टवर्गं विना सर्वत्र खकारोच्चारणं कर्तव्यम्।

अनुस्वारस्य दीर्घात्परस्य ह्रस्वगुंकारोच्चारणम्। ह्रस्वात्परस्य तु दीर्घगूंकारोच्चारणम्। "देवानाᳶ हृदयेभ्यः" (शु० य० १६।४६) इत्यत्र दीर्घात्परस्यापि ह्रस्वोच्चारणं भवति। एवं संयोगे परेऽपि ह्रस्वात्परस्य अनुस्वारस्य न दीर्घगूंकारोच्चारणम्।

अत्र केचित् 'गुं गूं' इत्यनयोः स्थाने 'ग्वम्' इति पठन्ति, तन्न समीचीनम्; तथाऽविधानात्। प्रतिज्ञापरिशिष्टे—'गुम्' इत्याकारिकाया वर्णानुपूर्व्याः स्पष्टमुल्लेखाच्च। 'ग्वम्' इत्युच्चारणे ह्रस्व-दीर्घयोः स्पष्टतया भेदोऽपि न स्यात्।

एवं "गर्भधम्" (शु० य० २३।४६), "सहस्रपात्" (शु० य० ३१।१), "रश्मीन्" (शु० य० ३४।४६) इत्यादौ अर्धमात्रिक-मकाराद्युच्चारणानन्तरं द्वयोरोष्ठयोर्विश्लेषं कृत्वा तादृशस्यैव मकारादेरुच्चारणे ऋगन्तादिनियमेन मात्रात्रयादिविरामेऽर्द्धमात्रिको मकारादिः सस्वर इवोच्चारितः प्रतीयते, न तु वस्तुतस्तत्र समाचरो मकारादिर्ज्ञेयः। अवसानगतमकारादीनुच्चार्य तत ओष्ठविश्लेषः कर्तव्य इत्यत्र प्रमाणन्तु पाणिनीयशिक्षायाम्—

अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये।
द्विरोष्ठ्यौ तु विगृह्णीयात्॥

एवं निर्ऋतिरित्यत्र रेफ-ऋकारयोर्योगे स्वरभक्तिप्रयोगो भवति नवेति विचारे याज्ञवल्क्यशिक्षायाम्—

करेणु कुर्विणी चैव हरिणी हरिता तथा।
तद्वत् हंसपदा नाम पञ्चैताः स्वरभक्तयः॥

इत्यादिना पञ्चानामेव स्वरभक्तीनां विधानात् तत्र चास्यानन्तर्भावात् दाक्षिणात्यसम्प्रदाये स्वरभक्तिपाठाभावाच्च तत्र स्वरभक्तिर्नास्तीति केचित्कथयन्ति। परन्तु वयं मन्यामहे तत्रापि स्वरभक्तिप्रयोगः शास्त्रीय एव। यद्यपि शिक्षायां नोक्तं तथापि "अथापरान्तस्य रेफोष्मऋकारैरेकारसहितोच्चारणम्" इति कात्यायनपरिशिष्टे प्रतिज्ञासूत्रे निर्ऋतिरित्यादावपि स्वरभक्तेर्विधानात्। न चैवं वाच्यम्, याज्ञवल्क्यशिक्षाया मन्त्रमात्रविषयकत्वेन तद्विषये तस्या एव प्राबल्यात्, प्रतिज्ञासूत्रं च ब्राह्मणविषयकमिति, तथा कथने प्रमाणाभावात्; प्रत्युत तत्रैव "माध्यन्दिनीयके मन्त्रे स्वरप्रक्रिया" इत्येवोपक्रमात् तस्य च ये मन्त्रा 'इषे त्वादि खं ब्रह्मान्तास्तेषु' इत्यनन्तरं व्याख्यानात् प्रतिज्ञासूत्रस्यापि मन्त्रविषयत्वस्य स्पष्टतोऽवगमात्। एवं "चानुक्तमविरोध्यन्यतो ग्राह्यम्" इति न्यायेन प्रतिज्ञासूत्रानुसारेण षष्ठ्यपि स्वरभक्तिरवश्यं स्वीकार्येति प्रतीयते। शिक्षास्थं पञ्चपदं तु उपलक्षणतया नेयम्। यथैव हि प्रातिशाख्येऽनुक्तानपि विषयानविरोधिनः शिक्षादितः स्वीकुर्मस्तथैव शिक्षानुक्तस्यापि परिशिष्टतः स्वीकरणे न कश्चिद्दोषः। अतएव विकल्पमन्तरा पञ्चानामिव षष्ठ्यपि स्वरभक्तिः प्रतिज्ञासूत्रबलान्नियमेन प्राप्नोति। न च सम्प्रदायविरोधः, गौडीयसम्प्रदायेऽत्रापि स्वरभक्तिप्रयोगस्य नियमेन दर्शनात्। अतो वेदे पाठभेदस्यानुचितत्वात्प्रमाणसिद्धोऽयं निर्ऋतिरित्यादौ स्वरभक्तिपाठ एकरूपेण सर्वैरेव कर्तव्य इति प्रतिभाति। एवं यज्ञ इत्यादावपि एकरूपपाठेनैव भाव्यमिति।

उदात्ते तर्जन्याः, अनुदात्ते कनिष्ठायाः प्रक्षेपः। स्वरिते ह्रस्वे दीर्घे वा वकारे संयुक्तेऽसंयुक्ते वा जात्ये वा सर्वत्र अङ्गुलिद्वयप्रक्षेपः। इतरत्र स्वरिते एकस्याः कनिष्ठायाः प्रक्षेपः। ह्रस्वे गूंकारेऽङ्गुष्ठाकुञ्चनम्, दीर्घे गूंकारे रङ्गे च तर्जन्याः प्रसारः।

वेदेषु तत्र तत्र "वितृण्णाम्, प्रतृण्णाम्, स्वयमातृण्णाम्, शतातृण्णाम्, असन्तृण्णाम्" इत्येवं पदानि श्रूयन्ते। इमानि सर्वाण्यपि पदानि हिंसानादरार्थकतृदिरधातोः निष्पन्नानि भवन्ति। तैत्तिरीयसंहितायां षष्ठद्वितीयैकादशेऽनुवाके वाक्यमिदमुपलभ्यते—"हनू वाऽ एते यस्य यदधिषवणे न सन्तृणत्ति असन्तृण्णे हि हनू" वाक्येनानेन स्पष्टमवगम्यत एव तृदिरधातोरेवायं शब्दो निष्पन्न इति। धातोरस्य हिंसानादरार्थकत्वेऽपि "उपसर्गेण धात्वर्थो बलादन्यत्र नीयत" इति-अभियुक्तोक्तेर्विभिन्नेष्वर्थेषु पदानीमानि प्रयुक्तानि वेदे। वेदेषु यत्र यत्रायं शब्दः प्रयुक्तस्तत्र तत्र णकारद्वित्वघटित एवोपलभ्यते। अत्र च प्रमाणम्—"ऋण्ण पण्ण ष्ण म्ण राण्ण च", "इति प्राकृताः" (१३।१३-१४) इति तैत्तिरीयप्रातिशाख्यगतं सूत्रद्वयमेव। यत्र 'ऋण्ण' शब्दस्योदाहरणत्वेन तदपि व्याख्यामिमान्येव पूर्वोक्तानि पदानि उल्लिखितानि। सति चैवं 'प्रतृण्ण' शब्दमशुद्धं मन्वानः कश्चन पण्डितम्मन्यः 'प्रतृणा' इति पाठेन भाव्यमित्युल्लिलेख। तन्न समीचीनम्।

'यन्मे छिद्रम्' (शु० य० ३६।२) इति मन्त्रे 'अतितृण्णम्' इति णकारद्वयपाठे अतिहिंसितार्थरूपार्थलाभो भवति। केवलमेकणकारघटितपाठे तु वास्तविकार्थो न सङ्गच्छते। अतः पूर्वोक्तेषु सर्वेष्वपि पदेषु णकारद्वयस्योच्चारणं सर्वथा सर्वसम्मतं प्रतिभाति। एवं वेदेषु प्रमादवशतो यत्र कुत्रापि 'वेष्योऽसि' (शु० य० १।३०), 'मनोऽसि' (शु० य० ४।१६), 'चप्यम्' (शु० य० १६।८८), 'भस्मसा' (शु० य० ११।८०) इत्यादीनि अशुद्धवाक्यान्युट्टङ्कितानि सन्ति। वस्तुतस्तत्र 'वेष्योऽसि', 'मनासि', 'चप्पम्', 'मस्मसा' एवंविधाः शुद्धाः पाठा विधेयाः।

ये परशाखीया मन्त्राः सूत्रकारेण संगृहीतास्तेऽपि जकार-द्वित्व-वकार-रेकार-षकार-गूंकाराद्युच्चारणरूपेण यजुर्वेदधर्मेणैव पठनीयाः, स्वशाखीये गृह्यसूत्रादौ तेषां पाठात्।

सूत्रकारेण परशाखीयमन्त्राणां स्वररहितानामेव पाठात् एकश्रुत्यैव ते पठनीयाः, न तु त्रैस्वर्यं तत्र। परन्तु तत्र यकारादिस्थाने जकाराद्युच्चारणं न कर्तव्यम्, स्वशाखायां कुत्राप्यपाठात्।

शुक्लयजुर्वेदीयमाध्यन्दिनशतपथब्राह्मणे उदात्तानुदात्तौ द्वावेव स्वरौ, न स्वरान्तरम्। यकारस्य जकारोच्चारणम्, षकारस्य खकारोच्चारणम्, अनुस्वारस्य ँकारोच्चारणम्, पदादिस्थवकारस्य द्वित्ववकारोच्चारणम्, रेफस्योष्म-ऋकारैः

संयुक्तस्य रेकारोच्चारणम्, लकारस्योष्मसंयुक्तस्य लेकारोच्चारणम्, माध्यन्दिन-संहितावदेव भवति। विसर्गेष्वङ्गुलिप्रक्षेपणं तु न क्रियते। यत्र द्वयोरक्षरयोस्त्रयाणां वाऽनुदात्तता तत्र सर्वाण्यक्षराणि हस्तेन कण्ठेन च अनुदात्तानि उच्चारणीयानि।

कृष्णयजुर्ब्राह्मणेऽपि त्रयः स्वराः सन्ति। ब्राह्मणान्तरेषु स्वराणामभाव एव।

सामवेदे गाने मध्यम-गान्धार-ऋषभ-षड्ज-धैवत-निषाद-पञ्चमेति क्रमेण सप्त स्वराः क्रियन्ते। तत्र मध्यमे हस्तो रिक्त एव स्थाप्यते। गान्धारे अङ्गुष्ठेन तर्जन्या मध्यं पर्व स्पृश्यते। ऋषभेऽङ्गुष्ठेन मध्यमाङ्गुलिमध्यपर्व, षड्जेऽनामिका-मध्यपर्व, धैवते कनिष्ठामध्यपर्व, निषादे कनिष्ठामूलम्, पञ्चमे तर्जन्यग्रं स्पृश्यते।

यस्य वर्णस्योपरि, एतच्चिह्नं तस्य दीर्घमुच्चारणं तर्जनीमध्यस्पर्शो हस्तस्य तिर्यक्करणं च भवति।

यत्र—एतद्दण्डसदृशं चिह्नं तत्र तर्जनीमारभ्य कनिष्ठिकापर्यन्तं स्पृशेत्।

यत्र उ२ एतच्चिह्नं भवेत् तत्र पूर्ववत् तर्जनीमारभ्य कनिष्ठान्तं कनिष्ठामारभ्य तर्जनीं यावत् स्पृष्ट्वा मध्यमामन्तः क्षिपेत् ब्राह्मतीर्थसंस्पृष्टां कुर्यादिति।

यत्र कु३ एतच्चिह्नं भवेत् तत्र मध्यमामग्रमारभ्य मूलं यावत् स्पृशेत्।

यत्र वर्णस्योपरि ९ लिखितं स्यात्तत्र तर्जनीमूलमारभ्य मूलं यावत् स्पृशेत्।

विरामे विसर्गं सानुनासिकमुच्चरेत्। अनुनासिकस्य चोच्चारणं ङकारतुल्यं भवति। दीर्घमृकारं रे इत्युच्चरेत्। ऋकारस्य च रे इत्युच्चारणं षकार-हकारयो-र्योगे विधेयम्। सामसंहितायां मध्यम-गान्धार-ऋषभास्त्रय एव स्वराः क्रमेण स्वरितो-दात्तानुदात्ता भवन्ति।

पारस्करादिगृह्यसूत्राणां तदीयमन्त्राणां चोच्चारणं तु "छन्दोवत्सूत्राणि भवन्ति" (प्रति० परि०) इति शास्त्रात् तत्तच्छाखानुसारेण कार्यमिति।

विवाह-विषये विशेषविचारः

१—विवाहे वरकन्ययोः ग्रन्थिबन्धनकालनिर्णयः

विवाहे पाणिग्रहणात्पूर्वं वर-कन्ययोर्वस्त्रयोर्ग्रन्थिबन्धनं यदाधुनिके पुस्तके क्वचिदुपलभ्यते तत्प्रमाणपदवीमारूढं नवेति विचारे पारस्करगृह्यसूत्रानुसार-पद्धत्यनुवादकेन केनचित्—

कन्यका सुदशे पार्श्वे द्रव्यपुष्पाक्षतादिकम् ।
निक्षिप्य तच्च सम्बध्य वरवस्त्रेण संयुजेत् ॥
वस्त्रैः संयोज्य तौ पूर्वं कन्यादानं समाचरेत् ।
दानेन युक्तयोः पश्चाद् विदध्यात् पाणिपीडनम् ॥

इति योगियाज्ञवल्कीयोद्धृते श्लोके यद्यपि पाणिग्रहणात्पूर्वमेव ग्रन्थिबन्धनस्य कर्तव्यत्वं प्रतीयते, तथापि तस्य श्लोकस्य योगियाज्ञवल्कीये कस्मिन्नपि ग्रन्थेऽनुपलम्भात् शिष्टाचारविरोधाच्च श्लोकोऽयं केवलं स्वकपोलकल्पितो न प्रमाणकोटिमारूढ इत्यवगम्यते ।

सूत्रकारान्तरैरापस्तम्ब-बौधायन-खादिर-जैमिनि-हिरण्यकेशिप्रभृतिभिः पाणिग्रहणं विधाय अनन्तरमेव "अन्वारब्धायामुत्तरा आहुतीर्जुहोति" (आप० गृ० सू० ४।११।५), "अग्निमुपसमाधाय दक्षिणतः पतिं भार्योपविशति, आचान्तः समन्वारब्धायां परिषिञ्चन्ति" (हिरण्यके० गृ० सू० ५।४।५), "पाणिग्राहस्य दक्षिणत उपवेशयेदन्वारब्धायां स्रुवेणोपघातं महाव्याहृतिभिराज्यं जुहुयात्" (खादिरगृ० सू० १।३।७।८), "दक्षिणत एरकायां भार्यामुपवेश्योत्तरतः पतिरुभावन्वारभेयातां स्वमुच्चैर्जुहुयाज्जायायामन्वारब्धायाम्" (जैमिनिगृ० सू० १।२०), "अलङ्कृत्य कन्यामुदकपूर्वां दद्यात्समन्वारब्धायां हुत्वा" (आश्व० गृ० सू० १।७।७), "अन्वारब्ध आघारावाज्यभागौ हुत्वा" (पार० गृ० सू० १।५।३)।

भट्टकुमारिलप्रणीतायामाश्वलायनगृह्यकारिकायाम्—

"वरेणैवं वृतां कन्यां तत्पिता प्रददाति ताम्" (१।१०।१७) इत्यादिना कन्यादानं विधाय—

बध्वा वस्त्रान्तमुभयोः प्राङ्मुखौ च ततः परम् ।
होमदेशे व्रजेतां तु परिगृह्य करौ मिथः ॥
वधूदक्षिणहस्तेन समन्वारब्ध एव सन् ।
कुर्यादाघारपर्यन्तं चौलोक्ताज्याहुतित्रयम् ॥ (१६।२०)

इत्यादिना च पाणिग्रहणानन्तरमेव वरवध्वोरन्वारम्भो विहितः । अतश्च सर्वैरेव सूत्रकारैः वर-वध्वोरन्वारम्भस्य पाणिग्रहणानन्तरमेव विधानात् यावत्पाणिग्रहणं न

सञ्जातम् ततः पूर्वं तयोः परस्परं सम्बन्धाभावात् असम्बद्धयोरन्वारम्भस्यानुचितत्वात् पाणिग्रहणानन्तरमेवान्वारम्भः कर्तव्य इति सर्वसूत्रकारानुमतम्। एतदन्वारम्भज्ञापकमेव ग्रन्थिबन्धनमपि लौकिकाचारागतमित्यनुमातुं शक्यते। अतएव पाणिग्रहणानन्तरमेव ग्रन्थिबन्धनं शास्त्रानुमतम्, न ततः पूर्वम्। एवं च पाणिग्रहणात्पूर्वं कन्याप्रदकर्तृकं ग्रन्थिबन्धनमिति यत् क्वचिदुपलभ्यते तन्निर्मूलकं वा कन्याप्रदयोर्मातापित्रोर्वेति निर्णयः।

२—विवाहे वधूवरयोरग्नेश्च मध्ये अन्तःपटविचारः

लाजहोमात्पूर्वं 'परं मृत्योऽ अनु०' (शु० य० ३५।७) इत्यनेन मन्त्रेण यो होमः क्रियते तस्य फलं मृत्युनिवारणम्।

रौद्र्यां पैत्र्यामथो याम्यां मातर्व्यामाहुतौ तथा।
दम्पत्योरल्पमायुः स्यादन्तर्धिरचना न चेत्॥

इति वचनात्। अत एव होमकाले होत्रा वरेण वध्वा च आहुतिर्न द्रष्टव्येति। वधूवरयोरग्नेश्च मध्ये पटेनान्तर्धानं क्रियते तदन्तःपटशब्देनोच्यते। अत्र केश्चित् केवलं वध्वा एव अक्ष्णोः पटेन पिधानं क्रियते तन्न समीचीनम्। होमेनानेन उभयनिष्ठदोषस्यैव निवारणात्। अतोऽत्र फलभाजोरुभयोरपि दर्शनं वारणीयमिति मत्वा दम्पत्योरग्नेश्च मध्येऽन्तर्धानं कर्तव्यम्, न त्वेकस्या वध्वाः। अतएव संस्कारभास्करे उपक्रमेऽस्योभयार्थत्वमेवोक्तकारिकानिर्देशपुरःसरमभिहितम्। अन्ते तु वध्वक्ष्णोर्वस्त्रपटं निक्षिप्येति यदुक्तं तदुभयोरुपलक्षणार्थमिति मन्तव्यम्।

ज्योतिष्टोमे प्रवर्ग्यहोमकाले पत्न्या अपि केवलं वस्त्रेणाच्छादनं भवति, वचनबलात्। अत्र तु न तथा, वचनमस्तीत्युभयोरन्तर्धानम्। दाक्षिणात्यानामुपनयने विवाहे च गायत्र्युपदेशात्पूर्वमाचार्यमाणवकयोः, कन्यादानात्पूर्वं वधू-वरयोरन्तःपटधारणं भवति। पठन्ति च—

वस्त्रान्तरं तयोः कृत्वा मध्ये तु वर-कन्ययोः।
परस्परं मुखं पश्येन्मुहूर्ते चाक्षतान् क्षिपेत्।
वध्वोरन्तः पटं वस्त्रं वराय विनिवेदयेत्॥ इति।

३—विवाहे वधूवरयोर्ब्रह्माग्न्योर्मध्येन निष्क्रमणविचारः

समाचारात् क्रियमाणे चतुर्थक्रमणे वधूवरौ ब्रह्माग्न्योर्मध्ये न गच्छेताम्। अग्नेरिव मण्डपस्थानां ब्रह्मादीनामपि पूज्यबुद्ध्या प्रदक्षिणीकरणस्य "मृदं गां दैवतं विप्रम्" (मनु० ४।३९) इति मनुवचनात् सिद्धत्वात्।

दक्षिणां दिशमाश्रित्य यमो मृत्युश्च तिष्ठतः।
तयोः संरक्षणार्थाय ब्रह्मा तिष्ठति वाह्यतः॥

इत्यादिवचनैः "अथ परिक्रामतः" (पा. गृ. सू० १।७) इति विधिबोधितेषु त्रिषु परिक्रमणेषु ब्रह्माग्न्योरन्तरा गमनेऽपि चतुर्थे नान्तरा गमनम्। इतरथा वृत्तावेव

पूर्वावृत्तिसाजात्यनियमसत्त्वात्। इतरथाऽऽवृत्तिस्तु नात्र, तत्कारणस्य बहिरङ्गव्यवधानस्याभावात्।

कात्यायनो हि "आवृत्तिसामन्तेषु प्रदक्षिणम्" (का० श्रौ० सू० १।७।२५) इति सूत्रानन्तरमनुल्लिख्य "गार्हपत्याहवनीयौ न व्यवेयात्" (का० श्रौ० सू० १।८।२३) इति गार्हपत्याहवनीययोर्व्यवधानं निषिध्य प्रदक्षिणीकरणादौ व्यवायावश्यंभावं मन्यमानो व्यवायकरणदोषपरिजिहीर्षया विवृत्येति इतरथाऽऽवृत्तिं विदधाति। ततश्च प्रकृते वधूवरयोः स्वामित्वेनान्तरङ्गत्वात्, ब्रह्मणश्च ऋत्विक्त्वेन बहिरङ्गत्वाद् वधूवरयोस्तदन्तरा गमने बहिरङ्गव्यवायाभावान्नेतरथावृत्तिः। अन्तरङ्ग-बहिरङ्गभावश्च "हविष्पात्रस्वाम्यृत्विजां पूर्वं पूर्वमन्तरम्" (का० श्रौ० सू० १।८।३१) इति परिभाषायां कात्यायनेन प्रतिपादितः। एवं च चतुर्थपरिक्रमणं कुर्वन्तौ वधूवरौ ब्रह्माग्न्योर्मध्ये न गच्छेतामिति हरिहरोक्तिः साधीयस्येवेति नात्र तत्खण्डनेऽभिनिवेष्टव्यमिति। सूत्रव्याख्यायां ब्रह्माग्न्योर्मध्ये गच्छेतामित्येव युक्तम्, इत्युल्लेखस्तु परिक्रमणत्रयाऽभिप्रायक इति बोध्यमिति संस्कारदीपके।

४—विवाहे लाजाहुतिसंख्याविचारः

(क) विवाहे लाजानां दशाहुतयः सूत्रकारैरुक्ताः। आपस्तम्बादिभिस्तु आहुतित्रयमुक्तम्। एतासामाहुतीनां प्राधान्ये न कस्यापि विवादः। होमकर्तरि मन्त्रपाठे च विवादो दृश्यते। तत्र आपस्तम्बीयानां होमो वरकर्तृक एव। यद्यपि कन्याहस्तेनैव हूयते, तथापि कन्याहस्तस्तत्र जुहूस्थानीय एव। अतएव च केचन प्रतपनसंमार्गादीन् जुहूधर्मान् हस्ते विदधति। केचन नेच्छन्ति। कन्याहस्ते पञ्चावत्ततादिसम्पादनार्थमुपस्तरणाभिघारणे हविषो द्विरवदानं त्रिरवदानं वा कुर्वन्ति। मन्त्रपाठोऽपि वरकर्तृक एव 'तेषाम्। अतश्च वरः कन्याहस्तं स्वहस्ते जुहूवद् गृहीत्वा उपस्तरणादिकमनुष्ठाय ततो जुहोति, मन्त्रं च पठतीति सम्प्रदायः। आस्माकीनास्तु ग्रन्थकारा लाजाहुतीर्दशापि कन्याकर्तृका एवाभिप्रयन्ति, अतएव च मन्त्रपाठोऽपि तस्या एव। मन्त्रलिङ्गमपि एतदनुकूलमेवास्माकम्। वरस्यान्वारम्भः परं कैश्चित्पद्धतिकारादिभिरुक्तः। "लाजानावपति" इत्येतद्वचनाद् उपस्तरणाभिघारणादिरूपोऽवदानधर्मोऽपि नैवाभिप्रेतः सूत्रकारस्येति गम्यते। भाष्यकार-पद्धतिकारादिभिरपि नैवालिखितः।

(ख) दशमो लाजहोमः "चतुर्थं शूर्पकुष्ठया सर्वाँल्लाजानावपति भगाय स्वाहा" इति सूत्रस्य भाष्याद्यनवलोकनेन सूत्रमात्रपर्यालोचनायां यद्यपि वरकर्तृकोऽयं होमः शूर्पेण 'भगाय स्वाहा' इति मन्त्रेण कर्तव्य इति प्रतीयते "शूर्पेण शिष्टानग्नावोप्य" इति खादिरगृह्यसूत्रेण "लाजानावपन्तिका" इति पारस्करगृह्यमन्त्रलिङ्गाच्च "आवाप" शब्दोऽत्र होमविषय एव। अतः शूर्पेणैव वधूश्चतुर्थीमाहुतिं कुर्यात् इत्येवार्थवर्णनं समुचितमिति प्रतिभाति, तथापि अस्यार्थस्य भाष्यकारादिभिः कैरप्यनुक्तत्वात प्रत्युत शूर्पकोणेन वधूभ्राता वध्वञ्जलौ चतुर्थमावपेत्। सा "भगाय स्वाहा" इति

मन्त्रेण अञ्जलिना जुहुयादिति सुस्पष्टं लेखनात् भाष्यकाराद्यादृतोऽद्य यावच्छिष्टैराद्दतोऽयमेव पक्षः साधीयानिति ।

"शूर्पकोणेन शिष्टांस्तानभ्यात्मं जुहुयाद् वधूः ।"

शौनकः—हुतावशिष्टांल्लाजांस्तु वधूः स्वाभिमुखं ततः ।
शूर्पाग्रेणैव जुहुयात्तूष्णीं निरवशेषतः ॥

आश्वलायनस्मृतिः—अवशिष्टान् वरो लाजान् शूर्पकोणेन चैव हि ।
अभ्यात्मं जुहुयात्तूष्णीमिति यज्ञविदां मतम् ॥ इति ।

५ विवाहे लाजहोमेऽन्वारम्भविचारः

लाजहोमकाले अन्वारम्भमात्रस्य रेणुकारिकादावुक्तत्वाद् वरेण कन्यायाः स्पर्शमात्रं कार्यम् । स च स्पर्शः कन्याया अनुपृष्ठं पतिः परिक्रम्य उदङ्मुखोऽवस्थाय वरेण कर्त्तव्यः, गोभिलगृह्यसूत्रादौ तथैव विधानात् । न तु कन्यायाः पृष्ठतो गत्वा ततः पुरतो हस्तौ प्रसार्य कन्याया हस्तयोर्ग्रहणम्, अशास्त्रीयत्वात् असभ्यताऽऽपादकत्वाच्च ।

यद्यपि कैश्चिदन्वारम्भणस्यास्मत्सूत्रकारानुक्तत्वात् शाखाऽन्तरीयान्वारम्भग्रहणे प्रमाणाभावाद् अन्वारम्भो नानुष्ठेयः । अतएव चातुर्मास्ययागे वरुणप्रघासकर्मणि "करम्भपात्राणि जुहोति शूर्पेण मूर्द्धनि कृत्वा दक्षिणेऽग्नौ प्रत्यङ्मुखी जायापती वा" (का० श्रौ० सू० ५।५।१०) इति सूत्रेण उभयकर्तृके करम्भपात्रहोमविधाने यजमानस्य पत्न्यन्वारम्भ उक्तः, न तु केवलपत्नीकर्तृके करम्भपात्रहोमे । एवं च पत्नीमात्रकर्तृके लाजहोमे नैवान्वारम्भः, केवलं पत्नी उत्थाय जुहुयात्, वरस्तु उपविशेदेवेत्याक्षिप्यते । तथापि—

तिष्ठन्ती तिष्ठता पत्न्या गृहीताञ्जलिनैव सा ।
अञ्जलिस्थान् त्रिधा कृत्वा प्राङ्मुखी प्रतिमन्त्रतः ॥

इति रेणुकारिकावचनमाश्रित्य शिष्टाचारप्राप्तोऽन्वारम्भो लाजहोमे वरेण कार्य इति वक्तुं शक्यते । तत्रापि वधूः प्राङ्मुखी जुहुयात् । वरश्च प्राङ्मुख एव भवेदित्याहुः । शाखान्तरे तु वरस्योदङ्मुखत्वं श्रूयते "अनुपृष्ठं पतिः परिक्रम्य दक्षिणत उदङ्मुखोऽवतिष्ठते वध्वञ्जलिं गृहीत्वा" (गो० गृ० सू० ; ।

६—विवाहे लाजहोमे प्रदक्षिणाविचारः

विवाहे कुशकण्डिकाकरणात्पूर्वमेकम्, लाजहोमसमकाले त्रीणि, ततः समाचाराच्चतुर्थमिति पञ्चैव प्रदक्षिणानि, न तु सप्त । सप्तानां प्रदक्षिणानां केनापि प्रमाणेनाप्राप्तत्वात् । अतः पञ्चैव प्रदक्षिणा अनुष्ठेया इति ।

७—विवाहे तृणच्छेदनाभिप्रायः

विधाय वाऽपि गां कौशीं विधिं तत्र समाप्य च ।
गामुद्धृत्य च तां कौशीमीशान्यां तान् कुशान् क्षिपेत् ॥

अत्र बहुषु अर्वाचीनेषु पुस्तकेषु "तृणं छिन्द्यात्" इति पाठो दृश्यते। अत्र मूलं नोपलभ्यते, तदित्थमिह तर्कः। "पाप्मा हतः" इत्युच्यते, तत्र न तद्धननमनुभूतम्। तस्माद्यथा विष्टरे वैर्यध्यासं कृत्वा तदधः करणमेव वैर्यधिकरणं तथेहापि तृणे एव पापाध्यासं कृत्वा तच्छेदनमेव पापहननमिति प्रदर्शनाभिप्रायेण तथाऽऽचरणमिति।

८—विवाहे मण्डपवेद्यादौ हस्तनिर्णयः

"कन्याहस्तैः पञ्चभिः सप्तभिर्वा कार्या वेदिः कूर्मपृष्ठोन्नता सा" इति वचनात्। मण्डपस्तु षोडशहस्तादिः सद्मनो वामभागे द्वारसमीपे वा पित्रादेर्हस्तेनैव कार्यो न तु कन्यायाः। अन्यथा मण्डपस्याष्टादिहस्तत्वपत्तेऽतिलघुत्वापत्तेः।

आचार्यहस्तमानेन मण्डपे निर्मिते शुभे।
मध्ये वेदी प्रकर्तव्या चतुरस्रा समन्ततः॥

इति ज्योतिर्निबन्धवचनाच्च।

९—कन्यादानकाले हस्तधारणविचारः

कन्यादानकाले कैश्चित् सङ्कल्पात्पूर्वमेव वरहस्ते कन्याहस्तं निधाय ततः सङ्कल्पादिकं दानं वा क्रियते तदसाधु। तथा क्वचिदप्यविधानात्, दानात्पूर्वं वरेण अदत्तकन्याहस्तग्रहणे प्रमाणाभावात्। अतो दानानन्तरमेव अर्थात् "तुभ्यमहं सम्प्रददे" इति दानबोधकशब्दोच्चारणपूर्वकं कन्याहस्तं गृहीत्वा तत्पित्रा यदा दानं क्रियते तदनन्तरम् "हस्तं केशं तथा पुच्छम्" इति शास्त्रेण कन्याहस्तो वरेण ग्रहीतव्यो न ततः पूर्वम्। एवं च कैश्चिदाधुनिकैः पद्धतिकारैः "जामातृदक्षिणकरोपरि कन्यादक्षिणकरं निधाय" इत्यादि यल्लिखितं तदनाचारमूलकमेव।

१०—विवाहे प्रधानाहुतिविचारः

विवाहप्रकरणेऽस्माकं सूत्रकारेण "जयाभ्यातानांश्च जानन्, राष्ट्रभृत इच्छन्, अग्निरैतु प्रथमो देवतानाम्, कुमार्या भ्राता शमीपलाशमिश्राँल्लाजान्, चतुर्थं शूर्पकुष्ठया" इति चतुर्भिः सूत्रैरष्टपञ्चाशदाहुतयो विहिताः। तत्र जयाः, अभ्यातानाः, राष्ट्रभृतश्चेति त्रिचत्वारिंशदाहुतय अन्यैर्बौधायनापस्तम्बादिभिः सूत्रकारैः "अत्रैके जयाभ्यातानान् राष्ट्रभृत इत्युपजुह्वति पुरस्तात्स्विष्टकृतः" इति उपहोमत्वेन (अङ्गत्वेन) विहिताः। न त्वेतेषां क्वचिदपि कर्मणि प्राधान्यमङ्गीकृतं तैः। अस्मत्सूत्रकारैस्तु 'जानन् इच्छन्' इति पदसमभिव्याहारात् होमान्तरैः साकमेतेषां त्रिचत्वारिंशद्धोमानां विकल्पः परमङ्गीकृतः। प्रधानत्वाप्रधानत्वविषये तु न किञ्चिदपि सूत्रितम्। व्याख्यातृभिः कैरपि एतद्विषये न किञ्चिदपि स्पष्टतयोक्तम्। नापि पद्धतिकारैर्विषयोऽयं स्पृष्टः। परन्तु अत्रत्यसूत्रसन्दर्भशैलीपर्यालोचनया व्याख्यातॄणां व्याख्यानपरिपाटीदर्शनेन च इदमवगम्यते-एतेषां विवाहे प्राधान्यमेवाभिप्रेतमस्मत्सूत्रकारादिभिः, न तु सूत्रकारान्तरवदङ्गत्वमभिप्रेतम्। यदि हि अङ्गत्वमेतेषामभिप्रेतमभविष्यत्, तर्हि आपस्तम्बादिवत् अत्राप्यवक्ष्यत्। तदभावात् पूर्वोत्तरतन्त्रमध्ये प्रधानस्थाने एतेषा-

मावापविधानात् अन्यत्र क्वचिदपि कर्मण्येतेषामविधानात् प्राधान्यमेवाभिप्रेतमित्यवगम्यते। एवमेव "येन कर्मणेर्त्सेत्" (तै० सं० ३।४।६) इत्यनेन अन्यत्रापि ऋद्धिमिच्छता जयहोमः कार्य इति ज्ञायते इति वदन् गदाधरदीक्षितः अन्यत्राप्येतेषामनुष्ठानमङ्गीकरोति, तथापि प्राधान्याप्राधान्यविषये न किञ्चिदुक्तवान्। एतन्मन्त्रव्याख्यानरीतिस्तु एतेषां प्राधान्यमेवागमयतीति।

११—विवाहे त्र्यायुषकरणादिविचारः

"पाकयज्ञेषु स्वयं होता भवति" (आश्व० गृ० सू०) इति वचनात् वासःपरिधानादि सकलं विवाहकर्म वरेणैव कर्तव्यमिति प्रतिपादितम्। एवं च त्र्यायुषकरणं स्वयमेव वरेण कर्तव्यम्। तत्र वरकर्तृके त्र्यायुषकरणे "तन्नोऽ अस्तु त्र्यायुषम्" इत्यत्र अस्मच्छब्दस्य नोहः। वरप्रतिनिधिभूताऽऽचार्यकर्तृकत्र्यायुषकरणपक्षेऽपि ऊहो नास्ति, कर्मणः परार्थत्वात्। ऋत्विजां च कर्मकरणार्थं परिक्रीतत्वात्। लिङ्गाच्च—"यां वै काञ्च यज्ञऽ ऋत्विजऽ आशिषमाशासते यजमानस्यैव सा" (शत० ब्रा० १।१।१६) इति। अतएव "वाजश्च मे प्रसवश्च मे" इत्यादौ ऋत्विक्कर्तृकपाठेऽपि नोहः। "शूलेन पाहि नो देवि" इत्यादौ दुर्गापाठेऽस्मच्छब्दस्य नोहः। स्पष्टञ्चेदम्—"ममाग्ने वर्चो विहवेष्वस्तु" इत्येतत्सूत्रे कर्कभाष्ये (का० श्रौ० सू० २।१।२)। तथाहि—'ममाग्ने' इत्यत्र अध्वर्युकर्तृकेऽपि अग्न्यन्वाधाने यजमानाभिधायिपदानाम् अन्यायनिगदत्वादनूह एव। न च वर्चोदिशां च अवनतिः अध्वर्युविषया, कर्मणः परार्थत्वात् इति। एवं च "तन्नोऽ अस्तु त्र्यायुषम्" इत्यत्र "तत्ते" इति विशेष इति क्वाचित्कलेखनं तु प्रामादिकमेव।

ब्रह्माण्डपुराणे—स्नात्वा पुण्ड्रं मृदा कुर्यात् हुत्वा चैव तु भस्मना।
देवानभ्यर्च्य गन्धेन सर्वपापापनुत्तये॥

प्रयोगदीपिकायां वसिष्ठः—ऐशान्या आहरेद् भस्म स्रुचा वाऽथ स्रुवेण वा।
अङ्कनं कारयेत्तेन शिरः कण्ठांसहृत्सु च॥
कश्यपस्येति मन्त्रेण यथाऽनुक्रमयोगतः॥ इति।
ततोऽनामिकया कुर्याद् बिन्दुं सघृतभस्मना।
हृद्यंसयोर्ललाटे च त्र्यायुषेति पदैः क्रमात्॥ इति।

१२—विवाहे चतुर्थीकर्मकालनिर्णयः

विवाहाङ्गभूतस्य चतुर्थीकर्मणो विवाहाच्चतुर्थेऽह्नि अपररात्रे कर्तव्यत्वेन सत्यपि विधौ केनचिदापदादिना कारणेन तस्मिन् दिने कर्तुमशक्तौ विवाहदिन एव कर्तव्यं न वेति विचारे सर्वैरपि सूत्रकारैः पद्धतिकारैश्च चतुर्थदिन एव

तत्कर्तव्यताविधानात् कालान्तरस्याविधानाच्च विहितसमये कर्तव्यमिति यद्यपि प्रतीयते। युक्तं चैतत्, तथापि चतुर्थदिने बलवत्तरप्रतिबन्धेन कर्तुमशक्तौ कर्मलोप-सम्भावनायाम् "कर्मलोपो विगर्हितः" इति कर्मलोपस्य निषिद्धत्वात् "यदि त्वशक्तेः कुलाचाराद्वा तद्दिन एव चतुर्थीहोमः क्रियते तदा तत्समाप्तावेवोदीच्यं कर्म तन्त्रेण कर्तव्यम्" इति (संस्कारतत्त्वे पृ० ९०६) प्रामाणिकनिबन्धकारवचन-बलात् क्वचिद्देशे चतुर्थीकर्मणो विवाहादनन्तरकर्तव्यताया अपि प्रतीतेः "प्रात-र्होमं कृत्वा दिवा विवाहं सम्पाद्य सद्यश्चतुर्थीकर्म च कृत्वा तद्दिन एवावसथ्याधानम्" इत्याधानप्रकरणस्थहरिहरवाक्येनापि (पा० गृ० सू० हरि० कां० १) आपत्काले चतुर्थीकर्मणः सद्यः कर्तव्यताया अभ्यनुज्ञातत्वाच्च विवाहदिनेऽपि अनुष्ठानं परित्यागापेक्षया समुचितमिति।

१३—विवाहे वधूपठनीयमन्त्रविचारः

विवाहे दर्शादौ च ये मन्त्राः वध्वा पठनीयास्ते सर्वेऽपि पूर्वं तया गुरुमुखा-त्सस्वरमध्येतव्या एव। अधीतानामेव मन्त्राणां यागीयापूर्वजनकत्वस्य पूर्वतन्त्रे सिद्धान्तितत्वात्। अतश्च ये मन्त्राः स्त्रीमात्रपठनीयास्तेषां पूर्वमध्ययनमावश्यकम्। इदं च "तस्या यावदुक्तम्" (६।१।२४) इति पूर्वतन्त्रे षष्ठाध्याये व्यवस्थापितम्।

१४—दिवा विवाहविचारः

आपस्तम्बगृह्यसूत्रे चतुर्थखण्डे विवाहप्रकरणमुपक्रम्य पञ्चमखण्डे अश्मारोहण-सप्तपद्यादीनभिधाय लाजहोमान् जयादींश्च विधायानन्तरं वधूवरौ तेनैवाग्निना साकं तस्मिन्नेव अश्वाभ्यामनडुद्भ्यां वा युक्तं रथमारुह्य वरगृहं गच्छेतामित्यभिहितम्। अनन्तरं षष्ठखण्डे मध्येमार्गं नदीवाप्यादीनां प्राप्तौ तत्तरणे विशेषधर्मांश्चाभिधाय, वरः स्वगृहं प्राप्य "गृहानुचरया सङ्काशयति" इत्यनेन वध्वै (स्वभार्यायै) "सङ्का-शयामि" इत्यनया ऋचा स्वगृहं दर्शयेदिति विधायानन्तरं गृहं प्रविश्य तत्र लोहितं वास आस्तीर्य वधूं दक्षिणेन पदा गृहान् प्रपादयन् वध्वामन्वारब्धायां "आगन् गोष्ठम्" इत्यादित्रयोदशाहुतीर्हुत्वा पूर्वमास्तीर्णे वस्त्रे उपविशतो वरो वधूश्चेत्यभिधायानन्तर-मिदं सूत्रम् - "अथास्याः पुंसोर्जीवपुत्रायाः पुत्रमङ्क उत्तरत उपविश्य तस्मै फलान्युत्तरेण यजुषा प्रदायोत्तरे जपित्वा वाचं यच्छत आनक्षत्रेभ्यः" इति प्रवृत्तम्। अनन्तरम्— "उदितेषु नक्षत्रेषु प्राचीमुदीचीं वा दिशमुपनिष्क्रम्योत्तराभ्यां यथा लिङ्गध्रुव-मरुन्धतीञ्च दर्शयति" इति सूत्रम्।

अत्र प्रथमसूत्रे विवाहदिन एव "वाचं यच्छत आनक्षत्रेभ्यः" नक्षत्रोदयपर्यन्तं वधूवराभ्यां वाग्यमः कार्य इत्यभिहितत्वात्, द्वितीयसूत्रे "उदितेषु नक्षत्रेषु" इत्य-भिधानाच्च विवाहो दिवा कर्तव्य इति स्पष्टमवगम्यते।

एवं पारस्करगृह्यसूत्रेऽपि विवाहदिने वरो वधूं "तच्चक्षुः" इति मन्त्रेण सूर्यमुदी-क्षयेदिति विधिरस्ति--"अथैनां सूर्यमुदीक्षयति तच्चक्षुः" इति। एवम्--"अस्तमिते ध्रुवं दर्शयति" इत्यपि विधिर्वर्तते। अनयोस्सूत्रयोः दिवा विवाहपक्ष एव सङ्गतिः स्यात्।

विवाहदिने घटीस्थापनमेवं विहितं नारदेन—

ताम्रपात्रे जलैः पूर्णे मृत्पात्रे वाऽथ वा शुभे।
मण्डलार्धोदयं वीक्ष्य रवेस्तत्र विनिक्षिपेत्॥ इति।

अनेनापि प्रमाणेन दिवा विवाहः स्पष्ट एवेति।

१५—विवाहे मधुपर्कविचारः

विवाहे वरदात्रोरेकशाखत्वे मधुपर्कविषये न विवादः। भिन्नशाखत्वे तु यजमानशाखयैव मधुपर्कः कर्तव्य इति जयन्तप्रभृतयः। अस्यैव पक्षस्य सर्वदेशेषु भूयान् प्रचारः। युक्तं चैतत्। अत्र यजमानकर्तृकत्वात् कर्तृशाखयैव कर्मानुष्ठानस्योचितत्वात्।

यः स्वशाखां परित्यज्य परशाखां समाश्रयेत्।
अप्रमाणमृषिं कृत्वा सोऽन्धे तमसि मज्जति॥

इति परशाखया कर्मानुष्ठाने दोषश्रवणात्। शाखान्तरेणानुष्ठाने तच्छाखीयमन्त्राणां यजमानादिनाऽनध्येयत्वदशायामेतदर्थमध्ययनकल्पनागौरवापत्तेः। अत्र—

स्वशाखी चेद्वरो न स्यात्कस्मै देया सुकन्यका।
स्वगृह्योक्तविधानेन दद्यादपरशाखिने॥
पूजयेन्मधुपर्केण स्वशाखाविधिना वरम्।
आकन्यादानपर्यन्तं पिता कुर्यात्स्वशाखया॥

इति गदाधरमिश्रकृतटीकाधृतवचनान्यत्रानुकूलानि। परन्तु केचिद् ग्रन्थकाराः पक्षमिमं निषिध्य वरशाखयैव मधुपर्कं लिखन्ति, तत्र प्रमाणमपि ददति—

अर्च्यस्य या भवेच्छाखा तच्छाखागृह्यचोदितः।
मधुपर्कः प्रदातव्यो ह्यन्यशाखेऽपि दातरि॥

(आश्व० गृ० सू०)

केचित्तु वचनस्यास्य सोमयागपरत्वं मन्वानास्तत्रैवार्च्यशाखया मधुपर्कः। अन्यत्र तु यजमानशाखया, तुलादान-जलाशयोत्सर्गादौ तु विकल्प इति वदन्ति। यथोचितमत्र ग्राह्यमिति। अद्यत्वे तु अर्च्यस्य यच्छाखीयं कर्म तच्छाखया मधुपर्कं कुर्वन्ति यायजूकाः।

"तत्तद्गृह्योक्तविधिना विष्टराद्यर्हणं ततः।"

इति जगन्नाथकारिकावचनात्। तद्युक्तमयुक्तं वेति विचारणीयम्। नारायणभट्टादयस्तु "अयुक्तम्" इत्याहुः। यतः मधुपर्कार्हेषु स्नातकराजमातुलादिषु कर्माभावेन एतस्यासंभवात् क्वचिदधीयमानशाखायाः क्वचिच्च कर्मसवन्या ग्रहणे वैरूप्यापत्तेः। तेन सर्वत्रैकरूपेण अधीयमानशाखयैव मधुपर्कः, "ऋत्विजो वृत्वा मधुपर्कमाहरेत्" इत्याश्वलायनसूत्रात्।

संपूज्य मधुपर्केण ऋत्विजः कर्म कारयेत्।
अपूज्य कारयन् कर्म किल्बिषेणैव युज्यते॥

इति विश्वप्रयोगचिन्तामणिधृतविश्वामित्रवचनाच्च । सोमयागातिरिक्त-स्थलेऽपि मधुपर्को वैकल्पिक इति ।

१६—विवाहे पठनीयमन्त्रेषु स्वरविचारः

विवाहे ये मन्त्राः स्वशाखीयास्ते सस्वरा एव पठनीयाः । ये मन्त्राः सौत्रास्तेषां मध्ये ये शाखान्तरादागतास्तेषां तत्तच्छाखातः स्वरान् ज्ञात्वा ते सस्वरा एव पठनीयाः । येषां तु सर्वथा मूलं नोपलभ्यते स्वराश्च नावगम्यन्ते तेषां परमैक-स्वर्येण पाठो, न तु सर्वेषाम् । एवं यज्ञेऽपि याज्याः पुरोऽनुवाक्याः प्रैषः निवित् सामिधेन्यः सूक्तवाकः इत्येवमादीन् वर्जयित्वा अन्ये करणमन्त्रा अपि "इषे त्वा" इत्यादयः सर्वेऽपि सस्वरं पठनीयाः । एवं यत्र जुहोतिचोदना तत्र सर्वत्रापि होमाङ्गभूतानां मन्त्राणां सस्वरमेव पाठः । एवं न्यास-पूजा-जपाभिषेकादावपि सस्वरमेव पाठः कर्तव्यः । न चात्र न्यासादौ हस्तस्य व्यापृतत्वात् कथं स्वरः पठितुं शक्यत इति केषाञ्चिद् भ्रमो युक्तः । स्वरो हि कण्ठेन प्रकाश्यः । कण्ठेनो-च्यमानस्य स्वरस्य हस्तः सूचकः परम्, न तु हस्तेनैव स्वरः पठ्यते । अतएव हस्तस्य कार्यान्तरव्यापृतत्वेऽपि मुखेन अक्षरैः साकं पूर्वोक्तेषु कर्मसु स्वराः पठनीया एव निषिद्धवर्जम् । "एकश्रुति दूरात्सम्बुद्धौ यज्ञकर्मणि" इति तु प्रतिषेधो याज्याप्रैषादिपरक एव । अतएव "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा" इत्यग्नि-होत्रहोमाङ्गभूतो मन्त्रः जातवेदस इति वपायागाङ्गभूतो मन्त्रश्च करणभूतोऽपि सस्वर एव पठ्यते ।

अतश्च ये नाम अन्धपरम्परामनुसरन्तो न्यासहोमादिषु व्यापृतेन हस्तेन स्वरस्य प्रदर्शयितुमशक्यत्वात् स्वरोच्चारणमपि परित्यक्तव्यं मन्यन्ते, अतएव च कारणात् स्वरं विना एतादृशानां कार्याणां प्रचलितत्वात् अनधीतवेदा अपि अपरिज्ञातस्वरा अपि पुस्तकं हस्तेनादाय केवलं पुस्तकवाचनमात्रेणैव कर्माण्यनुष्ठा-पयन्ति तादृशानां कर्मणां यथाविध्यनुष्ठानाभावात् न केवलमभिलषितफला-प्राप्तिः, किन्तु निन्दितकरणात् विपरीतफलप्राप्तिरपि यजमानाचार्ययोर्भवेत् । अतो ये नाम कर्मानुतिष्ठन्ति आचार्यीभूयानुष्ठापयन्ति वा तैः पूर्वं तत्तदुपयुक्तान् मन्त्रान् सस्वरं गुरुमुखादधीत्य, अनन्तरं कर्मानुष्ठाने आचार्यत्वेन प्रयतितव्यम् । मन्त्राश्च सस्वरं तेषु तेषु कर्मसु पठनीया इति ।

१७—विवाहे ऋषिच्छन्दोदेवताविनियोगादीनामुच्चारणविचारः

विवाहकाले ऋषिच्छन्दोदेवताविनियोगादीनां ज्ञानमेव आवश्यकम्, न प्रयोग-मध्ये उच्चारणम् । एवं सौत्रमन्त्राणां च ऋष्याद्यपेक्षा नास्तीति बहवः । होम-मन्त्राणामृष्यादिज्ञानमावश्यकमिति संस्कारदीपके ।

१८—विवाहे अभिषेकविचारः

विवाहमध्ये वरकर्तृकवधूमूर्धाभिषेकाङ्गकः "आपः शिवाः" इत्यादिको मन्त्रो वरेणैव

पठनीयः। यद्यपि विशेषेण सूत्रकारैरेवं न स्वकण्ठत उक्तं तथापि विवाह-प्रकरणपठितानां मन्त्राणां वधू-वरान्यतरपाठ्यत्वमेव सर्वसूत्रकारसम्मतम्। भाष्य-कारैरपि तथैव भाषितं पद्धतिकारैश्च तथैवोक्तम्। प्रकृतमन्त्रविषयेऽपि—"आपः शिवाः" इत्यादिमन्त्रेण वरो मूर्द्धन्यभिषिञ्चति इत्येव कर्कादिभिरुक्तम्।

लाजहोमे मन्त्रत्रयं सूर्यस्यावेक्षणे सकृत्।
भगाय चैकमंत्रश्च कन्या पठति पञ्चकम्॥
ध्रुवदर्शनकाले च षष्ठश्चैव उदाहृतः।
कन्यावस्त्रपरीधाने तथा चैवोत्तरीयके॥
तथा समीक्षाकालेऽपि चतुर्निष्क्रमणे गृहात्।
अश्मन्यारोहणे चैव हस्तग्राहे तथैव च॥
सप्तपद्यां तथा चैव वरमूर्द्ध्न्यभिषेचने।
हृदयालंभने चैव तथैव चाभिमंत्रणे॥
दृढपुरुषे क्रमेणैव एतान्मन्त्रान् वरः पठेत्॥

इति रेणुदीक्षितोऽपि। तथापि सर्वोऽयं विषयोऽधीतब्राह्मणविषयः नानधीतब्राह्मणस्य क्षत्रियवैश्ययोश्च विषयः, सामर्थ्यात्। अद्यत्वे प्रायः क्षत्रियादीनामध्ययनाभावात्। यदि दैवान्मानुषाद्वा प्रतिवलात् अनुपनीतयोः क्षत्रियवैश्ययोर्विवाहो भवेत्, तत्र विवाहे तु सुतरां मन्त्रपाठेऽनधिकारात् मन्त्राणामृत्विजामपि पाठो भवितुमर्हति। अतोऽनुपनीतत्वात् अनधीतत्वात् शिष्टसमाचाराच्च।

विवाहे यो विधिः प्रोक्तो मन्त्रा दाम्पत्यवाचकाः।
परन्तु तान् जपेत् सर्वान् ऋत्विग्राजन्यवैश्ययोः॥

इति गृह्यासङ्ग्रहवचनबलाच्च-वैवाहिकानां मन्त्राणामृत्विजाऽपि पाठकरण-प्रतीतेः प्रकृतस्याप्यभिषेकमन्त्रस्य वरातिरिक्तेन ऋत्विजादिनापि पाठे न कमपि दोषं पश्याम इति।

१६—विवाहानन्तरमेकवर्षपर्यन्तं त्याज्यविषयाणां विचारः

विवाहानन्तरमेकवर्षपर्यन्तं पिण्डदानं मृदा स्नानं तिलतर्पणं तीर्थयात्रां मुण्डनं प्रेतानुगमनं चेत्यादि न कार्यम्। कार्ष्णाजिनिः—

विवाहव्रतचूडासु वर्षमर्धं तदर्धकम्।
पिण्डदानं मृदा स्नानं न कुर्यात्तिलतर्पणम्॥ इति।

एवं निषेधे प्राप्ते क्वचित्तस्यापवादो हेमाद्रौ—

महालये गयाश्राद्धे मातापित्रोः क्षयेऽहनि ।
कृतोद्वाहोऽपि कुर्वीत पिण्डनिर्वपणं सदा ॥ इति ।

अत्र महालये पिण्डदानं श्रुतं तथापि विवाहाब्दे महालयं शिष्टा नानुतिष्ठन्ति, सर्वदेशेष्वयमेवाचारः । महालये क्षयाहेऽपि पिण्डदानं केचनानुतिष्ठन्ति, तत्राचार एव मूलम् । गयाश्राद्धे प्रतिप्रसवः प्रासङ्गिकगयायात्रापरः । तादर्थ्येन गमनस्य विवाहाब्दे निषेधात् ।

२०—सिंहस्थे गुरौ गुरु-शुक्रमौढ्यादौ च विवाहादिविचारः

यस्मिन् वर्षे गुरुः सिंहराशिगतो भवति तस्मिन् वर्षे विवाहादिशुभकर्माणि कर्तव्यानि नवेति जिज्ञासायां मत्स्यः—

सिंहस्थिते सुरगुरावधिमासके च
ज्येष्ठे तथाद्यतनयस्य तु शुक्रगुर्वोः ।
मौढ्ये तथा स्थविरबालकयोश्च कुर्या-
ज्जनस्थिते सुरगुरौ नहि मङ्गलानि ॥ इति ।

गर्गः—गुरौ सिंहस्थिते चैव सूर्ये च धनुषि स्थिते ।
विवाहमपि नेच्छन्ति मुनयः काश्यपादयः ॥ इति ।

नारदः—गुरौ तु सिंहराशिस्थे भागे भाग्यवती भवेत् ।
पैत्रे यमर्क्षे सा नारी विवाहे विधवा भवेत् ॥ इति ।

एतत्सर्वं नर्मदोत्तरविषयम् । तथाह व्यासः—

नर्मदोत्तरदेशे तु सिंहस्थे देवमन्त्रिणि ।
विवाहं नैव कुर्वीत निषेधो नास्ति दक्षिणे ॥ इति ।

श्रीधरीये—नर्मदोत्तरभागेषु सिंहस्थेऽमरपूजिते ।
विवाहादि न कुर्वीत नायं दोषोऽस्ति दक्षिणे ॥
सिंहराशौ सिंहराशौ यावत्तिष्ठति वाक्पतिः ।
नर्मदायाम्यकोणेषु न दोषो दक्षिणापथे ॥ इति ।

अर्णवे—अन्नप्राशं न वैवाहं पुंसो जन्मर्क्ष एव च ।
जन्ममासे च वर्ज्यं स्यान्नर्मदातीर उत्तरे ॥
नर्मदादक्षिणे भागे विवाहादिषु मङ्गलम् ।
जन्ममासे शुभं प्रोक्तं बहूनां सम्मतन्त्विदम् ॥ इति ।

व्यासः—अन्नप्राशनमातिथ्यं विवाहं वास्तुकर्म च ।
रात्रावहनि वा कुर्याच्छेषाप्यहनि कारयेत् ॥
आषाढः प्रोष्ठपन्माघौ मार्गशीर्षस्तथैव च ।
चत्वारो दूषिता मासा वर्णसंस्कारकर्मणि ॥

विवाहं मौञ्जीबन्धनम् ।

माघफाल्गुनवैशाखज्येष्ठमासाश्शुभावहाः ।
मध्यमः कार्तिको मार्गशीर्षको निन्दिताः परे ॥
न कदाचिद् ऋषर्क्षेषु भानोरार्द्राप्रवेशनात् ।
पौषचैत्रौ शुभौ गार्ग्यो नेति प्राह बृहस्पतिः ॥
श्रावणं केचिदिच्छन्ति नेच्छन्त्यन्ये महर्षयः ।
कन्याकुम्भकुलीरस्थे रवौ दौरं विवर्जयेत् ॥
आषाढादिचतुर्मासान् चान्द्रान् पौषञ्च वर्जयेत् ।
सार्वकालिकमिच्छन्ति विवाहं गौतमादयः ॥ इति ।

आपस्तम्बः—

सर्वर्तवो विवाहस्य शैशिरौ मासौ परिहाप्योत्तमञ्च नैदाघमिति ।

शैशिरौ—माघफाल्गुनौ । निदाघस्य ग्रीष्मस्य । यश्चोत्तमः अन्त्यः आषाढः तानेतान् त्रीन्मासान् परिहाप्य वर्जयित्वा सर्वर्तवो विवाहस्य काल इत्यर्थः ।

बालभूषायाम्— निन्द्यो मघास्थः सर्वत्र विशेषाद् गौडगुर्जरे ।
कलिङ्गवङ्गमगधे सिंहे सिंहांशगो गुरुः ॥ इति ।

मुहूर्त्तचिन्तामणिकारः—

मघादिपञ्चपादेषु गुरुः सर्वत्र निन्दितः ।
गङ्गागोदान्तरं हित्वा शेषांघ्रिषु न दोषकृत् ॥
मेषेऽर्के शुभ उद्वाहो वङ्गे गोदान्तरेऽपि च ।
सर्वसिंहगुरुर्वर्ज्यः कलिङ्गे गौडगुर्जरे ॥ इति ।

एभिः प्रमाणैरिदं सिद्धम्—सिंहस्थे गुरौ नर्मदातो दक्षिणवासिभिः विवाहादिकं कर्तुं शक्यते, उत्तरवासिभिश्च सर्वैरेव न कर्तुं शक्यते, आपस्तम्बगौतमादिभिस्तथा विधानात् । अतश्च तत्तद्देशाचारभेदेन स्मृतीनामपि कल्पसूत्राधिकरणे पूर्वपक्षानुसारेण व्यवस्थितप्रामाण्यमङ्गीकृत्य विवाहादिशुभकर्माण्यनुष्ठेयानीति सिद्धम् । यद्यपि कल्पसूत्राधिकरणे ईदृशं प्रामाण्यं स्मृतीनामाचाराणाञ्च न

सिद्धान्तितम्, तथापि मीमांसकसरणितो याज्ञिकानां वैदिकानाञ्च सरणिस्तत्र तत्र किञ्चिन्नैवोपलभ्यत इति देशभेदेन स्मृतीनामाचाराणाञ्च प्रामाण्यव्यवस्था स्वीकार्या इति ।

२१—चतुर्थीकर्मणि कुशकण्डिकाविचारः

विवाहे कुशकण्डिकाकरणपूर्वकमग्निस्थापनं कृत्वा विवाहहोमोऽनुष्ठीयते, पुनः कुशकण्डिकानुष्ठान विना चतुर्थीकर्महोमो न कर्तुं शक्यते। कुशकण्डिका-करणस्य अग्निसंस्काररूपत्वेन यत्कर्मोद्देशेन ये संस्कारास्तस्मिन्नग्नावनुष्ठितास्तत्कर्म-समाप्त्यनन्तरमेव तेषामपि संस्काराणां नाशात् पुनः कर्मान्तरानुष्ठानार्थं कुश-कण्डिकान्तरमवश्यानुष्ठेयमेव। "अपवृत्तकर्मा लौकिकोऽर्थसंयोगात्" (का. श्रौ. सू. १. ३. २८) इति शास्त्रेण विवाहे जाते तस्याग्नेर्लौकिकत्वेन वैवाहिकेऽग्नौ चतुर्थीकर्मणो विहितत्वेऽपि सद्यश्चतुर्थीकर्मानुष्ठानपक्षे चतुर्थीकर्मार्थं पुनस्तत्र कुशकण्डिकाकरणमित्येव पक्षो मुख्यः। अथवा—"पशुः समानतन्त्रः स्यादिति बौधायनोऽब्रवीत्" इति बौधायनेन प्रायश्चित्तपशोरग्नीषोमीयपशुसमानतन्त्रता-बोधनात् माध्यन्दिनादिभिः सर्वैरपि तत्पक्षस्य स्वीकारात् अत्रापि कुशकाण्डिकां विनैव विवाहहोमेन समानतन्त्रतास्वीकारात् चतुर्थीकर्महोमानुष्ठानम्। विवाहाग्नौ चतुर्थी-कर्मानुष्ठानं तु सूत्रान्तरात्, "तमेवाग्निमुपसमाधाय" (पा० गृ. सू० १।१०) इति कुशकण्डिकां विनापि स्वसूत्राच्च प्राप्नोत्येवेति।

२२—विवाहे कुशकण्डिकाविचारः

विवाहादिषु कर्मसु कुशकण्डिकाकरणपूर्वकम् अग्निस्थापनं कृत्वा विवाहादि-होमेऽनुष्ठिते सति पुनः कुशकण्डिकानुष्ठानं विना होमादि कर्तुं न शक्यते। कुशकण्डिकाकरणस्याग्निसंस्काररूपत्वेन यत्कर्मोद्देशेन ये संस्कारास्तस्मिन्नग्नावनु-ष्ठितास्तादृशकर्मसमाप्त्यनन्तरमेव तेषामपि संस्काराणां नाशात्पुनः कर्मान्तरानुष्ठा-नार्थं कुशकण्डिकान्तरमवश्यमनुष्ठेयमेवेति।

२३—विवाहकाले वरवध्वोरुभयोर्ललाटे पट्टिका (सेवरा) काचन निबद्धव्या, इयमपि रीतिः स्पष्टतोऽस्मत्सूत्रकारेणानुक्ताऽपि आश्वलायनगृह्यपरिशिष्टे पट्टिकाबन्धन-स्योक्तत्वात् 'अनुक्तमन्यतो ग्राह्यम्' इति न्यायेनास्माभिरपि तदेव पट्टिकाबन्धनं पुष्पेण वस्त्रेण पत्रादिना वा कार्यत इति।

२४—वैवाहिकवेद्याश्चतुर्षु कोणेषु चतुरः कुम्भान् निक्षिप्य तत्सविधे चतुरः शङ्कून् निखाय शङ्कून् कलशांश्च सूत्रेणावेष्ट्य कुम्भमध्ये शरेषीकाश्चतस्रः स्थाप-यित्वा इषीकाणां चत्वार्यग्राणि एकीकृत्य यथा च बन्धनमग्नेरुपर्यागच्छेत्तथा रक्त-सूत्रेणाऽऽबध्य लाजहोमः कर्तव्यः। विधिरयं सूत्रकारैरनुक्तोऽपि मरुदेशीयाचारप्राप्तः प्राचीनपरम्पराऽऽदृतश्च। विवाहे मण्डपस्य विहितत्वात् मुख्यस्य तस्य सम्पादनासम्भवे गौणमिदं मण्डपकरणमिति प्रतीयते। अतो मण्डपकरणस्थानीयमिदं कर्म। एतस्यैव

कुम्भचतुष्टय-कोणचतुष्टयादि-सम्बन्धनात् चतुरिका चौरी)- करणमित्यपि कथयन्ति मरुदेशीयाः ।

२५—लाजहोमे कन्यायाः कर्तृत्वम्, 'आयुष्मानस्तु मे पतिः' (पा० गृ० सू० १।६) इति मन्त्रलिङ्गात् । 'ताञ्जुहोति सठं० हतेन तिष्ठती' (पा० गृ० सू० १।६) इति सूत्राच्च ।

२६—सप्तपदीप्रक्रमणे सप्ताक्षतपुञ्जान् विनिक्षिप्य तदुपरि त्वया पदं निक्षेप्तव्यमिति यदुपदेशमात्रेणोच्यते कन्यां प्रति तदसाधु । अत्र वरः कन्याया दक्षिणं पादं गृहीत्वा सप्तसु स्थानेषु निक्षिपेत् इत्येव सूत्रकाराशयः प्रतीयते । एवमेवाश्मारोहणेऽपि । न चैवं शङ्कनीयं पादस्पर्शेऽपि दोष इति, शास्त्रविहिते कर्मणि दोषलेशस्य सम्भावयितुमशक्यत्वात् । एवमेव दाक्षिणात्यानामाचारोऽपि ।

२७—वर-कन्ययोरुभयोर्मातामहगोत्रस्यैक्येऽपि परस्परं सपिण्डताऽभावे विवाहो भवितुमर्हति । सपिण्डतायां सत्यां यदि वरमातामहात्पञ्चमान्तर्वर्तिनी कन्या स्यात्तर्हि सा विवाह्या न भवतीति ।

२८—विवाहमध्ये नान्दीश्राद्धानन्तरमाशौचप्राप्तौ वधूवरयोः तन्मातापित्रोश्च विवाहसमाप्तिं यावत् दानप्रतिग्रहकालपर्यन्तमाशौचं नास्ति इतरेषां तु भवत्येव ।

२९—नान्दीश्राद्धात्पूर्वमपि विवाहार्थं सम्भारेषु सम्भृतेषु आशौचागमने प्रायश्चित्तं कृत्वा साङ्गं विवाहकर्म अनुष्ठेयम् । प्रायश्चित्तं तु—

अनारब्धविशुद्ध्यर्थं कूष्माण्डैर्जुहुयाद् घृतम् ।
गां दद्यात्पञ्चगव्याशी ततः शुद्ध्यति सूतकी ॥

इति विष्णूक्तं बोध्यम् ।

३०—विवाहे आशौचेऽपि स्वस्तिवाचनादि ग्रहयज्ञादिकं च सर्वं भवति ।

३१—विवाहे आशौचादिसम्भावनायां पूर्वसङ्कल्पितान्नस्य उभयपक्षीयैरन्यैरपि भोजने न दोषः । परं परिवेषणमसगोत्रैः कर्तव्यम् ।

३२—आशौचादिसम्भावनायां विवाहे नान्दीश्राद्धं दशभ्यो दिनेभ्यः पूर्वमनुष्ठातुं शक्यते, कृते नान्दीश्राद्धे आशौचं न भवति ।

३३—विवाहमध्ये विवाहाङ्गहोमादिकाले कन्याया रजोदर्शने तां कन्यां स्नापयित्वा 'युञ्जान' (शु. य. ११. १) इति मन्त्रेण होमं कृत्वाऽवशिष्टं कर्म कुर्यात् ।

यज्ञपार्श्वे—विवाहे वितते तन्त्रे होमकाल उपस्थिते ।
कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः ॥
स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि ।
युञ्जानामाहुतिं हुत्वा ततस्तन्त्रं प्रवर्तयेत् ॥ इति ।

३४—एवं वधूवरयोर्मातुः रजोदर्शनादिसम्भावनायां नान्दीश्राद्धमपकृष्य

दशभ्योऽह्रोभ्यः पूर्वमनुष्ठेयम्। अकृते नान्दीश्राद्धे रजोदर्शने श्रीशान्तिं कृत्वा विवाहः। एवं वरवध्वोर्मातरि सूतिकायामपि श्रीशान्त्या शुद्धिः।

३५ एकस्मिन् वत्सरे विवाहानन्तरं षण्मासाभ्यन्तरे चौलोपनयने न कर्तव्ये, चौलोपनयनानन्तरं विवाहः कर्तुं शक्यते।

३६—एकस्मिन् वत्सरे सोदरयोर्विवाहादि न शोभनम्, सङ्कटे तु कर्तव्यम्। वर्षभेदे तु न दोषः।

३७—एवमेककाले द्विशोभनं नेष्टम्। तत्रापि पुत्रीविवाहात्परं पुत्रविवाहो भवति। पुत्रोद्वाहानन्तरं पुत्रीविवाहस्तु ऋतुत्रये न शोभनः।

३८—पुत्रीद्वयपरिणयस्तु एककालेऽपि शास्त्रानुमतः, परं न सह। किन्तु एकस्या वैवाहिकं कृत्यं समाप्य। अतो दिनचतुष्टयमध्ये न कुर्यात्, अनन्तरं कुर्यादिति।

३९- कन्यादाने पिता, पितामहः, भ्राता, मातामहः, मातुलः, सकुल्यः, जननी इति क्रमः। अत्र पूर्वपूर्वाभावे उत्तर उत्तरोऽधिकारीति।

४०—ज्येष्ठे भ्रातरि अकृतविवाहे कनिष्ठस्य न विवाहः, एवं कन्याया अपि। कृते तु कृच्छ्रातिकृच्छ्रौ प्रायश्चित्तम्।

४१—वाग्दानानन्तरं कुलद्वयेऽपि कस्यचिद्विनाशे तेन वरेण साकं तस्या विवाहो न कर्तव्यः। सङ्कटे तु वरवध्वोर्मातृमरणे संवत्सरं यावदविवाहः। भ्रातृपुत्रमरणे सार्द्धमासम्, सपिण्डान्तरमृते मासम्, तदनन्तरं विनायकशान्तिं गोदानं च कृत्वा विवाहः।

४२– विवाहात्प्राक् कन्याया रजोदर्शने ऋतून् गणयित्वा तावतीर्गा दद्यात्। कस्यैचित्कुमार्यै सरत्नभूषणं च दद्यात्। कन्या च दिनत्रयमुपोषयेत्। उपवासप्रत्याम्नायं वा कारयेत्।

४३ – वरकन्ययोः चतुःपुरुषपर्यन्तं कस्यचिन्मृतौ न विवाहः। सङ्कटे तु अनुमासिकान्यपकृष्य वृद्धिश्राद्धानुष्ठानपूर्वकं विवाहः।

४४—अनाथकन्यादाने द्विगुणं फलं भवति। अनाथां कन्यां धर्मार्थं सदृशाय वरायात्मीयद्रव्यव्ययेन यो दद्यात्तस्यापि कन्यादानद्विगुणं फलं भवति।

अनाथां कन्यकां दृष्ट्वा यो दद्यात्सदृशे वरे।
द्विगुणं फलमाप्नोति कन्यादाने यदीरितम्॥

इति संस्काररत्नमालाधृतं वचनम्। एवमनाथपुरुषविवाहेऽपि फलमुक्तम्।

४५—परकीयां कन्यां तत्पित्रोः सुवर्णं दत्वाऽऽत्मीयां कृत्वा असगोत्रोऽपि धर्मार्थं दातुं प्रभवति।

४६– कन्याया वैधव्ययोगे कुम्भविवाहः सौवर्णविष्णुप्रतिमादानं वा विधिना कृत्वा विवाहः कार्यः।

४७– तृतीयभार्याविवाहः शास्त्रे निषिद्धः। अतोऽर्कविवाहं कृत्वा तृतीयभार्योद्वाहः कर्तव्यः।

४८—पुत्रस्य प्रथमविवाहे नान्दीश्राद्धं पिता कुर्यात् । द्वितीयादिविवाहे तु वर एव स्वयं कुर्यात् ।

४९—नान्दीश्राद्धे पित्रादिजीवने मात्रादिजीवने मातामहादिजीवने वा पितरं पितामहं वा परित्यज्य ततः परेभ्यः पितामहादिभ्यः प्रपितामहादिभ्यो दद्यात् । एवं पितामहीप्रमातामहादिजीवनेऽपि "येभ्य एव पिता दद्यात्" इति न्यायात् । "जीवेत्तु यदि वर्गाद्यः" इति वचनं तु तीर्थ-गया-महालयादिपरं न नान्दीश्राद्धविषयम् । एवं शान्तिक-पौष्टिकादिकर्मस्वपि येभ्य एवेति न्यायस्यैवानुसरणं नान्दीश्राद्धे ।

५०—विधवाकर्तृकनान्दीश्राद्धे श्वश्रूप्रभृति तिस्रः स्वभर्तृप्रभृति त्रयः स्वपितृप्रभृति त्रय इति नव देवताः ।

"अपुत्रा पुत्रवत्पत्नी पितृकर्म समाचरेत् ।"

इति वचनात् ।"स्वभर्तृप्रभृति त्रिभ्यः" इति वचनं षड्दैवतदर्शादिश्राद्धपरम् । "चत्वारः पार्वणाः" इति तु महालयपार्वणपरम् । श्राद्धमयूखे विस्तरेणैतदुक्तं ततोऽवगन्तव्यम् ।

५१—पितुरभावे नान्दीश्राद्धकर्त्ता वरवध्वोरेव पित्रादीनां श्राद्धं कुर्यान्न स्वपित्रादीनाम् ।

५२—विवाहे मधुपर्को यजमानशाखयेति बहवः ।

५३—विवाहे अग्निस्थापनकुशकण्डिकादिविधिर्वरशाखया भवति ।

५४—विवाहे मण्डपनिर्माणं संस्कारकस्य पित्रादेर्हस्तेनैव न तु कन्याया हस्तेन ।

५५—विवाहे कौतुकागारम्—

"दक्षिणस्यां पराग्भागे कल्पयेन्मण्डपान्तिके ।
विवाहे कौतुकागारं पत्नीशालां तथाऽध्वरे ॥"
"यज्ञोत्सवविवाहादौ विधायादौ च मण्डपम् ।
धर्मदिक्पश्चिमे कुर्यात्कौतुकागारमण्डपम् ॥"

५६—विवाहे ग्रहयज्ञो मण्डपस्थापनदिनात्पूर्वं दशसु दिनेषु यस्मिन् कस्मिंश्चिद्दिने कर्तुं शक्यते ।

५७—विवाहे प्रधानद्वयं कन्यादानं पाणिग्रहणं च । आद्यं कन्यापितरं प्रति । द्वितीयं वरं प्रति ।

५८—विवाहात्पूर्वं ज्ञातिभोजनमुक्तं वैखानसगृह्ये (३।२)—

"कन्यां वरयित्वा पश्चादेषु कुलस्य परिशुद्ध्यै सपिण्डैः श्रोत्रियैः सह भुञ्जीत यस्मात्स पूतो भवतीति विज्ञायते ॥"

५९—विवाहे वृद्धपरम्परागता ग्रामधर्मा देशधर्माः कुलधर्माश्च कर्तव्याः—

"अथ खलूच्चावचा ग्रामधर्मा जनपदधर्माः कुलधर्माश्च तान्विवाहे प्रतीयात् ।"

(आश्व० गृ० सू०)

"आवृताश्चाऽऽस्त्रीभ्यः प्रतीयेरन्" (आप० गृ० सू०)
"देशजातिकुलधर्माश्चाम्नायैरविरुद्धाः" (गौ० ध० सू०)
"आचारिकाणि कर्माणि कुर्यात्" (लौ० गृ० सू०)

६०—देशान्तरे विवाहे नान्दीश्राद्धं तत्रैव गत्वा कार्यं न गृहे। इदं च साङ्गविवाहस्य देशान्तरे करणपक्षे बोध्यम्।

६१—कन्यागृहे बान्धवैः सह गमनं वैखानसगृह्ये (३।२) उक्तम्—
"कन्यागृहं बान्धवैः सह गत्वा" इति।

६२—विवाहे वाद्यं वेदघोषं गीतकं च कुर्यात्। मात्स्ये—

मङ्गलानि च वाद्यानि ब्रह्मघोषं च गीतकम्।
ऋद्ध्यर्थं कारयेद्विद्वानमङ्गलविनाशनम्॥

६३ विवाहे नर्तनमपि अविधवाभिः स्त्रीभिर्मात्रादिभिः कार्यम्। अथवा सौशील्यादिगुणयुक्तः कश्चन पुरुषोऽपि नृत्यं कुर्यादित्युक्तं भारद्वाजगृह्ये (२२.१)।

६४—विवाहादौ कर्माङ्गत्वेन पाठ्यमानानां मन्त्राणां प्रतिपदादावनध्यायो नास्ति। अनध्यायविधेरध्ययनमात्रोद्देशेन प्रवृत्तत्वात्। तथा चापस्तम्बः (प. १ सू० ४०)—

"स्वाध्यायेऽनध्यायो मन्त्राणां न कर्मण्यर्थान्तरत्वात्"

६५—विवाहादौ दर्शपूर्णमासादिषु च सर्वत्र शुक्लयाजुषैः प्रतिमन्त्रमादावोङ्कारोच्चारणं क्रियते, अन्यशाखीयैस्तु न क्रियते। तत्र "नोङ्कुर्याद्धोममन्त्राणां पृथगादिषु कुत्रचित्" इत्यादिना गोभिलवचनेन द्वितीयपक्ष एव शास्त्रानुमत इति प्रतीयते।

६६—वैवाहिकोऽग्निरेव स्मार्ताग्निरिति शाखान्तरीयाणामाश्वलायनादीनां पक्षः। अस्माकं माध्यन्दिनीयानां तु "आवसथ्याधानं दारकाले" (पा. गृ. सू० १. २) इत्यादिविधिना स्थापितोऽग्निर्गृह्याग्निः।

६७—गान्धर्वादिविवाहेषु अग्निसाक्षिकभार्यात्वाय होमादिः सप्तपद्यन्तो विधिः कार्यो न दानम्।

६८—विवाहे अष्टपञ्चाशदाहुतयः सूत्रकारेण विहितास्तासां सर्वासां प्राधान्यमेवेति भाष्यादिनाऽवगम्यते।

६९—द्वितीयविवाहे, सीमन्तादिसंस्कारेषु च सर्वत्र स्मार्ताग्नेरपि लौकिकाग्नावेव सर्वं कर्मानुष्ठेयं न तु स्मार्तेऽग्नौ।

७०—विवाहे कुशकण्डिकाकरणात्पूर्वमेकम्, लाजहोमसमकाले त्रीणि, ततः समाचाराच्चतुर्थमिति पञ्चैव प्रदक्षिणानि न तु सप्त। सप्तानां प्रदक्षिणानां केनापि प्रमाणेनाप्राप्तत्वात्।

७१—"यद्यग्निस्थापनानन्तरं कर्मकाले वृष्ट्यादिशङ्कया संस्कृतोऽग्निरन्यत्र नीयते तदा पुनर्भूसंस्कारः कर्तव्यः" (गो० गृ० भाष्ये १. १. १०)।

७२—विवाहे मण्डपः षोडशहस्तः। तत्र ग्रह--योगिनी--क्षेत्रपाल--वास्तु-वेद्यादिरचनमपि कर्तुं शक्यते। एवं नव-पञ्चैककुण्डीपक्षोऽपि यथायथं कर्तुं शक्यते। कुण्डेषु होमो ग्रहाणामेव। वैवाहिको होमस्तु मध्यवेद्यामेव। मध्यवेदिः श्रीधरी अपि भवति, तन्निर्माणप्रकारः अस्मदीयविवाहपद्धतौ टिप्पण्यामुक्तः।

७३—विवाहादिस्मार्तकर्मसु सर्वत्र होमस्यैवोपदेशात् प्रक्षेपान्त एव त्यागः समुचितः प्रक्षेपकाले वा। न तु त्यागोत्तरं प्रक्षेपः। अनेककर्तृकहोमे तु प्रत्याहुति त्यागस्याशक्यत्वाद्देवताभिध्यानकाले एव सकृत्तन्त्रेणैव त्यागः कार्यः। अत एव हरिहरादिपद्धतिषु सर्वत्र प्रक्षेपं निर्दिश्य त्यागोल्लेखो दृश्यते।

७४—विवाहाङ्गवरवृतौ, कन्यादाने, कन्यादानसाङ्गतायां च यथाशक्ति सुवर्णादिदानमावश्यकम्। कन्यादानानन्तरं सति विभवे अन्यदपि भूषणवस्त्रग्रामादिदानमैच्छिकम्। कन्यापाणिग्रहणनिमित्तं वरपित्रा यत् कन्यापितुः सकाशाद् बलाद् द्रव्यं गृह्यते तत्तु न शास्त्रसिद्धम्।

७५—"मण्डपाद् बहिरैशान्यां वेदिं चैवाग्निहेतवे।"

इति मण्डपाद् बहिर्वेदिकरणं नेदानीं प्रचलति।

"कलौ सङ्कोचतः कुर्याद् बहिर्वेदि न मण्डलात्।"

इति वचनात्। कलौ मण्डलाद् बहिः कुर्यान्न मण्डपादिति तदर्थः।

७६—कर्मकाले मूषक-पल्ली-सरट-वायस-सच्छूद्रादि-मार्जारपुच्छस्पर्शे स्नानम्, दर्शने त्वाचमनम्, मार्जारस्यान्याङ्गसंस्पर्शे आचमनम्, चाण्डाल-रजस्वला-शूद्रादिसम्भाषणेऽशुचिदर्शनेऽपि स्नानम्, तद्दर्शने त्रिराचमनम्, स्त्रीशूद्राणाममन्त्रकं प्राणायामः। तथा चोक्तम्—

स्त्रियो वृद्धाश्च बालाश्च मक्षिका मशकादयः।
मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः॥

(७७) वरवृतौ कन्यादाने कन्यादानसाङ्गतायां च यथाशक्ति हिरण्यादि वराय देयम्। विवाहानन्तरमपि वरकन्याभ्यां वस्त्र-पात्र-भूषण-ग्रामादि यथेष्टं दातुं शक्यते। एतदतिरिक्तस्थले विवाहे दानस्यावश्यकता नास्ति।

आचारिकाणि द्रव्याणि वस्त्राण्याभरणानि च।
मणि-मुक्ता-प्रवालानि यथाशक्ति प्रदीयते॥
गो-भू-हिरण्यमश्वांश्च वस्त्राणि विविधानि च।
अन्यानि चैव दानानि यथाविभवमर्पयेत्॥

(७८) विवाहादौ नान्दीश्राद्धेऽनुष्ठिते तदीयमातृविसर्जनं (मण्डपोत्थानं) यावत् अन्यसंस्कारनिमित्तं नान्दीश्राद्धं न भवति। पुत्रजन्मादिनिमित्तं तु मण्डपोत्थापनात्पूर्वमपि भवत्येव। मातृविसर्जनानन्तरं तु भवत्येव।

एवं च एकस्मिन् आभ्युदयिके कृते षण्मासं यावत् अपरमाभ्युदयिकं नानुष्ठेय-मिति भ्रमो हेयः।

७९—एवमाभ्युदयिकानन्तरं मातृविसर्जनं यावत् बलिवैश्वदेवोऽपि पितृ-यज्ञवर्जितं कार्यः। अपसव्यं श्राद्धं नित्यश्राद्धं भस्मादिधारणं तिलतर्पणं च न कार्यम्। नित्यतर्पणं तु कार्यमेवेति। स्वाध्यायोऽपि सङ्क्षेपेण कार्यः ।

८०—विवाहे स्पर्शास्पर्शदोषो न भवति—

तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे।
नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति॥

८१—विवाहे भस्म गोपीचन्दनं वा न धार्यम्।

ज्योतिर्निबन्धे—अभ्यङ्गे सूतके चैव विवाहे पुत्रजन्मनि।
माङ्गल्येषु च सर्वेषु न धार्यं गोपिचन्दनम्॥

८२—विवाहे रजकधौतवस्त्रादिधारणं न निषिद्धम्।

८३—विवाहमध्ये उपोषणमुद्यापनादि च न कार्यम्। ज्योतिर्निबन्धे—

व्रतस्योद्यापनं नैव नैव कुर्यादुपोषणम्।
जीर्णभाण्डादि न त्याज्यं गृहसंमार्जनं तथा॥

८४—विवाहे छिक्कायां न दोषः—

आसने शयने दाने भोजने वस्त्रसंग्रहे।
विवादे च विवाहे च क्षुतं सप्तसु शोभनम्॥

८५—विवाहे पूर्णाहुतिर्न भवति—

विवाहे व्रतबन्धे च शालायां वास्तुकर्मणि।
गर्भाधानादिसंस्कारे पूर्णाहुतिं न कारयेत्॥

८६—विवाहफलं देवपितृऋणापाकरणम्।

८७—अन्तर्जातिविवाहो न शास्त्रीयसम्प्रदायसिद्धः।

८८—स्वशाखी चेद्वरो न स्यात् कस्मै देया तु कन्यका।
स्वगृह्योक्तविधानेन दद्यात्तां परशाखिने॥

इति वचनात् परशाखिनेऽपि कन्या दातुं शक्यते।

८९—विकलाङ्गानां षण्ढादीनां च विवाहः शास्त्रसम्मतः। तत्र—

"कन्यास्वीकरणादन्यत्सर्वं विप्रेण कारयेत्।" इति विधिः।

९०—अत्र वरस्यापठितत्वे वरस्य मन्त्रपाठानुवाचनमाचार्येण कार्यम्। अनु-वाचनस्य चादृष्टार्थत्वादवसानं विना यथा वाचनं स्यात्तथा कार्यम्। सर्वथैवमु-च्चारणाशक्तौ यथाशक्ति वाचयीत। "यथाशक्ति वाचयन् सन्धिकृतं वर्णविकारं नान्यथा कुर्यात्" इति स्मृतिकौस्तुभे।

६१—प्रवसितस्य द्वादशाब्दादूर्ध्वमनागतस्य कृतौर्ध्वदेहिकस्य जीवतः पुनर्गृहे समागतस्य गार्हस्थ्यं चिकीर्षतो जनस्य गर्भाधानादयो विवाहान्ताः संस्काराः पुनरनुष्ठेया इति विधिः। तत्र विवाहे "ममौर्ध्वदेहिकजनितानिष्टदोषनिर्वहणपूर्वकं पुनर्गृहस्थाश्रमसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं तामेव स्त्रियमुद्वहिष्ये" इति सङ्कल्पः।

नात्र पित्रादिकर्तृकं कन्यादानादि, किन्तु होममारभ्य चतुर्थीकर्मान्तं भवति। स्त्र्यन्तरपरिणये तु सर्वं प्रथमविवाहवदेव भवति।

६२—विवाहे केचन होमात्पूर्वं गर्भाधानादीन् पञ्चदश संस्कारानग्नेः कुर्वन्ति। तत्र पञ्चदशसंस्कारसिद्ध्यर्थं पञ्चदशकृत्वः प्रणवं पठेत् इत्येकः पक्षः।

अथवा "अग्नेर्गर्भाधानादिपञ्चदश संस्कारान् करिष्ये" इति सङ्कल्प्य आज्यस्थाल्यामाज्यं निरूप्य अधिश्रित्य स्रुक्स्रुवं प्रतप्य सम्मृज्याभ्युदय पुनः प्रतप्य दक्षिणतो निदध्यात्। आज्यमुद्वास्य उत्पूय अवेद्य उपयमनकुशान् वामहस्ते कृत्वा स्रुवेण स्रुचि चतुर्गृहीतं गृहीत्वा दक्षिणं जान्वाच्य विवाहे वह्नेः गर्भाधानसंस्कारं करोमि स्वाहा ॥ १ ॥ इति हुत्वा एवं पुनः पुनः पूर्ववद् चतुर्दशवारमाज्यं गृहीत्वा चतुर्दश आहुतीर्जुहुयात्। तत्र मन्त्राः—विवाहवह्नेः पुंसवनसंस्कारं करोमि स्वाहा ॥ २ ॥ सीमन्तसंस्कारं करोमि स्वाहा ॥ ३ ॥ जातकर्मसंस्कारं करोमि स्वाहा ॥ ४ ॥ नामकरणसंस्कारं करोमि स्वाहा ॥ ५ ॥ निष्क्रमणसंस्कारं करोमि स्वाहा ॥ ६ ॥ अन्नप्राशनसंस्कारं करोमि स्वाहा ॥ ७ ॥ चौलसंस्कारं करोमि स्वाहा ॥ ८ ॥ उपनयनसंस्कारं करोमि स्वाहा ॥ ९ ॥ वेदारम्भसंस्कारं करोमि स्वाहा ॥ १० ॥ वेदव्रतचतुष्टयसंस्कारं करोमि स्वाहा ॥ ११ ॥ केशान्तसंस्कारं करोमि स्वाहा ॥१२॥ समावर्तनसंस्कारं करोमि स्वाहा ॥ १३ ॥ विवाहसंस्कारं करोमि स्वाहा ॥ १४ ॥ चतुर्थीकर्मसंस्कारं करोमि स्वाहा ॥ १५ ॥ इति। (संस्काराणां क्रम-संख्यादिविषये मतभेदा उपलभ्यन्ते। तत्र स्वपरम्परागता व्यवस्था ग्राह्या।)

६३—अरणिपक्षे विशेषः। आदौ पञ्चभूसंस्कारसंस्कृतायां वेद्यां हिरण्यं निधाय वेदिं वस्त्रेणाच्छाद्य पीठे अधरारणिम्, उत्तरारणिम्, मन्थम्, प्रमन्थम्, ओविलीं च निधाय. वरः—"··· गोत्रः शर्मा अस्मिन् विवाहकर्मणि विवाहसाधनभूतस्याग्नेर्योनि—रूपयोररण्योः पूजनं करिष्ये" इति सङ्कल्प्य "श्रीश्च ते" (शु० य० ३१।२२) इति "योनिरूपाभ्यां अरणिभ्यां नमः" इति षोडशभिरुपचारैः सम्पूज्य उत्तरारणित ईशानकोणस्थं शङ्कुं निष्कास्य प्रमन्थमूले दृढीकृत्य अग्न्यायतनस्य पश्चिमतः प्राग्ग्रीवमुत्तरलोम कृष्णाजिनमास्तीर्य तस्योपरि प्रागग्रामधरारणिं सक्षेत्रां निधाय तदुत्तरत उत्तरारणिं च निधाय मन्थनदेशे मन्थमूलं धृत्वा ओविलीं रज्ज्वा त्रिर्वेष्टयित्वा प्रमन्थं प्राङ्मुखो यजमानो मन्थस्योपरि धारयेत्। ओविलीं च अन्यः कश्चन गृहीत्वा मन्थेत्। यावदग्नेरुत्पत्तिस्तावदग्निसूक्तानि पठेत्। कांस्यादिपात्रे शुष्कगोमयस्य चूर्णं नारिकेलजटां च निधाय उत्पन्नमरणिस्थाग्निं तन्मध्ये प्रक्षिप्य धमन्यादिना मुखेन प्रज्वालयेत्। ततः आचार्याय वरं दद्यात्। "जातस्याग्नेः समृद्ध्यर्थं वरमूल्यमाचार्याय तुभ्यमहं सम्प्रददे"। ततो वेद्या उपरि आच्छादितं वस्त्रमपसार्य "अग्निं दूतम्" (शु० य० २२।१७), इति स्थापयेत् तूष्णीं वा।

६४—कर्मापवर्गे ब्राह्मणभोजनमिति शाङ्खायनसूत्रम्।

"शुचीन्मन्त्रवतः सर्वकृत्येषु भोजयेत्' (आप० ध० २।१४।६) इति वचनात्। "ततो ब्राह्मणभोजनम्" (पा० गृ० सू०) इति सर्वकर्मान्ते ब्राह्मणभोजनविधायकपारस्करादिवचनात्। "ब्राह्मणं तर्पयितवै ब्रूयाद्यज्ञमेवैतत्तर्पयतीति श्रुतेः" (का० श्रौ० सू० ३।८।२७)। "गर्भाधानादिसंस्कारे ब्राह्मणान् भोजयेद्दश" इति विशेषवचनाच्च श्रौतेषु गृह्योक्तेषु स्मार्तेषु दैवेषु पित्र्येषु मानुषेषु च सर्वेषु कर्मसु ब्राह्मणभोजनस्य यथाशक्ति कर्तव्यत्वेन विधिप्रतीतेः तत्तत्कर्माङ्गमेव ब्राह्मणभोजनम्। अतश्च तदवश्यमनुष्ठेयमेव। तदभावे अङ्गवैगुण्यकृतदोषो भवत्येव। परन्तु इतराङ्गवत् अस्याप्यङ्गत्वमेव। अस्य च कालविशेषाभावात् प्रधानसन्निहितकाले करणं न्यायप्राप्तम्। केनचिन्निबन्धेन तदा करणाशक्तौ कालान्तरेऽपि कर्तुं शक्यते, परन्तु अवश्यमनुष्ठेयमिति।

यज्ञोपवीतविषये विशेषविचारः

१—उपनयने आशौचादिसम्भावनायां षड्भ्यो दिनेभ्यः पूर्वं नान्दीश्राद्धमनुष्ठातुं शक्यते, नान्दीश्राद्धानन्तरमाशौचं न भवति। उपनयनारम्भोत्तरमाशौचप्राप्तौ—

कूष्माण्डीभिर्घृतं हुत्वा गां च दद्यात्पयस्विनीम्।
चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेत्॥ इति भवत्येव।

२—आशौचेऽपि नान्दीश्राद्धानन्तरं स्वस्तिवाचनादि ग्रहयज्ञादिकं च सर्वं भवति।

३—नान्दीश्राद्धानन्तरमाशौचेऽपि पूर्वसङ्कल्पितान्नभोजने न दोषः। परं परिवेषणमसगोत्रैः कार्यम्।

४—नान्दीश्राद्धानन्तरमाशौचप्राप्तौ उपनयनकर्तुः सपत्नीकस्य उपनेयस्य चाशौचं न भवति उपनयनसमाप्ति यावत्। इतरेषां तु भवत्येव।

५—वरमातू रजोदर्शनादिसम्भावनायां नान्दीश्राद्धमपकृष्य षडहोभ्यः पूर्वं कुर्यात्, तत उपनयनादि कर्तुं शक्यते। अकृते नान्दीश्राद्धे रजोदर्शने श्रीशान्त्या उपनयनम्। एवमापत्तौ मुहूर्तान्तराद्यलाभे सूतिकादिप्राप्तावपि श्रीशान्त्योपयनम्।

६—एकस्मिन्काले सोदरयोरुपनयनं न शोभनम्। सङ्कटे तु कर्त्तव्यम्। वर्षभेदेऽपि न दोषः।

७—उपनयनात्परं षण्मासं यावत् पिण्डदानं मृदा स्नानं तिलतर्पणादि तीर्थयात्रा प्रेतानुगमनादि च न कार्यम्। महालये क्षयाहे च पिण्डदानं कर्तव्यमेव।

गयाश्राद्धे प्रतिप्रसवः प्रासङ्गिकगयायात्रापरः । महालय-क्षयाहयोरपि पिण्डदानं नानुतिष्ठन्ति केचन, तत्राचार एव मूलम् ।

८—उपनयने चतुष्पुरुषपर्यन्तंमृतौ नोपनयनम् । सङ्कटे तु अनुमासिकान्यपकृष्य वृद्धिश्राद्धानुष्ठानपूर्वकमुपनयनम् ।

९—अनाथब्राह्मणोपनयने महत्फलम् ।

१०—उपनयने नान्दीश्राद्धे पित्रादिजीवने मात्रादिजीवने मातामहादिजीवने वा पितरं पितामहं वा परित्यज्य ततः परेभ्यः पितामहादिभ्यः प्रपितामहादिभ्यः पिण्डं दद्यात् । एवं पितामही-प्रमातामहादिजीवनेऽपि, "येभ्य एव पिता दद्यात्" इति न्यायात् । "जीवेत्तु यदि वर्गाद्यः" इति वचनं तु तीर्थ-गयामहालयादिपरं न तु नान्दीश्राद्धविषयम् । एवं शान्तिक-पौष्टिककर्मस्वपि "येभ्य एव" इति न्यायस्यैवानुसरणं नान्दीश्राद्धे ।

११—पितुरभावे नान्दीश्राद्धकर्त्ता उपनेयस्य पित्रादिभ्य एव दद्यान्न स्वपितृभ्यः ।

१२—उपनयने मण्डपनिर्माणं संस्कारकस्य पित्रादेर्हस्तेनैव, न तु संस्कार्यस्य हस्तेन । अन्यथा मण्डपस्याष्टहस्तत्वेऽतिलघुत्वापत्तेः ।

आचार्यहस्तमानेन मण्डपे निर्मिते शुभे ।
मध्ये वेदी प्रकर्त्तव्या चतुरस्रा समन्ततः ॥

इति ज्योतिर्निबन्धवचनाच्च ।

१३—उपनयने मण्डपपक्षे षोडशहस्तादिर्मण्डपः । तत्र फलभूयस्त्वार्थिना वास्तु-योगिनी-क्षेत्रपालपीठादिः कार्यः । ग्रहहोमार्थं कुण्डं च कर्त्तुं शक्यते, कुण्डानि वा । मध्यभागे वेदिर्हस्तोच्चा । तत्रैवोपनयन-वेदारम्भ-समावर्त्तनहोमार्थं वेद्यो विधेयाः ।

१४—उपनयने ग्रहयज्ञो मण्डपस्थापनदिनात् पूर्वं दशसु दिनेषु यस्मिन् कस्मिन् दिने कर्तुं शक्यते ।

१५—उपनयने प्रधानं सावित्रीवाचनम् । अन्यत्सर्वमङ्गम् ।

१६—उपनयनादौ सर्वत्र शुक्लयाजुषैः प्रतिमन्त्रमादावोङ्कारोच्चारणं क्रियते । अन्यशाखीयैस्तु न क्रियते । तत्र—

"नोङ्कुर्याद्धोममन्त्राणां पृथगादिषु कुत्रचित् ।"

इत्यादिना गोभिलवचनेन द्वितीयपक्ष एव शास्त्रानुमत इति प्रतीयते ।

१७—छन्दोदेवतार्षेयविनियोगादीनां ज्ञानमेव कर्मकाले आवश्यकं न प्रयोगमध्ये उच्चारणम् । एवं सौत्रमन्त्राणां च ऋष्याद्यपेक्षा नास्तीति बहवः । प्रयोगमध्येऽप्युच्चारणमिति च मतम् ।

१८—उपनयनाग्नेस्त्रिरात्रपर्यन्तं संरक्षणं कार्यम् । ततः परं लौकिकेऽग्नौ ब्रह्मचारिणो होम इति सर्वसम्मतः पक्षः । उपनयनाग्निरौपासन इति बौधायनधर्मसूत्रोक्तेर्विवाहपर्यन्तमपि उपनयनाग्निर्धारयितुं शक्यते ।

१६--उपनयन-वेदारम्भ-समावर्तनेषु न पूर्णाहुतिः। समावर्तने भवतीत्यन्ये।

२०—अत्र कुमारस्य मन्त्रपाठानुवाचनमाचार्येण कार्यम्। अनुवाचनस्य चादृष्टार्थत्वादवसानं विना यथावाचनं स्यात्तथा कार्यम्।

सर्वथैवोच्चारणाशक्तौ यथाशक्ति वाचयीत। "यथाशक्ति वाचयन् सन्धिकृतं वर्णविकारं नान्यथा कुर्यात्" इति स्मृतिकौस्तुभादावुक्तम्।

२१--ब्रह्मचारिकर्तृकक्रियाकरणीभूतमन्त्राणां "शन्नो देवी:" (शु० य० ३६।१२) इत्येवमादीनामुपनयनात्प्रागेव शिक्षणं कर्तव्यम्, सूत्रवृत्तिकृदभ्यनुज्ञातत्वात्, पत्न्या यथाऽवेक्षणादिमन्त्राणामिति संस्काररत्नमालायाम्।

२२--ब्राह्मण-क्षत्रिय-वैश्यानामष्टौ, एकादश, द्वादश वर्षाणि उपनयनस्य मुख्यः कालः। ततः षोडश, द्वाविंशतिः, चतुर्विंशतिर्वर्षाणि यावद् गौणः कालः। मुख्यकाले उपनयनाकरणे अनादिष्टं प्रायश्चित्तम्।

२३—पितामहः, भ्राता, पितृव्यः, ज्ञातयः इति वट्वपेक्षया वृद्धा उपनेतारः। विद्वत्पितुरभावेऽन्यो विद्वानुपनेता। "तमसो वा एष तमः प्रविशति यमविद्वानुपनयते" इति श्रुतिः। क्षत्रिय-वैश्ययोस्तु ब्राह्मण एवोपनेता न पित्रादयः।

२४--वटूपनेत्रोरधिकारसिद्ध्ये प्रायश्चित्तम्--

"कृच्छ्रत्रयं चोपनेता त्रीन् कृच्छ्रांश्च वटुश्चरेत्।" इति।

२५—आचार्यस्य गायत्र्युपदेशाधिकारार्थं गायत्रीजपो द्वादशसहस्रं द्वादशाधिकसहस्रं वा। माणवकस्य तु न गायत्रीजपः अविधानात् अनधिकाराच्च।

गुरुर्द्वादशसाहस्रं सावित्रीं प्रजपेत्ततः।
स्वाधिकारार्थमेवास्याः प्रदानार्थं हि तत्स्मृतम्॥

इति गुरोरेव विधेः।

२६—"उपनीत्या सहाथवा" इति वचनात् उपनयनदिन एव उपनयनात्प्राक् चौलकर्म विधातुं शक्यते।

२७—अनापदि ज्येष्ठेऽकृतसंस्कारे कनिष्ठो न संस्कार्यः।

२८—(क) विकलाङ्गानां मूकोन्मत्तजडान्धबधिरषण्ढादीनामुपनयनं द्विजत्वसम्पादनाय कार्यम्। तत्र—

संस्कारमन्त्रहोमादीन् करोत्याचार्य एव तु।
आनीयाग्निसमीपं वा सावित्रीं स्पृश्य वा जपेत्॥

इति विधिर्द्रष्टव्यः।

(ख) मूक-बधिरादौ "को नामाऽसि" इति नामप्रश्नोऽपि नास्ति अयोग्यत्वात्। "न नाम पृच्छति" इति बौधायनोक्तेश्च। अन्यदङ्गजातं यथासम्भवं भवति। वेदाध्ययनेऽधिकारस्तु नास्त्येव।

२९—पुनरुपनयने मेखलाऽजिनवस्त्रादानभिक्षा व्रतवत्।

३०—प्रथमं पुनरुपनयनं चाभक्ष्यभक्षणे समुद्रयात्रादौ प्रायश्चित्तं कृत्वा भवति प्रायश्चित्तार्थम्।

३१—द्वितीयं पुनरुपनयनस्य निमित्तमनध्यायादावुपनीतत्त्वम्।

३२—तृतीयं पुनरुपनयननिमित्तं "नान्यत्र संस्कृतो भृग्वङ्गिरसोऽधीयीत" इति अथर्ववेदार्थं वचनात्। अत्रोभयत्रापि क्वचिदपि ग्रन्थे विशेषानुक्तेरविकृतं पुनरुपनयनं कार्यम्।

३३—प्रायश्चित्तार्थं पुनरुपनयनं तु प्रायश्चित्तं कृत्वा मेखलाजिनवस्त्रभिक्षाव्रत-दण्डनिवृत्तिपूर्वकमनुष्ठेयम्।

३४—प्रायश्चित्तिना कालान्तरेऽपि पुनरुपनयनकरणे तावत्पर्यन्तं सन्ध्याऽनुष्ठेयैव। ब्रह्मयज्ञादिकं तु न भवत्यशुचित्वात्। महापातकिनोऽपि "सम्यक् सन्ध्यामुपासीत" इति स्मृत्या सन्ध्यावन्दनविधिः स्मर्यते।

३५—व्रतेऽह्नि पूर्वसन्ध्यायां वारिदो यदि गर्जति।
तद्दिने स्यादनध्यायो मौञ्जीबन्धं न कारयेत्॥
नान्दीश्राद्धे कृते चेत् स्यादनध्यायस्त्वकालिकः।
मौञ्जीबन्धं तदा कुर्याद्वेदारम्भं न कारयेत्॥

अत्र शान्तिरप्युक्ता नृसिंहप्रसादे—

ब्रह्मौदनविधेः पूर्वं प्रदोषे गर्जितं यदि।
तदा विघ्नकरं ज्ञेयं वटोरध्ययनस्य तत्॥
तस्य शान्तिप्रकारं तु वक्ष्ये शास्त्रानुसारतः।
प्रधानं पायसं साज्यं द्रव्यं शान्तियजौ भवेत्॥
सूक्तं बृहस्पतेर्विद्वान् पठेत् प्रज्ञाविवृद्धये।
गायत्री चैव मन्त्रः स्यात्प्रायश्चित्तं तु सर्पिषा॥
धेनुं सवत्सकां दद्यादाचार्याय पयस्विनीम्।
ब्राह्मणान्भोजयेत्पश्चात्ततो ब्रह्मौदनं चरेत्॥

३६—चत्वारि वेदव्रतानि आह आश्वलायनः—

प्रथमं स्यान्महानाम्नी द्वितीयं स्यान्महाव्रतम्।
तृतीयं स्यादुपनिषद् गोदानाख्यं ततः परम्॥

गोदानस्यैव 'केशान्त' इति संज्ञा। ब्राह्मणस्य त्रयोदशवर्षादारभ्य व्रतानि। क्षत्रियस्योनविंशतिवर्षादारभ्य व्रतानि। वैश्यस्यैकविंशतिवर्षादारभ्य व्रतानि।

केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते।
राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः॥ इति वचनात्।

तैत्तिरीयाणां त्वन्यानि व्रतानि –"प्राजापत्यं सौम्यमाग्नेयं वैश्वदेवम्" इति। कातीयानां परिशिष्टोक्तानि—"आग्नेयं शुक्रियं सावित्रं गोदानम्।" इति। गदाधरभाष्ये तु – षड् व्रतानि कात्यायनानामुक्तानि। एषां व्रतानामेकमेकं संवत्सरमनुष्ठानमुक्तम्। एषां व्रतानामकरणे प्रायश्चित्तमनुष्ठेयम्।

३७ "द्व्यामुष्यायणो गौतम-शाण्डिल्यगोत्रः गौतमाङ्गिरसौतथ्यशाण्डिल्यासितदेवलेति प्रवरस्त्वामभिवादये" इत्येवमभिवादयेत्। एवं विवाहादावपि गोत्रद्वयोच्चारणम्।

३८--उपनयने वपनं नाचरन्ति केचन, तदसाम्प्रतम्। तत्प्रतिनिधित्वेन तस्य प्रायश्चित्तादिकमपि नास्ति।

३९—विवाहानन्तरमुपनयने व्रात्यप्रायश्चित्तमनुष्ठेयम्।

४०—उपनयनाग्नौ वेदारम्भोऽपि तस्मिन्नेवाग्नौ पुनः कुशकण्डिकानुष्ठानं विना न कर्तुं शक्यते। कुशकण्डिकाकरणस्य अग्निसंस्काररूपत्वेन यत्कर्मोद्देशेन ये संस्कारास्तस्मिन्नग्नावनुष्ठितास्तत्कर्मसमाप्त्यनन्तरमेव तेषामपि संस्काराणां नाशात् पुनः कर्मानुष्ठानार्थं कुशकण्डिकान्तरमवश्यमनुष्ठेयमेव। "अपवृत्तकर्मा लौकिकोऽर्थसंयोगात्" (का० श्रौ० सू० १।३।२८) इति शास्त्रेण उपनयने जाते तस्याग्नेर्लौकिकत्वेन पुनस्तत्र कुशकण्डिकाकरणमित्येव पक्षो युक्तः।

अथवा--"पशुः समानतन्त्रः स्यादिति बौधायनोऽब्रवीत्" इति बौधायनेन प्रायश्चित्तपशोरग्नीषोमीयपशुसमानतन्त्रताबोधनात् माध्यन्दिनादिभिः सर्वैरपि तत्पक्षस्य स्वीकारात् अत्रापि कुशकण्डिकां विनैव वेदारम्भहोमः।

समावर्त्तनं तु उपनयनाग्नौ न सम्भवति। उपनयनाग्नेर्वेदग्रहणार्थत्वेन समावर्तनस्य च व्रतविसर्गरूपत्वेन भिन्नविषयत्वात्। कुशकण्डिकान्तरकरणे तु समावर्तनमपि उपनयनाग्नौ भवतीत्यन्ये।

४१—अत्र पि राचार्यत्वे पितुराचार्यस्य न वरणम्। कर्मोपदेशकस्याचार्यस्य उपदेशकाचार्यप्रतिनिधिभूतस्य तु वरणं भवति। अत्रोपनयन-वेदारम्भ समावर्तनकर्मसु आचार्य-ब्रह्मभेदात् षड् ऋत्विजः। आचार्यप्रतिनिधिपक्षे त्रय आचार्यप्रतिनिधय इति नव। एवमेकाचार्यपक्षे आचार्यस्यैकप्रतिनिधिपक्षेऽप्यूह्यम्।

४२--मेखलाबन्धनं माणवकस्य कटिप्रदेशे कर्तव्यम्—

"आचार्यो माणवकस्य कटिप्रदेशे बद्ध्वा" (शा० गृ० सू० २।२।२)
"मेखलामाबध्नन् वाचयेत्" (गो० गृ० सू० २।२०)
"तस्मादेषाऽन्तरा वाससो भवति" (श० प० ब्रा० ३।२।१।११)
"तच्चैतत्सन्नहनं नाभेरधः कटिप्रदेशे कर्त्तव्यम्" (देवया० का० श्रौ० सू० २)
"अस्ति वै पत्न्या अमेध्यं यदावाचीनं नाभेः" (श० प० ब्रा० १)
"स्वलङ्कृतं मेखलया नितम्बे" (भागवत ३।८।२८) इत्यादिवचनेन।

४३—उपनयन-वेदारम्भ-समावर्तनकर्मणां पृथक्करणपक्षे पृथगाभ्युदयिक-

श्राद्धं स्वस्तिवाचनादि च। सहानुष्ठाने तु "गणशः क्रियमाणानाम्" इति वचनात् सकृत्तन्त्रेणानुष्ठानम्।

४४—अकामतो गर्भाधानादिसंस्काराणामननुष्ठितौ एकैकस्य संस्कारस्य लोपे पादकृच्छ्रं चूडाया अर्धकृच्छ्रं प्रायश्चित्तम्। कामतोऽननुष्ठाने तु द्विगुणम्। पादकृच्छ्रप्रत्याम्नाय एका गौः तन्निष्क्रयो वेति। एतत्प्रायश्चित्तमनुष्ठायानादिष्ट-मप्यनुष्ठेयम्।

४५—उपनयनस्य ब्राह्मण क्षत्रिय-विशां क्रमेण अष्टौ, एकादश, द्वादश वर्षाणि मुख्यः कालः। ततः षोडश, द्वाविंशतिः, चतुर्विंशतिर्वर्षाणि गौणः कालः। तत्र मुख्य-कालातिक्रमे गौणकालेऽप्यनादिष्टप्रायश्चित्तं कृत्वोपनयनं भवति। गौणकालातिक्रमे तु व्रात्यस्तोमं कृत्वोपनयनम्। पतितसावित्रीका व्रात्या उच्यन्ते। व्रात्यकर्तृको यज्ञो व्रात्यस्तोमः।

तत्र व्रात्याश्चतुर्विधा भवन्ति। हीनाचाराः, पापाध्यारोपेण जातिबहिष्कृताः, युवावस्थायामेव ज्ञातिबहिष्कृताः, अपगतप्रजननेन्द्रियसामर्थ्या वृद्धव्रात्याः। एतैः शुद्ध्यर्थं क्रियमाणो यज्ञो व्रात्यस्तोमोऽपि चतुर्विधः। एषु द्वितीय उक्थ्यसंस्थः। इतरेऽ-ग्निष्टोमसंस्थाः।

अयं च गणयज्ञः। अतोऽयं नैकेन व्रात्येन कर्तुं शक्यते। व्रात्यस्तोमोऽयं लौकिकेऽग्नौ भवति (का० श्रौ० सू० १।१।१४)। व्रात्यस्तोमयज्ञविधिः कात्यायन-श्रौतसूत्रे (२२।४) द्रष्टव्यः।

अस्य यज्ञस्य पाशुकत्वाद् गणयज्ञत्वाच्च नास्मिन् युगेऽनुष्ठानम्। अतः स्मृत्युक्तेन प्रत्याम्नायेन शुद्धिः सम्पाद्या। प्रत्याम्नायोऽपि गोनिष्क्रयदानमेव प्रत्याम्नायान्तरा-पेक्षया सुकरः। तत्र ब्राह्मणस्य द्वादशाब्दम्, क्षत्रियस्य नवाब्दम्, वैश्यस्य षडब्दम्। एषु क्रमेण ३६०, २७०, १८० गावस्तन्निष्क्रया वा दातव्या भवन्ति।

४६—कलौ उपनयनयोग्यक्षत्रिय-वैश्ययोरभावान्न तयोरुपनयनमिति नागोजि-भट्टप्रभृतयो दाक्षिणात्याः। सर्वेषु देशेषु अयं ब्राह्मणः, अयं क्षत्रियः, अयं वैश्यः, इत्यविगीतव्यवहारस्य जातिनिर्णायकस्य विद्यमानत्वात् स्व-स्वजात्युचितधर्माचरण-रहितानामपि तत्तज्जात्युचितधर्माचरणशीलैः सह भोजनादिव्यवहारस्य दर्शनात् वणिज इत्याद्यनभिचरिताविगीतव्यवहाराच्च अगरवालाः सर्वेऽपि तृतीयवर्णाः प्रायेणोपनयनादिसंस्कारभाजः शिष्टैः परिगृहीता भवन्ति। अतः सर्वेऽपि प्रायश्चित्ते कृते उपनयनार्हा भवन्ति। तत्र त्रिपुरुषं पतितसावित्रीका एवोपनयनार्हा न तु दश-विंशतिपुरुषपर्यन्तमस्मर्यमाणोपनयना अपीति केचन दाक्षिणात्याः।

४७—बहुकालतोऽस्मर्यमाणोपनयनानामपि क्षत्रिय-वैश्यानामुपनयनार्हत्वं प्राय-श्चित्तेन निष्कण्टकमिति सर्वे।

४८—कासुचित् उपनयनपद्धतिषु "उपनयन-वेदारम्भ-समावर्तनकर्माणि एक-तन्त्रेण करिष्ये" इति सङ्कल्पो लिखितः, यच्च कैश्चित्तदनुसारेण त्रयाणां समान-तन्त्रेणैव सङ्कल्पः क्रियते, तन्न युक्तम्, त्रयाणां तेषामेकैकप्रयोगपरिसमाप्त्यनन्तरमेव अपरस्यानुष्ठेयत्वेन एकप्रयोगपरिगृहीतत्वाभावात्। एकप्रयोगपरिगृहीतानामेव च

कालकर्त्राद्यैक्ये तथाऽनुष्ठानस्य शास्त्रे सिद्धान्तितत्वात् । अतोऽत्र पृथक् पृथगेव सङ्कल्पः कार्यो न तु सर्वादौ पृथक् सकृत्, पृथक् पृथग्वा। स्वस्तिवाचनादिषु तु एकस्मिन् दिने कर्तव्येषु आवृत्त्यभावात् सर्वादौ सर्वोद्देशेन "करिष्यमाणसर्वकर्माङ्गत्वेन स्वस्तिपुण्याहवाचनादीनि करिष्ये" इत्येव युक्तम् । "तन्त्रं च अनेकेषां प्रधानानामेकदाऽनुष्ठाने प्राप्ते पूर्वाङ्गानामुत्तराङ्गानां च सर्वोद्देशेन सकृदनुष्ठानम्" ।

चूडाकरणविषये विशेषविचारः

१—चौलकर्मणि गणपतिपूजनं पुण्याहवाचनं मातृपूजनमाभ्युदयिकं सति सम्भवे ग्रहयज्ञश्च भवति । एतच्च पूर्वदिने चौलदिने एव वा भवति ।

२—आभ्युदयिकश्राद्धं चौलात्पूर्वं त्रिभ्योऽहोभ्यः पूर्वमनुष्ठातुं शक्यते ।

३—सोदराणां युगपच्चौलसंस्कारो न कार्यः ।

४—असोदराणां युगपच्चौलादिकरणे मातृपूजनं नान्दीश्राद्धादि च सकृदेव कार्यम् ।

५—चौलकर्म प्रथमे तृतीये पञ्चमे सप्तमे वाऽष्टमे वर्षे भवति। "सहोपनयनेन वा" इत्याश्वलायनवचनादुपनयनेन सहाप्यस्यानुष्ठानम् ।

६—चूडाकर्मानन्तरं मासत्रयपर्यन्तं पिण्डदानं तिलतर्पणादि च न कार्यम् ।

७—चूडाकर्म पित्रा कार्यम् , तदभावेऽन्येनापि ।

८—पितुरभावे कुमारपितरमारभ्य श्राद्धादि कार्यं न स्वपितरमारभ्य ।

९—पित्रादिजीवने पितामहादिमारभ्य श्राद्धं कार्यम् ।

"जीवेत्तु यदि वर्गाद्यस्तं वर्गं तु परित्यजेत् ।"

इति तु गयाश्राद्धे प्रवर्तते न नान्दीश्राद्धे इति रुद्रकल्पद्रुमादौ स्पष्टमस्मच्छाखिनं प्रति ।

१०—विधवाकर्तृके नान्दीश्राद्धे "अपुत्रा पुत्रवत्पत्नी भर्तुः श्राद्धं समाचरेत्" इति वचनात् पत्यादयः श्वश्र्वादयः पित्रादयश्च देवताः ।

११—चौलकर्मणि शिखाधारणं कार्यम् । अस्य कर्मणः शिखाधारणसंस्कारत्वात् । शिखाच्छेदनं तु न कुत्रापि विहितम् । "गर्भकेशा न धारणीयाः" इत्यपि जनप्रवादो निर्मूल एव ।

१२—कन्यायाश्चौलकर्मणि सर्वं तूष्णीं मन्त्रवर्जं भवति ।

"हुतकृत्यं तु पुंवत् स्यात्स्त्रीणां चूडाकृतावपि ।"

इति वचनात् होमः समन्त्रको भवति । केवलं प्रधानकृत्यममन्त्रकं भवति । अन्यत्सर्वमङ्गकृत्यं गणपतिपूजादि नान्दीश्राद्धान्तं समन्त्रकमेवेति ।

१३—स्त्रीणां शिखाधारणं न भवति—

शिखायज्ञोपवीतं च कुशा मौनं तथैव च।
वेदाध्ययनभैक्ष्ये च स्त्रीशूद्रपतनानि षट्॥

इति धर्मप्रवृत्तौ निषेधात्।

१४—"शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः।"

इति वचनाच्छूद्रस्यापि चूडाकरणं भवति।

१५—कुमारस्य ज्वराद्युत्पत्तौ चूडाकरणादि निषिद्धम्।

१६—"गर्भाद्यसंस्कृतस्यापि कर्तव्यं चोपनायनम्।
प्रायश्चित्तं तु पूर्वेषां नौपनायनिकस्य च॥
श्रौतस्मार्ताधिकारी स्यान्नौपनायनिकं विना।"
"एतेष्वेकैकलोपे तु पादकृच्छ्रं समाचरेत्।"
"चूडाया अर्धकृच्छ्रं स्यादापदीत्येवमीरितम्।
अनापदि तु सर्वत्र द्विगुणं द्विगुणं चरेत्॥"

१७—सूनोर्मातरि गर्भिण्यां प्रथममासादूर्ध्वं चूडाकर्म न कार्यम्। उपनयनेन सह चूडाकरणे तु गर्भिण्यामपि चूडाकर्म कर्तुं शक्यते। कुमारस्य पञ्चमवर्षादूर्ध्वं तु गर्भिण्यामपि मातरि न चूडाकर्मनिषेधः।

१८—कुमारस्य मातरि रजस्वलायां न चौलं भवति। नान्दीश्राद्धानन्तरं रजस्वलायां तु श्रीशान्तिं गोदानं च कृत्वा कार्यम्। सङ्कटे तु नान्दीश्राद्धाकरणेऽपि शान्त्या कार्यम्।

१९—मातुलपितृव्यादौ कर्तरि तत्पत्न्यां रजस्वलायामपि मङ्गलं नेति सिन्धुः।

२०—चतुष्पुरुषमध्ये षण्मासमध्ये उपनयनविवाहोत्तरं चूडाकर्म न कार्यम्। अब्दभेदे तु कार्यम्।

२१—चूडाकर्मानन्तरमपि महालये गयायां वार्षिके च पिण्डदानादि कार्यम्। साम्प्रतं नानुतिष्ठन्ति प्रायस्तत्र मूलं मृग्यम्।

२२—चौले पूर्णाहुतिर्नास्ति। अग्निमुखं पितृशाखया भवति।

२३—साग्नेरप्येतत्कर्म लौकिकेऽग्नौ भवति न गृह्येऽग्नौ। बहिःशालाया विधानसामर्थ्यात्। विना वचनमग्निः स्वायतनाद् बहिर्न नेतुं शक्यते।

२४—मुहूर्तवशादनध्यायेऽपि क्रियमाणे चौलेऽनध्यायदोषो मन्त्रपाठे न भवति।

शिलान्यासविषये विशेषविचारः

१—नूतनगृहादिनिर्माणारम्भे सविधि प्राथमिकशिलानिवेशः शिलान्यासः।

२—जीर्णोद्धारे काष्ठतृणादिनिर्मिते चलमण्डपादौ च न शिलान्यासः। तत्र काष्ठमयस्तम्भनिवेश एव शिलानिवेशस्थानीयः। तथा च निर्णयसिन्धौ—

आयव्ययौ मासशुद्धिं तृणागारे न चिन्तयेत्।
शिलान्यासादि नो कुर्यात्तथाऽऽगारपुरातने॥ इति।

विष्णुधर्मोत्तरे (खं० ३, अ० ९४)—

"मृन्मये चेष्टकान्यासः कर्तव्यो न च दारवे।" इति।

३—कूपाद्यारम्भेऽपि भूमिपूजनमात्रम्, न शिलान्यासः। शिलान्यासस्य प्रासादगृहयोरेव विधानात्।

४—शिलामये प्रासादादौ शिलामय्य इष्टकाः, इष्टकामये मृन्मये च इष्टकामय्य एव शिलाः।

शिलान्यासः प्रकर्तव्यः प्रासादे तु शिलामये।
इष्टकानां तु विन्यासः प्रासादे चेष्टकामये॥

इति विश्वकर्मप्रकाशवचनात्।

"प्रासादे तु शिलाः शैले इष्टका इष्टकामये।" (अग्नि. अ. ९२)
"मृन्मये चेष्टकान्यासः" इति पूर्वोक्तवचनाच्च।

५—इष्टकालक्षणं च—

एकवर्णाः सुपक्काश्च बहुजीर्णास्तु वर्जिताः।
अप्यङ्गारान्विताः नेष्टाः कृष्णवर्णाः सशर्कराः॥
भग्नाश्च विभ्रमैर्हीना वर्जनीयाः प्रयत्नतः।
सुप्रमाणा रक्तवर्णाश्चतुरस्रा मनोरमाः॥

६—शिलाश्च ब्राह्मणस्य एकविंशत्यङ्गुलदीर्घास्तदर्धविस्तारा विस्तारार्धोच्छ्राया-श्चतुरस्राः, क्षत्रियस्य सप्तदशाङ्गुलदीर्घास्तदर्धविस्तारास्तदर्धोच्छ्रायाः, वैश्यस्य त्रयोदशाङ्गुलदीर्घास्तदर्धविस्तृता विस्तारार्धोच्छ्रिताः, शूद्रस्य नवाङ्गुलदीर्घास्तदर्धविस्तारा-स्तदर्धोच्छ्रायाश्चतुरस्राः कार्याः। तथा च विश्वकर्मप्रकाशे—

शिलाप्रमाणं क्रमशः प्रदिष्टं वर्णानुपूर्व्येण तथाऽङ्गुलानाम्।
अथैकविंशद् घन-विश्व-नन्दा विस्तारके व्यासमितं तदर्धम्॥
तदर्धमानं त्वथ पिण्डिका स्यात् ऊर्ध्वाधिका न्यूनतरा न कार्या॥

विश्वकर्मप्रकाशे—"प्रासादादौ विधानेन न्यस्तव्याः सुमनोहराः ।
चतुरस्राः समाः कृत्वा समन्ताद्धस्तसन्निभाः ॥
आग्नेये—"अष्टाङ्गुलोच्छ्रिताः शस्ताश्चतुरस्राः करायताः ।"
"पाषाणानां शिलाः कार्या इष्टकानां तदर्धतः ।"
तत्रैव—"करप्रमाणा श्रेष्ठा स्याच्छिलाऽप्यथ शिलामये ।"
मुहूर्तसिन्धौ—देवाम्बुगेहे परितो जिनाङ्गुष्ठाः षडुन्नताः ।
विस्तारेऽर्काङ्गुलाः केचिल्लिङ्गेऽम्बुनि विरिक्तकाः ॥

७—इष्टकाश्च नव पञ्च चतस्रो वा कार्याः ।

आग्नेये—नन्दा भद्रा जया पूर्णा अजिता चापराजिता ।
विजया मङ्गलाख्या च धरणी नवमी शिला ॥ इति ।
आग्नेये—शिलापञ्चकपक्षेऽपि मनागुद्दिश्यते यथा ।
नन्दा भद्रा जया रिक्ता पूर्णाख्या पञ्चमी मता ॥ इति ।
विश्वकर्मप्रकाशेऽपि—गृह्यकोणेषु सर्वेषु पूजां कृत्वा विधानतः ।
ईशानमादितः कृत्वा प्रादक्षिण्येन विन्यसेत् ।
नन्दाभद्राजयारिक्तापूर्णानाम्नीर्यथाक्रमम् ॥
विष्णुधर्मोत्तरे—शिलान्यासं तु कुर्वीत तत्रैवाह्नि चतुर्दिशम् ।
नन्दा भद्रा जया पूर्णाश्चतस्रो हि शिलाः शुभाः ॥
विश्वकर्मप्रकाशे च—यो विधिर्गृहनिर्माणे शिलान्यासस्य कर्मणि ।
प्रासादादिषु स ज्ञेयश्चतस्रस्तु शिलास्तथा ।
नन्दाभद्राजयापूर्णा आग्नेयादिषु विन्यसेत् ॥

८—शिलान्यास आग्नेयादिषु कोणेषु प्रादक्षिण्येन कार्य इत्येकः पक्षः । तथाऽऽह ब्रह्मशम्भौ—

सूत्रभित्तिशिलान्यासं स्तम्भस्यारोपणं तथा ।
पूर्वदक्षिणयोर्मध्ये कुर्यादित्याह काश्यपः ॥
कुण्डग्रन्थेषु—स्तम्भोच्छ्राये शिलान्यासे सूत्रयोजनकीलके ।
खननावटसंस्कारे प्रारम्भो वह्निगोचरः ॥
वास्तुराजवल्लभे—"दक्षिणपूर्वविभागे पूजनपूर्वं शिलाः समाः स्थाप्याः ।"
समराङ्गणसूत्रधारे—"आग्नेय्यामादितो नन्दां स्थापयेत् क्रमशः शिलाम् ।"
विश्वकर्मप्रकाशे—"नन्दाभद्राजयापूर्णा आग्नेयादिषु विन्यसेत् ।"

गृह्यकारिकायाम्—"आग्नेयादिषु कोणेषु मन्त्रैरेतैः शिलां न्यसेत् ।"

वराहसंहितायाम्—"दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत् प्रथमाम्" ।

ब्रह्मशम्भौ—सूत्रं भित्तिं शिलान्यासं स्तम्भस्यारोपणं तथा ।
पूर्वदक्षिणयोर्मध्ये कुर्यादित्याह काश्यपः ॥

शार्ङ्गधरः—प्रासादेषु च हर्म्येषु गृहेष्वन्येषु सर्वदा ।
आग्नेय्यां प्रथमं स्तम्भं स्थापयेत्तद्विधानतः ॥

ईशानमादितः कृत्वा शिलान्यास इति द्वितीयः पक्षः । गर्गः—
"ऐशानमादितः कृत्वा प्रादक्षिण्येन विन्यसेत् ।"

विश्वकर्मप्रकाशे—ईशानमादितः कृत्वा प्रादक्षिण्येन विन्यसेत् ॥
नन्दाभद्राजयारिक्तापूर्णानाम्नीर्यथाक्रमम् ।
गृहकोणेषु सर्वेषु पूजां कृत्वा विधानतः ॥

शान्तिरत्ने—"तत ईशानदिग्भागे साक्षतं रत्नपञ्चकम् ।" इत्यादि ।

विष्णुधर्मोत्तरे—"मध्ये शैलमयं कुम्भं शङ्कुं च स्थापयेत्ततः ।
ऐशाने च ततः कोणे शिलां पूर्वं प्रतिष्ठयेत् ॥
(द्वि. वि. अ. २६)

तत्रैव (अ. ६४) प्रासादप्रकरणे—
ऐशाने च ततः कोणे शिलां पूर्वं प्रतिष्ठिताम् ।
प्रदक्षिणं ततो राजन् शिलान्यासो विधीयते ॥

हरिभक्तिविलासे—"निश्चित्य मध्यमैशान्यां गर्तं कृत्वाऽर्पयेच्छिलाम् ।"

वैखानसतन्त्रे—गृहवास्तोर्देववास्तोरीशाने विधिरिष्यते ।
ब्राह्मणे वैष्णवैश्चापि विशेषफलहेतवे ॥

वासुदेवसंहितायाम्—"अथेशदिशमारभ्य शिलान्यासं समाचरेत् ।"

पञ्चरात्रागमे—"प्रासादब्रह्मभूभागे न्यसेत्तत्र महाशिलाम् ।"
ब्रह्मभूभाग ऐशानकोणः ।

वीरमित्रोदये—"ऐशाने च तथा कोणे शिलां पूर्वं प्रतिष्ठयेत् ।"

अत्रोक्तवाक्यनिचयेन परस्परनिरपेक्षेण आग्नेयेशानान्यतरकोणोपक्रमः शिलान्यासः प्राप्नोति । सति चैवमेकार्थत्वाद् विकल्प इति बहवः ।
"ऐशानादग्निकोणाद्वा शिलाः स्थाप्याः प्रदक्षिणाः ।"

इति प्रासादमण्डनेऽपि विकल्प एवोक्तः । गृहे शिलान्यास ईशानोपक्रमः, प्रासादे तु आग्नेयोपक्रमः इति विश्वकर्मप्रकाशव्यवस्था । वचनानि प्रागुक्तानि ।

अथेशदिशमारभ्य शिलान्यासं समाचरेत् ।
सर्वेष्वपि हि वर्णेषु ब्राह्मणेषु विशेषतः ॥
ब्राह्मणैर्वैष्णवैश्चापि विशेषफलहेतवे ॥

इत्यादिवचनबलात् ब्राह्मणकर्तृके ईशानादिक्रमः । क्षत्रियादौ तु—

"वास्तु चैशानतो विप्रे क्षत्रादावग्नितो न्यसेत् ।"

इति वचनबलादाग्नेयादिक्रम इत्यपि केषाञ्चिद् व्यवस्था । गृहे प्रासादे वा सर्वत्राग्नेयादिक्रम एवेति प्रामाणिकसम्प्रदायः ।

९—सम्पूज्य कलशान् पञ्च क्रमेण निजनामभिः ।
निरुन्धीत विधानेन न्यासो मध्यशिलाक्रमात् ॥

पञ्चशिलापक्षे मध्योपक्रमपक्षे मध्ये प्रथमां शिलां न्यस्य तत आग्नेयादिक्रमेण शिलां न्यसेत् इत्युक्तं तत्रैव (अ० ६४) ।

शिलापञ्चकपक्षे तु मनागुद्दिश्यते यथा ।
मध्ये पूर्णशिलान्यासः सुभद्रकलशेऽर्द्धतः ॥
पश्चादिषु च नन्दाद्याः कोणेष्वग्न्यादिषु क्रमात् ।

अनेन पञ्चशिलापक्षे मध्योपक्रमे पूर्णादिक्रमेणैव शिलान्यास इत्यपि प्रतीयते । चतुःशिलापक्षे तु नन्दादिक्रमेणैव शिलास्थापनम् ।

उपशिलाश्च शिलासमसङ्ख्या एव कार्याः, न तु एकस्यामुपशिलायां महत्यां सर्वासां शिलानां स्थापनम् । उपशिलानां प्रासादपादस्थानीयत्वात् पादानां चैकत्र न्यासस्यासम्भवात् । तदुक्तमाग्नेये(६२ अ०) -

शिलाः प्रासादलिङ्गस्य पादा धर्मादिसंज्ञकाः ।
अष्टाङ्गुलोच्छ्रिताः शस्ताश्चतुरस्राः करायताः ॥

एतेनोपशिलाप्रमाणमपि सिद्ध्यति ।

नन्दादिशिलानां स्थापनार्थं किञ्चित्तदधिकप्रमाणाः शिलामया आधारविशेषा उपशिला इत्युच्यन्ते ।

१०—उपशिलासु मध्ये कुम्भनिधानार्थमेकैको गर्तोऽपि कारयितव्यः—

ध्रुवे शिलायास्तु ततः खनित्वा कुम्भं प्रतिष्ठाप्य शराङ्गुलीयम् ।
विप्रादिवर्णानुगतः प्रशस्तस्तदर्धमानं तु तदर्धमानम् ॥

इति विश्वकर्मप्रकाशे । एतेन विप्रादीनां क्रमेण पञ्चाङ्गुलाः सार्धद्व्यङ्गुलाः सपादाङ्गुलाः कलशाः कार्या इति कलशप्रमाणमपि सिद्ध्यति ।

११—कलशलक्षणं पञ्चरात्रे—

समानीय शिलोपेतान् कलशान् पूर्वसंभृतान् ।

उत्कृष्टधातुसम्भूतान् नव शैलमयांस्तु वा ॥
समान् सुपक्वान् सुघनान् मृन्मयांस्तदभावतः ।
द्वादशाङ्गुलविस्तीर्णांस्तन्मानेन तु चोन्नतान् ॥
द्विगुणान् सति सामर्थ्ये नृपाणां हेमजान् हितान् ।

एवञ्च धातुमयाः पाषाणमया मृन्मया वा कलशाः कार्याः ।

१२—नवशिलापक्षे कलशानां नामानि—सुभद्रः १ विभद्रः २ सुनन्दः ३ पुष्प नन्दः ४ जयः ५ विजयः ६ कुम्भः ७ पूर्णः ८ उत्तर ९ इति ।

१३—पञ्चशिलापक्षे कुम्भनामानि—पद्मः १ महापद्मः २ शङ्खः ३ मकरः ४ सुभद्रः ५ इति ।

१४—चतुःशिलापक्षे—पद्मः १ महापद्मः २ शङ्खः ३ सुभद्रः ४ इति ।

१५—शिलान्यासे वास्तुपूजनमपि सति सम्भवे कार्यम् ।

वसिष्ठः—निर्माणे मन्दिराणां च प्रवेशे त्रिविधेऽपि च ।
वास्तुपूजा प्रकर्तव्या तस्मात्तां कथयाम्यदः ॥

मात्स्ये—प्रासादभवनोद्यानप्रारम्भे परिवर्तने ।
पुरवेश्मप्रवेशेषु सर्वदोपापनुत्तये ॥
"इति वास्तुविधानं तु कृत्वा तां स्नानमण्डपात् ।"

इति विश्वकर्मप्रकाशे विधेश्च ।

'साज्यं कुम्भं स्थिरं मुक्त्वा वास्तुपूजनपूर्वकम्' इति शान्तिरत्ने ।

१६—पञ्चशिलापक्षे शिलासु क्रमेण चन्दनादिना पद्मम्, सिंहासनम्, तोरणच्छत्रे, कूर्मम्, चतुर्भुजम् विष्णुं चोल्लिखेत् ।

१७—शिलाविन्यासकाले सम्भारा गर्गोक्ताः—

शिलाविन्यासकाले तु सम्भारांश्चोपकल्पयेत् ।
सुवर्णजातिरत्नानि सुवर्णं रजतं तथा ॥
सर्वबीजानि गन्धांश्च शरान् दर्भांस्तथैव च ।
शुक्लान् सुमनसः सर्पिः केतकीं मधु रोचनाम् ॥

१८—शिलान्यासे होमोऽपि गर्गेणोक्तः—

"हुत्वाग्निं विधिवत्सर्वं मुहूर्ते चोपपादिते ।"

१९—शिलान्यासः कुम्भोपरि कर्तव्य इत्युक्तं शान्तिरत्ने—

तत ईशानदिग्भागे साक्षतं रत्नपञ्चकम् ।
साज्यं कुम्भं स्थिरं मुक्त्वा वास्तुपूजनपूर्वकम् ॥
कुम्भोपरि शिलान्यासः कर्तव्यस्तदनन्तरम् ॥

२०—शिलान्यासे शङ्कुस्थापनमप्युक्तं विष्णुधर्मोत्तरे—

"मध्ये शैलमयं कुम्भं शङ्कुं वा स्थापयेद् बुधः ।"

२१—पूर्णाहुत्यनन्तरं भूतेभ्यो बलिदानमुपशिलास्थापनं घटस्थापनं घटान्तरालानां मृदादिभिः पूरणं चोक्तम् ।

तन्त्र ग्रन्थे—दत्वा पूर्णां स्वयं कृत्वा स्थलस्थस्यार्चनं ततः ।
बलिदानं च भूतानां समाचम्य ततो व्रजेत् ॥
ततः स्वशक्तिपाषाणैरेकैकं स्थापयेद् घटम् ।
पूरयेदस्त्रमन्त्रेण घटानामन्तरं ततः ॥
मृदुमृद्वालुकाभिस्तु सुधयाऽचलसिद्धये ॥

२२—नवशिलापक्षे शिलानां न्यासम् आग्नेयादिक्रमेण ईशानादिक्रमेण वा। तत्र आग्नेयादिक्रमेण न्यासे पूर्णादिक्रमेण शिलानां न्यासो न तु नन्दादिक्रमेण। ईशानादिक्रमेण न्यासे नन्दादिक्रमेण न्यासः, आग्नेये तथा विधानात् ।

२३—शिलापञ्चकपक्षे आग्नेयादिक्रम ईशानादिक्रमो वा। आग्नेये तु मध्यादिक्रमेणापि शिलान्यास उक्तः शिलापञ्चकपक्षे ।

२४—खननं च पुरुषपर्यन्तं चतुर्हस्तं द्विहस्तं वा कार्यम्,

"पुरुषाधः स्थितं शल्यं न गृहे दोषदं भवेत् ।" इति मात्स्यात् ।
"चतुर्हस्तं द्विहस्तं वा जलान्तं वाऽपि शोधयेत् ॥" इति लङ्गाच्च ।

जलान्तमिति प्रासादादिपरम्—

"प्रासादे दोषदं शल्यं भवेद्यावज्जलान्तिकम् ।" इति मात्स्यात् ।
पाषाणान्तं जलान्तं वा शर्करान्तमथापि वा ।
प्रासादपादभूमिष्ठं सशल्यं दोषदं यतः ॥
प्रासादादिभुवं तस्मात्तत्तन्मानेन शोधयेत् । इति त्रिविक्रमपद्धतौ ।

२५—"चतुःषष्टिपदे क्षेत्रे" इत्यादिना ईशानादीनां वास्तुदेवतानां बलिविधानमुक्त्वा—

रक्षोमातृगणेभ्यश्च पिशाचादिभ्य एव च ।
पितृभ्यः क्षेत्रपालेभ्यो बलीन् दद्यादकामतः ॥
अहुत्वैतानसन्तर्प्य प्रासादादीन् न कारयेत् ॥

इति राक्षसादीनां च बलिविधानमुक्तमग्निपुराणे ।

२६—पुत्र-कलत्र-धन-धान्य-धर्मार्थ-कामादि-सकलसौख्यसाधनं शीताम्बुवातघर्मापहं सकलजन्तुनिवासभूतं गृहम् ।

२७—अजितास्थापनमन्त्रः— अजिते सर्वदा त्वं मां कामानामजितं कुरु।
प्रासादे तिष्ठ संहृष्टा यावच्चन्द्रार्कतारकौ॥
२८—अपराजितास्थापनमन्त्रः—स्थिराऽपराजिते भूत्वा कुरु मामपराजितम्।
आयुर्दा धनदा चात्र पुत्रपौत्रप्रदा भव॥
२९—विजयास्थापनमन्त्रः— विजये विजयं देहि. स्थिरा भूत्वाऽत्र सर्वदा।
आयुः कामं श्रियं चात्र प्रासादे देहि मेऽनघे॥
३०—मङ्गलास्थापनमन्त्रः— प्रासादेऽत्र स्थिरा भूत्वा मङ्गले मङ्गलं कुरु।
धनधान्यसमृद्धिं च सर्वदा कुरु नन्दिनि॥
३१—धरणीस्थापनमन्त्रः—धरणी लोकधरणी त्वामत्र स्थापयाम्यहम्।
निर्विघ्नं धारय त्वं मां गृहेऽस्मिन् सर्वदा शुभे॥ इति।

गृहवास्तुविषये विशेषविचारः

१—एतद् वास्तूपशमनं कृत्वा कर्म समाचरेत्।
प्रासादभवनोद्यानप्रारम्भे परिवर्तने॥
पुरवेश्मप्रवेशे च सर्वदोपोपशान्तये।
वास्तूपशमनं कृत्वा ततः सूत्रेण वेष्टयेत्॥
रक्षोघ्नपावमानेन सूक्तेन भवनादिकम्।
नृत्यमङ्गलवाद्यैश्च कुर्याद् ब्राह्मणभोजनम्॥
अनेन विधिना यस्तु प्रतिसंवत्सरं बुधः।
गृहे वाऽऽयतने कुर्यान्न स दुःखमवाप्नुयात्॥

इति हेमाद्रौ मत्स्यपुराणे गृहनिर्माण-गृहप्रवेशादौ वास्तुशान्तिः सर्वाशुभ-निवृत्त्यादिफलिका विहिता।

२—कार्यारम्भेषु सर्वेषु नववेश्मप्रवेशने।
ग्रहशान्तिं विधानेन कृत्वाऽभीष्टं समश्नुते॥

इति शौनकेन ग्रहयागस्यापि वास्तुशान्तौ विधानात् सति सम्भवे ग्रहयाग-सहिता वास्तुशान्तिः प्रकर्तव्या। ग्रहपूजनं च वास्तुदेवतापूजनापेक्षया पूर्वमेव कार्यम्। होमोऽपि ग्रहोद्देश्यको वास्तुदेवोद्देश्यकहोमापेक्षया पूर्वमेव कार्यः। ग्रहशान्तेः

सकलकर्मसाधारण्येन पुण्याहवाचनादीनामिव कर्मारम्भात्पूर्वमेव अनुष्ठातुमुचितत्वात्।

"ततो ग्रहार्चनं वास्तुपूजाविधिमतः परम्।"

इति विश्वकर्मप्रकाशे (८।२।२७) वचनात्।

"होमं कुर्याद् ग्रहाणां तु स्वशाखोक्तविधानतः।

वास्तुहोमं ततः कुर्यात् ·········॥" (११।४०)

इति तत्रैव होमेऽपि ग्रहहोमस्यैव पूर्वोक्तेः।

३—"नित्यं नैमित्तिकं हित्वा सर्वमन्यत्समण्डपम्।"

इति शारदातिलकात्। मत्स्यपुराणे गृहप्रवेशविधिमुक्त्वा "प्रासादवास्तुशमने च विधिर्य उक्तः" (२५७) इति प्रासादवास्तुशान्त्युक्तविधानस्य गृहवास्तुशान्तौ अतिदिष्टत्वाच्च मण्डपकरणं सति संभवे भवति। प्रासादवास्तुशान्तौ च मण्डपो मात्स्ये उक्तस्तदनुसृत्य मयूखादौ चोक्तः।

४—वास्तुशान्तौ वरदो नामाग्निः। वास्तुयागे "प्रजापतिः" इति वास्तुतत्त्वे वचनात् प्रजापतिर्वा।

५—"ईशान्यां चतुरस्रां चतुरङ्गुलमुच्छ्रितां वेदिं कृत्वा" (आश्व० गृ० प०) इति सूत्राद्वास्तुवेदिः चतुरस्रा चतुरङ्गुलोच्छ्रिता हस्तमाना कार्या। शान्तिसार-शान्तिकमलाकर-मयूखकारादिभिः सर्वैः परिशिष्टवचनमनुसृत्य ईशान्यामेव वास्तुवेदिकरणमुक्तम्।

गर्त्तस्योत्तरपूर्वेण स्थण्डिलं हस्तमात्रकम्।

द्विवप्रं चतुरस्रं च वितस्त्युच्छ्रायसम्मितम्॥

इति पूजार्थवेदिनिर्माणस्य ईशान्यामेव वास्तुवेदिकरणं युक्तम्। पूर्वतो वेदिकरणं तु निर्मूलमेव।

ग्रहवेदिश्च वास्तुवेदितो दक्षिणतः कार्या, वास्तुवेदिश्च तदुत्तरतः। ग्रहाणां पूर्वाङ्गत्वात् प्राक् पूजनीयत्वेन पश्चाद् रुद्रपूजाया उदक्संस्थत्वापेक्षणात्। अतएव—

अथ प्रधानादपि यत्र पूर्वं ग्रहादिवासश्च तदा प्रधानम्।

ईशानदेशे च ततस्त्ववाच्यां श्रीखेटवेदिः करविस्तृतोच्चा॥

इति कुण्डरत्नावल्यामुक्तम्। भट्टकृतमहारुद्रपद्धतौ च "महारुद्र-वास्तुशान्त्यादौ प्रधानमीशान्यां तद्दक्षिणे ग्रहाः" इत्युक्तम्।

"अवाङ्मुखो निपतित ईशान्यां दिशि संस्थितः।" (वि० क० प्र० ४।३)

इति विश्वकर्मप्रकाशवचनमप्यत्रानुकूलमिति।

६—वास्तुमण्डलकोणेषु ईशानादिक्रमेण च।

शङ्कूनां रोपणं शस्तं प्रादक्षिण्येन मार्गतः॥ (वि० क० प्र० ५।१३)

इति वचनात्।

कुर्याद् वेदिं हस्तमितां चतुरस्रामुदक्प्लवाम्।
तदीशानादिकोणेषु लोहकीलान् निवेशयेत्॥

इत्युक्तेश्च ईशानादितः शङ्कुरोपणम्।

स्तम्भोच्छ्राये शिलान्यासे सूत्रयोजनकीलके।
खननेऽवटसंस्कारे प्रारम्भो वह्निगोचरे॥

इति वचनादाग्नेयादित इति केचित्। शङ्कवश्च सारदारुमया इति श्लोकशुल्बे। "कुर्याद् वेदिम्" इत्युक्तवचनाल्लोहमया वा इत्यपि जीर्णसम्प्रदायः।

७—वास्तुदेवतास्थापने शिख्यादिक्रमः—

"शिखी चैवाथ पर्जन्यो जयन्तः कुलिशायुधः।"

इत्यादिना मत्स्यपुराणे उक्तः। आश्वलायनगृह्यपरिशिष्टेऽपि "ब्राह्मणमादितः कृत्वाऽदित्यन्तमेके" इति शिख्यादिक्रममुक्त्वा उक्तम्। अत एवात्र एकग्रहणात् ब्रह्मादिक्रमेऽनादरता प्रदर्शिता। मयूख-शान्तिसार-शान्तिकमलाकरादिभिरपि अयमेव क्रमोऽङ्गीकृतः। शारदातिलके परं "ब्रह्माणं पूजयेदादौ" इत्यादिना ब्रह्मादिक्रम उक्तः।

८—वास्तुपूजनं वेदमन्त्रैर्नाममन्त्रैः समुच्चितैः प्रणवव्याहृतियुतैः "ॐ भूर्भुवः स्वः शिखिने नमः" इत्याकारकैर्विधेयम्।

शिख्यादिपञ्चचत्वारिंशद्देवांस्तत्र प्रपूजयेत्।
वेदमन्त्रैर्नाममन्त्रैः प्रणवव्याहृतिस्तथा॥

इति विश्वकर्मप्रकाशे (५।१०) वचनात्।

९—ब्रह्मस्थाने ततो विद्वान् कुर्यादाधारमक्षतैः।
तस्मिन् संस्थापयेत् कुम्भं वर्द्धन्या सह पूरितम्॥

इति यागतत्त्वे वचनात्। विश्वकर्मप्रकाशे (५।१७०) तु—

"कलशे स्थापयेद्देवं वरुणं वारुणैस्ततः।"

इत्यादिना कलशस्थापनमुक्तम्, स्थानं नोक्तम्। तत्र सामान्यनियमात् ईशान्यां तत्स्थापनमिति पद्धतिकाराः।

१०—कलशे सर्वौषध्यादिप्रक्षेपणानन्तरं द्रव्यविशेषाः प्रक्षेप्या उक्ता वास्तुशान्तौ। ते यथा विश्वकर्मप्रकाशे (५।१०४-१०५)—

वटीर्वटोदुम्बरस्य वेतसस्य तथैव च।
अश्वत्थस्यैव मूलं च पञ्च कापायकाः स्मृताः॥
तुलसी सहदेवी च विष्णुक्रान्ता शतावरी।
मूलान्येतानि गृह्णीयाच्छतालाभे विशेषतः॥ इति।

११—वास्तुमूर्तिः सर्पाकारा कार्या—

इति प्रार्थ्य ततो भूमौ संलिखेद् वास्तुपूरुषम् ।
पिष्टातकैस्तण्डुलैर्वा नागरूपधरं विभुम् ॥ (वि० क० प्र० १।७)

इति वचनात् ।

गृहवास्तुं प्रवक्ष्यामि येन देवमयो भवेत् ।
ईशानादि निर्ऋत्यन्तं वास्तुः सर्पः प्रकीर्तितः ॥

इति प्रतिष्ठासरणौ सङ्गमशक्तितन्त्रधृतवचनाच्च ।

१२—अत्र वास्तुदेवतापूजन-बलिदान-होम-प्रतिमा-निखननान्तः परिशिष्टायुक्तो मुख्यः पक्षः । प्रतिमानिखननरहितो मात्स्योक्तो मध्यमः । पूजाबलिदानमात्रः शारदोक्तः कनिष्ठः । न च मतभेदात्सर्वेऽपि मुख्यकल्पा एवेति वाच्यम्; "एककर्मणि गुणविशेषे फलविशेषः" (का० श्रौ० सू० १ । १० । ११) इति न्यायेन समानफलानुत्पत्तेः ।

१३—"वास्तोष्पते" इति मन्त्रैश्चतुर्भिर्होमः शिख्यादिहोमात्पूर्वमेव कार्य इति युक्तं पश्यामः । अत्र वास्तुशान्तौ वास्तोष्पतिदेवस्य प्रधानत्वात् प्रधानहोमस्य च पूर्वमेव न्याय्यत्वात् । परिशिष्टे - "वास्तोष्पत इति चतसृभिश्चरुणा समित्तिलपायसाज्यैः केवलाज्येन वा हुत्वा होमशेषं समाप्य" (आश्व० परि०) इत्युक्तेश्च । पद्धतिकारैस्तु सर्वैः शिख्यादिहोम एव पूर्वमुक्तः । तैः शिख्यादयोऽपि प्रधानत्वेनैवाङ्गीकृताः । शिख्यादिहोमानन्तरं "वास्तोष्पते" इति चतुर्भिर्मन्त्रैः प्रधानहोमः, ततो बिल्वहोम इति पद्धतिक्रमः । अस्माकं मते तु आदौ प्रधानहोमस्ततः शिख्यादिहोमः । ततो बिल्वहोमः । प्रधानहोमश्च प्रतिद्रव्यं प्रतिमन्त्रं वा अष्टादिसंख्यया, शिख्यादिहोमश्चाष्टसंख्यया, सामान्यनियमात् ।

होमो ग्रहादिपूजायां शतमष्टोत्तरं भवेत् ।
अष्टाविंशतिरष्टौ वा तत्संख्या परिकीर्तिता ॥
अष्टोत्तरसहस्रं वा तत्संख्या परिकीर्तिता ।

इति वचनात् । अथवा शिख्यादिभ्यो दश-दश-संख्यया होमः कार्यः ।

"इतरान् दशभिर्देवानाहुतिभिः प्रकल्पयेत् ।"

इति वास्तुयागतत्त्वे रघुनन्दनधृतवचनात् । अथवा "वास्तोष्पत इति चतसृभिः प्रत्यृचं हुत्वा" इति सूत्रविहितहोमे सकृत्संख्या यथा गृह्यते, तद्वदत्रापि सकृत्संख्यैव ग्राह्या, तेन शिख्यादिभ्यः एकैकाऽऽहुतिरित्यपि पक्षो बोध्यः ।

१४—शिख्यादिहोमः पूजान्ते कार्य इति विश्वकर्मप्रकाशे (५०।६६) । शिख्यादिपूजनमुक्त्वा ततः कलशस्थापनं च (वि० क० प्र० ५।१००—१०६) उक्त्वा अनन्तरं "होमश्चिमेखले कार्यः" (वि० क० प्र० ५ । ११० - ११२) इत्यादिना पूजनानन्तरमेव होमविधानात् ।

१५—वास्तुबलिर्होमान्ते कार्यः—

होमान्ते भक्ष्यभोज्यैस्तु वास्तुदेशे बलिं हरेत् ।
नमस्कारान्तयुक्तेन प्रणवाद्येन सर्वतः ॥ (वि० क० प्र० ५।११३)

इति वचनात्। स च बलिः "घृतान्नं शिखिने दद्यात्" (वि० क० प्र० ५।११६-१३२) इत्यादिना शिख्यादिदेवेभ्यः पृथक् पृथग्द्रव्यैर्विहितैभ्यस्तत्तद् द्रव्येण देयः ।

"अथवा पायसं दद्यात् सर्वेभ्यश्च सदीपकम् ।" (वि० क० प्र० ५।१३४)

इति वचनात् ।

पायसं वाऽपि दातव्यं स्वनाम्ना सर्वतः क्रमात् ।
नमस्कारान्तयुक्तेन प्रणवाद्येन सर्वतः ॥

इति मात्स्यात् । "पायसान्नैर्बलिं हरेत्" इति शारदातिलकाच्च सर्वेभ्यः पायसद्रव्येण वा बलिर्देयः । आग्नेये तु बलिविशेषमभिधाय—

"यजेत सकलं वास्तु दध्यक्षतकुशैर्जलैः ।"

इत्यग्निपुराणे उक्तम् । बलिश्च—

"कुक्कुटाण्डप्रमाणं तु बलिरित्यभिधीयते ।"

इति स्मृत्यर्थसारोक्तः कार्यः । सति संभवे—

"सर्वेभ्योऽपि हिरण्यं च ब्रह्मणे गां पयस्विनीम् ।" (वि० क० प्र० ५।१३३)

इति वचनात् । शिख्यादिभ्यश्चतुश्चत्वारिंशद्भ्यः सुवर्णम् , ब्रह्मणे च गां तन्निष्क्रयं वा दद्यात् ।

१६—ततः सम्पूजयेत्तस्मिन् सर्वलोकवसुन्धराम् ।
सुरूपां प्रमदारूपां दिव्याभरणभूषिताम् ॥
ध्यात्वा तामर्चयेद्देवीं परितुष्टां स्मिताननाम् ।

इति वास्तुयागतत्त्वे रघुनन्दनोक्तेः ।

वास्तुमण्डलमध्ये तु ब्रह्मस्थाने प्रपूजयेत् ।
सुरूपां पृथिवीं दिव्यरूपाभरणसंयुताम् ॥ (वि० क० प्र० ५।३४)

इति वचनाच्च ब्रह्मस्थाने ब्रह्मपूजोत्तरं तस्मिन्नेव पदे तदुत्तरतो धरापूजनमाचरन्ति । केचित्तु अस्मिन्नेवावसर इति ।

१७—वास्तूपशमनं कृत्वा ततः सूत्रेण वेष्टयेत् ।
रक्षोघ्नपवमानेन सूक्तेन भवनादिकम् ॥ इति मात्स्यात् ।

"कृणुष्व पाजः" इति पञ्चर्चं रक्षोघ्नसूक्तम्। "पुनन्तु मा पितरः" इत्यादिकं नवर्चं पवमानसूक्तम्।

१८—"बलिं च सम्यग्विधिवत्प्रयुज्य क्षीरेण धारां परितस्तु दद्यात्।"

इति मात्स्यात्।

वाचयित्वा ततः स्वस्ति कर्करीं परिगृह्य च।
सूत्रमात्रेण तोयस्य धारां कुर्यात्प्रदक्षिणाम्॥
प्रक्षिपेत्तेन मार्गेण सर्वबीजानि चैव हि। (वि० क० प्र० ५।८७-८८)

इति विश्वकर्मप्रकाशोक्तेश्च जलदुग्धोभयधाराकरणमत्र कर्तव्यम्।

१९—"होमशेषं समाप्याथ यजमानो वास्तुमूर्तिं रौद्रकोणेऽधोमुखीं गर्ते प्रच्छादयेत्" इति आश्वलायनगृह्यपरिशिष्टे (४।२) पूजितवास्तुप्रतिमाया गर्ते प्रच्छादनमीशानकोणेऽभिहितम्।

मृत्पेटिकां स्वर्णरत्नधान्यशैवालसंयुताम्।
गृहमध्ये हस्तमात्रे गर्ते न्यासाय विन्यसेत्॥

इति नारदसंहितायां मृत्पेटिकायां गृहमध्ये गर्ते निधानमुक्तम्। शान्तिसारादिकारैस्तु उभयैकवाक्यतया वास्तुप्रतिमां मृत्पेटिकायां निधाय गर्ते तस्या निधानमुक्तम्। अथ च वास्तुभूमेरेकाशीतिपदानि कल्पयित्वा ईशानकोणादष्टमे आकाशपदे निधानमुक्तम्, तच्च परिशिष्टोक्तसंहितोभयविरुद्धमिति चेन्न। आकाशपदस्यैव रौद्रत्वस्वीकारात्, लिङ्गतोभद्रादिमण्डले इन्द्राग्न्योर्मध्यस्य रुद्रायतनत्वकथनात्।

२०—वास्तुयागान्ते दक्षिणोक्ता वास्तुयागतत्त्वे—

एवं निष्पाद्य विधिना वास्तुयागं सुरोत्तम।
सुवर्णं गां च वस्त्रं च आचार्याय निवेदयेत्॥ इति।

विश्वकर्मप्रकाशे (५।२५६-२६२) च—

ततस्तु प्राङ्मुखो भूत्वा आचार्याय निवेदयेत्।
दक्षिणां ब्रह्मणे दद्याद्यथावित्तानुसारतः॥
उदङ्मुखाय च ततः क्षमस्वेति पुनः पुनः।
गां सवत्सां स्वर्णयुतां तथा वासोयुगान्विताम्॥
यज्ञान्ते आप्लुतान् वस्त्रानाचार्याय निवेदयेत्।
दैवज्ञं च ततस्तोष्य स्थपतीन् वैष्णवानपि॥
दक्षिणां च ततो दद्यात् घृते छायां विलोकयेत्।
रक्षाबन्धं मन्त्रपाठं त्र्यायुषं च समाचरेत्॥

ऋत्विग्भ्यो दक्षिणां दद्याच्छिष्टेभ्यश्च स्वशक्तितः।
दीनान्धकृपणेभ्यश्च दद्याद् वित्तानुसारतः॥
सम्प्राप्नोति नरो लक्ष्मीं पुत्र-पौत्रधनान्विताम्। इति।

२१—अकपाटमनाच्छन्नमदत्तबलिभोजनम्।
गृहं न प्रविशेद्धीमान् विपदामाकरं हि तत्॥

इति नारदसंहितावचनात् गृहे ब्राह्मणानां भोजनं कृत्वा गृहप्रवेशः कार्यः।
२२—गृहप्रवेशाङ्गत्वेन पताकादिरोपणप्रकारो विश्वकर्मप्रकाशे (१०।६८-१०१) विहितः।

वितानैस्तोरणैः पुष्पैः पताकाभिर्विशेषतः।
अलङ्कृत्य नवं गेहं देहलीं पूजयेत्ततः॥
दिक्पालांश्च तथा क्षेत्रपालं ग्रामाधिदैवतान्।
प्रणम्य विधिवत् पूज्य द्वारमार्गे विशेद् गृहम्॥
पूजयेद् गणनाथं च मातृकाश्च विशेषतः।
वसोर्धारां पातयित्वा ग्रहांश्चैव तु पूजयेत्॥
वास्तुनाथं च सम्पूज्य ब्राह्मणान् भोजयेत्ततः।
गोदानं भूमिदानं च कुर्याच्चैव यथाविधि॥ इति।

गृहेऽपि पताकाः कुण्डसिद्धयुक्तवर्णोचिता दश कार्या इत्युक्तं विश्वकर्मप्रकाशे (१३।१०१-१०५)।

यद् द्वारमार्गे पूर्वे तु ध्वजः षोडशहस्तकः।
स्तम्भोऽस्य विधिवत् स्थाप्यः सघण्टाकिङ्किणीयुतः॥ इति।

व्यवस्थासंग्रहः

१—श्रावणीनिर्णयः

वर्षेऽस्मिन् (संवत् १९८८) श्रावणी पूर्णिमा परेद्युः ३।५८ दण्डपरिमिता, पूर्वेद्युः ०।४७ एतत्पलेभ्योऽनन्तरं प्रवर्त्तते। कस्मिन्दिने उपाकर्मानुष्ठेयमिति संशये यजुर्वेदिनां प्रथमदिन एव कर्तव्यता प्रतीयते हेमाद्रि-निर्णयसिन्ध्वादिपर्यालोचनया। तथाहि—

उदये सङ्गवस्पर्शे श्रुतौ पर्वणि चार्कभे।
कुर्युर्नभस्युपाकर्म ऋग्यजुःसामगाः क्रमात्॥

इति वचनेन उदयसङ्गवोभयव्यापिपर्वादिके कर्मणो मुख्यः कालः उपाकर्मण इत्यवगम्यते। तदभावे उदयसम्बन्धाभावेऽपि यस्मिन्दिने पर्वणः सङ्गवकालसम्बन्धो वर्तते तस्मिन्नेव दिनेऽनुष्ठेयम्। तच्चास्मिन् वर्षे प्रथमदिन एव वर्तते न तु द्वितीय-दिवसे। यद्यपि प्रथमदिने चतुर्दशीसम्बन्धोऽस्ति पर्वणः स च—

सम्प्राप्तवान् श्रुतीर्ब्रह्मा पर्वण्यौदयिके पुनः।
अतो भूतदिने तस्मिन्नोपाकरणमिष्यते॥

इति निषिद्धः, तथापि न सम्बन्धमात्रं दोषावहम्, किन्तु तत्र तत्र तिथ्यन्तर-वेधस्यैव धर्मशास्त्रेषु दोषावहत्वं श्रूयते। वेधश्च "त्रिभिर्मुहूर्तैर्विध्यन्ति" इति वचनबलात् मुहूर्तत्रयरूपदण्डषट्कपरिमितकालसम्बन्धात्मक एवेत्यवगम्यते। प्रकृते तु न तथास्ति, अतो न चतुर्दशीवेधसम्बन्धनिमित्तो दोषः पूर्वदिने।

"पर्वण्यौदयिके कुर्युः श्रावणीं तैत्तिरीयकाः।"

इति मदनरत्नधृतबह्वृचपरिशिष्टबलादपि पूर्वदिन एव कर्तव्यता प्रतीयते, तत्र हि पर्वण औदयिकत्वं नाम न उदयकालमात्रसम्बन्धस्तस्य—

श्रावणी पौर्णमासी तु सङ्गवात्परतो यदि।
तदैवौदयिकी ग्राह्या नान्यदौदयिकी भवेत्॥
घटीपरिमितः कालः सङ्गवादूर्ध्वपर्वणि।
*औदयीकमिति प्राहुर्मुनयस्तिथिचिन्तकाः॥

इत्यादिवचनविशेषैः पर्वव्यवस्थापनात्। एवञ्च औदयिके पर्वणि यजुर्वेदिना-मुपाकर्मानुष्ठानं विदधतो मदनरत्नकारस्य मतेनापि द्वितीयस्मिन्दिवसे पर्वणः सङ्गवसम्बन्धाभावेन औदयिकत्वासिद्धेः पूर्वदिवस एवोपाकर्मानुष्ठानं सिद्ध्यति। अतश्च हेमाद्रि-मदनरत्नादिसर्वनिबन्धकृन्मतेनापि सर्वयजुर्वेदिनामुपाकर्म पूर्व-स्मिन् दिन एव कर्तव्यं शास्त्रसम्मतम्।

---

* औदयीकमिति दीर्घ आर्षः एवमेवोपर्युद्धृतेषु पद्येषु 'पूज्य' 'तोष्य' आदिप्रयोगा बोध्याः।

रक्षाबन्धनस्य तु पूर्वदिने भद्रायोगात् उपाकर्मरक्षाबन्धनयोरङ्गाङ्गिभावस्य गृह्यनिबन्धकाराद्यनभिमतत्वात् परेद्युरेवानुष्ठानमिति निर्णयः ।

२—संक्रान्तौ उपाकर्मनिर्णयः

कस्मिंश्चिद् वर्षे यदि पौर्णमासीसमाप्त्यनन्तरमर्द्धरात्रादधस्तात् संक्रान्तिर्भवति तदा तद्दिने प्रातरारभ्य विद्यमानायां संक्रान्त्यस्पृष्टायां पौर्णमास्यामुपाकर्म न करणीयमिति निर्णयसिन्धुकारमतम् । तथाहि तदीयग्रन्थे श्रवणयुतदिने संक्रान्त्यादौ तु—

उपाकर्म न कुर्वन्ति क्रमात्सामर्ग्यजुर्विदः ।
ग्रहसंक्रान्तियुक्तेषु हस्तश्रवणपर्वसु ॥

इति हेमाद्रौ निषेधात् । 'पञ्चम्यादयो ग्राह्याः' इत्युपक्रम्य एतेन ग्रहणसंक्रान्तिकाले श्रवणसत्त्वे एव निषेधः, नार्वागिति मूर्खशङ्का परास्ता, ग्रहणविशिष्टानां हस्तश्रवणपर्वणां प्रत्येकं निषेधे तद्युतोपाकर्मनिषेधे च विशिष्टोद्देशे वाक्यभेदात् पञ्चम्यां संक्रान्तौ निषेधाभावापत्तेश्च । तेनार्धरात्रात्पूर्वं ग्रहसंक्रमसत्त्वे एवोपाकर्मनिषेधः, न तद्योगे एव इत्यन्तेन उपसंहृतम् । निर्णयसिन्धुमतानुसारेण धर्मसिन्धावपि ग्रहण-संक्रान्तियोगश्चोपाकर्मसन्धिन्यहोरात्रे भविष्यन्मध्यरात्रात्पूर्वमतीतमध्यरात्रादूर्ध्वं चेति यामाष्टके विद्यमानश्रवणनक्षत्रपूर्णिमादितिथिस्पृष्टोऽप्युपाकर्मदूषकः इत्युक्तम् । यद्यपि पञ्चम्यां संक्रान्तियोगे उपाकर्मनिषेधकवचनं नोपलभ्यते, तथापि निर्णयसिन्धुकारैर्वाक्यभेदभिया कल्पितेन सामान्यवाक्येन तत्र निषेधः स्वीक्रियते । ननु ग्रहणसंक्रान्तौ सामान्येन उपाकर्मनिषेधकवचनं वर्त्तते, तथाहि हेमाद्रिमदनपालधृता स्मृतिः—

संक्रान्तौ ग्रहणे चैव सूतके मृतके तथा ।
गणस्नानं न कुर्वीत नारदस्य वचो यथा ॥ इति ।

एवं च सामान्यवचनेन पञ्चम्यां संक्रान्तावुपाकर्मनिषेधः स्पष्ट एवेति चेत् न, हेमाद्रिणा अस्य विशेषवचनेनैकवाक्यतास्वीकारात् । अस्य वाक्यस्य सामान्यतः संक्रान्तिदिने उपाकर्मनिषेधकत्वस्वीकारे निर्णयसिन्धुकारमते—

संक्रान्तिर्ग्रहणं वापि यदि पर्वणि जायते ।
तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते ॥
संक्रान्तिर्ग्रहणं वापि पौर्णमासी यदा भवेत् ।
उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः ॥ इति विधानात् ।

३—होलिकादाहनिर्णयः

फाल्गुनीपूर्णिमा पूर्वदिने ३६।३६ अनन्तरं प्रवर्तते, परदिने ३१।२६ यावद् वर्तते । तत्र होलिकादाहः कदा कार्य इति संशये—परदिने पूर्णिमायाः सन्ध्याकालेऽल्पावशिष्टत्वात् ग्रस्तोदयचन्द्रग्रहणसत्त्वाच्च "सर्वेषामेव वर्णानां सूतकं राहुदर्शने"

इति वचनेन उपरागकाले क्रियान्तरस्याननुष्ठेयत्वदर्शनात् पूर्वस्मिन्नेव दिने धर्मशास्त्रोक्तं नाडीपञ्चकात्मकं भद्रामुखं वर्जयित्वा द्वाचत्वारिंशद्घटिकोत्तरं होलादाहः कार्यः, न तु परदिने प्रदोषकाले पूर्णिमासत्त्वेऽपि पूर्णिमाया तस्याः ग्रहणदूषितत्वात्। "अथ परेऽह्नि ग्रस्तोदयस्तदा पूर्वदिने भद्रावर्जं रात्रौ चतुर्थयामे विष्टिपुच्छे वा होलिका कार्या। ग्रहोत्तरं प्रतिपत्सत्त्वात्तत्पूर्वं च दिवा होलानिषेधात्" इति निर्णयसिन्धौ पूर्वदिनकर्तव्यत्वस्यैव प्रतिपादनात्। यत्तु तत्रैव "वस्तुतस्तु" इत्यादिना द्वितीयेऽह्नि कर्तव्यता, तत्र च हेतुतया—

सर्वेषामेव वर्णानां सूतकं राहुदर्शने।
स्नात्वा कर्माणि कुर्वीत............॥

इति वचनमुत्तरार्द्धशेषतया व्याख्यातम्, तन्न युक्तम्। परेऽह्नि उपरागसमये उपरागप्रयुक्तजप-दान-होमादिक्रियातिरिक्तस्य सर्वस्यापि कर्मणो धर्मशास्त्रेषु निषेधात् होलिकादाहस्य च तन्निषेधान्तःपातित्वेन तस्य ग्रहणकालेऽनुष्ठानाप्रवृत्तेः। अत एव निर्णयसिन्धुव्याख्यात्रा कृष्णंभट्टेनापि "पूर्वपक्षेऽस्वरसंसूचयन्नेवाह वस्तुतस्तु" इति व्याचक्षाणेन प्रथमदिनकर्तव्यतापक्ष एवाभ्युपगतः। अतश्च यद्यपि प्रथमदिने न प्रदोषरूपमुख्यकाललाभः, तथापि गौणकालस्य सत्त्वात् द्वितीयदिने च मुख्यकालस्य प्रदोषस्य ग्रहणदुष्टत्वेन च निषेधाक्रान्तत्वात् निषिद्धकालग्रहणापेक्षया गौणकालग्रहणस्यैव समुचितत्वेन पूर्वदिने चतुर्दश्यामेव द्विचत्वारिंशद् दण्डोत्तरं होलिकादाहः कार्य इति युक्तं प्रतीमः।

४—एकादश्युपवासनिर्णयः

यदा पूर्वदिने घटिकात्रयं यावद् दशमी, तत एकादशी, अनन्तरदिवसे च एकघटिकापर्यन्तमेकादशी तदुपरि द्वादशी, तृतीयदिवसे च ०।१४ पर्यन्तमेव द्वादशी अस्यां दशायामेकादश्युपवासः कदा कार्य इति संशये—

"द्वादशी तु त्रयोदश्यां कलामात्रापि दृश्यते।
द्वादशद्वादशीर्हन्ति पूर्वस्यां पारणं कृतम्॥"
"पारणाहे न लभ्येत द्वादशी कलयाऽपि चेत्।
तदानीं दशमीविद्धाप्युपोष्यैकादशी तिथिः॥"

इत्यादिनिर्णयसिन्धुवचननिचयेन यस्मिन् दिने सूर्योदयानन्तरं कलामात्रमपि द्वादशी तस्मिन्नेव दिने पारणा, तत्पूर्वस्मिन् दिने उपवास एकादशीप्रयुक्त इत्यवगमात्। शेषेतु एकादश्युपवासः कर्तव्य इति भाति।

५—नवरात्रपारणानिर्णयः

आश्विनशुक्लनवमी षष्टिदण्डा, द्वितीयदिने च वृद्धया २३ पर्यन्तं गता,

अनन्तरं दशमी, तदनन्तरदिनेऽपि ३४ यावद् दशमी, तत्र नवरात्रपारणा कदा कर्तव्येति सन्देहे सञ्जाते—पूर्वदिने शेषनवम्यनन्तरं दशमीलाभात् दशम्यामेव पारण-विधानात् 'यदा दिनद्वये नवमी तदा उपोष्य तिथ्यन्ते पारणा' इति निर्णयसिन्धु-वाक्यात् 'अथ नवमी षष्टिदण्डा द्वितीयदिने शेषयुक्ता दशमी, तत्रापि नवम्या युक्त-दशम्यामेव विसर्जनपारणे' इति धर्मसिन्धुवचनाच्च नवमीविद्धदशम्यामेव पारणम्, न तु शेषदशम्याम्। पूर्वदिने कर्मकालपर्याप्ततिथिलाभात् द्वितीयदिने तदभावान्नवमी-वेधस्य क्वचिदपि निषेधाश्रवणाच्चेति युक्तं पश्यामः।

६—ग्रहणविचारः

यस्मिन् देशे दिने सञ्जातं चन्द्रग्रहणं सूर्यास्तात् द्विपलाभ्यां पूर्वमेव समाप्तं भवति तत्र ग्रहणपुण्यकालस्तत्प्रयुक्तं स्नानादिकं कर्तव्यं न वेति विचारे निर्णय-सिन्धु-धर्मसिन्धुप्रभृतिषु निबन्धेषु पर्यालोच्यमानेष्वयमेव निर्णयः सञ्जायते यन्मे-घाच्छादने सति चन्द्रग्रहणस्य सूर्यग्रहणस्य वा यस्य दर्शनयोग्यता (किञ्चित्काला-वस्थायिता) तस्यैव पुण्यप्रयोजकता, तत्रैव च स्नान-दानाद्यनुष्ठानं नान्यत्र। एवञ्च सूर्यास्ताव्यवहितपूर्वक्षणस्यापि दिवात्वाविशेषात् सूर्यास्ततः अत्यल्पकालात् पूर्वमपि समाप्तस्य ग्रहणस्य दिवाग्रहणत्वस्याङ्गीकर्तव्यत्वात्।

सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा।
तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचित्॥

इति शास्त्रविषयत्वावगतेः सूर्यास्तपूर्वक्षणे समाप्तस्य ग्रहणस्य पुण्यजनकत्वं स्नानादिप्रयोजकत्वं वा नास्त्येवेति।

७—अन्नकूटोत्सवनिर्णयः

अन्नकूटोत्सव अमाविद्धायां प्रतिपदि (परेद्युः) कर्तव्य उत द्वितीयावि-द्धायां प्रतिपदि (परेद्युः) कर्तव्य इति संशये—स्मृतिपुराणादिधर्मग्रन्थेषु कार्तिक-शुक्लप्रतिपदि गोवर्धनगोपालपूजा विहिता, तत्र मुख्यगोवर्द्धनासम्भवे गोमयेनान्न-कूटेन वा गोवर्द्धनं सम्पाद्य तत्र तयोः पूजा कर्तव्या, इदमेव पूजनमन्नकूटोत्सव इत्यभिधीयते।

तथा च धर्मसिन्धौ—'मुख्यगोवर्द्धनासम्भवे तस्यैव पूजा; तदसान्निध्ये गोमयेनान्नकूटेन वा गोवर्द्धनं कृत्वा तत्सहितगोपालपूजा कार्या।' इति।

स्मृतिकौस्तुभेऽपि—'इदमेव गोवर्द्धनपूजात्मकं कर्म अन्नकूटोत्सवत्वेन पाद्मे उक्तम्' इति।

तत्र—"पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनम्।"

इत्यादिवचनात्पूर्वविद्धप्रतिपद्येव कर्तव्यम्। एवं च सति यत्र गोवर्धनपूजा क्रियते काशीस्थ-गोपालमन्दिरादौ तत्रान्नकूटोऽपि पूर्वविद्धायामेव कर्तव्यः। यत्र त्वन्नकूटः कल्पितो न वा, किन्तु गोवर्धनगोपालपूजनादिकं क्रियते, तत्र केवलं

भक्तानां प्रसादप्रदानार्थं बहोः कालात्सम्प्रदायमवलम्ब्य क्रियते यथा काशीस्थ-विश्वनाथाऽन्नपूर्णामन्दिरादौ। तत्र पूर्वोक्तवचनस्याप्रवृत्तेः। तत्र च क्रियमाणस्यान्नकूटस्य दुर्गापूजादिरूपत्वेन तत्र पूर्वाह्णव्यापिन्या एव तिथेर्ग्राह्यत्वात्तथैवाचाराच्च द्वितीयदिने उदयव्यापिन्यां प्रतिपद्येवान्नकूटः। यदि च विश्वनाथमन्दिरादावपि गोपालपूजादिकं क्रियते, तर्हि तत्रापि पूर्वदिने तत्कर्तव्यता। तत्र त्वेवमाचाराभावात्केवलस्यान्नकूटस्यान्नपूर्णा-विश्वनाथपूजाङ्गत्वेनैव सम्पादनात्तस्य च गोवर्द्धनपूजात्वाभावाद् द्वितीयदिन एव तदनुष्ठानम्।

प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतम्।
परविद्धेषु यः कुर्यात्पुत्रदारधनक्षयः॥

इत्यादिनिषेधस्तु गोवर्द्धनगोपालपूजात्मकान्नकूटविषयक एव, न त्वन्नकूटसामान्यविषयकः। अतश्च द्वितीयदिनकरणे विरोधाभावादाचाराच्च द्वितीयदिन एवान्नकूट इति शास्त्रनिर्णयः।

८ अग्निहोत्रविचारः

केनचित् धार्मिकधौरेयेण राज्यादिकार्यान्तरव्यापृतेन स्वयमग्निहोत्रं कर्तुमवकाशमलभमानेनान्यं कञ्चन श्रौत-स्मार्तनित्यकर्मानुष्ठाननिरतं विप्रवरं तत्र नियुज्य तेन कारितेऽग्निहोत्रादिकर्मणि काले च दैवादिष्टं गते तस्मिन् प्रयोजितरि, तत्पुत्रादेश्चानधिकारप्रयोजके वैधुर्यादौ सञ्जाते पूर्वनिर्दिष्टब्राह्मणकर्तृकाग्निहोत्रस्याधिकाराभावप्रयुक्तो लोपो भवेन्न वेति संशये-इदमुत्तरम्—

"वसन्ते ब्राह्मणोऽग्नीनादधीत" इत्यादावात्मनेपदश्रवणेनाग्निसिद्धिरूपफलस्याधानसामानाधिकरण्यावश्यकतया अनाधातुराहवनीयाद्यभावप्रतीतेः क्रयादिनाऽन्येन केनचित् प्रकारेणाहिताग्नित्वसम्पादनयाऽऽधानाधिकरणयोः निरस्तत्वात् यद्गतं यादृशं कर्तृविशेषणमधिकारिताप्रयोजकं तद्गततादृशाभावस्यैव तदभावप्रयोजकतावश्यंभावनैयत्येन प्रयोजकपुरुषगतवैधुर्यादेस्तत्त्वाभावेनाऽधिकारनाशकत्वासम्भवात्पूर्वनिर्दिष्टे विप्रवरेऽधिकारपौष्कल्यप्रतिभानात्तेन चाऽग्निहोत्रं यथावदेव रक्षणीयम्। 'वीरहा वा एष देवानां चाग्निमुद्वासयते' इति श्रुत्या अग्न्युत्स्रष्टुः वीरहत्यादोषप्रतिपादनात्तेन ब्राह्मणेनावश्यमेव वीरहत्यादोषाभावायाऽग्नयः संरक्षणीयाः। अग्निहोत्रं च करणीयम्। यैश्च नियतवृत्तिदानादिना प्रवर्त्तितोऽयं ब्राह्मणोऽस्मिन् धर्मकार्ये तैस्तत्सन्ततिजैश्च पुरुषैस्तादृशदोषप्रयोजकत्वादात्मानं रक्षितुकामैः यथावदेव नियतवृत्तिदानेन संरक्षणीया अग्नयोऽग्निहोत्रं चेति धार्मिकश्चायं पन्था इति।

९—देवमन्दिरजीर्णोद्धारविचारः

कस्मिंश्चिद्देवालये भूकम्पादिना निमित्तेनात्यन्तं विशीर्णतां प्राप्य पतनोन्मुखे सति तत्र स्थापिताया देव्या मूर्तेरवैकल्ये च सति तस्या मूर्तेस्तस्मात् स्थानादुत्थापनं विना तत्रैव देशे पुनर्मन्दिरनिर्माणस्याशक्यत्वे च सति तामविकलां मूर्त्तिं तस्मात्स्थाना-

दुत्थाप्य स्थानान्तरे क्वचित्तन्निकट एव संस्थाप्य तन्मूर्तिनिष्ठां शक्तिं सुवर्णादिपात्रस्थे जले आकृष्य तत्रैव तत्त्वन्यासादिकं कृत्वा यावत्पुनः स्थापनं मूर्तेस्तावत्तज्जलं रक्षेत्।

एवं प्रासादशक्तिमपि कस्मिंश्चिद् खड्गे आकृष्य तत्त्वन्यासादिकं कृत्वा मूर्तिसन्निधौ निधाय खड्गमेव यथाविधि देववत्पूजयेत्। ततो देवालयं नूतनं पूर्वदेशे निर्माय तत्र तामेव मूर्त्तिं पुनः स्थापयेद्यदि मूर्तिरखण्डिता भवेत्। संस्थाप्य च पुनस्तां तां शक्तिमाकर्षणादिना तत्र तत्रैव न्यस्य मूर्तिं प्रासादञ्च यथावत्पूजयेदिति शास्त्रीयो निर्णयः प्रतिष्ठात्रैविक्रम्यां विद्यत इति।

१०—श्रौताग्निहोत्रप्रयोजककर्तुर्देहदाहाय दत्तेऽप्यरण्युत्पादिताग्नौ नाग्निहोत्रनाशः

केनचित् धार्मिकाग्रेसरेण कश्चिच्छ्रौतस्मार्त्तकर्मनिष्ठो ब्राह्मणः नियतवृत्त्युपकल्पनपुरःसरं श्रौताग्निहोत्रफलकामनयाऽग्न्याधाने प्रवर्तिते यथाविधि श्रौताग्निहोत्रादि करोति। वृत्त्युपकल्पकस्य श्रौताग्निहोत्रप्रयोजककर्तुस्तस्य दैवाधीने शरीरत्यागे वृत्ते सति तदीयजनाऽभ्यर्थनयाऽग्निहोत्रिब्राह्मणेन लौकिकारण्युत्पादितो वह्निस्तच्छरीरसंस्कारार्थं प्रशस्त इति बुद्ध्या समर्पितः। सत्यामेवंविधायामवस्थायां पूर्वाग्निहोत्रनाशः सञ्जात इति केषाञ्चिद्विदुषां मतं समीचीनं नवेति प्रश्ने—न समीचीनमित्युत्तरम्। तथाहि आधानसिद्धानामेवाग्नीनामग्निहोत्रादिकर्मौपयिकता सर्वशास्त्रानुमता इत्यत्र नास्ति सन्देहः। आधानस्य च अग्निसिद्धिकामकर्तृकत्वेन काम्यतया 'काम्ये प्रतिनिधिर्नास्ति' इति शास्त्रानुसारेण प्रतिनिधिद्वाराऽनुष्ठापयितुमशक्यत्वात् यजमानकर्तृकत्वमेव। इत्थं च प्रयोजककर्तुर्धार्मिकाग्रेसरस्य प्रातिनिध्येन ब्राह्मणेन अग्न्याधानं कृतमिति न शक्यते संभावयितुमपि। अतः प्रयोजककर्तृत्वाधीनपुण्यप्राप्तिकामेन कारितस्याप्यग्निहोत्रस्य प्रयोजककर्तृनाशेन नाशशङ्का न शङ्कास्पदमपि। सत्येवं लौकिकारणिस्थवह्निकृतसंस्कारस्य सद्गतिप्राप्तिरूपफलविशेषप्रयोजकत्वेऽपि पूर्वाग्निहोत्रनाशकत्वं न सम्भवत्येवेति स्थिर एव पूर्वगृहीतः श्रौतोऽग्निरग्निहोत्रकर्तुर्ब्राह्मणस्येति, तेन यथापूर्वमग्निहोत्रादिकर्म सम्यगनुष्ठेयम्। प्रयोजककर्तृपुत्रादिभिरपि स्वपितृप्रवर्तितं कर्मवृत्त्युपकल्पनद्वारा यथापूर्वमेव सम्यग्रक्षणीयमित्येव धर्मतत्त्वविदां मतम्।

११—मन्दिरादिगृहनिर्माणे शिलास्थापनदिशो व्यवस्था

मन्दिरादिगृहनिर्माणार्थमादौ शिलान्यासकर्म कर्तव्यत्वेन विहितम्। शिलाश्च चतुर्षु कोणेषु मध्येषु स्थापनीयत्वेन विहिताः। तच्च स्थापनं कस्मात्कोणादारभ्य कर्तव्यमिति विषये—ज्यौतिषग्रन्थाः सर्वेऽपि अग्निकोणादारभ्यैव शिलास्थापनं कर्तव्यत्वेन विदधति। यद्यपि पारस्करगृह्ये वास्तुप्रकरणे शालाकर्मणि शालानिर्देशो न कृतः, तथाऽपि भाष्यकारेण अग्निकोणमारभ्यैव शिलास्थापनं लिखितम्। तदेव भाष्यकारवचनानुसारेण सर्वे पद्धतिकाराः आग्नेयकोणमारभ्यैव लिखन्ति। अयमेव चाचारः अस्मासु प्रायशः सर्वेषु देशेषु प्रचलति।

अतश्च यदिदम् आग्नेयकोणादारभ्य शिलास्थापनं तत्सर्वं ज्यौतिषग्रन्थविहित-भाष्यकारेणोल्लिखितं सर्वपद्धतिकारादृतं प्राचीनशिष्टाचारानुमोदितं चेति। अस्माभिरपि इदानीन्तनैरयमेव पन्था अनुसरणीयः। विश्वकर्मप्रकाशाख्ये वास्तुविद्याग्रन्थे संस्कारदीपके च ईशानकोणादारभ्य शिलान्यासो विहितः। वीरमित्रोदये राजनीतिप्रकाशेऽपि ईशानकोणादारभ्य शिलान्यास उक्तः। ग्रन्थ-द्वयमिदं वर्जयित्वाऽन्यत्र क्वचिदपि न ईशानकोण उक्तः। यदि तु क्वचित्कदा-चित्कैश्चित् ईशानकोणस्य ग्राह्यत्वमुक्तं स्यात्तत्तु सर्वानपि अग्निकोणविधायकान् ग्रन्थान् पृष्ठीकृत्य ग्रन्थद्वयमात्रमिदमवलम्ब्य उक्तं भवेत्। यदि च मयाऽपि क्वचित्कदाचिदयं पक्षः अनुमोदितो भवेत्तदनुमोदनं पूर्वोक्तग्रन्थद्वयमात्रप्रामाण्य-पक्षपातिमात्रग्राहिणं पुरुषं प्रति। तस्यापि ग्रन्थद्वयस्य प्रमाणकोटिनिविष्टत्वेन तदीयं प्रामाण्यमनपलपितुमेव कृतम्, परन्तु अग्निकोणपक्ष एव ज्योतिःशास्त्र-भाष्य-पद्धतिकारशिष्टाचारादिभिः सर्वैरप्यनुमोदितः श्रेष्ठतरः पक्ष इति।

१२—अवभृथस्नानविचारः

रुद्र-विष्णुयागादिषु कर्मसमापनान्तेऽवभृथस्नानं क्रियते, तद्युक्तं न वेति विचारे युक्तमित्येव प्रतिभाति। ज्योतिष्टोमादिसोमयागेषु कर्मसमाप्त्यनन्तरं नद्यां तडागे वा अवभृथेष्टिं कृत्वा तत्र सर्वैः स्नानं कर्तव्यमिति विधिरस्ति। अयं चावभृथो मुख्यः परिगण्यते। एवं दर्शपूर्णमासयोरप्यवभृथस्नानं विहितम्। "एष वै दर्शपूर्णमासयोरवभृथः यदपां व्युत्सेकः" इति। अत्र नदी-तडागादिष्व-वगाहनपूर्वकमुख्यावभृथस्नानाभावेऽपि अपां व्युत्सेकरूपगौणावभृथस्नानं तत्र कर्तव्यत्वेन विहितम्। तद्वत् प्रकृतेऽपि रुद्रादियागे कर्मणः साङ्गत्वसिद्ध्येऽन्ते गौणावगाहनस्नानं कृतमपि न दोषाय भवेत्। यद्यपि कुत्रापि विधिर्नावलोक्यते "अवभृथस्नानं कर्तव्यम्", तथापि यागसमाप्त्यनन्तरं पुण्येषु तीर्थेषु तदङ्गत्वेना-वभृथस्नाने कृते न कोऽपि दोषः। प्रत्युतावभृथस्नानकरणेनैव कर्मणः साद्गुण्यं भवेदिति शिष्टाचारस्य वर्त्तमानत्वादवश्यमाचरणीयमवभृथस्नानम्। शिष्टाचारस्यापि प्रामाण्यस्य व्यवस्थापनात् मीमांसाशास्त्रे। अतस्तदनुरोधेनावश्यमेवावभृथस्नान-माचरणीयमिति।

१३—*दत्तकविषये व्यवस्था

अपुत्रस्य सन्तत्यविच्छेदार्थं स्वस्य पैतृकानृण्यसिध्यर्थञ्च सत्यां दत्तकविधानेन पुत्रजिघृक्षायां कीदृशो दत्तको ग्रहीतव्य इति विषये विचारपथं गते सति एतद्विषयक-

---

* स्व० श्रीमन्महाराजाधिराजकाशिराजश्रीमदादित्यनारायणसिंहमहोदयैः वर्त्तमान महाराजाधिराजकाशिराजश्रीविभूतिनारायणसिंह एम० ए० महोदयो यो दत्तकरूपेण गृहीत-स्तस्मिन्नवसरे म० म० पण्डितश्रीविद्याधरगौडमहोदयैः प्रदत्तेयं व्यवस्था वर्त्तते।

सर्वधर्मशास्त्रग्रन्थालोडनेन समासादितोऽयं निर्णयः—

"माता पिता वा दद्यातां यमद्भिः पुत्रमापदि।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः॥"
"दद्यान्माता पिता यं वा स पुत्रो दत्तको भवेत्।"
"ब्राह्मणानां सपिण्डेषु कर्तव्यः पुत्रसंग्रहः।
तदभावेऽसपिण्डो वाऽन्यत्र तु न कारयेत्॥"
"अदूरबान्धवं बन्धुसन्निकृष्टमेव प्रतिगृह्णीयात्।"

इत्यादिमनु-याज्ञवल्क्य-शौनक-वसिष्ठादिवचनात् सति सम्भवे बन्धुसन्निकृष्टस्य जातिकुलगुणादिभिः सदृशस्य मातापितृभ्यां प्रीतिपूर्वकं दत्तस्य दत्तकहोमाद्यनुष्ठानपूर्वकं गृहीतस्य स्वसपिण्डसगोत्रस्य जातकर्मादिभिः संस्कृतस्य च पुत्रत्वं सिध्यतीत्यवगम्यते। तस्यैव च मुख्यं दत्तकत्वम्। अन्येषान्तु गौणत्वमिति गम्यते। सगोत्रसपिण्डाभावे तु असगोत्रसपिण्डस्य दत्तकरूपेण ग्राह्यत्वम्, "ब्राह्मणानां सपिण्डेषु" इति शौनकवचने समानासमानगोत्रजसपिण्डमात्रवाचिपदप्रयोगात्। तच्च सापिण्ड्यं द्विविधम्—एकपिण्डान्वयित्वेन एकशरीरान्वयित्वेन च। "अवश्यञ्चैकशरीरावयवान्वयेन सापिण्ड्यं वर्णनीयम्" इत्यादिना मिताक्षरादौ एकशरीरान्वयित्वरूपसापिण्ड्यस्याऽपि अवश्याभ्युपगमात्। एवञ्चैकपिण्डान्वयिपुरुषालाभे एकशरीरान्वयिरूपसपिण्डस्यैव ग्रहणं कर्तव्यम्। न चैवं शङ्कनीयम्—एकशरीरान्वयिरूपसापिण्ड्यस्य विवाहमात्रविषयकत्वान्न दत्तकविषये प्रवृत्तिरिति।

दत्तक्रीतादिपुत्राणां बीजवप्तुः सपिण्डता।
पञ्चमी सप्तमी तद्वद् गोत्रं तत्पालकस्य च॥

इति बृहन्मनुवचनेन तस्य दत्तकविषयेऽप्यतिदेशदर्शनात्। अत एव च प्रतिग्राह्यपुत्रक्रमनिरूपणावसरे 'तत्राऽयं सपिण्डसगोत्रो मुख्यः, उभयथाऽपि प्रत्यासत्तेः। तदभावेऽसगोत्रः सपिण्डः, सापिण्ड्यप्रत्यासत्तेः' इति समानगोत्रः सपिण्डो मुख्यः, तदभावेऽसमानगोत्रः सपिण्डः। यद्यप्यसमानगोत्रः सपिण्डः समानगोत्रोऽसपिण्डश्चेत्युभावपि तुल्यकक्ष्यौ, एकैकविशेषणराहित्यादुभयोः, तथाऽपि गोत्रप्रवर्तकपुरुषात् सापिण्ड्यप्रवर्तकपुरुषस्य सन्निहितत्वेनाऽभ्यर्हितत्वम्। तेन च 'असमानगोत्रोऽपि सपिण्ड एव ग्राह्यो मातामहकुलीनः' इति च वीरमित्रोदय-दत्तकमीमांसाकारौ कण्ठरवेणोचतुः। एवञ्च सगोत्रसपिण्डाभावे तदनन्तरमसगोत्रसपिण्डस्य स्वमातामहकुलीनस्यैव दत्तकविधया ग्राह्यत्वं शास्त्रतः सिद्ध्यति।

एवं "ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः" इति मनुवचनानुमितं "न ज्येष्ठं पुत्रं दद्यात्" इति मिताक्षरीयं वचनम्, तद्दातारमेव स्पृशति न तु प्रतिग्रहीतारम्। अतश्च ज्येष्ठपुत्रदाननिषेधोल्लङ्घनेन तद्दाने दातुरेव दोषः, न प्रति-

ग्रहीतुः, न वा दत्तकत्वस्याऽसिद्धिः—इति दत्तकमीमांसा-मयूखकारादीनां मिताक्षराशयं वर्णयतामयमेव सिद्धान्तः।

एवं "नैकपुत्रेण कर्तव्यं पुत्रदानं कदाचन" इत्येकपुत्रदाननिषेधपरे "बहुपुत्रेण कर्तव्यं पुत्रदानं विशेषतः" इति शौनकीये वाक्ये बहुपुत्रपदश्रवणमेकत्वसङ्ख्याधिकसङ्ख्याक-पुत्रवत्परं सदनुवादः। अन्यथा पूर्वोत्तरार्धयोः पृथक्पृथग्विधिनिषेधाङ्गीकारे वाक्यभेदप्रसङ्गात् ग्रन्थान्तरविरोधाच्च। अत एव बालम्भट्ट्यां मतान्तरनिरासपूर्वकमयमेव पक्षः सिद्धान्तितः। तस्माद् द्विपुत्रेणाऽपि पुत्रदानकरणे न दोषः।

एवञ्च सति श्रीकाशीमहाराजैः श्रीमदादित्यनारायणसिंहमहोदयैः पूज्यतमायाः स्वमातुराज्ञया यः स्वमातामहवृद्धप्रपौत्रः तन्मातापितृभ्यां प्रीतिपूर्वकं दत्तः दत्तकहोमाद्यनुष्ठानपूर्वकं ज्येष्ठपुत्रोऽसगोत्रसपिण्डो गृहीतः श्रीविभूतिनारायणसिंहमहोदयः, स शास्त्रीयया दृष्ट्या सर्वप्रकारेण दत्तकतामर्हत्येवेति।

१४—सपिण्डीकरणश्राद्धे ज्ञातिभोजनविषये विचारः

सपिण्डीकरणश्राद्धानन्तरं ब्राह्मणान् भोजयित्वा ततो ज्ञाति-भोजनमिति कृत्वा क्वचित् सजातीयाः स्वशक्तिमतिक्रम्यापि भोज्यन्ते, तत् सजातीयभोजनं शास्त्रारूढं न वेति विचारे इत्थम् शास्त्रपर्यालोचननिर्गलितो निर्णयः—ज्ञातिशब्देन सर्वत्र स्मृतिकारैः सपिण्डाः समानोदका एव च गृह्यन्ते, न सजातयः। यथा—

"सर्वे ज्ञातयोऽपोऽभ्यवयन्त्यासप्तमात्पुरुषाद्दशमाद्वा" (पा० गृ० सू० ३।१०।१६)

"ज्ञातयः सपिण्डाः समानोदकाश्च" इति कर्क—हरिहर—गदाधरभाष्ये च।

"तां ज्ञातयोऽन्वारभन्ते" (आप० पितृमेध सू० ४।५)

"ज्ञातयः सकुलाः" इति गोपालस्तद्व्याख्याता।

"सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युपयन्त्यपः" (याज्ञ० प्राय० ३)

"निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः॥" (मनु० ५।७७)

"ज्ञातयः समानगोत्राः सपिण्डाः समानोदकाश्च" (मिताक्षरा)

"निर्दशाहसपिण्डमरणं श्रुत्वा" इति तद्व्याख्या कुल्लूकभट्टकृता।

"सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः।" (अमरकोश २।६।३४)

"सगोत्रः, बान्धवः, ज्ञातिः, बन्धुः, स्वः, स्वजनः" इति षट् सगोत्रस्य इति तट्टीका।

प्रमाणैरेतैर्ज्ञातिशब्देन सपिण्डानां समानोदकानामेव ग्रहणात् तेषामेव तत्र तत्र श्राद्धशिष्टान्नभोजने विधिदर्शनात् तदितरेषां श्राद्धशिष्टान्नभोजने—

"पित्रादीनामथान्येषां[1] श्राद्धशेषान्नभोजनम्।
व्रतिनां विधवानां च यतीनां च विगर्हितम्॥"
"श्राद्धावशिष्टभोक्तारस्ते वै निरयगामिनः।
सगोत्राणां सकुलानां ज्ञातीनां च न दोषकृत्।
विप्रस्त्वन्यगृहे श्राद्धशिष्टान्नं भोजनं चरेत्।
प्राजापत्याद्विशुद्धः स्यात् ज्ञातिभोजे न दोषकृत्॥"

इति निर्णयसिन्धुहेमाद्र्यादिवचनेन निषेधदर्शनात् ज्ञातिभ्य इतरेषां भोजनस्य धर्मशास्त्रे विध्यभावाच्च, यदिदं सजातीयभोजनं तदशास्त्रीयमेव। नैवमाशङ्कनीयं यदिमानि शास्त्राणि श्राद्धशिष्टान्नभोजनस्यैव निषेधपराणि, नतु दिनान्तरे पृथक् पक्वान्ननिषेधपराणि।

"प्रक्षाल्य हस्तावाचम्य ज्ञातिप्रायं प्रकल्पयेत्।
ज्ञातिभ्यः सत्कृते दत्त्वा ब्राह्मणानपि भोजयेत्॥"
"निवृत्ते पितृमेधे तु दीपं प्रच्छाद्य पाणिना।
प्रक्षाल्य पाणी आचम्य ज्ञातीन् शेषेण भोजयेत्॥"

इति मनु-देवल-विहित-ज्ञातिभोजनाच्च अतिरिक्तस्य स्वसजातीयभोजनस्य कुत्रापि विधेरदर्शनात्। अतः सपिण्डनानन्तरं स्वसजातीयभोजनं न शास्त्रविहितमिति तत्करणे अविहितानुष्ठानरूपदोषप्राप्तिमन्तरा न कञ्चन फलविशेषं पश्यामः।

१५—पञ्चायतनदेवतास्थापनविचारः

पञ्चायतनदेवतास्थापने प्रसिद्धा प्राची ग्राह्या, मन्त्रशास्त्रोक्ता देवाभिमुखत्वादिरूपा कल्पिता प्राची वा इति शङ्कायामिदमुत्तरम्—मन्त्रशास्त्रोक्ता कल्पिता प्राच्येव पञ्चायतन-देवता-स्थापनादौ ग्राह्या।

"देवस्य मुखमारभ्य दिशं प्राचीं प्रकल्पयेत्।" इति।
"शम्भौ मध्यगते" इति श्लोकव्याख्याने निर्णयसिन्धूक्तेः।
"पूज्यपूजकयोर्मध्ये प्राची प्रोक्ता विचक्षणैः" इति तच्छ्लोकव्याख्याने

---

१. अन्ये—भिन्नगोत्राः।

पूजाप्रकाशे मित्रमिश्रोक्तेश्च । तस्मान्मन्त्रशास्त्रोक्तकल्पितप्राच्यनुसारेण पञ्चायतन-देवता-स्थापनं युक्ततरम् । केचित्तु केवलवैदिकपूजने मन्त्रशास्त्रोक्तकल्पितप्राचीम-नादृत्य प्रसिद्धप्राच्यनुसारेण पञ्चायतनदेवतास्थापनं वदन्ति । कैश्चित् साम्प्रदायि-कैस्तथैवाचरणात् । देवमन्दिरेषु स्थापनं चोभयथा दृश्यते । मन्त्रशास्त्रोक्तप्राची-ग्रहणपक्षश्च आसेतुहिमाचलं समादृतनिर्णयसिन्ध्वादिमहानिबन्धसम्मतः शिष्टाचार-सम्मतश्च । प्रसिद्धप्राचीग्रहणपक्षश्च टीकोद्धृतानां केषाञ्चित्सम्मतः शिष्ट-सम्प्रदायसिद्धश्च । तस्मात् कल्पितप्राच्यनुसारि स्थापनं शुभावहतरम् । प्रसिद्ध-प्राच्यनुसारि स्थापनमपि न दोषावहम्, किन्तु शुभावहमेव सम्प्रदायसिद्धत्वात् । अत्रानुष्ठाने रुचिरेव नियामिका, न कोऽपि कस्यचिद् गर्ह्य इत्यलं पल्लवितेन ।

१६— मातृपितृमरणे संवत्सरपर्यन्तं शुभकर्मनिषेधः

प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत् ।
न दैवं नापि पित्र्यं वा यावत्पूर्णो न वत्सरः ॥

इति निषेधात् पुत्रेण वर्षपर्यन्तं किमप्यनापत्तौ नानुष्ठेयम् । अन्यमरणेऽपि —

प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियाम् ।
आचतुर्थं ततः पुंसि पञ्चमे शुभदं भवेत् ॥

इति निर्णयसिन्धुधृतमेधातिथिवचनात् चतुःपुरुषपर्यन्तं वर्षं यावत्काम्य-कर्मणोऽननुष्ठानमिति ।

१७—मातापित्रोर्मृते संवत्सरपर्यन्तमार्त्विज्यनिषेधः

मातापित्रोर्मृते संवत्सरं यावदनापदि विष्णुयागादौ आर्त्विज्यं न कार्यम् । "आरम्भो वरणं यज्ञे" इति वचनात् ऋत्विजामपि मधुपर्कानन्तरं यद्यप्याशौचा-भावो निर्णयसिन्ध्वादावुक्तः, तथापि नायं पक्षः सुसमीचीनः ।

१८— गायत्र्या जप-होम-स्वाध्यायादौ प्रणवयोजनविचारः

गायत्र्या जप-होम-स्वाध्यायादौ प्रणवसाहित्यमुक्तं ग्रन्थेषु, तत्र कुत्र कैः कियन्तः प्रणवाः संयोजनीया इति संशये निम्नलिखितः तत्तदाश्रमपुरस्कारेण प्रकारो धर्मशास्त्रेषु निर्णीतः । गृहस्थब्रह्मचारिभिः जपे प्रथमं प्रणवमुच्चार्य ततो व्याहृती-श्चोच्चार्य ततो गायत्री जप्तव्या । होमे तु तथैव प्रयुज्य अन्ते स्वाहाकारोऽपि योजनीयः । सम्पुटगायत्री तु संन्यासिनामेव, एवं षडक्षरापि ।

प्रणवः पूर्वमुच्चार्यो भूर्भुवः स्वस्ततः परम् ।
गायत्री प्रणवश्चान्ते जपो ह्येवमुदाहृतः ॥
एषा सम्पुटगायत्री सर्वपापप्रणाशिनी ॥ इति ।

"उभयतःप्रणवां सव्याहृतिकां जपेत्" इति बौधायनः ।

षडोङ्कारां जपेद्विप्रो गायत्रीं मनसा शुचिः ।
तिस्रो व्याहृतयः पूर्वं पृथगोङ्कारसंयुताः ॥
पुनः संहृत्य चोङ्कारं मन्त्रस्याद्यन्तयोस्तथा ।

इदं द्वयमपि संन्यासिविषयम् ।

स्मृतिरत्नावल्याम्—

सम्पुटैकषडोङ्कारा गायत्री त्रिविधा मता ।
तत्रैकप्रणवा ग्राह्या गृहस्थैर्जपकर्मणि ॥
गृहस्थवत्तु जप्तव्या सदैव ब्रह्मचारिभिः ।
सम्पुटा च षडोङ्कारा भवेतामूर्ध्वरेतसाम् ॥

ऊर्ध्वरेतसो नैष्ठिकब्रह्मचारिवानप्रस्थप्रभृतयः ।

यो न वाञ्छति सन्तानं मोक्षमिच्छति केवलम् ।
अन्त्योङ्कारमसौ कुर्वन्नक्षरं पदमाप्नुयात् ॥ इति ।

स्मृतिसारसमुच्चये—

गृहस्थो ब्रह्मचारी च प्रणवाद्यामिमां जपेत् ।
अन्ते यः प्रणवं कुर्यान्नासौ वृद्धिमवाप्नुयात् ॥ इति ।

संवर्तः—"प्रणवाद्यां तु सन्ध्यायां जपेद् व्याहृतिभिः सह ।" इति ।

मनुः—एतदक्षरमेतां च जपन् व्याहृतिपूर्विकाम् ।
सन्ध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते ॥ इति ।
"प्रणवव्याहृतीः सार्द्धं स्वाहान्ता होमकर्मणि ।" इति ।

नित्यस्वाध्याये तु दशप्रणवा गायत्री अध्येतव्यत्वेनोक्ता । तस्याः स्वरूपं तु स्मार्तोल्लासे स्पष्टम् ।

प्राणायामेऽपि दशप्रणवा गायत्री स्मर्यते सर्वत्र । वस्तुतस्तु योगियाज्ञवल्क्य-सिद्धान्तानुसारेण आदावन्ते च जपे प्रणवसंयोजनं सर्वैः कर्तव्यम् । यत्तु 'गृहस्थो ब्रह्मचारी च प्रणवाद्यामिमां जपेत्' इति मतेन आदावेव प्रणवसंयोजनं हरिहरादिभाष्यविरोधादुपेक्ष्यम् । अतएव वीरमित्रोदयेनापि निजाह्निकप्रकाशे आद्यन्तप्रणवसंयोजनमेव स्पष्टतः समर्थितम् । किन्तु जपादन्यत्र गृहस्थो ब्रह्मचारी च आदिप्रणवां गायत्रीं प्रयुञ्जीत ।

१६—गायत्रीजपे आनुपूर्वीविचारः

'तज्जपस्तदर्थभावनम्' इति (यो०सू० १।२८) योगसूत्ररीत्या अर्थानुसन्धानपूर्वकं

जपः कर्तव्य इति सम्प्रदायः। तत्र 'णियम्' इत्यस्योच्चारणे अर्थावबोधो न संम्पद्यते। एवञ्च जपे 'वरेण्यम्' एव प्रयोज्यम्। इदमेव मतं गायत्रीपुरश्चरणपद्धत्या विश्वामित्र-कल्पेन च समर्थ्यते। 'इयादि पूरणः' (पिङ्गल० सू० ३।२) इति पिङ्गल-छन्दस्सूत्रानुसारेण 'णियम्' इति प्रयोगस्तु केवलं पादपूर्त्तये। तथा च चतुर्विंश-त्यक्षरत्वं गायत्र्याः सुयोज्यते।

२०—गयाश्राद्धभेदादिविचारः

गयाश्राद्धे चिकीर्षिते घृतश्राद्धं पार्वणविधिना कृत्वा गयां प्राप्य तत्र तीर्थ-प्राप्तिनिमित्तकं फल्गुतीर्थे श्राद्धं तीर्थविधिना अर्घावाहनादिवर्जं कुर्यात्। ततः प्रेतपर्वतश्राद्धमारभ्य सर्वाणि श्राद्धानि पार्वणविधिना कार्याणि, नतु तीर्थश्राद्ध-विधिना। तथाहि गयाश्राद्धपद्धतौ 'इदं प्राप्तिनिमित्तकमेव कार्यम्' नतु तदन्तर्गत-प्रेतशिलादितीर्थान्तरेषु दिनान्तरेषु वा कर्तव्यम्, व्यवहाराभावात् तन्त्रादिन्यायात् प्रधानन्यायाच्च। एवमेव सकलशिष्टाचारोऽपि। तथैव प्रामाणिकग्रन्थसिद्धव्यव-हारोऽपि। एवं च प्रेतशिलादौ पार्वणविधिनैव अविकृतेनैव पार्वणं वक्ष्यमाणरीत्या षोडशदैवं करणीयम्।

तीर्थचिन्तामणौ—'गयाप्राप्त्यनन्तरमेवार्घावाहनादिरहितपार्वणेतिकर्तव्यताकं श्राद्धं कुर्यात्' प्रेतशिलादौ तु पार्वणेतिकर्तव्यताकमेव, नत्वर्घावाहनादिसहितम्। गयाश्राद्धस्य प्रकृतिश्राद्धं प्रेतशिलाश्राद्धं तत्र सर्वाङ्गोपदेशात्। एवमेव ढोण्ढुमिश्र-मैथिल-जीवानन्द-रघुनन्दन-अनन्तदेव-वाचस्पति-नारायणभट्टकृतपद्धतौ च।

लघुत्रिस्थलीसेतौ—तच्च श्राद्धं प्राप्तिदिने 'फल्गु'नद्यामप्यावाहनवर्जं तीर्थ-श्राद्धवत्कार्यमित्यविवादम्। प्रेतपर्वत-पदवटादावपि तथैव। तेषां च स्थलतीर्थत्वादिति केचित्। वयं तु—तेषां स्वतन्त्रतीर्थत्वं गयाकृत्यान्तर्गतत्वं वेत्यन्यदेतत्, वस्तुतस्तु सप्तपञ्चादिदिनसाध्यं गयाकृत्यमेकं कर्म। तथाऽथशब्दादिभिः क्रमोक्तेः। अथ जिह्वाया अथ वक्षस इतिवत्। न विभिन्नप्रयोगविधिग्रहे क्रमोऽङ्गं भवतीत्येकं कर्म। तत्र च तीर्थप्राप्तेः सकृन्निमित्तत्वादादावेव तीर्थम्। अन्यानि तु भिन्नानीत्यावाहनादि तत्र कार्यमेवेत्ययं पन्थाः—इति युक्तमुत्पश्यामः।

गयामाहात्म्ये—प्रेतशिलायामावाहनादिसहितसकलं पार्वणमुक्त्वा "सर्व-स्थानेषु चैवं स्यात्पिण्डदानं तु नारद" इति प्रेतपर्वतश्राद्धस्य तदग्रिमश्राद्धेष्वतिदेशः। एवं च गयाश्राद्धं सर्वपार्वणविधिनैव, नतु तीर्थविधिनेति निरवद्यमिति।

२१—दत्तकस्य गयाश्राद्धादिविचारः

गोत्ररिक्थे जनयितुर्न भजेद्दत्त्रिमः सुतः।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा॥ (मनु० ९।१४२)

इति वचनेन जनयितृपिण्डदानस्य दत्तकपुत्रेण अकर्तव्यतया ग्रहीतुरेव पितुः सांवत्सरिकगयाश्राद्धादीनां कर्तव्यताविधानात् "एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्" इत्यादि-अत्रिसंहितावचनेन गयाश्राद्धस्यावश्यकत्वात् "पिण्डोदक-

क्रियाहेतोर्नाम संकीर्तनाय च" इति वचनेन पिण्डदानार्थमेव दत्तकस्य ग्रहणाच्च जनयितृपितृसत्त्वेऽपि मृतग्रहीतृस्वपितृकस्य दत्तकस्य गयाश्राद्धादावधिकारः। शास्त्र-दृष्ट्या जनयितुः पितुः पितृत्वमेव नास्ति, किन्तु लोकव्यवहारेण तत्र गौणमेव पितृत्वम्।

२२—प्रेतोद्देश्यकश्राद्धे दत्तानि सर्वाण्यपि वस्तूनि महापात्रस्यैव

प्रेतोद्देश्यकश्राद्धे यानि वस्तूनि दीयन्ते, तानि सर्वाणि महापात्रस्यैव भवन्ति। पुरोहितेन प्रेतोद्देश्यकं द्रव्यं यदि गृह्येत तर्हि तेन प्रायश्चित्तं करणीयम्। अत्र प्रमाणानि प्रायश्चित्तविवेके अभक्ष्याभक्ष्यप्रकरणे सन्ति, तानि तत्रैव द्रष्टव्यानि।

२३—विप्रहस्ते दर्भासनदानस्य नैष्फल्यम्

ब्राह्मणहस्ते देव-पितृ-मनुष्य-प्राजापत्याग्नि-तीर्थानां सद्भावात् हस्तविन्यस्तेषु दर्भेषु ममेदमिति देवादीनां कलहः स्यात्। अतएव नागरखण्डे हस्ते दर्भासन-दानस्य वैफल्यमुक्तम्—

हस्ते तोयं परिक्षेप्यं नो दर्भास्तु कथञ्चन।
यो हस्ते चासनं दद्यात्तं दर्भं बुद्धिवर्जितः॥
पितरो नाशये तत्र प्रकुर्वन्ति निवेशनम्।

यत्तु प्रचेतसोक्तं 'गृह्णीयुस्ते तु तान् कुशान्' इति तदपि मनसा स्वीकुर्युरिति व्याख्येयम्, नतु हस्ते गृह्णीयुरित्यतो न विरोधः। देवस्वामी तु मन्यते—यः पाणौ दर्भदानप्रतिषेधः स आसनास्तरणार्थदर्भविषयः। यस्तु ग्रहणविधिः स याज्ञवल्क्य-वचनात्तस्य पर्यालोचनया पाणावेव विष्टरार्थं कुशविषय इति—तदयुक्तम्। आसनास्तरणार्थानां दर्भाणां विप्रहस्ते प्रदानाप्रसक्तेः प्रतिषेधानवकाशादिति हेमाद्रौ।

२४—त्यक्तशिखासूत्रस्य पुनर्गार्हस्थ्यप्रवेशे प्रायश्चित्तम्

प्रमादवशात् परित्यक्तशिखासूत्रः कृतोद्वाहः सपितृमातृको कश्चन ब्राह्मण-कुमारः पुनर्गृहस्थाश्रमं चिकीर्षुः पुनरुपनयनादिसंस्कारेण शुद्धो भवितुमर्हति नवेति प्रश्ने—धर्मशास्त्रोक्तविधिना प्रकृतत्र्यब्दप्रायश्चित्तः पुनरुपनयनादिसंस्कार-संस्कृतः 'सर्वेषामेव पापानां जपः प्रायश्चित्तमीरितम्' इत्याद्युक्त्या द्वादशसहस्र-गायत्रीजपेन शुद्धो भवितुमर्हति। प्रमाणं च प्रायश्चित्तविवेके संस्कार-भास्करे च वर्तते।

२५—असच्छिष्यस्य न गुरुधनभागिता

कश्चिद् ब्राह्मणः कस्यचिद्यतेर्धनग्रहणार्थं तच्छिष्यतया साधुरूपेण वर्तमानः पश्चादसच्छिष्योऽयमिति गुरुणा परित्यक्तस्तदीयधनभागी भवितुमर्हति नवेति प्रश्ने नार्हतीति विदुषां परामर्शः। तथा च याज्ञवल्क्यः (व्यवहार० १३७)—

वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः।
क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः॥

क्रमेण प्रतिलोमक्रमेणेत्यर्थः।

२६—सच्छिष्यस्यैव यतिधनभागिता

कस्यचिद्यतेः पार्श्वे लुब्धो ब्राह्मणसुतः छद्मना मठे गतः। यत्र तत्र गत्वा स्वीयैर्ब्राह्मण इति व्यपदिश्यमानो यतेः सर्वस्वं परिगृह्य यतेर्व्यामोहं कृतवान्। स च तादृशः कदाचित् यतिना लक्षितः। ततोऽन्यः कश्चन विरक्तः शिष्यः कृतः। याते च काले कदाचित् यतिः मृतः। पश्चान् स कपटवेषपटुरसच्छिष्यः तां गुरुसम्पत्तिं कस्यचिदन्यस्य यतेः पार्श्वे विक्रीय द्रव्यं गृहीत्वा स्वपत्न्या सह स्वग्रामे तिष्ठति। किं स एव तद्धनमर्हति विरक्तो वा तच्छिष्य इति संशये एष निर्णयः—

तस्य यतेर्यः सच्छिष्योऽन्यतः परावर्त्य तदर्पणमर्हतीति। यथोक्तं याज्ञवल्क्येन—

वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः।
क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः॥

क्रमश्च विपरीतक्रमो बोध्यः। तथा चायमर्थः—'ब्रह्मचारिणो नैष्ठिकस्य धनमाचार्यो गृह्णाति। उपकुर्वाणस्य तु ब्रह्मचारिणः भ्रात्रादयो गृह्णन्ति। यतेस्तु धनं सच्छिष्य एव गृह्णाति। दुर्वृत्तस्याचार्यादेरपि भागानर्हत्वे किमु वक्तव्यं तादृशस्य शिष्यस्येति। वानप्रस्थस्य धनं एकाश्रमिणा धर्मभ्रात्रा लभ्यत इति। तथा च प्रकृतकपटवेषपटोर्गुरुप्रतारकत्वेनासच्छिष्यत्वात् तद्धनलाभानर्हता। अन्य एव सच्छिष्यस्तद्धनं लब्धुं योग्य इति।

२७—कर्मकालेऽशुचिस्पर्शादौ शुद्धिविचारः

यज्ञादिकर्मकाले मूषक-पल्ली-सरट-गोधा-वायस-सच्छूद्रादिस्पर्शे स्नानम्, दर्शने त्वाचमनम्। मार्जारस्यान्याङ्गसंस्पर्शे आचमनम्, चाण्डाल-रजस्वला-शूद्रादिसंभाषणेऽशुचिदर्शनेऽपि स्नानम्, तद्दर्शने त्रिराचमनम्, स्त्रीशूद्राणाममन्त्रकं प्राणायामाः।

मनुः—आचम्य प्रयतो नित्यं जपेदशुचिदर्शने।
सौरान्मन्त्रान् यथोत्साहं पावमानीश्च शक्तितः॥ इति।

बृहस्पतिः—स्त्रियो वृद्धाश्च बालाश्च मक्षिका मशकादयः।
मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः॥ इति।

२८—रोगार्तनित्यकृत्यलोपे विचारः

(क) रोगार्तस्य गृहस्थस्य स्नान-सन्ध्या-देवर्षिपितृतर्पण-वैश्वदेव-देवार्चालोपे "वेदोदितानां नित्यानां कर्मणां समतिक्रमे" (मनु० ११।२०३) इत्यादिवचनेन अनातुरस्य एकस्य परित्यागे एकस्योपवासस्य विधानेऽपि आतुरस्य—

राष्ट्रक्षोभे नृपक्षोभे रोगार्तौ क्षयसूतके।
सन्ध्यावन्दनविच्छित्तिर्न दोषाय कदाचन॥

इति गौतमवचनेन दोषाभावस्मरणेऽपि "अत्रापि यथासंभवमाचरणीयम्, लोपे तु किञ्चित् प्रायश्चित्तम्" इति प्रायश्चित्तमञ्जरीकारवचनात् तत्रैव पूर्वमापदि दिनत्रयातिक्रमे उपवास इत्युक्तत्वाच्च स्नानादेर्नित्यकर्मण एकैकस्य दिनत्रयातिक्रमे एक उपवासः, अनेकेषामतिक्रमे 'प्रतिनिमित्तं नैमित्तिका वृत्तिः' इति न्यायेन उपवासा वृत्तिः प्राप्नोति । एवं च यावत्सु दिनत्रयेषु सन्ध्यादीनां लोपः सञ्जातस्तावन्त उपवासा निमित्तभेदेन कर्तव्यतां प्राप्नुवन्ति । तदशक्तौ उपवासषट्कप्रतिनिधित्वेन एकं प्राजापत्यं परिकल्प्य यावन्त्युपवासषट्कानि तावन्ति प्रत्याम्नायकृच्छ्राणि कार्याणि । तत्राप्यशक्तौ तावत्संख्याका गावो देयाः ।

(ख) ज्वरार्तस्य द्विजस्य स्नान-सन्ध्या-देवर्षि-पितृ-तर्पण-वैश्वदेव-देवार्चालोपेन यो दोषः समजनि तद्दोषपरिहाराय आपदि नित्यकर्मणां दिनत्रयावधिकलोपे एकोपवासस्य धर्मशास्त्रेषु विधानात् एकैकस्य लोपे एकैक उपवास इति पञ्चानां स्नानादीनां दिनत्रयावधिकलोपे पञ्चोपवासा इति आहत्य परिगणनया सार्द्धमासद्वये सन्ध्यादिलोपे पञ्चविंशत्यधिकशतोपवासानां प्राप्तत्वात् तावतामुपवासानां स्वरूपतः कर्तुमशक्यत्वेन तत्प्रतिनिधित्वेन उपवासषट्कस्य एकप्राजापत्यपरिकल्पनया एकविंशतिप्राजापत्यं कृच्छ्राणां प्रतिनिधित्वेन एकविंशतिगोमूल्यं वेति ।

२६—पूर्वसङ्कल्पितस्यानुष्ठानविचारः

(क) यदि कश्चिदार्तः पूर्वं मनसा सङ्कल्पितं बहुदिनसाध्यं गायत्रीपुरश्चरणादिकं कर्म चिकीर्षन् शुक्रास्तादिदोषरहितकालागमनपर्यन्तं जीविते संशयमापन्नस्तादृशदोषदूषित एव काले स्वसङ्कल्पं पूरयितुमभिलषति तदनुष्ठानं शास्त्रीयमस्ति न वेति विचारे इदमुत्तरम्—

स्वसङ्कल्पितस्य स्वेनैव समापनीयस्य षाष्ठन्यायसिद्धत्वात् दोषापगमं यावज्जीवनस्यानिश्चितत्वेन सङ्कल्पितकर्मणोऽनन्यगतिकत्वात् अनुष्ठातव्यत्वमेव ।

"कालेऽनन्यगतिं नित्यां कुर्यान्नैमित्तिकीं क्रियाम् ।"

तथा—"नैमित्तिकं तु कुर्वीत सावकाशं न यद् भवेत् ।"

इत्यादिवचनबलादुत्तरत्र—अतएव "सावकाशं च सम्भवति, निरवकाशस्य कर्मणो दोषयुक्तेऽपि कालेऽनुष्ठानं न दोषायेति गम्यते" इति निरवकाशस्यानन्यगतिकस्य प्रतिप्रसवोऽर्थात् सिद्धः ।

कर्म कुर्यात्फलावाप्त्यै चन्द्रादिशोभने बुधः ।
स्वस्थकाले त्विदं सर्वं नार्तकालमपेक्षते ॥
स्वस्थकाले त्विदं सर्वं सूतकं परिकीर्तितम् ।
आपद्गतस्य सर्वस्य सूतकेऽपि न सूतकम् ॥

व्यतीपातोऽथ संक्रान्तिस्तथैव ग्रहणं रवेः ।
पुण्यकालास्तदा सर्वे यदा मृत्युरुपस्थितः ॥

एवञ्च पूर्वोक्तेन पुरुषेण शुक्रास्तादिदोषयुतेऽपि स्वसङ्कल्पितस्यानुष्ठानं यदि क्रियते कार्येत वा तच्छास्त्रीयमेवेति ।

(ख) केनचिन्मानसिकः सङ्कल्पः कृतो गायत्रीपुरश्चरणस्य पूर्वम् । स च मरणावस्थां प्राप्तः, अतस्तेन किं कर्तव्यमिति संशये उत्तरमिदम्—

स्वपुत्रादौ विश्वासयोग्ये प्रतिनिधौ च सति तद्द्वारा कारणीयं शुक्रास्तादिदूषितसमयानन्तरम् । तादृशपुत्राद्यलाभे तु वैद्यादिद्वारा स्वात्मज्ञानद्वारा च मरणनिश्चये सति स्वयमपि कालाशुद्धावपि अनुष्ठानं कर्तव्यम्, मानसिकसङ्कल्पस्याप्यारम्भरूपत्वात् आरब्धकर्मणो नित्यत्वात् नित्यानां शुक्रास्तादिदोषाभावादिति ।

३०—श्रावणमासादौ गवाश्वादिप्रसूतिविचारः

कश्चिन् श्रावणमासादौ गवाश्वादिप्रसूतिसंभवे किं कर्तव्यमिति विचारे—

माघे बुधे च महिषी श्रावणे वडवा दिवा ।
सिंहे गावः प्रसूयन्ते स्वामिनो मृत्युदायकाः ॥

इति गार्ग्यपरिशिष्टवचनेन माघे बुधे चेति समुच्चयार्थकचकारश्रवणात् माघबुधयोः समुच्चितयोरेव निमित्तत्वं न तु पृथग्भूतयोः । यथा गौश्च अश्वश्चेत्यत्र चकारश्रवणाद् विशिष्टानामेव विधानं तद्वत् ।

एवं "श्रावणे वडवा दिवा" इत्यत्रापि चकारानुकर्षणात् समुच्चितयोरेव श्रावणदिनयोर्निमित्तत्वं न तु पृथग्भूतयोः ।

एवं च माघमासावच्छिन्नबुधवारे महिषीप्रसवे, श्रावणमासावच्छिन्नदिने वडवाप्रसवे च दोषः । गोप्रसूतौ तु सिंहस्यैव केवलस्य निमित्तत्वम् । एवं च सति शान्तिरत्ने कोष्ठान्तर्गतभागे "माघे बुधे च" इत्यत्र चकारोपादानान्माघबुधयोः समुच्चयः दिवेत्यस्यानन्तरमपि चकारोऽनुषञ्जनीयः । उद्द्योते विशेषः— "अत्र माघबुधयोः श्रावणदिनयोश्च विशिष्टयोर्निमित्तता, न च विशिष्टोद्देशे वाक्यभेदात्प्रत्येकं निमित्ततेति वाच्यम्, महिषीप्रसवस्योद्देश्यत्वेनान्यतरविवक्षायामपि वाक्यभेदात् । अतः पौरुषेयत्वाद्वाक्यभेदो नेति समाधेयम्" इति प्रथमत उक्त्वा अन्ते "श्रावणान्तर्गते दिवसे वडवाप्रसवश्चेद्विशेषतो दुष्टः, माघे महिषीप्रसवोऽपि बुधे चेत्तथा, बुधरहिते माघे महिष्याः, श्रावणे रात्रौ तदितरमासे दिवा च वडवायाः प्रसवश्चाल्पदोषदः" इति । "श्रावणे च विशेषतः" इति विशेषपदस्वारस्यात् यत्केवलस्यैव दिनस्य बुधस्य वा निमित्तत्वमुक्तं तत्परस्परविरुद्धत्वेन प्रक्षिप्तत्वावगमादुपेक्षणीयम् । एवं च सति श्रावणमासि दिने यदि वडवा प्रसूयेत, माघमासान्तर्गतबुधे च महिषी प्रसूयेत, तदानीमेव तद्दोषपरिहारार्थं शान्त्यादिकमनुष्ठेयमिति ।

माघश्रावणौ तु न सङ्क्रान्त्या ग्राह्यौ, किन्तु पूर्णिमान्तमासेन। सिंहेति सिंहस्यैव सङ्क्रान्त्योपादानात्, एवं च श्रावणस्याधिमासत्वे उभावपि श्रावणौ दुष्टाविति।

"त्यागो विवासो दानं वा कृत्वाऽप्याशु शुभं लभेत्।"

इति वचनात्सति संभवे गवादेर्दानादिकमेव विधेयम्। निष्क्रयदानप्रमाणं तु न काप्युपलभामहे।

३१—मृतवृषभस्य संस्कारविचारः

कश्चिदुत्सृष्टवृषः स्वायुषः क्षयेण कालकवलितोऽभूत्। तच्छवस्य प्रतिपत्तिकरणे ग्रामव्यवहारानुसारिणि कलिकालप्रभावान्वितचर्मकारैरस्वीकृते तथैव शवस्थितौ दुर्गन्धादिदोषभयेन तद्ग्रामनिवासिभिः कतिपयैर्वैश्यजातीयैः संहत्य तच्छवप्रतिपत्तिकरणं निश्चित्य स्वयमेव ग्रामाद् बहिर्नीत्वा देशप्रथानुसारेण निखननादिकमनुष्ठितम्। ततोऽन्ये कतिपयजनास्तान् निन्दितकर्मकारितयाऽधिक्षिपन्ति। एवं स्थिते शास्त्रतस्ते निन्दितकर्मानुष्ठातारो नवेति प्रश्ने 'इदमुत्तरम्—धर्मार्थं परोपकारबुद्ध्या तैः शवनिर्हरणस्य तत्संस्कारस्य च विधानात् ते न दुष्यन्ति। तथाहि—

"वोढा चैवाग्निदाता च सद्यः स्नात्वा विशुद्ध्यति।"

इति निर्णयसिन्धौ धर्मार्थं शवनिर्हारप्रसङ्गेनापरार्कधृतवृद्धपराशरोक्तेः, अत्र वचने ब्राह्मणपदमुपलक्षणमिति तट्टीकायां रत्नमालायाम्। एवमग्निदातेत्युपलक्षणम्, संस्कारकर्तुः पूर्वार्द्धे संस्कारपदोपादानात्। एवञ्च धर्मार्थं वृषभशववोढारस्तत्खननादिकर्तारश्च न दोषभाज इति।

३२—छायादानविचारः

दीयतां राजशार्दूल छायादानं विशेषतः।
दद्यात्ते प्रीतये राजन् कृष्णां धेनुं पयस्विनीम्॥

इति शनिग्रहशान्तिकर्मणि विहितं छायादानं यद्यङ्गत्वेन विहितं यद्वा कर्मसमृद्ध्यर्थम्, उभयथापि तदाज्येनैव कर्तव्यं छायादानमिति।

कांस्यपात्रे स्थिताज्यं च आत्मरूपं निरीक्ष्य तु।
ससुवर्णं तु यो दद्यात्सर्वविघ्नोपशान्तये॥

इत्यादिवचनात्कांस्यपात्रं सुवर्णमाज्यम्, तत्र च स्व-स्वरूपनिरीक्षणमित्यङ्गचतुष्टयमाज्यस्थाने, तैलग्रहणे आज्यरूपाङ्गाभावादङ्गहीनं छायादानं भवेत्। यथा सोमयागाद्यङ्गभूतदीक्षणीयेष्टेः स्वाङ्गसहिताया एवानुष्ठानम्, तत्र केनाप्यङ्गेन न्यूनायां दीक्षणीयेष्टौ ज्योतिष्टोमाद्यङ्गत्वं न सेत्स्यतीति यथा सिद्धं तद्वदेवात्रापि स्वाङ्गसहितस्यैव छायादानस्य प्रधानोपकारकत्वं भवति। अतः शनिप्रीत्यर्थं तैलस्यावश्यकत्वेऽपि पृथगेव तस्य दानं कर्तव्यम्, नतु छायादाने तदन्तर्भाव्यम्। अतएव शनिग्रहदान-

विधौ छायादानात्पृथगेव तैलदानं शनिमूर्तिसहितं पृथक्त्वेन च विहितम्। अतश्च शनिग्रहशान्तावाज्येन यच्छायादानं परम्परागतमनुष्ठीयते तदेव साधु, नान्यदिति निर्णयामः।

३३—कूपादिजलेषु स्नानविचारः

यत्र नदा नद्यस्तडागा वा न सन्ति तत्राल्पजलोदके कूपे यन्त्रादिविनिःसृतोदके वा स्नानफलप्राप्तिर्भवति न वेति विचारे—

नद्यां तु विद्यमानायां न स्नायादुष्णवारिणा।
न स्नायादल्पतोये तु विद्यमाने बहूदके॥ इति।

यत्र नद्यः सन्ति तत्र ताः परित्यज्य अन्यत्र न स्नातव्यम्। विशेषतश्च—

नद्या यच्च परिभ्रष्टं नद्या यच्च विनिस्सृतम्।
गतप्रत्यागतं यच्च तत्तोयं परिवर्जयेत्॥

इति व्यासवचनेन यन्त्रद्वारा विनिस्सृते जले स्नाननिषेधाच्च। तडागाम्भस्येव स्नानं शास्त्रसम्मतं स्नानफलदम्, न तु यन्त्रोद्धृतनालीद्वाराऽऽगतजलेन स्नाने तादृशं फलम्। तेन दृष्टफलं शरीरमलोद्वासनं कदाचित् भवितुमर्हति, न त्वदृष्टरूपं स्नानजं फलम्। अतस्तडागादिसत्त्वे तत्रैव स्नानादिकं कर्तव्यमिति।

३४—ऊनमासिकादिश्राद्धविचारः

शास्त्रेषु षोडशमासिकेषु ऊनमासिक-ऊनषाण्मासिक-ऊनाब्दिकश्राद्धविषये मतभेदो दृश्यते। तत्र "मृतेऽहनि तु कर्तव्यम्" इति वचनानुसारेण मासिकं द्व्याहे भवति। तच्चाशौचान्ते एकादशाहे अनुष्ठीयते। एवं "मृतेऽहनि तु कर्तव्यं प्रतिमासं तु वत्सरम्" इत्युक्त्या आब्दिकस्यापि द्व्याह एव कालः, तस्याप्यशौचान्ते एकादशाहे आद्यश्राद्धेन सह तन्त्रेणानुष्ठानम्। एतत्पक्षे मासिकस्य प्रथमाब्दिकस्य चैकादशाहे एवानुष्ठानात् 'एक-द्वि-त्रिदिनैरूने' इति वचनानुसारेण ऊनमासिकस्य माससमाप्तेः पूर्वमेकादिन्यूने दिवसे अनुष्ठानमिति। आब्दिकस्याप्यब्दपूर्तेः एकादिन्यूने दिवसे अनुष्ठानम्। एवं षाण्मासिकस्यापि षष्ठमासारम्भदिने अनुष्ठानात् ऊनषाण्मासिकस्य च मासोनदिने अनुष्ठानम्। मासिकम्, ऊनमासिकम्, षाण्मासिकम्, ऊनषाण्मासिकम्, द्वादशमासिकम्, ऊनाब्दिकं चेति क्रमः पर्यवस्यतीति प्रथमप्रकारः।

"आद्यश्राद्धं क्षयेऽहनि", "मासादौ मासिकं कार्यमाब्दिकं वत्सरे गते" इति लौगाक्षिवचनानुसारेण द्वितीयमासारम्भदिने प्रथममासिकस्य द्वितीयवर्षारम्भदिने प्रथमवार्षिकस्य चानुष्ठानं प्राप्नोति। तन्मते षाण्मासिकमपि सप्तममासारम्भदिने अनुष्ठेयत्वेन प्राप्नोतीति ततः पूर्वतनेषु दिवसेषु ऊनमासिक-ऊनषाण्मा-

सिक-ऊनाब्दिकानां क्रमेणानुष्ठानमिति । एतत्पक्षे ऊनमासिक-ऊनषाण्मासिक-मासिक-ऊनाब्दिक-आब्दिक-शब्दानां तत्तच्छ्राद्धे ऊहः कार्य इति ।

३५—पतिमृतौ पत्या साकं चितारोहणमीहमानाया रजस्वलायाः शुद्धिविषये विचारः

अन्त्येष्टिपद्धतौ शुद्धिमयूखे च—

यदा स्त्रियामुदक्यायां पतिः प्राणान् परित्यजेत् ।
द्रोणमेकं तण्डुलानामवहन्याद्विशुद्धये ॥
मुसलाघातैस्तदा साऽसृक् स्रवते योनिमण्डलात् ।
विरजस्कां मन्यमाना स्वे चित्ते तदसृक्क्षयम् ॥
दृष्ट्वा शौचं प्रकुर्वीत पञ्चमृत्तिकया पृथक् ।
त्रिंशद्विंशति दश च गवां दद्यादहःक्रमात् ॥
विप्राणां वचनाल्लब्ध्वा समारोहेद् हुताशनम् ।
नारीणां सरजस्कानामियं शुद्धिरुदाहृता ॥ इति ।

तन्मूलं मृग्यं गारुडे ।

३६—ज्वराभिभूताया रजस्वलायाः शुद्धिविषये विचारः

ज्वरावस्थायां रजस्वलायाः शुद्धिविषये तूशनाः—

ज्वराभिभूता या नारी रजसा च परिप्लुता ।
कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मणा ॥
चतुर्थेऽहनि संप्राप्ते स्पृशेदन्यां तु तां स्त्रियम् ।
सा सचैलावगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत् ॥
दश-द्वादशकृत्वो वा आचामेच्च पुनः पुनः ।
अन्ते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा ॥ इति ।

आतुरे स्नान उत्पन्ने दशकृत्वो ह्यनातुरः ।
स्नात्वा स्नात्वा स्पृशेदेनं ततः शुध्येत्स आतुरः ॥ (पाराशरस्मृ० ७।२१)

दद्याच्छक्त्या ततो दानं पुण्याहेन विशुद्ध्यति ।
न सूतकादिदोषोऽस्ति ग्रहे होमजपादिषु ॥
ग्रस्ते स्नायादुदक्यापि तीर्थादुदृधृत्य वारिणा ॥ इति ।

रजस्वलायाः स्नानविधिं चाह—

स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला।
पात्रान्तरिततोयेन स्नानं कृत्वा व्रतं चरेत्॥
सिक्तगात्रा भवेदद्भिः साङ्गोपाङ्गा कथञ्चन।
न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेत्॥ इति।

त्रिरात्रमेकरात्रं वा समुपोष्य ग्रहणे स्नानदानाद्यनुष्ठाने महाफलमिति।

३७—सन्निहितातिकाले मौञ्जीबन्धे मीनगेऽर्के गुर्वादिदोषाभावः

गुरौ द्वादशके व्रतप्रकरणविहितवर्षसमाप्तौ उपनयनं कार्यं नवेति प्रश्ने कार्यमेवेत्युत्तरं निर्णयसिन्धौ--

"शुद्धिर्नैव गुरोर्यस्य वर्षे प्राप्तेऽष्टमे यदि।
चैत्रे मीनगते भानौ तस्योपनयनं शुभम्॥
जन्मभादष्टमे सिंहे नीचे वा शत्रुभे गुरौ।
मौञ्जीबन्धः शुभः प्रोक्तश्चैत्रे मीनगते रवौ॥" इति।
"व्रते जन्मत्रिखारिस्थो जीवोऽपीष्टोऽर्चनात्सकृत्।
शुभोऽतिकाले तुर्याष्टव्ययस्थो द्विगुणार्चनात्॥" इति।

३८—क्लीबान्धादिविवाहविषये विचारः

षण्ढान्धबधिरस्तब्धजडगद्गदपङ्गुषु।
ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितम्॥

इति स्मृतिरत्नधृतवचनेन षण्ढादीनामुपनयन-विवाहादिसंस्कारविधिश्रवणात्।
"कर्मस्वनधिकारेऽपि संस्कारार्हाः" इति श्रुतिः।

मूकान्धादिषु चोद्वाहे कन्यास्वीकरणं विना।
पाणिग्रहं विना सप्तपदानां क्रमणं विना॥
विप्रेण कारयेत्सर्वं पङ्गोः सप्तपदान्यपि॥

इत्यादिस्मृतिमुक्ताफलधृतवचनात्। "यद्यर्थिता तु दारैः स्यात्" (मनु० ९।२०३) इति मनूक्तेश्च। तस्य च क्लीबस्य स्मार्त्तेष्वधिकारात्तदर्थो विवाहोऽसत्यामप्यर्थितायां युक्त एवेति मेधातिथिव्याख्यानात्। मेधातिथि-व्याख्याने उपक्रमोपसंहारयोर्विवाहस्य विहितत्वात्। अस्ति तु क्लीबादीनां दारपरिग्रहः इति जीमूतवाहन-लेखनात्। 'केचित् स्तब्धमूकत्वादिदोषदुष्टानां विवाहसंस्कारो नेति वदन्ति, तदपास्तम्' इति सरस्वती-विलासवचनात्।

धृतराष्ट्रादीनामन्धानामपि विवाहरूपाचारदर्शनाच्च क्लीबादीनामपि दारसंग्रहोऽस्त्येवेति सिद्ध्यति। यद्यपि "अनंशौ क्लीबपतितौ" (मनु० ६।२०१) इति मनुवचनेन क्लीबादीनां भागहरत्वं नास्ति, तथापि स्नेहेन कारुण्यादिना वा कारणेन भ्रात्रादिभिः क्लीबादिभ्यो दत्ते भागे तैश्च बहुकालं तद्धने निर्विवादं भुङ्क्ते पुनः कालात्ययदोषदुष्टस्य तस्य न पुनर्दायादिभिः प्रत्याहरणं कर्तुं शक्यते। क्लीबस्य अनंशित्वेऽपि प्रतिग्रहे व्यवसायादौ चाधिकारात्। क्लीबादीनां विवाहानर्हताविषये यज्जैमिनीयन्यायमालायाः प्रमाणत्वेन कथनं तत्सर्वथाऽज्ञानविजृम्भितम्। तत्र हि यज्ञेऽधिकारानधिकारविचारः कृतः। अन्धपङ्ग्वादीनामचिकित्स्यरोगिणां यज्ञेऽनधिकारनिरूपणस्यैव तद्विषयत्वात्। नहि विवाहो यज्ञरूपः, किन्तु दारपरिग्रहरूपः। तस्य यज्ञत्वं कुत्रापि स्मृतिषु शास्त्रान्तरेषु वा नोक्तम्। किञ्च 'यजतिचोदनाचोदितत्वमेव यागत्वम्'। नहि कुत्रापि विवाहो यजति चोदनाचोदितः। अतः सर्वथा न तद्विषये जैमिनीयन्यायमालावचनं प्रामाण्यमर्हतीति।

३९—सापिण्ड्याद्यभावे दूरसम्बन्धिनोर्मिथो विवाहविषये विचारः

कस्यचिद् ब्राह्मणस्य मातुलकन्या केनचिद् ब्राह्मणेन ऊढा, साच मृता, अनन्तरं स वोढा ब्राह्मणः कामप्यन्यामुवाह। तस्यां पुत्रः समजनि। स इदानीं परिणयनकालमवाप्तः। तेन सह स ब्राह्मणः स्वां दुहितरं विवाहयितुमिच्छति। अतोऽयं विवाहः धर्मविरुद्धो न वेति जिज्ञासायाम्—धर्म्य एवेति प्रतिवचनम्। अनयोर्वधूवरयोः सापिण्ड्याभावात् सगोत्रत्वाभावाच्च याश्च काश्चित्सपिण्डसगोत्रत्वरहिता अपि विवाहसम्बन्धे विरुद्धाः, यथा भार्यास्वसुर्दुहिता पितृव्यपत्नीस्वसा च तथा। बौधायनोऽपि—

"मातुः सपत्न्या भगिनीं तत्सुतां च विवर्जयेत्।" इति।

"मातृष्वसुः सापत्नपुत्रकन्याप्यविवाह्या" इत्याद्या निर्णयसिन्धौ तृतीय—परिच्छेदे उक्ताः। तास्वप्यस्या अभावात्। तथा—

वाक्सम्बन्धकृतानां तु स्नेहसम्बन्धभागिनाम्।
विवाहोऽत्र न कर्तव्यो लोकगर्हा प्रसज्ज्यते॥

इत्यादिवचनानां तु मूलाभावाच्चिन्त्यतैवोक्ता निर्णयसिन्धुकृता। अतोऽस्य सम्बन्धस्य विवाहप्रतिबन्धकशास्त्रीयदोषाभावात् संमतत्वमेवेति व्यवस्था।

४०—स्वपुत्रस्य स्वपितृष्वसुः पौत्र्या साकं विवाहो न शास्त्रसम्मतः

रमाबाई मीराबाईदेव्याः पितुःष्वसा भवति। अतः मीराबाईदेव्याः पुत्रस्य रमेशचन्द्रस्य विवाहः रमाबाईदेव्याः पौत्र्या साकं भवितुमर्हति न वेति जिज्ञासायामिदमुत्तरम्—

शास्त्रदृष्ट्या पितुःस्वसा मातृसदृशी स्मृता। अतः वरवधूत्वेनोपस्थिताविमौ भ्रातृभगिनीसमानौ। अनयोर्विवाहः कथमपि नैव भवितुमर्हति। वस्तुतः विवाहस्य प्रयोजनं सापिण्ड्यनिवृत्तिः। सापिड्यं च एकशरीरावयवान्वयः। एकस्य पितुर्मातुर्वा

शरीरावयवः येषु पुत्र-पौत्रादिषु साक्षात्परम्परया वा शुक्रशोणितरूपेणानुस्यूतस्तत्रैव सापिण्ड्यव्यवहारः। वध्वा वरस्य सापिण्ड्यं स्वतो न भवति, किन्तु कूटस्थपुरुष-[1]द्वारैव। तथाहि—

"पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा।"

इति याज्ञवल्क्यस्मृत्यनुसारं प्रकृते वरस्य माता मूलपुरुषेण (नृसिंहरामेण) पञ्चमी भवति। रमाबाईदेव्याः पौत्र्याः सूरजबाईदेव्याः पिता (किशनलालः) मूलपुरुषेण पञ्चमः सम्पद्यते। तस्मात्सापिण्ड्यस्य निवृत्तेरसम्भवादनयोर्विवाहः न शास्त्रसम्मतः।

४१—निवृत्तसापिण्ड्ययोरेव विवाहः शास्त्रसम्मतः

मातामही भ्रातृपुत्रो मातुर्मातुलभ्राता समानबन्धुस्तदपेक्षया ऊर्ध्वतना अधस्तनाश्च ये पञ्चपुरुषास्तेभ्यः प्रत्येकं पञ्चमी कन्या न विवाह्या। एवं पितामह्या भ्रातुष्पुत्रः पितुर्मातुलभ्राता सपितृबन्धुस्तदपेक्षया ऊर्ध्वतना अधस्तनाश्च ये सप्तपुरुषास्तेभ्यः प्रत्येकं सप्तमी कन्या न विवाह्या।

४२—सापिण्ड्यनिवृत्तौ वरकन्ययोर्विवाहविचारः

वरकन्ययोरुभयोर्मातामहगोत्रस्यैक्येऽपि परस्परं सपिण्डताऽभावे विवाहो भवितुमर्हति। सपिण्डतायां सत्यां यदि वरस्य मातामहात् पञ्चमान्तर्वर्त्तिनी कन्या स्यात्तर्हि सा विवाह्या न भवतीति।

४३—विवाहाङ्गचतुर्थीकर्मणि पत्युर्दक्षिणत एव भार्याया उपवेशनम्

प्रयोगपारिजाते—संस्कार्यपुरुषो वाऽपि स्त्री वा दक्षिणतः शुभा।
संस्कारकर्त्ता सर्वत्र तिष्ठेदुत्तरतः सदा॥ इति।

धर्मप्रवृत्तौ— जातके नामके चैव ह्यन्नप्राशनकर्म्मणि।
तथा निष्क्रमणे चैव पत्नी पुत्रश्च दक्षिणे॥
गर्भाधाने पुंसवने सीमन्तोन्नयने तथा।
वधूप्रवेशने चैव पुनः संधान एव च॥
प्रदाने मधुपर्कस्य कन्यादाने तथैव च।
कर्मस्वेतेषु भार्या वै दक्षिणे तूपवेशयेत्॥ इति।

स्मृतिसंग्रहे— व्रतबन्धे विवाहे च चतुर्थ्यां सह भोजने।
व्रते दाने मखे श्राद्धे पत्नी तिष्ठति दक्षिणे॥ इति।

---

१. कूटस्थो मूलपुरुषः।

धर्मप्रवृत्तौ— आशीर्वादेऽभिषेके च पादप्रक्षालने तथा।
शयने भोजने चैव पत्नी तूत्तरतो भवेत्॥ इति।

मूलशान्तौ — 'पत्नी वामाङ्गतः प्रोक्ता मूलाऽश्लेषाविधानयोः।' इति।

संस्कारसंग्रहे— 'सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः शुभा।' इति।

इत्यादिवचनेभ्यः सर्वेषु धर्मकार्येषु वधूप्रवेशे च दक्षिणत एव पत्न्या उपवेशनविधानाद्वधूप्रवेशे दक्षिणत एव भार्याया उपवेशनम्। एवमेव सर्वे संस्कारभास्करादयो निबन्धा आमनन्ति।

वामे सिन्दूरदाने च वामे चैव द्विरागमे।
वामेऽशनैकशय्यायां भवेज्जाया प्रियार्थिनी॥

इति संस्कारभास्करादुद्धृतं वचनं द्विरागमनपरम्। द्विरागमनञ्च तृतीयादिविषमवर्षे यो वधूप्रवेशः स उच्यते।

विवाहानन्तरं क्रियमाणं फलकभ्रमणाख्यं कर्म न द्विरागमनस्थानापन्नम्। अत्र द्विरागमनसंबन्धिनः पदार्थस्य कस्यचिदभावात्, तत्स्थानापन्नत्वेन क्वचिदपि प्रमाणग्रन्थेष्वनुपलम्भात्। अतो द्विरागमनधर्मः पत्न्या वामत उपवेशनादि नात्र प्राप्नोति। न वा वामभागोपवेशनार्हेषु कर्मसु क्वचिदिदमन्तर्भवति। अतः "सर्वेषु धर्मकार्येषु" इत्यादिवचनैः प्राप्तं दक्षिणत उपवेशनमेवात्रापि कर्तव्यम्, सामान्यत प्राप्तस्य निषेधे सङ्कोचे वा प्रमाणानुपलम्भादिति।

४४—अग्निहोत्रिणामशने ग्राह्याग्राह्यविचारः

(क) उपवसथदिनेऽग्निहोत्रिणा हविष्यान्नमशितव्यम्। हविष्यान्नं च—

हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः।
माषकोद्रवगौरादि सर्वालाभेऽपि वर्जयेत्॥ (कात्या० स्मृ० ६।१०)

गौराः—गौरसर्षपाः। आदिपदेन चणक-मसूर-कुलित्थादि ग्राह्यम्।

(ख) अग्निहोत्रिणा उपवसथदिने किं नाशितव्यमित्यत्र कात्यायनः—

शाकं मांसं मसूरं च चणकं कोरदूषकान्।
माषान्मधु परान्नं च वर्जयेदौपवस्तके॥ इति।
तिलमुद्गादृते शैम्ब्यं सस्यगोधूमकोद्रवौ।
चणकं देवधान्यं च सर्वशाकं तथैक्षवम्॥
सज्जीक्षारं यवक्षारं टङ्कणं क्षारमेव च।
व्रतस्थो वर्जयेन्नित्यं सामुद्रलवणं तथा॥ इति परिशिष्टे।

(ग) अग्निहोत्रिणा गुड-गोरसमन्तरा किमपि पराग्निपक्वं न भक्षणीयम्।

(घ) अग्निहोत्रिणा अन्याग्निहोत्रिगृहेऽपि भोजनं न कर्तव्यम्। यदि स स्वेन सह स्वाग्निं निनयेत् तदा तत्र स्वाग्निपक्वं भोक्तुमर्हति।

४५—अग्निहोत्रिणा प्रवासे पृष्ठोदिविविधानं विधायैव भोक्तव्यम्

अग्निहोत्रिणा प्रवासे कात्यायनपरिशिष्टसूत्रानुसारं पृष्ठोदिविविधानं विधायैव भोजनं कर्तव्यम्। पृष्ठोदिविविधानं कात्यायनप्रणीतपरिशिष्टविहितमस्ति उतान्येन केनचिद्विदुषा प्रणीतं वेत्यत्र विद्वांसो विप्रतिपद्यन्ते।

४६—अग्निहोत्रिणः परदेशगमने पुत्रादीनां कर्तव्यनिर्णयः

अग्निहोत्री यदा परदेशं स्वाग्निं विहाय गच्छेत्तदा तत्पुत्रादयः पञ्चमहायज्ञमनुतिष्ठेयुः। ते "पितृभ्यः स्वधा नमः" इति बलिं दद्युः। पितुः प्रतिनिधित्वेन तदाज्ञया एतादृशमनुष्ठानं शास्त्रसम्मतम्। जीवत्पितृकः पुत्रः पितुः पार्थक्येन यदि निवसति तदा सः पञ्चमहायज्ञादिकं पृथक् कुर्यात्। पञ्चमहायज्ञे जीवत्पितृकः मृतपितृकश्चेत्युभावप्यधिक्रियेते। पञ्चमहायज्ञानुष्ठानात्पूर्वं समागतान् परिव्राजकब्रह्मचारिप्रभृतीन् श्रोत्रियादीनतिथींश्च भिक्षा-भोजनादिदानेन सन्तोषयेयुः।

अकृते वैश्वदेवे तु भिक्षुके गृहमागते।
उद्धृत्य वैश्वदेवार्थं भिक्षां दत्त्वा विसर्जयेत्॥
निर्वृत्ते वैश्वदेवे तु यदन्योऽतिथिराव्रजेत्।
तस्याप्यन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत्॥ इति स्मरणात्।

गृहे बालवृद्धा अपि पञ्चमहायज्ञानन्तरमेव भोजनं कुर्युः, "बालज्येष्ठा गृह्या यथार्हमश्नीयुः" (पा० गृ० सू० २।९।१५) इति पारस्करवचनात्।

४७—नान्दीश्राद्धं स्वस्तिवाचनात्प्राक् पश्चाद्वेति विचारः

ये नान्दीश्राद्धं कर्मान्तःपातित्वेनान्तरङ्गं मन्यन्ते ते पूर्वं स्वस्तिवाचनं विधाय पश्चात् नान्दीश्राद्धमनुतिष्ठेयुः। ये तु कर्मबहिर्भूतत्वं मत्वा बहिरङ्गं मन्यन्ते ते प्रथमं नान्दीश्राद्धं विधाय परस्तात् स्वस्तिवाचनं कुर्युः। उभयमपि शिष्टाचारसम्मतम्।

४८—चान्द्रायणव्रतविषये विचारः

शुक्लपक्षस्य प्रतिपदमारभ्य पौर्णमासीपर्यन्तं तिथिसमुदायं गणयित्वा यदा सौरेषु पञ्चदशसु दिनेषु परिसमाप्तिर्भविष्यति, एवं कृष्णप्रतिपदमारभ्य अमावास्यापर्यन्तं तिथिसमूहं गणयित्वा सौरेषु पञ्चदशसु दिनेषु तत्समाप्तिर्भविष्यति तदैव यवमध्यं चान्द्रायणं कर्तव्यम्। सौरदिने तिथिसम्बन्धस्तु यस्मिन् कस्मिन् समयेऽपि भवति चेत्क्रमानुसारेण तत्सौरदिनस्य तत्तिथित्वेन ग्रहणं कर्तव्यम्।

यथा—अमावास्यायां द्वित्रदण्डानन्तरं प्रतिपत्प्रवृत्तिः परेद्युश्च पञ्चदशदण्ड-पर्यन्तं प्रतिपत् तदा पूर्वेद्युर्व्रतारम्भः—एकग्रासमात्रभोजनम् । परेद्युश्च सत्यामपि प्रतिपदि क्रमानुरोधात् ग्रासद्वयभोजनं द्वितीयातिथ्यनुसारेण कर्तव्यम् ।

४६—स्वयं पाठं वाचयित्वा पाठश्रवणे फलविचारः

एकस्मादपि पाठात् स्वनाम्ना सङ्कल्प्य श्रवणे फलं न भवतीति न वक्तुं शक्यते, किन्तु फलस्य न्यूनता भवत्येव । अतः समर्थो यः सः स्वयमेव पाठसङ्कल्पं विधाय तदर्थं कमपि विद्वांसं नियोज्य यदि शृणोति तदा समग्रफलभाग्भवतीति मन्यते । सुतरामयमेव पक्षः श्रेयानिति ।

५० - सन्दिग्धासपष्टानुपदिष्टधर्मनिर्णये विचारः

अनाम्नातेषु अभ्याख्यातेषु वा धर्मेषु सञ्जाते धर्मसंशये के निर्णेतारो भवितुमर्हन्तीति प्रश्ने तत्र भगवती श्रुतिराह—

"अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् । ये तत्र ब्राह्मणाः सम्मर्शिनः युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणाः सम्मर्शिनः युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तेषु वर्तेरन् तथा तेषु वर्तेथाः ।"

(तैत्तिरीयोपनिषत् १।११।३-४)

अत्र कर्म श्रौतं स्मार्तं च, वृत्तमाचारः । अभ्याख्यातेष्विति सन्दिह्यमानेन दोषेण संयोजितेषु–इति शङ्कराचार्याः । मनुरप्याह (१२।१०८) –

अनाम्नातेषु धर्मेषु कथं स्यादिति चेद् भवेत् ।
यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशङ्कितः ॥

अनाम्नातेषु सामान्यविधिप्राप्तेषु विशेषेणानुपदिष्टेष्विति कुल्लूकभट्टः । के शिष्टा इति प्रश्ने मनुः (१२।१०९-११३)—

धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः ।
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ॥
दशावरा वा परिषद्यं धर्मं परिकल्पयेत् ।
त्र्यवरा वापि वृत्तस्था तं धर्मं न विचालयेत् ॥
त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः ।
त्रयश्चाश्रमिणः पूर्वे परिषत् स्याद्दशावरा ॥
ऋग्वेदविद् यजुर्विच्च सामवेदविदेव च ।
त्र्यवरा परिषज्ज्ञेया धर्मसंशयनिर्णये ॥
एकोऽपि वेदविद् धर्मं यं व्यवस्येद् द्विजोत्तमः ।
स विज्ञेयः परो धर्मो नाज्ञानामुदितोऽयुतैः ॥ इति ।

यमश्च— एको द्वौ वा त्रयो वापि यं ब्रूयुर्धर्मपाठकाः ।
स धर्म इति विज्ञेयो नेतरेषां सहस्रशः ॥ इति ।

पराशरश्च— "चत्वारो वा त्रयो वापि यं ब्रूयुर्वेदपारगाः ।
सधर्म इति विज्ञेयो नेतरैस्तु सहस्रशः ॥" इति ।

"चत्वारो वा त्रयो वापि वेदवन्तोऽग्निहोत्रिणः ।
ब्राह्मणानां समर्था ये परिषत् साऽभिधीयते ॥
अनाहिताग्नयो येऽन्ये वेदवेदाङ्गपारगाः ।
पञ्च त्रयो वा धर्मज्ञाः परिषत्सा प्रकीर्तिता ॥" इति ।

वृहस्पतिश्च— वेदवेदाङ्गधर्मज्ञाः पञ्च सप्त त्रयोऽपि वा ।
यथोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभा ॥ इति ।

शिष्टलक्षणं महाभाष्येऽप्युक्तम् (६।३।१०६)—"कः पुनरार्यावर्तः ? प्रागादर्शात् प्रत्यक् कालकवनाद्दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम् । एतस्मिन्नार्यावर्ते आर्यनिवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारङ्गतास्तत्रभवन्तः शिष्टाः ।" इति ।

कलियुगे पूर्वोक्तलक्षणा ब्राह्मणाः सुदुर्लभाः, अतः परिषदः सङ्घटनं न सम्भवतीति शङ्का पराशरभाष्ये माधवाचार्येण निवर्तिता । तथा चेयं माधवाचार्याणामुक्तिः—"नहि पापप्रवृत्तानां परिषत्त्वं युक्तम् ।" "स्वधर्मरतविप्राणाम्" (पाराशरस्मृ० ८।२) इति तल्लक्षणात् । न चाभक्ष्य-भक्षणादिभ्यः पापेभ्यो निवृत्तानां शिष्टानां परिषत्त्वं स्यादिति शङ्कनीयम् ; तादृशस्य कस्याप्यदृष्टचरत्वात् । अतः कलियुगे सर्वेषां निन्द्यत्वादेतदेव युगमुद्दिश्य प्रवृत्तस्य पराशरधर्मशास्त्रस्य निर्विषयत्वं स्यादित्याशङ्क्याह—

युगे युगे तु ये धर्मास्तेषु तेषु च ये द्विजाः ।
तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजाः ॥ (परा०स्मृ० ११।५२)

अयमाशयः—द्विविधा ह्यधर्मप्रवृत्तिः, युगप्रयुक्ता प्रमादालस्यादिप्रयुक्ता च । तत्र युगप्रयुक्तायाः प्रवृत्तेरपरिहार्यत्वान्न तन्निवृत्तये पराशरस्योद्यमः । या तु प्रमादालस्यादिप्रयुक्ता तत्र सावकाशं धर्मशास्त्रम् । स्वरूपलोपाद्वरं यथासम्भवानुष्ठानमित्यभिप्रेत्य युगप्रवृत्तां सर्वैरप्यवर्जनीयामधर्मप्रवृत्तिमदोषत्वेनाभ्युपगम्य तेषां निन्दा न कर्तव्या इत्युक्तमिति ।

५१—वैश्यपत्न्याः प्रेतबाधाविमुक्तये कर्तव्यम्

अकृतसपिण्डनायाः वैश्यपत्न्याः प्रेतबाधाविमुक्तये प्रेतशिलायां पिशाचमोचने च पिण्डदानं कर्तव्यम् । सप्ताहविधिना श्रीमद्भागवतश्रवणं च कर्तव्यमिति । अथवा 'दुर्गा'-नामजपः लक्षमेकम्, 'मधुसूदन'-नामजपः लक्षमेकम्, चण्डीपाठः

शतावृत्तिः, पार्थिवपूजनमष्टोत्तरशतम्, तुलसीपत्रदानञ्चाष्टोत्तरशतम्। एतत्पञ्चकानुष्ठानेन प्रेतबाधाया विमुक्तिर्भवतीति।

५२—पतितोत्पन्नत्वरूपपापक्षयार्थं प्रायश्चित्तम्

सजातीयेन पुंसा वैश्यायां विधवायामुत्पन्नया कन्यकया पतितोत्पन्नत्वरूपसंसर्गजन्यपापक्षयकामनया द्वादशवार्षिकमहाव्रतस्य यस्तृतीयांशस्तत्तृतीयभागरूपं चतुर्मासाधिकवार्षिकव्रतं कर्तव्यम्। तत्राशक्तौ चत्वारिंशद्धेनवो देयास्तन्मूल्यं वा। तस्याः परिणेतुरपि प्रायश्चित्तमेतदेव। संसर्गिषु परिणयरूपयौनसंसर्गस्य गुरुतमत्वाभिधानात्। गुरुतमसंसर्गे च सकृत्कृते तत्तुल्यत्वाभिधानात्। एवं कृतप्रायश्चित्तायास्तस्यास्तत्पतेरपि कृतप्रायश्चित्तस्य व्यवहारो भवितुमर्हति। अत्र प्रमाणं प्रायश्चित्तविवेके—'पतितोत्पन्नत्वमपि संसर्गविशेषः।' तत्र प्रायश्चित्तमाह बौधायनः—"अशुचिशुक्रोत्पन्नानां तेषां शुद्धिमिच्छतां प्रायश्चित्तं पतनीयानां तृतीयोंऽशः स्त्रीणामंशात्तृतीयः"इति। विवेककृता व्याख्यातं च "पतितोत्पन्ना स्त्री पतितप्रायश्चित्तस्य तृतीयभागस्य तृतीयभागं कुर्यात्" इति। अतः प्रायश्चित्तविवेकधृतबौधायनवचनमेवात्र प्रमाणम्। कृतप्रायश्चित्तायास्तस्या विवाहे तु न वरस्य दोषः। तथा च तत्रैव हारीतः—"पतितस्य कुमारीं विवस्त्रामाप्लाव्यामहोरात्रोपोषितां प्रातः शुक्लेन वाससाऽऽच्छाद्य 'नाहमेतेषां न ममैवैते' इति त्रिरुच्चैरभिदधानां तीर्थेषु गृहेषु वा उद्वहेरन्" इति। "कन्यां समुद्वहेदेषां सोपवासामकिञ्चनाम्।" इति याज्ञवल्क्यः। एषां पतितानामित्यर्थः।

५३—आशौचे देवार्चाविषये विचारः

आशौचे संप्राप्ते देवार्चा कार्या न वेति प्रश्ने ब्राह्मणद्वारा कार्या इत्युक्तम्—

"ब्राह्मणोऽपि स्वयं पाकं निर्माय विनिवेदयेत्।" इति।

निम्नलिखितवचनानुसारेण अन्नादिषु नाशौचसम्भवः। वचनानि च यथा—

लवणे मधुमांसे च पुष्पमूलफलेषु च।
शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयःसु च॥
तिलौषधाजिने चैव पक्वापक्वे स्वयं ग्रहः।
पण्येषु चैव सर्वेषु नाशौचं मृतसूतके॥ इति।

स्वयमेव स्वाम्यनुज्ञया ग्राह्यं न तद्धस्तादित्यर्थः। क्रये तु तद्धस्तादपि न दोषः। पक्वं लड्डुकादि। अपक्वं तण्डुलादि।

"पूर्वसङ्कल्पितान्नेषु न दोषः परिकीर्तितः।" इति।

५४—वैश्यस्य आशौचनिर्णयः

कश्चित् वैश्यजातीयः शास्त्रानुसारेण स्वकीयपूर्वपुरुषपरम्परया च सपिण्ड-जनन-मरणयोः पञ्चदशाहाऽऽशौचमाचरन्नवर्त्तत। अधुना केचन तदीयसपिण्डाः पूर्वपुरुषपरम्पराचारं परित्यज्य लोके केषाञ्चिद् ब्राह्मणजात्यतिरिक्तानामपि दशाहाऽऽशौचाचरणमनुलक्ष्य तद्रीतिमनुसरन्तो दशाहाशौचमाचरन्ति। एतस्यामवस्थायामत्र कलियुगे पूर्वोक्तस्य पञ्चदशाहाऽऽशौचमाचरतो वैश्यस्य स्वीयपूर्वपुरुषपरम्परा-परित्यागेन दशाहाऽऽशौचाचरणं युक्तम्, अथवा तेन पञ्चदशाहाऽऽशौचमा-चरणीयमिति प्रश्नस्योत्तरम्—

शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति॥ (मनु० ५।८३)

इति मनुनोक्तम्। धर्मशास्त्रप्रणेतृषु मनोः प्राधान्यान्मिताक्षरा-निर्णयसिन्धु-शुद्धितत्त्व-शुद्धिविवेकादि-प्रामाणिकस्मृतिनिबन्धेष्विदमेव जात्याशौचं मुख्य-कल्पत्वेन व्यवस्थाप्य—

सर्वेषामेव वर्णानां सूतके मृतके तथा।
दशाहाच्छुद्धिरेतेषामिति शातातपोऽब्रवीत्॥

इत्यादयो न्यूनाऽऽशौचपक्षा मनुस्मृतिविरोधपरिहाराय आपदनापद्गुणव-न्निर्गुणदेशभेदादिकमाश्रित्य यथाकथञ्चिद् व्यवस्थापिताः। एवं च यत्र कुले पूर्वपुरुषपरम्परया मनूक्तो मुख्याऽऽशौचपक्षोऽनुष्ठीयते, तत्र मनुस्मृतिसम्मतं पूर्व-पुरुषपरम्पराचरितं तादृशं मुख्यपक्षं विहाय मनुस्मृतिविरुद्धं कल्पान्तरं कथमपि नाऽनुष्ठेयम्। स्मृतिप्रणेतृषु मनोः प्राधान्यञ्च।

"वेदार्थोपनिबन्धृत्वात्प्राधान्यं हि मनोः स्मृतम्।
मन्वर्थविपरीता या सा स्मृतिर्नैव शस्यते॥" इति बृहस्पतिना।
"पुराणं मानवो धर्मः साङ्गवेदश्चिकित्सितम्।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः॥" इति महाभारते

भगवता व्यासेन चोक्तमिति।

५५—दत्तकप्रतिग्रहीतृजनकयोः कुले मिथो जननाद्यशौचाभावः

दत्तकप्रतिग्रहीतृजनकयोः कुले परस्परं जनन-मरणनिमित्तमाशौचं घटते नवेति सन्देहे—

"बैजिकादभिसम्बन्धादनुरुध्यादघं त्र्यहम्।"

इति वचनात् घटत इति पूर्वपक्षः, नैवेति सिद्धान्तः। तथाहि—

गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा॥

इति मनुवचनात् गोत्ररिक्थापगमेन पिण्डापगमो बोध्यते। अत्र स्वधापिण्ड-शब्दौ आशौचादिसकलपितृकर्मोपलक्षणम्, पिण्डदानादिनिमित्तभूतयोर्गोत्र-रिक्थयोर्निमित्तश्रवणात्। प्रेतपिण्डदानादिश्चापूर्वाशौचपूर्वकत्वनियमेन नियन्त्रितः। ततश्च पिण्डनिवृत्त्या चाशौचनिवृत्तिरर्थसिद्धैव।

असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्।
प्रथमेऽहनि यो दद्यात् स दशाहं समापयेत्॥

यावदाशौचमुदकं पिण्डमेकं च दद्युरित्यादिवाक्यपर्यालोचनया पिण्डाशौचयोः समव्याप्तिसिद्धिः। यत्तु "बैजिकादभिसम्बन्धात्" इति वचनं त्र्यहाशौचपरं तदपि "व्यपैति ददतः स्वधा" इत्यनेन व्यपोदितम्। वचनन्तु दत्तकातिरिक्तक्षेत्रजा-दिस्थले सावकाशम्, आशौचोदकदानादौ गोत्रसापिण्ड्ययोर्मिलितयोर्निमित्तत्वा-वगमेनान्यतरापाये तन्निमित्तं नाशौचादि। एष च सिद्धान्तः शंख-लिखिताभ्या-मप्यनुमतः।

सपिण्डता तु विज्ञेया गोत्रतः साप्तपौरुषे।
पिण्डश्चोदकदानं च शौचाशौचं तदानुगम्॥

इति प्रतिग्रहीतृपित्रादीनान्तु दत्तकादिमरणे त्रिरात्रमाशौचम्। तदाह बृहस्पतिः—

अन्याश्रितेषु दारेषु परपत्नीसुतेषु च।
एतेष्वाप्लुत्य शुद्ध्यन्ति त्रिरात्रेण द्विजोत्तमाः॥ इति।

इदं च त्रिरात्राशौचविधानं यन्निरूपितं भार्यात्वं पुत्रत्वञ्च तस्यैव त्रिपुरुषा-न्तर्वर्तिनां प्रतिग्रहीतृसपिण्डानां पृथगाह मरीचिः—

सूतके मृतके चैव त्रिरात्रं परपूर्वयोः।
एकतस्तु सपिण्डानां त्रिरात्रं यत्र वै पितुः॥ इति।

पितुः प्रतिग्रहीतुरित्यर्थः। सपिण्डानां प्रदेयपिण्डसामान्यवताम्। यद्यपि दत्तकस्योत्पन्नस्यैव स्वीकारात्प्रतिग्रहीतुस्तदुत्पत्त्याशौचं तु न घटत्येवेत्थं प्रतिग्रहीतृ-जनककुले दत्तकाशौचनिर्णयः। तयोः कुले बहुपुरुषभेदे तु आशौचाशङ्कालेशोऽपि न विद्यत एव।

५६—दशवारं कारागृहनिवासिवेश्यागाम्यन्नभोजिनः मृतावाशौचविचारः

दशवारं कारागृहे अनुरूपापराधेन निवसतो वाराङ्गनागामिनस्तदन्नं तद्धस्ताद् भुञ्जानस्य मृतस्याशौचादिकं तत्सपिण्डैर्न करणीयम्, न वा दाहः कर्तव्यः, न वा श्राद्धं च कर्तव्यम्, पतितत्वात्। यदि ते सपिण्डा दयया श्राद्धं कर्तु-मिच्छन्ति तदा पतितप्रायश्चित्तं द्वादशवार्षिकव्रतं तदनुकल्पमशीत्युत्तरशतधेनुदान-रूपं प्रायश्चित्तमनुष्ठाय श्राद्धादिकं सर्वं कर्तुमर्हन्ति नान्यथेति।

५७—दाल्भ्यगोत्रेतराणां दाल्भ्यगोत्रिणां च कायस्थानां वर्णव्यवस्थाविचारः

दाल्भ्यगोत्रेतरे कायस्थसंज्ञका माहिष्यवनिताजाता वैदेहसूनवः उपनयन-संस्कारहीना पुंसवननामकरणान्नप्राशनचौलविवाहेतिपञ्चसंस्कारमात्राधिकारिणो देवतास्पर्शनानधिकारिणो ब्राह्मणादिसेवालिपिलेखनशिल्पकर्माणः शूद्रधर्माणो भवन्ति । दाल्भ्यगोत्रिणस्तु जन्मतः क्षत्रिया एव । क्षात्रधर्मबहिष्कृताः क्रियालोपाच्छूद्रत्वं गता इति । अत्र प्रमाणं स्कान्दे—

[1]माहिष्यवनिता सूनुं [2]वैदेहाद्यं प्रसूयते ।
स कायस्थ इति प्रोक्तस्तस्य कर्म विधीयते ॥
लिपीनां देशजातानां,लेखनं स समाचरेत् ।
गणकत्वं विचित्रं च बीजपाटिप्रभेदतः ॥
अधमः शूद्रजातिभ्यः पञ्चसंस्कारवानसौ ।
चातुर्वर्ण्यस्य सेवा हि लिपिलेखनसाधनम् ॥
व्यवसायः शिल्पकर्म तज्जीवनमुदाहृतम् ।
शिखां यज्ञोपवीतं च वस्त्रमारक्तमम्भसा ॥
स्पर्शनं देवतानां च कायस्थाद्यो विवर्जयेत् ॥ इति ।

दाल्भ्यगोत्रिणां विशेष उक्तः स्कान्दे—

रामाज्ञया स दाल्भ्येन क्षात्रधर्माद्बहिष्कृतः ।
दत्तः कायस्थधर्मोऽस्मै चित्रगुप्तस्य यः स्मृतः ॥
तद्गोत्रजाश्च कायस्था दाल्भ्यगोत्रास्ततोऽभवन् ।
दाल्भ्योपदेशतस्ते वै धर्मिष्ठाः सत्यवादिनः ॥
सदाचाररता नित्यं रता हरिहरार्चने ।
देवविप्रपितॄणां च अतिथीनां च पूजकाः ॥ इति ।

क्रियालोपात् शूद्रत्वमाह मनुः (१०।४३)—

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥ इति ।

५८—यज्ञे आचार्यकुण्डस्थानविचारः

मात्स्ये आग्नेये च प्रतिष्ठाविधिमुपक्रम्य "वेदीपादान्तरं त्यक्त्वा कुण्डानि नव पञ्च वा" इत्युक्तेः प्रतिष्ठाविधावेव पञ्चकुण्डीकरणं युक्तम् ।

---

१. क्षत्रियाद्वैश्यायामुत्पन्नो माहिष्यः । २. विप्रायां वैश्यजो वैदेहः ।

महारुद्र-विष्णुयागादौ तु—"एकं कुण्डं शुभदं मध्ये शान्तौ जपाङ्गहवनेषु। आरभ्यैकादशिनीं लघुमहदतिरुद्रहवनविधौ" इत्याद्यभियुक्तोक्तेरेकस्यैव कुण्डस्य विधानादेकमेव कुण्डं कार्यमित्यायाति, तथापि पूर्वोक्तवचनात् पञ्चकुण्ड्यादिपक्षोऽपि साम्प्रतं प्रचलति। पञ्चकुण्ड्यादिपक्षेऽपि आचार्यकुण्डं मध्ये कार्यम्, न प्रतिष्ठादिवत् पूर्वेशानयोर्मध्ये। अत्र होमस्य प्रधानत्वात्।

दानोत्सर्गप्रतिष्ठासु वेदी मध्ये प्रकीर्तिता।
प्राच्यामुदीच्यां वा शान्तौ मुकुरोदरसन्निभा॥

इत्यादिना दानादिष्वेव मध्ये वेदिविधानम्। नारायणभट्टैरपि—

कुण्डं तन्मध्यभागे तु कारयेच्चतुरस्रकम्।
मध्ये तु मण्डपस्यापि कुण्डं कुर्याद्विचक्षणः॥

इत्यादिना मध्ये एव कुण्डं साधितम्। रुद्रकल्पद्रुमेऽपि ग्रहयज्ञाधिकारे मण्डपमध्यभागे कुण्डविधानात् रुद्रादियज्ञस्य ग्रहयज्ञविकृतित्वान्मध्ये एव कुण्डम्। पूर्वेशानदिशि कुण्डकरणं तु यत्र मण्डपमध्यभागे कुण्डविधिः श्रुतो नास्ति तद्विषयकम्।

प्रागुत्तरं समासाद्य प्रदेशे मण्डपस्य तु।
शोभनं कारयेत् कुण्डम्..................॥

इत्यादिवचनस्य त्वयमर्थः—"प्राक् पूर्वं मण्डपस्योत्तमं मध्यमं प्रदेशं प्राप्य कुण्डं कुर्यादिति। तेन लक्षहोमवन्मध्ये कुण्डम्" इत्युक्तम्। स्थलसङ्कोचे तु मध्ये कुण्डमन्यथेशान्यामिति केचिदित्यपि तत्रैव। तेन हवनप्रधाने यज्ञे मध्ये एव कुण्डम्, नान्यत्रेति।

"आचार्यकुण्डं मध्ये स्यात् गौरीपतिमहेन्द्रयोः।"

इत्यादि वचनं प्रतिष्ठापरकमेव, न यज्ञादिपरम्। अतः सर्वत्र हवनप्रधानयज्ञे मध्ये एव आचार्यकुण्डं भवतीति निर्विवादम्।

५६—यज्ञयजमानत्वे त्रैवर्णिकानामेवाधिकारः

रुद्र-विष्णुयागादौ यज्ञयजमानत्वे त्रैवर्णिकानामेवाधिकारो न शूद्रस्य। न ह्यविद्वान् विहितोऽस्तीति न्यायेन विदुष एव कर्मण्यधिकाराच्छूद्रस्य च ज्ञानासम्भवात्।

निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्यचित्॥ (मनु० २।१६)

इति शूद्रस्य श्रुति-स्मृत्यध्ययनश्रवणादिनिषेधात् स्मृतितः पुराणतो वापि न ज्ञानसम्भवः।

"नाध्येतव्यमिदं शास्त्रं वृषलस्य तु सन्निधौ" इति कूर्मपुराणवचनेन शूद्रस्य पुराणपाठश्रवणनिषेधात्। यद्यपि शूद्रस्य साक्षाच्छ्रवणनिषेधेऽपि "श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः" इति व्यासवचनात् परम्पराश्रवणेन

ब्राह्मणस्याध्यापनादि युक्तम्, 'स च वृत्तिं दर्शयतीतरेषाम्' इति गौतमवचनाद्, ब्राह्मणोपदेशेन वा ज्ञानसम्भवः, तथापि—

"वेदाक्षरविचारेण शूद्रश्चाण्डालतां व्रजेत् ।" इति ।

"वेदाक्षरविचारेण शूद्रस्य नरको ध्रुवम् ।" इति ।

इत्यादिपराशरवचनात् ग्रहयज्ञादेश्च वैदिकमन्त्रयुक्तत्वादेतद्ज्ञानमनुपपन्नमेव । सिद्धं चैतत् शूद्राधिकरणे । अतएव ग्रहयज्ञप्रकरणे विज्ञानेश्वर आह—

"द्विजानधिकृत्य शान्तिक-पौष्टिकादीन्यनुक्रान्तानि" इति ।

धर्मेप्सवस्तु धर्मज्ञाः सतां धर्ममनुष्ठिताः ।
मन्त्रवर्जं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च ॥

इति मेधातिथिरपि शूद्रधर्मेषु मनुवाक्यमित्थं व्याचख्यौ । मन्त्ररहितो ब्राह्मणादीनां धर्म उक्तः उपवासादिः, तमनुतिष्ठन्तः शूद्राः न दुष्यन्ति, न पुनः समन्त्रकाण्यपि मन्त्रवर्जमनुतिष्ठन्तोऽपि न दुष्यन्तीति । समन्त्रककर्मविधीनां मन्त्रवर्जनपूर्वकं विधानायोगादिति । तस्मात् समन्त्रके कर्मणि शूद्रस्यानधिकारः ।

यत्र तुलापुरुषादौ समन्त्रकेऽपि विशेषवचनं "चतुर्णामपि वर्णानाम्" इति, तडागोत्सर्गादौ च "शूद्रस्यापि प्रकर्तव्यम्" इति, तत्र समन्त्रकेऽपि मन्त्ररहिते एव शूद्रस्याधिकारः । "मन्त्रवर्जं हि शूद्रस्य" इति सुमन्तुवचनात्, "मन्त्रवर्जं न दुष्यन्ति कुर्वाणाः पौष्टिकीं क्रियाम्" इति मोक्षधर्मेषु व्यासवचनाच्च । तत्रापि नमोऽन्तं तन्नाममन्त्रैर्होमपूजादि कार्यम्, "नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत्" इति याज्ञवल्क्यवचनात् । न चैवं वचनं पञ्चमहायज्ञमात्रविषयमिति वाच्यम्; शूद्रधर्मपदेन शूद्राधिकारिककर्ममात्रम्, यज्ञशब्देनोद्दिश्य नाममन्त्रविधानात् पञ्चत्वरूपोद्देश्यविशेषणविवक्षायां ग्रहैकत्वविवक्षावद् वाक्यभेदापातात्, "नाममन्त्रेण शूद्रस्य कुर्याद्धोमादिकं बुधः" इति संग्रहवचनाच्छिष्टसमाचाराच्च । मनुवाक्यमप्येतादृशविषयमेवान्यैर्व्याख्यातम् । यत्तु माधवेन "दक्षिणार्थं तु यो विप्रः शूद्रस्य जुहुयाद्धविः" अर्थात् शान्ति-पुष्ट्यादिसिद्ध्यर्थं वैदिकैर्मन्त्रैर्जुहोति तस्य ब्राह्मणस्यैव दोषः, शूद्रस्तु होमफलं लभेतैवेति तदनन्यसाध्यराष्ट्रबाधोत्पातादिशान्त्यर्थं होमे तद्रक्षाधिकरणे द्रष्टव्यम् । तस्य नित्यत्वेनावश्यकत्वात्, अत्र बहुवक्तव्यमपि विस्तरभयान्नोच्यते ।

नन्वेवं सति "सर्वैरेव प्रकर्तव्यम्" इति यस्मिन् कस्मिन् कर्मणि श्रुतं तत्र म्लेच्छादीनामप्यधिकारः प्राप्नोति । अत्र ब्रूमः—श्रवणविधौ "चतुरो वर्णान्" इति श्रवणेन

पुराणश्रवणे म्लेच्छादीनामनधिकारात् पाठस्य च दूरापास्तत्वात्। "चाण्डालाः सर्वधर्मबहिष्कृताः" इति स्मृतिषु साक्षादनधिकारश्रवणाच्च। "मन्त्रवर्जं हि शूद्रस्य" इति शूद्रश्रवणे म्लेच्छस्यामन्त्रककर्मप्रापकाभावाच्च न म्लेच्छादीनामधिकारः। तस्मात् सर्वैरिति शूद्रं विषयीकरोति, न म्लेच्छादीन्। यत्तु वस्त्रदानादौ सर्वैरिति श्रवणेन म्लेच्छादीनामधिकारः, तत्तु साधारणधर्मत्वात् वैधज्ञानापेक्षा यथाकथञ्चित् सम्भवति इत्यलं प्रसङ्गागतक्षोदेन। तत्सिद्धये तदयुतहोमादौ शूद्रस्य नाधिकार इति। एतेन अनुपनीतानामप्यनधिकारः सिद्धः; "स्त्रीशूद्राश्च सधर्माणः" इत्यादिवचनैः शूद्र-समानधर्मत्वावगतेः। यत्तु लक्षहोमे "कुमारी च शुभं पतिम्" इति कुमार्याः फलश्रवणं तत्पित्रादिभिरनुष्ठितादेवेति वेदितव्यम्। तत्र तस्याः साक्षादेतदनुष्ठानेऽनधिकारः। यथा जातस्य पितृकृतं पुत्रे पूतत्वादि, यथा वा पित्रादिकृतेन कृच्छ्रादिना अनुपनीतस्य पातकक्षयः, तथैव तस्याः फलमात्रम्। अतएव बालकव्याधिनिरासार्थं घृततुलाकर्मविपाकादौ पित्रादिभिरेव सर्वं कर्तव्यमिति साम्प्रदायिकाः। बालककर्तव्ये सर्वत्र पित्रादेरेवाधिकारदर्शनात्। तत्रापि यत् सर्वौषधिस्नान-शरीरमार्जन-जल-स्नानादि तत्फलसंस्कारकत्वाद् बालकादीनामेव भवति। यद्वाऽस्तु कुमार्या एवाधिकारो वचनबलाद् रथकारस्येवाधाने। तस्मादपि शूद्रस्येव तुलादावत्र अमन्त्रकत्वेन शूद्र-सहधर्मत्वादिति।

६०—देवपूजने मन्त्रविनियोगविचारः

'गणानां त्वा' (शु० य० २३।१९) इति प्रकरणानुरोधान्महीधरादि-भिरश्वपरतया व्याख्यातोऽप्ययं मन्त्रः स्मृत्या गणपतिपूजने विनियुक्तो गणपति-परतया व्याख्यायते। एवं 'शन्नो देवीः' (शु० य० ३६।१२), 'त्वां गन्धर्वाः' (शु० य० १२।९८), 'अक्षन्नमीमदन्त' (शु० य० ३।५१) इत्यादीनामपि शनिपूजाद्युप-योगित्वम्। अन्यार्थानामपि मन्त्राणां वचनात्त्वयथार्थमैन्द्री स्यादिति न्यायेन विनियोग इति संस्कारचिन्तामणौ।

आग्नेये—मन्त्रैर्वैष्णवरौद्रैस्तु सावित्रैः शान्तिकैस्तथा।
विष्णुं प्रजापतिं वापि शिवं वा भास्करं तथा॥
तल्लिङ्गैरर्चयेन्मन्त्रैः सर्वदेवान् समाहितः॥

कौर्मे— ब्रह्माणं शङ्करं सूर्यं तथैव मधुसूदनम्।
अन्यांश्चाभिमतान् देवान् तल्लिङ्गैरर्चयेन्नरः॥

"ब्राह्मवैष्णव-रौद्र-सावित्र-मैत्र-वारुणैस्तत्तल्लिङ्गैरर्चयेत्" इति कात्यायनोऽपि स्नानसूत्रे।

अत्र ब्राह्मेत्यादिना देवतातद्धितेन तल्लिङ्गत्वे प्राप्ते पुनस्तल्लिङ्गैरिति ग्रहणं श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्याभिर्मन्त्राद्यङ्गविनियोगो भवति सर्वत्र, अत्र तु

लिङ्गमेव विनियोजकं येषां ते ग्राह्या इत्यर्थकम्, तेन तत्तल्लिङ्गमन्त्रपदेन यथाकथञ्चिदपि तत्तद्देवताद्रव्याद्यनुस्मारकपदघटितमन्त्रपरिग्रहः कार्य इति सिद्ध्यति।

६१—सङ्कल्पस्यावश्यकत्वविचारः

श्रद्धापूते मनसि कर्त्तव्यत्वेन निश्चितस्य कर्मणो ब्रह्मसभायामुच्चैर्वाचा यः संवादः स सङ्कल्पः। अथवा क्रियमाणकर्मादौ निमित्तोल्लेखपूर्वकः 'करिष्ये', 'होष्ये' इत्यादिपदोच्चारणसमकालीनदक्षिणहस्तकरणकपात्राधिकरणजलादिप्रक्षेपसहित-कर्मानुष्ठानप्रतिज्ञा मानसं कर्म सङ्कल्प इत्युच्यते। "सङ्कल्पः कर्म मानसम्" इति।

भविष्यपुराणे— सङ्कल्पेन विना विप्र यत्किञ्चित् कुरुते नरः।
फलं चास्याल्पकं तस्य धर्मस्यार्धक्षयो भवेत्॥ इति।

मार्कण्डेयपुराणे— सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः।
व्रतं नियमधर्मौ च सर्वे सङ्कल्पजाः स्मृताः॥ इति।

बृहद्यमस्मृतौ — सङ्कल्पश्च नरः कुर्यात् स्नान-दान-व्रतादिके।
अन्यथा पुण्यकर्माणि निष्फलानि भवन्ति वै॥ इति।

६२—सङ्कल्पे तिथ्यादीनामुच्चारणविचारः

ग्रहणादिनिमित्तस्य मास-पक्ष-तिथीनाञ्च प्रयागादेश्च देशविशेषमात्रस्योल्लेखः कार्यः, न तु व्यापकानामुत्तरायणादीनां श्रीमद्भगवत इत्यादीनां चेति केचित्। तन्न, "प्रयागादिषु तीर्थेषु पुण्येष्वायतनेषु च" इति मात्स्यवाक्यात्प्रयागादितीर्थविशेषस्य यथाऽङ्गत्वम्, एवम्—

"आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः" इत्यादिवाक्येनार्यावर्तादिसामान्यस्याऽप्यङ्गत्वावगमात्।

मासपक्षतिथीनां च निमित्तानां च सर्वशः।
उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेत्॥ (देवलः)

इत्यत्र 'सर्वशः' इति पदस्वारस्याच्च सर्वनिमित्तानामुल्लेखः। न चानेनैव सिद्धेर्मासपक्षतिथीनामित्यनर्थकमिति वाच्यम्; विधिस्पृष्टानां कार्तिक-माघादीनामुल्लेखसिद्धावपि तदस्पृष्टसाधारणमासाद्युल्लेखप्राप्त्यर्थत्वात्। अन्यथा अविहितमासादिके आधानादौ ज्योतिष्टोमे एकादशीव्रतादौ च मास-पक्ष-तिथीनामुल्लेखाभावप्रसङ्गः स्यात्। एतेन तेन रूपेण प्रयोगाङ्गतया विहितानामेव मासादीनामुल्लेख इत्यपि परास्तम्।

६३—अनेकदिनसाध्ये कर्मणि तिथ्यादीनां प्रतिदिनमुच्चारणमावश्यकम्

अनेकदिनसाध्ये कर्मणि प्रयोगाधिकरणभूताः सर्वा मासपक्षतिथय

उल्लेख्याः, न प्रारम्भदिनमात्रस्य । यत्तु आद्यदिने सङ्कल्पकालीनां तिथिमधिकरणत्वेनोल्लिख्य "ज्योतिष्टोमेनाहं यक्ष्ये", "महारुद्रहोमं करिष्ये" इत्यादि सङ्कल्पवाक्यं प्रयुञ्जते यायजूकाः, तत्तु पदानामन्वयायोगादनादर्त्तव्यमिति दिनकरः । साम्प्रदायिकास्तु नैतत्स्वीकुर्वते । तदुक्तं संस्काररत्नमालायाम्—

यावन्ति कर्मसम्बन्धान्यृक्षाणिस्युस्तु तावताम् ।
वारादीनामपि तथा युक्तं सर्वत्र कीर्तनम् ॥
केनचित्तु नवीनेन प्रोक्तमेतत्तु युक्तितः ।
प्रायोगिकास्त्वेकभादेरेव कुर्वन्ति कीर्तनम् ॥ इति ।

६४—मन्त्रादौ ओङ्कारोच्चारणविचारः

मन्त्रादौ सर्वत्र प्रणवः प्रयोक्तव्यः—"मन्त्रारम्भे विरामे च यागहोमार्चनादिषु ।" इति । "यज्ञ-दान-तपः-स्वाध्याय-जप-ध्यान-सन्ध्योपासन-प्राणायाम-होम-दैव-पित्र्यमन्त्रोच्चारण-ब्रह्मारम्भादीनि प्रणवमुच्चार्य प्रवर्तयेत्" इति शाट्यायनः । अतश्च मन्त्रमात्रोच्चारणे आदावोङ्कारः कार्य इति सर्वानुक्रमभाष्ये । केचित्तु 'प्रवर्त्तयेत्' इति वचनात् प्रारम्भे एव ओङ्कारोच्चारणं युक्तं न सर्वत्र । तथा च छन्दोगपरिशिष्टे कात्यायनः—

नोङ्कुर्याद्धोमन्त्राणां पृथगादिषु कुत्रचित् ।
अन्येषां च विकृष्टानां कालेनाचमनादिना ॥ इति ।

अस्यार्थः—"गोभिलगृह्यप्रसिद्धषडाहुतिविंशत्याहुतिमन्त्रेषु प्रतिमन्त्रम् आदौ न ओङ्कारप्रयोगं कचिदपि कुर्यात्, किन्तु प्रथममेव । अन्येषां जपाद्यर्थानां रुद्राध्यायादीनां मध्ये अप्रायत्ये सति आचमनादिना कालेन ओङ्कारेण सह व्यवधाने जाते न आचमनानन्तरं पठ्यमानस्य मन्त्रस्य आदावोङ्कारप्रयोगः कर्तव्यः । होममन्त्रेष्वेवं व्यवधाने ओङ्कारः कर्तव्य एव" इति नारायणवृत्तिकृता प्रतिपादितः । अत एव शाखान्तरीया न कुर्वन्तीत्याहुः ।

पारस्करगृह्यभाष्ये हरिहरस्तु—अन्येषां चाविकृष्टानामिति पाठं धृत्वा अविकृष्टानामनन्तरितानां कालेनाचमनादिना चेति व्याख्यातवान् । स च त्रिमात्रः प्रयोक्तव्यः—"त्रिमात्रस्तु प्रयोक्तव्यः कर्मारम्भेषु सर्वशः" इति मदनरत्ने व्यासोक्तेः ।

दाल्भ्यपरिशिष्टे च—ब्रह्मयज्ञो जपो होमो देवर्षिपितृकर्म च ।
अनोङ्कृत्य कृतं सर्वं न भवेत्सिद्धिकारकम् ॥

तेन प्रतिमन्त्रं प्रणवोच्चारणं कर्त्तव्यम् । अत्र तु एकविनियोगे युक्तत्वान्मन्त्रा-

णामादावेव प्रणवोच्चारणं कर्त्तव्यं न मध्येऽपि। अस्य पृथग्विधित्वान्मन्त्रेण सह न सन्धिः। पृथग्विधानेन सह सन्धिर्न भवतीत्युपपादितं "त्विषिमान्" (का० श्रौ० सू० ३।३।५) इति कातीयसूत्रे कर्कोपाध्यायैः। एवमध्याहारस्यापि लौकिकत्वान्मन्त्रेण सह सन्ध्यभाव इत्यपि प्रतिपादितं "पशुं पूर्वं समनक्ति" इत्यधिकृत्य "सन्त इति प्रतिमन्त्रम्" (का० श्रौ० सू० ६।४।२) इति सूत्रे तैरेव।

६५—कर्मविशेषे पत्युः समीपे भार्यायाः उपवेशननिर्णयः

धर्मप्रवृत्तौ— आशीर्वादेऽभिषेके च पादप्रक्षालने तथा।
शयने भोजने चैव पत्नी तूत्तरतो भवेत्॥ इति।

संस्कारगणपतौ—वामे सिन्दूरदाने च वामे चैव द्विरागमे।
वामेऽशनैकशय्यायां भवेज्जाया प्रियार्थिनी॥ इति।
"सुमङ्गलीरियं वधूः" इति पारस्करगृह्यसूत्रव्याख्याने।
सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः शुभा।
अभिषेके विप्रपादक्षालने चैव वामतः॥

विप्रपादक्षालनं च पित्र्ये कर्मणीति बोध्यम्।

वामे पत्नी त्रिषु स्थाने पितॄणां पादशौचने।
रथारोहणकाले च ऋतुकाले सदा भवेत्॥ इति च तत्रैवोक्तेः।

व्याघ्रपादस्मृतौ—कन्यादाने विवाहे च प्रतिष्ठायज्ञकर्मणि।
सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः स्मृता॥
दक्षिणे वसति पत्नी हवने देवतार्चने।
शुश्रूषा—रतिकाले च वामभागे प्रशस्यते॥
जातकर्मादिकार्याणां कर्मकर्तुश्च दक्षिणे।
तिष्ठेद् वरस्य वामे च विप्राशीर्वचनं यथा॥
त्रिषु स्थानेषु सा पत्नी वामभागे प्रशस्यते।
पादशौचे पितॄणां च रथारोहे ऋतौ तथा॥
श्राद्धे पत्नी च वामाङ्गे पादप्रक्षालने तथा।
नान्दीश्राद्धे च सोमे च मधुपर्के च दक्षिणे॥ इति।

स्मृतिसंग्रहे— व्रतबन्धे विवाहे च चतुर्थीसहभोजने।
व्रते दाने मखे श्राद्धे पत्नी तिष्ठति दक्षिणे॥

सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः शुभा ।
अभिषेके विप्रपादक्षालने चैव वामतः ॥ इति ।

धर्मप्रवृत्तौ— जातके नामके चैव ह्यन्नप्राशनकर्मणि ।
तथा निष्क्रमणे चैव पत्नी पुत्रश्च दक्षिणे ॥
गर्भाधाने पुंसवने सीमन्तोन्नयने तथा ।
वधूप्रवेशने चैव पुनःसन्धान एव च ॥
प्रदाने मधुपर्कस्य कन्यादाने तथैव च ।
कर्मस्वेतेषु भार्यां वै दक्षिणे तूपवेशयेत् ॥ इति ।

कात्यायनः—"पश्चादग्नेरुपविशतो दक्षिणतः पत्नी" (४।७।१६) इति ।

यत्तु— शान्तिकेषु च सर्वेषु प्रतिष्ठोद्यापनादिषु ।
वामे ह्युपविशेत् पत्नी व्याघ्रस्य वचनं यथा ॥ इति ।

यच्च—"पत्नी वामे सदा प्रोक्ता मूलाश्लेषाविधानयोः" इति तन्निर्मूलम् ।

६६—प्रश्नत्रयविचारः

(क) कस्याश्चिदुपरतपितृकायाः कन्यायास्तदीयसापत्नमातरं परित्यज्य निकटतमे सम्बन्ध्यन्तरेऽविद्यमाने तस्याः कन्यायाः संरक्षकत्वं तदीयसापत्नमातरि समापतति न वा ?

(ख) यदि सापत्नमाताऽन्धतादोषदूषिता भवेत्तर्हि तस्याः संरक्षकत्वाधिकारो राज्ञोऽपैति न वा ?

(ग) व्यावहारिकेषु धार्मिकेषु च कार्येषु राज्ञां हस्तक्षेपो धर्मशास्त्रसम्मतो न वा ?

इदानीमुपरिनिर्दिष्टप्रश्नत्रयविचारः प्रस्तूयते । तत्र प्रथममिदं विचारणीयम्, यद्धर्मशास्त्रानुरोधेन अनाथसंरक्षकत्वाधिकारः केषामिति । अत्र मनुः—

बालदायादिकं रिक्थं तावद्राजानुपालयेत् ।
यावत् स स्यात् समावृत्तो यावच्चातीतशैशवः ॥ (८ । २७)

एतेन अनाथानां तद्धनानां च संरक्षकत्वं राज्ञ एवापतति, परन्तु प्रकृते न तथा, कन्यायाः सापत्नमातुर्वर्तमानत्वात् । सा च भर्तुर्मरणानन्तरं तदीयसमस्तसम्पत्तेरधिकारिणी । परिशेषात् स्व-सापत्नकन्यायाः संरक्षिकापि भवति ।

तथा च बृहस्पतिः— कुल्येषु विद्यमानेषु पितृभ्रातृसनाभिषु ।
असुतस्य प्रमीतस्य पत्नी तद्भागहारिणी ॥ इति ।

याज्ञवल्क्योऽपि—पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुता गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः ॥
एषामभावे पूर्वस्य धनभागुत्तरोत्तरः ।
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः ॥ इति ।

विष्णुरपि—"अपुत्रधनं पत्न्यभिगामि, तदभावे दुहितृगामि, तदभावे पितृगामि, तदभावे मातृगामि ।" इत्यादि ।

भर्तृसम्पत्त्यधिकारिणीनामपि स्त्रीणां संरक्षणन्तु राजायत्तमेव । तथा च "बालदायादिकं रिक्थम्" इत्युपक्रम्य मनुना उक्तम्—

वशाऽपुत्रासु चैवं स्याद्रक्षणं निष्कुलासु च ।
पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च ॥ (मनु० ८।२८)

'एवं रक्षणं स्यात्' इत्यस्य 'राजा तु पालयेत्' इति पूर्वेण सम्बन्धः । तथा च अनाथानां सम्पत्तिमतीनामपि पालनं राज्ञैव यावज्जीवं कर्तव्यमिति पर्यवसितम् ।

जीवन्तीनां तु तासां ये तद्धरेयुः स्वबान्धवाः ।
तान् शिष्याच्चौरदण्डेन धार्मिकः पृथिवीपतिः ॥ (मनु० ८।२९)

इति वचनेन च सर्वथा राजाधीनमेव तासां रक्षणमिति फलति । यच्च—

अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा ।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥ (मनु० ९।२०१)

इति वचनेन कन्यकायाः सापत्नमातुरन्धतादोषदूषितत्वात् अनंशमापतितमपि तत्र जात्यन्धशब्दनिवेशात्तस्या जन्मान्धत्वसद्भावेऽनंशत्वं वर्तत एव अजन्मान्धाया अंशग्राहित्वं दुर्निवारम् । परन्त्वत्रेदमवधयेम्—उपरतपितृकाया अनाथायाः कन्यकाया विधवाया अन्धायाः सम्पत्तिमत्याः तत्सापत्नमातुरपि संरक्षणं पूर्वोपदर्शितमन्वादिवचनानुरोधेन राज्ञैव कार्यमिति स एव राजा उभयोरपि संरक्षको भवति चेत्तर्हि सर्वमवदातम् । किञ्च—

"व्यवहारान्नृपः पश्येद् विद्वद्भिर्ब्राह्मणैः सह ।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ॥" (याज्ञ०स्मृ०व्यव १)

"निजधर्माविरोधेन यस्तु सामयिको भवेत् ।
सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः ॥" (या० स्मृ व्यव० १८६)

"अपि भ्राता सुतोऽर्घ्यो वा श्वशुरो मातुलोऽपि यः ।
नादण्ड्यो नाम राज्ञोऽस्ति धर्माद्विचलितः स्वकात् ॥" (या० स्मृ०आ०३५८)

इत्यादिधर्मशास्त्रानुसारेण व्यवहारेषु धर्मकार्येषु वा यत्र कुत्रापि चाव्यवस्था राज्ञैव परिहरणीयेति ।

६७—गोमांसभक्षकहस्ते गोविक्रये प्रायश्चित्तम्

कश्चिद् ब्राह्मणोऽसकृद् गोमांसखादके गवां विक्रयं कृतवान् सः केन प्रायश्चित्तेन शुद्धो भवितुमर्हतीति प्रश्ने इदमुत्तरम्—यदि तां गां गोमांसखादको हतवान् तदा सकृद्विक्रेता एकपञ्चाशत्कार्षापणलभ्यहिरण्यदानेन पञ्चदशकार्षापणलभ्यहिरण्यदानेन च शुद्ध्यति । अत्यन्ताभ्यासेन एवं विक्रयं कुर्वतो द्वादशवार्षिकं व्रतम्, तदशक्तावशीत्युत्तरशतधेनुदानेन, तदशक्तौ चत्वारिंशदधिकपञ्चशतकार्षापणलभ्यहिरण्यदानेन पूर्वोक्तदक्षिणादानसहितेन शुद्धिः ।

विक्रयैर्गोविनिमयैर्दत्त्वा गोमांसखादके ।
चान्द्रायणव्रतं कुर्याद्वधे साक्षाद्वधी भवेत् ॥ इति गौतमवचनात् ।

विधेः प्राथमिकादस्माद् द्वितीये द्विगुणं भवेत् ।
तृतीये त्रिगुणं प्रोक्तम्.................. ॥ इति देवलीयात् ।

"चतुर्थे सर्वम्" इत्यापस्तम्बवचनात्सर्वमित्यस्य द्वादशवार्षिकमिति शूलपाणिव्याख्यातत्वाच्चेति ।

६८—भृत्यावरुद्धगोमृतौ भृत्यप्रायश्चित्तम्

यत्र भृत्यापराधात् कस्यचिद् गृहे गौर्मृता तदा रोधननिमित्तम् गोवधप्रायश्चित्तं भृत्येन कर्तव्यम् । भृत्यस्य द्रव्याभावे गृहस्वामिना द्रव्यं दत्वा कारयितव्यम् । यदि भृत्यो न स्वीकुर्यात्, म्लेच्छो वा भृत्यो भवेत् तदा स्वामिनैव रोधननिमित्तकवधप्रायश्चित्तं कर्तव्यम् । प्रमाणं चात्र मनुः—

यत्रापवर्तते युग्यं वैगुण्यात्प्राजकस्य तु ।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम् ॥ (८।२९३)

इति वचनेन अयोग्यसारथिनियोगे हिंसायां स्वामिनो दण्डविधानात् "एकत्र निर्णीतः शास्त्रार्थो बाधकं विना सर्वत्र प्रत्यायको भवति" इति न्यायात् गोवधप्रायश्चित्तेऽपि अयोग्यपालकादौ नियुक्ते स्वामिनो दोषस्तस्यैव प्रायश्चित्तम् । यदि पालकः प्रायश्चित्तं चिकीर्षेत्तदा तेनैव कर्तव्यम् । एतच्च गोवधप्रायश्चित्तप्रकरणे रघुनन्दनभट्टाचार्यैः प्रायश्चित्तमुक्तम् । अज्ञातस्वामिकाया गोर्वधे ब्राह्मणस्वामिकगोवधप्रायश्चित्तमेवानुष्ठेयम् ।

६९—वैश्येन दण्डनिपातनेन कृतायां स्वगोहत्यायां प्रायश्चित्तम्

केनचित् वैश्येन स्वस्याः गोर्वधे दण्डनिपातनेन किं प्रायश्चित्तमिति प्रश्ने प्रायश्चित्तविवेके वैश्यसम्बन्धिन्या वधे तु याज्ञवल्क्यः—

पञ्चगव्यं पिबेद् गोघ्नो मासमासीत संयतः ।
गोष्ठेशयो गोऽनुगामी गोप्रदानेन शुद्ध्यति ॥
पञ्चगव्येन गोघाती मासैकेन विशुद्ध्यति ।
गोमतीञ्च जपेद्विद्यां गवां गोष्ठे च संवसेत् ॥

मासैकपञ्चगव्यपाने धेनुचतुष्टयं दक्षिणा गोदानेन पञ्चधेनवः । एतद-बुद्धिकृते । बुद्धिकृते त्वेतदेव द्विगुणम् । ज्ञानतो वैश्यस्वामिकायाः दण्डेन गोर्वधे गोमतीविद्याजपसहितमासैकपञ्चगव्यपानरूपं व्रतं करणीयम् । तदशक्तौ दश धेनवो देयाः । दोग्ध्रीवधे तु प्रायश्चित्तद्वैगुण्यम्, तेन विंशतिधेनव एका गौर्दक्षिणा । प्रायश्चित्तद्वैगुण्ये दक्षिणायाः द्वैगुण्यम् । अत्र वपनं सशिखं सलोमकम् । प्रायश्चित्तमिदं कर्तव्यमित्यनुष्ठेयम् । पूर्वदिने तु उपवासः, घृतप्राशनं च, परस्य गवे ग्रासा देयाः । दश ब्राह्मणाश्च भोजयितव्याः ।

७०—गोवधे प्रायश्चित्तम्

बुद्धिपूर्वं कतमोऽपि वर्णः ब्राह्मणस्य गां शस्त्र-यष्टि-लौह-मुष्टि-विषादिना यदि हन्यात् तदर्थं त्रैमासिकव्रतं प्रायश्चित्तं स्मृतम् । अशक्तौ सप्तदश प्रत्यक्षगोदानानि, अथवाऽसामर्थ्ये तावतीनां गवां मूल्यं ददीत । प्रायश्चित्तविवेककारस्य मते एकस्या गोर्मूल्यं द्वादशाणकाः वर्तते । अपरे त्वाचार्याः "द्वात्रिंशत्पणिका गावः" इत्यभिप्रयन्ति ।

त्रैमासिकव्रतार्थं प्रथमदिने वपनोपवासौ तथा घृतप्राशनं विदधीत । तस्मिन्नेव दिने सायंकाले प्रायश्चित्तानुष्ठानार्थं संकल्पं कुर्यात् । द्वितीये दिने त्रैमासिकव्रतप्रत्याम्नायरूपेण गोमूल्यं प्रदद्यात् ।

अज्ञानात् ब्राह्मणगोवधे सार्धमासिकव्रतं प्रायश्चित्तं स्मृतम् । तदशक्तौ नव-प्रत्यक्षधेनवो देयाः, तत्रासामर्थ्ये तासां मूल्यं देयम् । धेनूनां मूल्यं सार्द्धपञ्चविंशति-कार्षापणाः विहितम् । दक्षिणारूपेण एका गौर्देया । पूर्वपरयोर्दिनयोः कार्यं यथापूर्वं कुर्वीत ।

ज्ञानपूर्वं क्षत्रियगोवधे षाण्मासिकव्रतं प्रायश्चितं समाम्नातम् । अशक्तौ द्वादश धेनवो यथाशक्तिदक्षिणापुरस्कृता देयाः । पूर्वापरदिनकृत्यं पूर्ववदनुतिष्ठेत् । अज्ञानाद् गोवधे तदर्द्धं प्रायश्चित्तं विहितम् ।

ज्ञानात् वैश्यगोवधे गोमतीविद्यां जपन् एकमासपर्यन्तं पञ्चगव्यपानरूपं व्रतमनुतिष्ठेत् । तदशक्तौ दश गावो देयाः, दक्षिणारूपेण चैकां गां ददीत । पूर्वापरदिनकृत्यं पूर्ववद् विदधीत । अज्ञानात् गोवधे तदर्द्धं प्रायश्चित्तं स्मृतम् ।

ज्ञानात् शूद्रगोवधे प्राजापत्यचतुष्टयं विदधीत, अथवा गोचतुष्टयं दद्यात् । अज्ञानाद् गोवधे तदर्द्धं प्रायश्चित्तं विहितम्, अन्यत् सर्वं यथापूर्वमनुतिष्ठेत् ।

७१—ब्रह्मवधे प्रायश्चित्तम्

अज्ञानाद् ब्राह्मणवधे द्वादशवार्षिकव्रतं प्रायश्चित्तम् । ज्ञानतो ब्राह्मणवधे

चतुर्विंशतिवार्षिकव्रतं प्रायश्चित्तम्। अज्ञानात् यागस्थानीयब्राह्मणस्य वधे चतुर्विंशतिवार्षिकव्रतम्, तथा ज्ञानतः यागस्थलीयब्राह्मणस्य वधे अष्टचत्वारिंशद्वार्षिकव्रतं प्रायश्चित्तं स्मृतम्। एवमेव बाल-वृद्ध-गुरु-माता-पितृ-सोदरभ्रातृणां श्रोत्रियब्राह्मणस्य तथाऽग्निहोत्रिब्राह्मणस्य ज्ञाताज्ञातवधे यथापूर्वं व्रतं प्रायश्चित्तं विहितम्।

अज्ञानतः प्रेतश्राद्धान्नभोजिनो ब्राह्मणस्य वधे वार्षिकव्रतं प्रायश्चित्तम्। तथा ज्ञानतो वधे द्विवार्षिकं प्रायश्चित्तं स्मृतम्। ज्ञानतोऽज्ञानतो वा ब्राह्मणस्य वधप्रायश्चित्तस्य प्रथमदिने उपोषणम्, सशिखवपनम्, घृतप्राशनम्, दशब्राह्मणभोजनम्, गोग्रासदानम्, दक्षिणारूपेण शतं गावो वा देयाः। एतदशक्तौ तन्निष्क्रयदानम्।

बहूनां ब्राह्मणानां एकपुरुषकर्तृकवधे तादृशमहापातकानुष्ठातुः पातकिनः कारीषाग्नौ प्रविश्य मरणमेव प्रायश्चित्तम्। अज्ञानत एतादृशपातकाचरणे तस्य आजीवनं द्वादशाब्दव्रतं प्रायश्चित्तं विधीयते।

क्षत्रियो यदि ज्ञानतो ब्राह्मणं हन्यात् तदा स ब्राह्मणस्य तादृशपातककर्तृविहितप्रायश्चित्तस्य द्विगुणं प्रायश्चित्तं विदधीत, अज्ञानतो यदि ब्राह्मणं हन्यात् तदाऽज्ञानतो ब्रह्मवधकर्तुर्ब्राह्मणस्य विहितं यत्प्रायश्चित्तं तद्द्विगुणं प्रायश्चित्तं विदध्यात्।

एवमेव वैश्यकर्तृकब्रह्मवधे त्रिगुणं प्रायश्चित्तं विहितम्। शूद्रकर्तृकब्रह्मवधे चतुर्गुणितं प्रायश्चित्तं स्मृतम्।

७२—गजाश्वादिवधे प्रायश्चित्तम्

राजसम्बन्धिश्रेष्ठगजवधे पञ्चनीलवृषदानम्। सामान्यगजवधे अहोरात्रमुपवासो घृतप्राशनञ्च। ज्ञानत उत्तमगजवधे चान्द्रायणव्रतम्, अज्ञानतस्तदर्धम्। ज्ञानतः अश्ववधे चान्द्रायणव्रतम्, अज्ञानतस्तदर्धम्। अज-मेष-खरवधे एकहायनवृषदानम्। अज्ञानतो मृग-महिष-तरक्षु-(व्याघ्रविशेषः) ऋक्ष-वानर-सिंह-व्याघ्र-पृषत-चमरी-रुरूणां वधे अहोरात्रमुपवासः, द्वितीयदिने घृतप्राशनञ्च। ज्ञानतो मृगादीनां वधे सप्तरात्रमुपवासः, उपवासाशक्तौ एकस्मिन्नुपवासे अष्टौ ताम्रपणाः प्रदेयाः। अज्ञानतः ग्राम्यपशुवधे प्राजापत्यं हिरण्यं च दक्षिणा। ज्ञानतः ग्राम्यपशुवधे द्विगुणं प्रायश्चित्तम्। मृगवधे तिलद्रोणमेकं सुवर्णदक्षिणा च। अज्ञानतो मार्जार-गोधा-नकुल-मण्डूक-श्व-वधे पक्षिवधे च दुग्धपानमात्रं कृत्वा त्रिरात्रमुपवासः। ज्ञानतस्तु मार्जारादिवधे द्विगुणं प्रायश्चित्तम्। मूषिक-सर्प-डुण्डुभ-अजगरवधे उपवासः लोहदण्डमेकं च दक्षिणा। अज्ञानतः सामान्यपक्षिवधे नक्तव्रतम्। ज्ञानतः द्विगुणितं व्रतम्। कुक्कुटवधे अहोरात्रमुपवासः। अज्ञानतः मत्स्यादिजलचराणां सकृद् वधे सप्तरात्रमभोजनम्, ज्ञानतो मत्स्यादीनां वधे द्विगुणं प्रायश्चित्तम्। अभ्यासे प्रायश्चित्तावृत्तिः।

अस्थिरहितानामस्थिसहितानां च जन्तूनां वधे शूद्रहत्याव्रतम्। एवं सहस्रजन्तोर्वधेऽपि च शूद्रहत्याव्रतम्। अस्थिसहितजन्तोर्वधे ब्राह्मणेभ्यः किञ्चिद्देयम्।

अस्थिरहितजन्तुवधे प्राणायामो विधेयः। अन्नेन रसेन फलेन पुष्पेण चोत्पन्नानां जन्तूनां वधे घृतप्राशनम्। ज्ञानतः सामान्यतो वृथा पशुमात्रवधे प्राजापत्यम्, अज्ञानतो वधे तदर्धम्।

७३—बालादिहनने प्रायश्चित्तम्

ज्ञानतो विषं प्रदाय वैश्यबालकं हतवत्या वैश्यस्त्रिया तत्पापक्षयार्थं द्वादशवार्षिकमहाव्रतस्यार्द्धं षड्वार्षिकं व्रतं कर्तव्यम्। तत्प्रयोजिकया स्त्रिया तदेव व्रतं पादन्यूनं सार्द्धचतुर्वार्षिकं कर्तव्यम्। अत्र मनुः (११।१२६)—

"तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः।
वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशः॥" इति।
"बालं वृद्धं गुरुं चैव स्त्रियं वीरां रजस्वलाम्।
ब्राह्मणं यजमानं च हत्वा निष्कृतिमाचरेत्॥
चरित्वा द्वादशाब्दानि वीरब्रह्महणं व्रतम्।
गोसहस्रं ततो दद्याद् ब्राह्मणेभ्यः शताधिकम्॥
द्रव्यहीनो यदा हन्ताबालादीनां सुराधिप।
चरित्वा द्वादशाब्दानि सेतुबन्धं स पश्यति॥" (भविष्यपुराणे)

एतेषां ब्रह्मवधप्रकरणोक्तत्वेऽपि "एकत्र निर्णीतः शास्त्रार्थो बाधकं विनाऽन्यत्रापि कल्पते" इति न्यायात् क्षत्रियादिवधेऽपि एतानि प्रवर्तन्ते। अज्ञानतो वैश्यवधे सार्द्धवार्षिकम्, ज्ञानतस्तु त्रैवार्षिकम्। अत्र तु बालहनने द्वैगुण्यस्याभिहितत्वात् ज्ञानकृतत्वाच्च षड्वार्षिकं व्रतं सम्पद्यत इति। षड्वार्षिकव्रतकरणाशक्तौ नवतिर्धेनवो देयाः, तत्राप्यशक्तौ तन्मूल्यं देयम्। ते च सप्तत्यधिकद्विशतकार्षापणा भवन्ति।

७४—यानगामिनः प्राणिनो मरणे सारथेर्नियोक्तुर्वा प्रायश्चित्तम्

यदि कस्यचित् यानगामिनो यानवैगुण्यात् प्राणिवधो जायते तदा तद्वधप्रायश्चित्तं यानप्रेरकेण सारथिना कर्तव्यम्। यदि सारथेर्द्रव्याभावस्तदा स्वामिना द्रव्यं दत्त्वा कारयितव्यम्। म्लेच्छः सारथिश्चेत् स्वामिनैव प्रायश्चित्तं कर्तव्यम्।

यत्रापवर्तते युग्यं वैगुण्यात् प्राजकस्य तु।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम्॥ (मनु० ८।२९३)

इति वचने यत्र सारथेरकौशलात् यानमन्यथा गच्छति तत्र हिंसायामशिक्षितसारथिनियोगात् स्वामी द्विशतं दण्डं दाप्यः स्यादिति कुल्लूकभट्टव्याख्यादर्शनात् अयोग्यपालकसमर्पणे स्वामिनो दोषात् तस्यैव प्रायश्चित्तम्।

यावत्सस्यं विनश्येत्तु तावत्स्यात् क्षेत्रिणः फलम्।

गोपस्ताड्यश्च गोमी च पूर्वोक्तं दण्डमर्हति ॥
(या० स्मृ० व्य० १६१)

इति गवादिदोषेण पालकस्ताड्य इति दर्शनाच्च ।

७५—स्वाम्यादेशात् प्रवृत्तस्य भृत्यस्य मरणे स्वामिनः प्रायश्चित्तम्

स्वामिना आदिष्टः कश्चित् शूद्रः कूपादौ म्रियते तन्मरणे तस्य प्रयोजकत्वात्तेन शूद्रवधोक्तं नवमासिकव्रतं पादन्यूनं कार्यम् , द्वाविंशतिदिनाधिकषाण्मासिकव्रतं कार्यम् , द्वादश धेनवो देयाः। स्वामिन आदेशाभावे तस्य प्रायश्चित्तमेव नास्ति, प्रयोजकत्वाभावात्। "त्वमेव कुरु" एवमादेशे प्रयोजकत्वं प्रोत्साहनेऽपि। तयोरन्यतरस्याभावात् आदेशाभावे प्रयोजकत्वं नास्तीति।

७६—आत्मघातिनो वैश्यस्य प्रायश्चित्तम्

शस्त्रादिना आत्मघातिनो मृतस्य वैश्यस्य पुत्रादिना तत्पापक्षयार्थिना यथोक्तं प्रायश्चित्तं कृत्वा नारायणबलिं च कृत्वा सर्वमौर्ध्वदेहिकं कर्तव्यम् , एवं महिषीदानमपि कर्तव्यम्। प्रायश्चित्तं तु वैश्यप्रायश्चित्तं ब्राह्मणवधप्रायश्चित्तस्याष्टमोंऽशः। तस्य पञ्चचत्वारिंशद् धेनुदानात्मकमात्मघातप्रायश्चित्तं च। चान्द्रायणद्वयात्मकं मिलित्वा षष्टिधेनुदानात्मकं भवति। धर्मसिन्धुकृन्मते अशक्तस्य प्रायश्चित्तमकृत्वापि केवलनारायणबल्यनुष्ठानेन श्राद्धादिकं महिषीदानमन्तरापि।

७७—पण्डितमदनमोहनमालवीयप्रदत्तदीक्षाविचारः

अन्योऽन्यविभिन्नान् अर्थान् एककार्यकर्तृत्वेन एककारणतया आलम्ब्य यदेकप्रत्यवमर्शात्मकम् अर्थप्रतिबिम्बरूपं ज्ञानं सञ्जातं तस्य 'अपोहः' इति नामधेयम्। वस्त्वंशच्छायामापन्नो विकल्पेन उल्लिखितबाह्यतया अभ्युपेयमानः विकल्पस्वरूपः स्वाकारविलक्षणाकारोत्पादकः 'अपोहः' अपोह्यते व्यावर्त्यते अनेनेति करणसाधनः, विकल्पान्तरवृत्तिरूपाद् विभिन्नतया आत्मना प्रतिभातत्वात्। अपोह्यते अन्यस्मादिति व्युत्पत्तिकः अन्यापोह इतरव्यावृत्तिः। एष तु मुख्यतयैव अन्यापोह-पदवाच्यतामालिङ्गति। हेतुत्रितयेन औपचारिकः अपोहः त्रिधा। निमित्ते नैमित्तिकधर्मारोपेण, नैमित्तिके निमित्तधर्मारोपेण, विभिन्नजातीयव्यावृत्तिमत्स्वलक्षणेन साकं ऐक्याध्यवसितया वा। अन्यापोहो हेतुः, इतरव्यावृत्तिमत्पदार्थप्राप्तिः फलम्। क्वचित् इतरव्यावृत्तिः फलधर्मः अपोहे हेतौ उपचरितो भवति। क्वचन हेतुवृत्तिधर्मः फले उपचर्यते, हेतुः इतरासंपृक्तं स्वलक्षणं, फलम् एकबोधाकारोऽन्यापोहः, स्वलक्षणवस्त्वनुभवेन अपोहस्य प्रादुर्भावात् अत्र खलु बीजभूते अनुभूयमाने स्वलक्षणे विद्यमानाया अन्यव्यावृत्तेः फलतामासादयति। एकप्रत्यवमर्शेऽध्यारोपणम्—इति भवति साध्वी संघटना। क्वापि विभिन्नजातीयात् व्यावर्तमानेन स्वलक्षणेन सार्धं बोधप्रतिष्ठितस्य आकारस्य ऐक्येन अध्यवसानाद् वा अन्यापोहरूपणम्, इति त्रिविधोऽपोहः पर्युदासात्मा व्याख्यातः।

प्रसज्यस्तु अपोहः—अयं घटः अघटो न भवति इति व्यावृत्तिमात्रपर्यवसायी। अतः सिद्धमेतद्—शब्दः निरूपणाधिगतस्य अन्यापोहस्यैव वाचकः उररीकरणीयः। वाच्यवाचकभावोऽपि अयं कार्यकारणभाव एव नेतरः। यतो बुद्धिप्रतिष्ठस्य प्रतिबिम्बस्य शब्दप्रभवत्वेन शब्दाभिधेयत्वं, प्रतिबिम्बस्य बीजत्वेन च शब्दस्य अभिधायकत्वम्—इति पूर्वपक्षः।

अत्रोच्यते—यदभिहितं भवद्भिः—'अपोहः शब्दलिङ्गाभ्याम्' इति तन्न समीचीनतामञ्चति, यस्मात्केनचित्प्रमाणेन अपोहे साधिते अपोहः शब्दवाच्यतामृच्छेत्, न चासौ प्रमाणप्रमितः, तथाहि—अपोहसत्त्वे किं मानम्, प्रत्यक्षं वा, अनुमानं वा? । न प्रथमः, प्रत्यक्षस्य स्वलक्षणगोचरत्वात्। नाप्यनुमानम्, तद्व्याप्यहेत्वभावात्। यतः असद्व्यावृत्त्या अगवादिव्यावृत्त्या वा व्याप्यं किञ्चन निमित्तं नैव विद्यते। सौगतनये हि ययोरुत्पाद्योत्पादकत्वं तादात्म्यं वा तयोरेव व्याप्तिरभ्युपेता। अन्यव्यावर्तनेन साकं तयोरुभयोरप्यसंभवः। इतरव्यावृत्तिः अपोहः—अकार्यव्यावृत्तिः कार्यत्वं स्वलक्षणं स्यात्, नित्यत्वनिषेधाकारं वा अनित्यत्वं वा भवेत्। न स्वलक्षणाकारं व्यावृत्तेः, अवस्त्वात्मकत्वात्, यद्वस्त्वाकारं न भवति, न भवति तत् स्वलक्षणं यथा मनुष्यशृङ्गम्। अनित्यत्वमपि नैव संगच्छते, व्यावृत्तेः निःस्वरूपतया पक्षयोरुभयोः तादात्म्यासंभवात्। खप्रसूतेन वन्ध्यासुतेन च समं कथं तादात्म्यसंभावना कस्यापि। अत एव न जन्यजनकत्वं, नीरूपत्वादेव। नहि वन्ध्यातनयः गगनकमलं वा कस्यचिज्जन्यं जनकं वा भवितुमर्हति। अथ मतं-वस्त्वभावेऽपि वस्तु ज्ञाने प्रतिबिम्बति, प्रतिबिम्बमेवापोहः, स च सर्वप्रत्यक्ष-

गोचर इति का आवश्यकता अनुमानविडम्बनायाः इत्यपि न स्थाने, ज्ञानस्य निराकारतायाः साधितत्वात्। तत्प्रतिबिम्बनस्य ज्ञाने उपपादयितुमशक्यत्वात्। अथवा अस्तु प्रतिबिम्बनम्, तथापि वक्तव्यं कस्य प्रतिबिम्बनम्, स्वलक्षणस्य सामान्यस्य वा। न तावदाद्य', यस्य यद् रूपं प्रतिबिम्बं तेन तद्रूपेण भवितव्यम्। यथा भूयते चन्द्रादिना। अनुगच्छंश्चाकारेण प्रतिबिम्बरूपः अन्यापोहोऽभिमतः। नच स्वलक्षणम् अनुगतम् इति गतं प्रथमकल्पेन। न द्वितीयः, भवतां मते सामान्यस्य असत्त्वात्, असतः प्रतिबिम्बनानुपपत्तेः, यथा गगनारविन्दस्य। अपिच ययोः प्रतिबिम्बाधारभावः तयोःप्रतिबिम्बनात् पूर्वं विविक्तरूपद्वयोपलम्भः—यथा वदनमुकुरयोः यथा वा चन्द्रजलाशययोः तथा ज्ञानसामान्याकारावपि प्रसज्येयाताम्।

इतश्च—वहनदोहनप्रभृतितत्तदेककार्यसाधनतया स्वलक्षणमेवानुगतं सामान्यमभ्युपेयते, अतो न कश्चिदभिहितदोषः समापतति इत्यपि कुशकाशावलम्बनमात्रम्, यस्मादर्थकारिता न सदातनी ततो यदा अर्थक्रिया न भवति तदा तामकुर्वाणं न प्रतिबिम्बेत्। अपरञ्च एककार्यक्रियाविधायित्वं स्वलक्षणे यद्यनु वर्तमानमेकं विभाव्यते तदा बाह्यं तद्विभावनावशात् तदेव विभाव्यमास्ताम्; परित्यज्यतां प्रतिबिम्बाभिनिवेशव्यसनम्। विस्तरस्तु अन्यत्रानुसन्धेयः।

मानाधीना मेयसिद्धिः

[पण्डितश्रीबदरीनाथशुक्लः, दर्शनविभागाध्यक्षः—वाराणसेयसंस्कृतविश्वविद्यालयः]

दर्शनशास्त्रेषु मानमेययोर्विषये पक्षद्वयं प्राप्यते। 'मानाधीना मेयसिद्धिः' इत्येकः पक्षः, 'मेयाधीना मानसिद्धिः' इत्यपरः पक्षः। तत्र प्रथमस्यायमभिप्रायो यद् योऽर्थः प्रमाणेन परिच्छिद्यते स एवास्तित्वेनाभ्युपगन्तुमर्हः, यत्र तु प्रमाणं न प्रवर्तते सोऽत्यर्थं काम्यमानोऽपि नाङ्गीकर्तुं शक्यते, यत्रच प्रमाणं व्याप्रियते सोऽनिष्यमाणोऽपि प्रसभं स्वीकार्यतामापद्यते। फलतयाऽस्मिन् पक्षे सर्वैः सततमभ्यर्थ्यमानमपि क्लेशलेशाकलङ्कितं मृत्युत्रासविवर्जितं सर्वविधसौविध्यसम्पन्नं सकलैः स्तूयमानमहिम मानवजीवनं प्रमाणगोचरतया नोपगम्यते। मृत्युश्च यावद्बुद्धिबलोदयं सर्वैरपोह्यमानोऽपि मनसा चिन्त्यमान एव चिन्ताचितोद्दीपनपक्षोऽपि प्रमाणबलाद् बलादभ्युपगम्यमानतां भजते।

द्वितीयपक्षस्यायमाशयो यत् प्रमाणसत्त्वं प्रमेयसत्ताया उपजीवकम्। अर्थाद् यद् यद् वस्तु विद्यते, व्यवहारपदवीमारोहति तत्परिच्छित्तय एव प्रमाणानि परिकल्प्यन्ते,

अन्योऽन्यविभिन्नान् अर्थान् एककार्यकर्तृत्वेन एककारणतया आलम्ब्य यदेकप्रत्यवमर्शात्मकम् अर्थप्रतिबिम्बरूपं ज्ञानं सञ्जातं तस्य 'अपोहः' इति नामधेयम्। वस्त्वंशच्छायामापन्नो विकल्पेन उल्लिखितबाह्यतया अभ्युपेयमानः विकल्पस्वरूपः स्वाकारविलक्षणाकारोत्पादकः 'अपोहः' अपोह्यते व्यावर्त्यते अनेनेति करणसाधनः, विकल्पान्तरवृत्तिरूपाद् विभिन्नतया आत्मना प्रतिभातत्वात्। अपोह्यते अन्यस्मादिति व्युत्पत्तिकः अन्यापोह इतरव्यावृत्तिः। एष तु मुख्यतयैव अन्यापोह-पदवाच्यतामालिङ्गति। हेतुत्रितयेन औपचारिकः अपोहः त्रिधा। निमित्ते नैमित्तिकधर्मारोपेण, नैमित्तिके निमित्तधर्मारोपेण, विभिन्नजातीयव्यावृत्तिमत्स्वलक्षणेन साकं ऐक्याध्यवसितया वा। अन्यापोहो हेतुः, इतरव्यावृत्तिमत्पदार्थप्राप्तिः फलम्। क्वचित् इतरव्यावृत्तिः फलधर्मः अपोहे हेतौ उपचरितो भवति। क्वचन हेतुवृत्तिधर्मः फले उपचर्यते, हेतुः इतरासंपृक्तं स्वलक्षणं, फलम् एकबोधाकारोऽन्यापोहः, स्वलक्षणवस्त्वनुभवेन अपोहस्य प्रादुर्भावात् अत्र खलु बीजभूते अनुभूयमाने स्वलक्षणे विद्यमानाया अन्यव्यावृत्तेः फलतामासादयति। एकप्रत्यवमर्शेऽध्यारोपणम्—इति भवति साध्वी संघटना। क्वापि विभिन्नजातीयात् व्यावर्तमानेन स्वलक्षणेन सार्धं बोधप्रतिष्ठितस्य आकारस्य ऐक्येन अध्यवसानाद् वा अन्यापोहरूपणम्, इति त्रिविधोऽपोहः पर्युदासात्मा व्याख्यातः।

प्रसज्यस्तु अपोहः—अयं घटः अघटो न भवति इति व्यावृत्तिमात्रपर्यवसायी। अतः सिद्धमेतद्—शब्दः निरूपणासधिगतस्य अन्यापोहस्यैव वाचकः उररीकरणीयः। वाच्यवाचकभावोऽपि अयं कार्यकारणभाव एव नेतरः। यतो बुद्धिप्रतिष्ठस्य प्रतिबिम्बस्य शब्दप्रभवत्वेन शब्दाभिधेयत्वं, प्रतिबिम्बस्य बीजत्वेन च शब्दस्य अभिधायकत्वम्—इति पूर्वपक्षः।

अत्रोच्यते—यदभिहितं भवद्भिः—'अपोहः शब्दलिङ्गाभ्याम्' इति तन्न समीचीनतामञ्चति. यस्मात्केनचित्प्रमाणेन अपोहे साधिते अपोहः शब्दवाच्यतामृच्छेत्, न चासौ प्रमाणप्रमितः, तथाहि—अपोहसत्त्वे किं मानम्, प्रत्यक्षं वा, अनुमानं वा ? । न प्रथमः, प्रत्यक्षस्य स्वलक्षणगोचरत्वात्। नाप्यनुमानम्, तद्व्याप्यहेत्वभावात्। यतः असद्व्यावृत्त्या अगवादिव्यावृत्त्या वा व्याप्यं किञ्चन निमित्तं नैव विद्यते। सौगतनये हि ययोरुत्पाद्योत्पादकत्वं तादात्म्यं वा तयोरेव व्याप्तिरभ्युपेता। अन्यव्यावर्तनेन साकं तयोरुभयोरप्यसंभवः। इतरव्यावृत्तिः अपोहः—अकार्यत्वव्यावृत्तिः कार्यत्वं स्वलक्षणं स्यात्, नित्यत्वनिषेधाकारं वा अनित्यत्वं वा भवेत्। न स्वलक्षणाकारं व्यावृत्तेः, अवस्त्वात्मकत्वात्, यद्वस्त्वाकारं न भवति, न भवति तत् स्वलक्षणं यथा मनुष्यशृङ्गम्। अनित्यत्वमपि नैव संगच्छते, व्यावृत्तेः निःस्वरूपतया पक्षयोरुभयोः तादात्म्यासंभवात्। खप्रसूतेन वन्ध्यासुतेन च समं कथं तादात्म्यसंभावना कस्यापि। अत एव न जन्यजनकत्वं, नीरूपत्वादेव। नहि वन्ध्यातनयः गगनकमलं वा कस्यचिज्जन्यं जनकं वा भवितुमर्हति। अथ मतं-वस्त्वभावेऽपि वस्तु ज्ञाने प्रतिबिम्बति, प्रतिबिम्बमेवापोहः, सच सर्वप्रत्यक्ष-

गोचर इति का आवश्यकता अनुमानविडम्बनायाः इत्यपि न स्थाने, ज्ञानस्य निराकारतायाः साधितत्वात्। तत्प्रतिबिम्बनस्य ज्ञाने उपपादयितुमशक्यत्वात्। अथवा अस्तु प्रतिबिम्बनम्, तथापि वक्तव्यं कस्य प्रतिबिम्बनम्. स्वलक्षणस्य सामान्यस्य वा। न तावदाद्य', यस्य यद् रूपं प्रतिबिम्बं तेन तद्रूपेण भवितव्यम्। यथा भूयते चन्द्रादिना। अनुगच्छंश्चाकारेण प्रतिबिम्बरूपः अन्यापोहोऽभिमतः। नच स्वलक्षणम् अनुगतम् इति गतं प्रथमकल्पेन। न द्वितीयः, भवतां मते सामान्यस्य असत्त्वात्, असतः प्रतिबिम्बनानुपपत्तेः, यथा गगनारविन्दस्य। अपिच ययोः प्रतिबिम्बाधारभावः तयोःप्रतिबिम्बनात् पूर्वं विविक्तरूपद्वयोपलम्भः—यथा वदनमुकुरयोः, यथा वा चन्द्रजलाशययोः तथा ज्ञानसामान्याकारावपि प्रसज्येयाताम्।

इतरच्च—वहनदोहनप्रभृतितत्तदेककार्यसाधनतया स्वलक्षणमेवानुगतं सामान्यमभ्युपेयते, अतो न कश्चिदभिहितदोषः समापतति इत्यपि कुशकाशावलम्बनमात्रम्, यस्मादर्थकारिता न सदातनी ततो यदा अर्थक्रिया न भवति तदा तामकुर्वाणं न प्रतिबिम्बेत्। अपरञ्च एककार्यक्रियाविधायित्वं स्वलक्षणे यच्चनु वर्तमानमेकं विभाव्यते तदा बाह्यं तद्विभावनावशात् तदैव विभाव्यमास्तम्; परित्यज्यतां प्रतिबिम्बाभिनिवेशव्यसनम्। विस्तरस्तु अन्यत्रानुसन्धेयः।

मानाधीना मेयसिद्धिः

[पण्डितश्रीबदरीनाथशुक्लः, दर्शनविभागाध्यक्षः—वाराणसेयसंस्कृतविश्वविद्यालयः]

दर्शनशास्त्रेषु मानमेययोर्विषये पक्षद्वयं प्राप्यते। 'मानाधीना मेयसिद्धिः' इत्येकः पक्षः, 'मेयाधीना मानसिद्धिः' इत्यपरः पक्षः। तत्र प्रथमस्यायमभिप्रायो यद् योऽर्थः प्रमाणेन परिच्छिद्यते स एवास्तित्वेनाभ्युपगन्तुमर्हः, यत्र तु प्रमाणं न प्रवर्तते सोऽत्यर्थं काम्यमानोऽपि नाङ्गीकर्तुं शक्यते, यत्रच प्रमाणं व्याप्रियते सोऽनिष्यमाणोऽपि प्रसभं स्वीकार्यतामापद्यते। फलतयाऽस्मिन् पक्षे सर्वैः सततमभ्यर्थ्यमानमपि क्लेशलेशाकलङ्कितं मृत्युत्रासविवर्जितं सर्वविधसौविध्यसम्पन्नं सकलैः स्तूयमानमहिम मानवजीवनं प्रमाणागोचरतया नोपगम्यते। मृत्युश्च यावद्बुद्धिबलोदयं सर्वैरपोह्यमानोऽपि मनसा चिन्त्यमान एव चिन्ताचितोद्दीपनपक्षोऽपि प्रमाणबलाद् बलादभ्युपगम्यमानतां भजते।

द्वितीयपक्षस्यायमाशयो यत् प्रमाणसत्त्वं प्रमेयसत्ताया उपजीवकम्। अर्थाद् यद् यद् वस्तु विद्यते, व्यवहारपदवीमारोहति तत्परिच्छित्तय एव प्रमाणानि परिकल्प्यन्ते,

न पुनः प्रकारान्तरसिद्धानि प्रमाणानि नूतनस्य प्रमेयस्य प्रतिष्ठापनाय क्षमन्ते। अस्मिन् पक्षे प्रमाणस्य प्रमेयमुखनिरीक्षकतया न तद्बलेन किमप्यपूर्वं वस्तु साधयितुं शक्यम्।

तत्र 'मानाधीना मेयसिद्धिः' इति बौद्धातिरिक्तानां सर्वदर्शनानां प्रायः समानोऽभ्युपगमः। बौद्धानां च 'मेयाधीना मानसिद्धिः' इत्यभ्युपगमः। ते हि प्रमाणानामसाङ्कर्यलक्षणां प्रमाणव्यवस्थां मन्यन्ते। तन्नय एकस्य प्रमाणस्य विषये प्रमाणान्तरं न प्रक्रमते। त इत्थमभिप्रयन्ति यद् यदि नाम प्रमाणानि संकीर्येरन् तदा तानि प्रमाणपदादेव प्रच्यवेरन्। तथा हि अगृहीतार्थज्ञापनमेव प्रमाणस्य कृत्यम्। एकेन च प्रमाणेन गृहीतं गोचरयन्नगृहीतं ज्ञापयतीति प्रमाणकृत्याकारितया कथमिव प्रमाणभावमश्नुवीत? एतेनेदमेव निष्पद्यते यद् ग्राह्यभेद एव प्रमाण-भेदस्य निदानम्, अतः प्रमाणव्यवस्था प्रमेयपरतन्त्रा। इत्थं तद्दर्शने सामान्यविशे-षभावाद् वस्तूनां द्विरूपमात्रतयाऽसाङ्कर्येण तदुभयग्राहिप्रत्यक्षानुमानरूपं प्रमाणद्वय-मेव सम्मतम्। अयमाशयः—यदि हि सामान्यविशेषालिङ्गितं सामान्यविशेषात्मकं वा किमपि वस्तु स्यात्तदा तदुभयग्राहके प्रमाणे तस्मिन् वस्तुनि नूनं प्रवर्तेयाताम्। सामा-न्यमात्रग्राहिणा विशेषमात्रग्राहिणा वा प्रमाणेन तस्य वस्तुनः साकल्येन ग्रहणा-सम्भवात्। परं तादृशं किमपि वस्तु अनुभूतिं व्यवहृतिं युक्तिपद्धतिं वा नारोहति, किन्तु केवलं सामान्यं केवलो विशेष एव च तामारोहतः। अतो विशेषग्रहणाय प्रत्यक्षं सामान्यग्रहणाय चानुमानं प्रमाणभावेन स्वीकार्यम्, प्रत्यक्षेण सामान्यस्यानुमानेन विशेषस्य च ग्रहणायोगात्।

इदं सौगतमतं प्रमाणनयतत्त्वालोकालङ्कारस्य स्याद्वादरत्नाकराभिधे टीकाग्रन्थे सोपन्यासमेवं निराकृतम्। तथा हि—अत्राह सौगतः—

प्रत्यक्षं च परोक्षं च द्वित्वमेवं न युज्यते।
प्रत्यक्षमनुमानं चेत्येतत्तु घटतेतराम्॥

आः कुमते! मैवं वोचः। यतः स्वलक्षणसामान्यप्रमेय-द्वैविध्यात्प्रमाण-द्वैविध्यमित्याकूतं भवतः, तदनुचितम्, तथाविधप्रमेयद्वैविध्यस्यासम्भवात्। यदि च प्रत्यक्षस्य स्वलक्षणमात्रविषयत्वमिष्यते, तदा ततः स्थिरस्थूलाद्याकारानध्यवसायेन प्रवृत्तिर्न स्यात्।

विज्ञानमन्यगोचरमन्यत्रार्थे प्रवर्तकमितीदम्।
व्यक्तं भवता कैतवमभ्यस्तं सौगत! कुतोऽपि॥

भवतु वा प्रमेयद्वित्वं, तथापि तत् प्रमाणद्वित्वस्य ज्ञातमज्ञातं वा ज्ञापकं भवेत्। यद्यज्ञातम्, तर्हि तस्य सर्वत्राविशेषात् सर्वेषामप्यविशेषेण तत्प्रतिपत्तिप्रसङ्गतो विप्रति-पत्तिर्न स्यात्। ज्ञातं चेत्, कुतस्तस्य ज्ञप्तिः? प्रत्यक्षादनुमानाद्वा, न तावत्प्रत्यक्षात् तेन सामान्यस्याग्रहणात्। ग्रहणे वा तस्य सविकल्पकत्वप्रसक्तिर्विषयसंकरश्च प्रमाणद्वि-त्वविरोधिनौ भवतः प्रसज्येयाताम्, नाप्यनुमानात् तेन स्वलक्षणस्याग्रहणात्। स्वलक्ष-णपराङ्मुखतया हि भवताऽनुमानमभ्युपगतम्। द्वाभ्यां प्रमेयद्वित्वस्याज्ञानेऽन्यतरस्यापि

प्रमाणद्वित्वज्ञापकत्वायोगः। अन्यथा देवदत्तयज्ञदत्ताभ्यां प्रतिपन्नाद् धूमद्वित्वात् तदन्यतरस्याग्निद्वित्वप्रतिपत्तिः स्यात्। द्वैविध्यमिति द्विष्ठो धर्मः, स च द्वयोर्ज्ञाने ज्ञायते नान्यथा, न ह्यज्ञातसह्यविन्ध्यस्य प्रतिपत्तुस्तद्गतद्वित्वप्रतिपत्तिरस्ति, प्रमाणद्वित्वात्तु प्रमेयद्वित्वज्ञप्तिस्वीकारे परस्पराश्रयदोषानुषङ्गः, सिद्धे हि प्रमेयद्वित्वेऽतः प्रमाणद्वित्वसिद्धिः, तस्याश्च प्रमेयद्वित्वसिद्धिरिति। ननु प्रत्यक्षानुमानयोः स्वसंवेदनप्रत्यक्षसिद्धत्वात्प्रत्यक्षसिद्धमेव प्रमाणद्वित्वम्, केवलं यस्तथा प्रतिपद्यमानोऽपि न व्यवहरति स प्रसिद्धेन प्रमेयद्वैविध्यव्यवहारेण प्रवर्त्यत इति चेत्, तदप्यसारम्, प्रमेयद्वैविध्यस्यासिद्धत्वेनाभिहितत्वात्"।

युक्तिप्रधानशास्त्राणां मूर्धन्यं न्यायशास्त्रमपि नोक्तं पक्षं समर्थयति, तस्य हि 'मानाधीना मेयसिद्धिः' इत्येष एव पक्षोऽभिमतः, तदीये ग्रन्थजाते तत्पक्षानुगुणस्यैव वर्णनस्य प्राप्यमाणत्वात्, तथा हि वात्स्यायनेन मुनिना न्यायदर्शनस्यादिमसूत्रावतरणभाष्ये स्पष्टमुक्तम्—"प्रमाणमन्तरेण नार्थप्रतिपत्तिः, नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम्; प्रमाणेन खल्वयं ज्ञाताऽर्थमुपलभ्य तमर्थमभीप्सति जिहासति वा।"

प्रमाणं विना प्रमेयव्यवस्था न भवितुमर्हति, प्रमाणसत्तैव प्रमेयसत्ताया जीवातुरिति न्यायदर्शनप्रणेतुः महर्षेर्गौतमस्याप्यभीष्टम्। अत एव तेन न्यायदर्शनस्य प्रथमे सूत्रे प्रमाणस्यैव प्राथम्येनाभिधानं कृतम्, "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" इति।

अयमेव पक्षो नव्यन्यायस्रष्टुः श्रीगङ्गेशोपाध्यायस्यापि सम्मत इति तद्वचसैव विभाव्यते, यथोक्तं प्रत्यक्षतत्त्वचिन्तामणेरुपक्रमे—"अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय। तत्र प्रेक्षावत्प्रवृत्त्यर्थं "प्रमाणादीनां तत्त्वज्ञानान्निःश्रेयसाधिगमः" इत्यादावसूत्रयत्। तेष्वपि प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते" इति। अत्र सर्वेषां व्यवस्थितिः प्रमाणाधीनेति विस्पष्टयाऽभिधयैव प्रत्यपादि।

प्रमाणसिद्धोऽर्थः प्रसभं स्वीकार्यो भवति, न कश्चित्तमुपेक्षितुं क्षमत इत्ययमर्थो व्युत्पत्तिवादगूढार्थतत्त्वालोकाभ्यां दृढं समर्थितः। तथा हि व्युत्पत्तिवादे "राज्ञः पुरुष" इति वाक्यजे बोधे स्वत्वं संसर्गविधया भासते प्रकारविधया वेति विचारप्रस्तावे गदाधरेण प्रत्यपादि—

"यत्तु "राज्ञः पुरुषः" इत्यादौ राजस्वत्ववान् पुरुष इत्याद्यन्वयबोधोपगमे राजकीयं स्वत्वम्, राजस्वत्ववान् पुरुष इत्याकारकद्विविधानुमितेरेव तदतिरिक्ताविषयकत्वेन तादृशानुमितिं प्रति प्रत्येकं तादृशवाक्यघटितसामग्र्याः प्रतिबन्धकत्वद्वयम्, अस्मन्मते च तादृशानुमित्योस्तथाविधवाक्यजन्याद् राजकीयः पुरुष इत्येतादृशबोधादतिरिक्तविषयकतया तत्र तादृशसामग्र्याः प्रतिबन्धकत्वकल्पनं नास्ति, तथाविधानुमिति-तथाविधशाब्दसामग्र्योश्च सत्योरनुमितेरेवोत्पत्तेः। अपितु राजकीयः पुरुष इत्याकारक-

स्वत्वसंसर्गकविधानुमितिं प्रत्येव तादृशसामग्र्याः प्रतिबन्धकत्वमेकं कल्पनीयमिति लाघवमिति। तदप्यकिञ्चित्करम्। भवद्भिर्यत्र यादृशानुमितिः स्वीक्रियतेऽस्माभिरपि तत्र तादृशानुमितेः स्वीकरणीयतयाऽनुमितौ शाब्दसामग्र्याः प्रतिबन्धकत्वसाम्यात्। उपदर्शितस्थले भवद्भिरनुमितिः स्वीक्रियतेऽस्माभिरपि स्वीक्रियत इति कुतः प्रतिबन्धकताद्वयकल्पनम्?"

अत्र 'भवद्भिर्यत्र यादृशानुमितिः स्वीक्रियतेऽस्माभिरपि तत्र तादृशानुमितेः स्वीकरणीयतया' इत्यंशमाश्रित्य गूढार्थतत्त्वालोके श्रीबच्चाझामहोदयेनेत्थमालोचितम्—"अथ बुभुत्सिते ह्येकस्मिन्नर्थे विजातीयानुभवसामग्र्याः सन्निपाते कस्मिंश्चिदप्यनुभवे जायमाने बुभुत्सितार्थावगतिसाकल्यसम्पत्तेः पुनरवगतेरसम्पाद्यत्वमिति तत्र यत्सामग्र्या लघुत्वं तस्या एव फलजनकत्वम्। बुभुत्सितयोरर्थयोर्विजातीयानुभवसामग्र्योः सन्निपाते कयाप्येकयैवार्थगत्या भवितव्यं जातिसांकर्यज्ञानयौगपद्ययोरनभ्युपगमादिति बुभुत्सितार्थावगतिसाकल्यासम्पत्तेः पुनरवगतिः सम्पादनीया, सा च सामग्र्यधीना, तत्र गुरुसामग्रीसम्पादनापेक्षया लघुसामग्रीसम्पादनं युक्तमिति यत्सामग्र्या गुरुत्वं तस्या एव प्रथमतः फलजनकत्वमनुभवसिद्धम्। तथा चान्वयव्यतिरेकसहचारग्रहतर्कादिसम्पाद्यव्याप्तिग्रहाद्यपेक्षानुमितिसामग्रीतः शाब्दसामग्र्याः, शाब्दसामग्रीतश्च प्रत्यक्षसामग्र्या लघुभूताया अनतिरिक्तविषयिकायामनुमितौ शाब्दमतौ च प्रतिबन्धकत्वं विभिन्नविषयके शाब्दबोधे चानुमितिसामग्र्यास्तादृशे प्रत्यक्षे न शाब्दसामग्र्याः प्रतिबन्धकत्वं क्लृप्तम्, तदनुसृत्यैवानतिरिक्तविषयकत्वमनुमितिद्वयस्य प्रतिबध्यत्वप्रयोजकं प्रदर्श्य संसर्गतावादिना प्रतिबन्धकत्वद्वयोपादानं कृतम्, नह्यकस्मादनुमितिद्वयस्य प्रतिबध्यत्वमवलम्ब्य तदुद्भावितम्। स्वमते च प्रतिबध्यता-प्रयोजकस्यानतिरिक्तविषयकत्वस्यानुमितिद्वये विरहात्तयोस्तत्र स्वीकारेण प्रतिबन्धकताद्वयवारणं च कृतम्। एवं सति संसर्गतावादिनामनुमितिद्वयस्वीकारः प्रतिबध्यत्वप्रयोजकानतिरिक्तविषयकत्वविरहनिबन्धनो नाकस्मिकः, प्रकारतावादिनां तु प्रतिबध्यत्वप्रयोजकस्यानुमितिद्वये सत्त्वात्तत्स्वीकारो निर्युक्तिक इति 'भवद्भिर्यत्र' इत्याद्युक्तिरसंगतेति चेदुच्यते—

न ह्यनतिरिक्तविषयकत्वं प्रतिबध्यताया अवच्छेदकत्वप्रयोजकम्, इच्छोत्तेजकत्वानुरोधेन त्वयापि तस्यानङ्गीकारात्, अन्यथा प्रतिबन्धकताद्वयापादनमेवासङ्गतं स्यात्, किन्त्वनुत्पाद्यत्वनियततया गृहीतं सदेव प्रयोजकमेषितव्यं तत्किमनुत्पत्त्या अपराद्धं यस्याः प्रयोजकत्वं न स्वीकरणीयम्, सा चानुत्पत्तिश्चेद् भवद्भिः राज्ञः पुरुष इत्यादिशाब्दसामग्रीकालेऽनुमितिसामग्रीसत्त्वे राजकीयः पुरुष इत्यनुमितावेव प्रमाणतः परिच्छिन्ना, न राजकीयं स्वत्वं, राजकीयस्वत्ववान् पुरुष इत्यनुमित्योः, तां तथैवाङ्गीकुर्मो वयं तत्परीक्षया निष्प्रयोजनत्वात्, परीक्षासहस्रेणापि प्रामाणिकस्यार्थस्यान्यथा कर्तुमशक्यत्वाच्च तथा चास्माकमपि राजत्वावच्छिन्नप्रकारतानिरूपितपुरुषत्वावच्छिन्नविशेष्यताशाल्यनुमितित्वावच्छिन्ना एकैव प्रतिबध्यता तन्निरूपितप्रतिबन्धकता चेति नाधिक्यं प्रतिबन्धकत्वस्य"।

अस्मिन् सन्दर्भे 'परीक्षासहस्रेणापि प्रामाणिकस्यार्थस्यान्यथा कर्तुमशक्यत्वात्' इत्युक्त्या स्पष्टमेवोद्घोषितं यत् प्रमाणेन योऽर्थः सिध्यति सोऽकाम्योऽप्यवश्यं स्वीकार्यतामापद्यते, फलतया प्रमेयव्यवस्थितेः प्रमाणाधीनत्वं सुतरां पर्यवस्यति। न्यायकुसुमाञ्जलेः पञ्चमे स्तबके 'हेत्वभावे फलाभावात्प्रमाणेऽसति न प्रमा' इति ब्रुवन्नुदयनाचार्योऽपि समर्थयामास प्रोक्तमर्थम्।

ननु प्रामाणिकेषु न्यायशास्त्रीयप्रबन्धेषु मानसिद्धेर्मेयाधीनत्वसमर्थका अपि सन्दर्भा दृष्टिपथमुपसर्पन्ति। यथा श्रीवर्धमानेन न्यायकुसुमाञ्जलिप्रकाशेऽतीन्द्रियार्थसम्बद्धचार्वाकविचारचर्चामाचरता तत्पक्षेण प्रथमस्तबकप्रारम्भप्रायभागे प्रत्यपादि—

'सामान्यलक्षणाप्रत्यासत्त्यजन्ययोगजधर्माजन्य - जन्यस्वविषयकसविकल्पकाजन्य-जन्यसाक्षात्कारविषयत्वं प्रमेयत्वव्यापकम्' इति। अर्थात् यत्किमपि प्रमेयं बुद्धिमारोहति तत्सर्वं विशिष्टप्रत्यक्षगोचरमेव, यदि किमपि पारीकृततादृशप्रत्यक्षपरिधिर्भवेत्तदा तत्स्वसत्ताऽनुरोधेन प्रत्यक्षातिरिक्तं प्रमाणं साधयेत्, परं नास्ति तथाविधं किञ्चिदिति न प्रत्यक्षतोऽतिरिक्तं प्रमाणं सेद्धुमर्हति, अनेन कथनेन मानसिद्धेर्मेयाधीनत्वं स्फुटमवद्योतितं भवति।

एवं तृतीयस्तवके उदयनाचार्येणोपमानाप्रामाण्यवादिपक्षमुपपादयता प्रत्यपादि—

"न तावदस्य विषयः सादृश्यव्यपदेश्यं पदार्थान्तरमेव सम्भावनीयम्, न हि भावाभावाभ्यामन्यः प्रकारः सम्भावनीयः, परस्परविधिनिषेधरूपत्वात्; न भाव इति निषेधमात्रेणैवाभावविधिः, ततस्तं विहाय कथं स्ववचनेनैव पुनः सहृदयो निषेधेन्नाभाव इति। एवं नाभाव इति निषेध एव भावविधिः, ततस्तं विहाय स्ववाचैवानुन्मत्तः कथं पुनर्निषेधेन्न भाव इति। अत एवम्भूतानामेकताऽप्यशक्यप्रतिपत्तिः, प्रतिषेधविध्योरेकत्रासम्भवात्। तस्माद् भावाभावावेव तत्त्वम्। भावत्वेऽपि गुणवन्निर्गुणं वेति द्वयमेव पूर्ववत्। पूर्वं द्रव्यमेव, उत्तरं चाश्रितमनाश्रितं वेति द्वयमेव पूर्ववत्। तत्रोत्तरं समवाय एव, अनवस्थाभयात्। आश्रितं तु सामान्यवन्निःसामान्यं चेति द्वयमेव पूर्ववत्। तत्र प्रथममपि स्पन्दोऽस्पन्द इति द्वयमेव। एतच्च यथासंख्यं कर्म गुण इति व्यपदिश्यते, निःसामान्यं निर्गुणमाश्रितं तु एकाश्रितमनेकाश्रितं वेति प्रागिव द्वयमेव। एतदपि यथासंख्यं विशेषः सामान्यं चेत्यभिधीयते, तदेतत्सादृश्यमेतास्वेकां विधामासादयन्नातिरिच्यते। अनासादयन्न पदार्थीभूय स्थातुमुत्सहते। ततोऽभावेन सह सप्तैव पदार्था इति नियमः। अतो नोपमानविषयोऽर्थान्तरम्" इति।

अनेन प्रघट्टकेन प्रस्फुटोऽयमर्थो यन्मानव्यवस्था मेयाधीनैव। यतो यदि सादृश्यं पदार्थान्तरमभविष्यत्तदा नूनमेव स्वग्राहे विलक्षणं प्रमाणमुपमानाख्यं व्यवस्थापयिष्यत्, नास्ति सादृश्यं क्लृप्तप्रमाणपरिच्छेदानर्हं पदार्थान्तरमिति न तद्बलेनोपमानं सेद्धुं प्रभवति।

तत्रैवात्मनो नयेनोपमानप्रामाण्यं प्रतिष्ठापयताऽऽचार्येण ग्राह्यबलादेव ग्राहकस्योपमानस्यास्तित्वं समर्थितम्। यथा—

सम्बन्धस्य परिच्छेदः संज्ञायाः संज्ञिना सह।
प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुः॥

वचनमिदं निःसंशयं स्पष्टयति यद् योऽर्थः क्लृप्तप्रमाणैः परिच्छेत्तुं न शक्यते स स्वपरिच्छेदकं प्रमाणान्तरं प्रतिष्ठापयतीति।

तदित्थं मानसिद्धेर्मेयाधीनत्वपक्षस्यापि बहुलमुपलब्धौ कथमिहैकान्ततो मेयसिद्धेर्मानाधीनत्वपक्षः सिद्धान्तपक्षतयोद्घोषयितुमर्हः?

अत्रोच्यते—ये सन्दर्भा मानसिद्धेर्मेयाधीनत्वपक्षस्यानुगुणतयोपन्यस्तास्ते न वस्तुतस्तथाभूताः, आपाततस्ते तथात्वेन प्रतिभासमाना अपि तात्पर्यतो मेयसिद्धेर्मानाधीनत्वपक्षस्यैव परिपोषकाः। यथा न्यायकुसुमाञ्जलिप्रकाशे वर्धमानेनोक्तं यत् प्रमेयत्वं प्रत्यक्षगोचरत्वनियतम्, प्रत्यक्षागोचरं यदि किमपि प्रमेयमभविष्यत्तदा तदनुरोधेन प्रमाणान्तरं कल्पितमभविष्यत्। एवमुदयनाचार्येण उपमानाप्रामाण्यवादिपक्षमुपपादयता प्रोक्तं यत् क्लृप्तप्रमाणापरिच्छेद्यं सादृश्याख्यं पदार्थान्तरं यद्यभविष्यत्तदा तद्ग्राहकतयोपमानाख्यं प्रमाणान्तरं स्वीकृतमभविष्यत्, परं नास्ति तादृशं सादृश्यमिति उपमानाख्यप्रमाणान्तरकल्पनमनावश्यकम्। स्वमतेनोपमानस्य प्रामाण्यं प्रतिष्ठापयता च तेन प्रत्यक्षादिभिरग्राह्यस्य शब्दार्थसम्बन्धस्य ग्राहकतयोपमानमभ्युपगतम्। अनयोः सन्दर्भयोस्तात्पर्यस्य सूक्ष्मेक्षिकयाऽन्वेषणेनेदमेव प्रतिभासते यत् कस्यापि प्रमेयस्यास्तित्वाभ्युपगमस्तदैव कर्त्तुं शक्यते यदि तत् केनचित् प्रमाणेन परिगृहीतं भवेत्। यदि नाम माननिरपेक्षाऽपि मेयसिद्धिः सम्भवेत्तदा किमिव वर्धमानेन आचार्येण वा प्रत्यक्षादिक्लृप्तप्रमाणैरग्राह्यस्य वस्तुनो ग्राहकतया प्रमाणान्तरस्वीकारस्यानुरोधः क्रियेत? अत उक्तप्रकारा ग्रन्थसन्दर्भा अपि वस्तुतो मेयसिद्धेर्मानाधीनत्वपक्षस्यैवानुगुणाः, नान्यपक्षस्येति निर्विवादम्। अतएव न्यायमञ्जर्यां तार्किकमूर्धन्यो जयन्तभट्टोऽपि बभाण, यत्—

"अदृष्टे तु स्वर्गापवर्गभिन्ने नैसर्गिकमोहान्धतमसविलुप्तालोकस्य लोकस्य शास्त्रमेव प्रकाशः, तदेव सफलसदुपायदर्शने दिव्यं चक्षुरस्मदादेः।"

अत्र शास्त्रप्रमाणबलेन स्वर्गादेरस्तित्वं प्रतिष्ठापयता तेन मेयसिद्धेर्मानाधीनत्वं सुतरां सुस्पष्टीकृतम्।

अत्र आगमिका औपनिषदाश्च विवदमाना अन्यथैवाचक्षते। ते हि प्रमाणनैरपेक्ष्येण स्वयं सिद्धं शिवं सम्बोध्य,

उपायजालं न शिवं प्रकाशयेत्
घटेन किं भाति सहस्रदीधितिः?।
विचारयन्नित्थमुदारदर्शनः
स्वयं प्रकाशं शिवमात्मवित् खलु॥

अपरोक्षे भवत्तत्त्वे सर्वतः प्रकटे स्थिते ।
यैरुपायाः प्रतन्यन्ते नूनं त्वां न विदन्ति ते ॥

इत्यादिकं ब्रुवाणा मेयसिद्धेर्मानाधीनत्वनियमं निराकुर्वन्तः प्रतीयन्ते । औपनिषदा अपि—

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥

"विज्ञातारमरे केन विजानीयात् ?" इत्याद्युपनिषद्वचनान्युपन्यस्यन्तः प्रमाणापरतन्त्रं ब्रह्म स्वीकुर्वन्तो मेयसिद्धेर्मानाधीनत्वपक्षं प्रतिक्षिपन्त इव प्रतिभासन्ते । परं विचारेण तेऽपि तत्प्रतिकूला न सिध्यन्ति, यत आगमिकानां शिव औपनिषदानां ब्रह्म च न प्रमेयकोटिमाटीकेते । शिवो ब्रह्म च तत्तन्नये न प्रमेयत्वं धत्तः, अपि तु प्रमाणवर्गं स्वसत्तया जीवयतः । अतस्तयोः प्रमाणनैरपेक्ष्यं मेयसिद्धेर्मानाधीनत्वं न मनागपि विरुणद्धि ।

तदेवं मेयसिद्धेर्मानाधीनत्वपक्षस्यैव सिद्धान्तपक्षतया सिद्धत्वेन प्रमाणानि प्रसभमपि प्रमेयसाधने प्रभवन्तीत्यर्थस्य निर्गलनेन स्याद्वादरत्नाकरे चार्वाकादीन्नास्तिकानुद्दिश्य सन्दृब्धं वचनमिदं सर्वथा स्थान एव—

एवं स्वर्गापवर्गप्रकटनविहितौ बद्धकक्षे परोक्षे
सम्प्राप्ते मानभावं झटिति विघटितो नास्तिकस्याभिसन्धिः ।
तस्मादास्तिक्यमेकं मनसि शुभलतोल्लासजीमूतकल्पं
मत्वा सद्धर्मकर्म प्रतनुत सततं स्वेष्टसिद्ध्यै विदग्धाः ! ॥

अतएव—"यतो धर्मस्ततो जयः", "धर्मो रक्षति रक्षितः", "स्वधर्मे निधनं श्रेयः" इति वेदशास्त्रसम्मतं सनातनं सिद्धान्तमेव मूर्धगतं कृत्वा पूज्यपादैः स्व० महामहोपाध्यायपण्डितश्रीविद्याधरशर्मभिराजीवनं वेदधर्मरक्षणव्रतं सर्वस्वत्यागेन पर्यपालीति तदीयजीवनप्रणाल्या अनुकरणमेव तेभ्यो वास्तवः श्रद्धाञ्जलिरिति मे मतम् ।

———

वेदान्त-दर्शन

[महामहोपदेशक पण्डितप्रवर श्रीछज्जूरामशास्त्री विद्यासागर, दिल्ली]

दर्शनानि समस्तानि शोभन्ते तावदेव हि ।
वेदान्तदर्शनं यावन्न पश्यामः शिरोमणिम् ॥

महामुनि बादरायण व्यासने 'वेदान्त-दर्शन' लिखा । इस दर्शन का निर्माण महाभारत के निर्माण से पूर्व हुआ था, क्योंकि भारतान्तर्गत गीता में ब्रह्मसूत्र नाम से वेदान्त-सूत्रों का उल्लेख है । यथा—'ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ।'

भगवान् बुद्ध के चार शिष्य हुए—सौत्रान्तिक, वैभाषिक, योगाचार और माध्यमिक । इनके चार सिद्धान्त हैं—क्षणिकत्ववाद, सर्वास्तिवाद, विज्ञानवाद और शून्यवाद । इन चारों सिद्धान्तों का खण्डन वेदान्त-दर्शन के तर्कपाद में मिलता है, तथापि यह बात वेदान्त-दर्शन को बुद्ध से पीछे का सिद्ध नहीं करती है । क्योंकि ये चारों सिद्धान्त भगवान् बुद्ध से बहुत प्राचीन हैं जो कि अनादि काल से चले आ रहे हैं । इसीलिए वाल्मीकि रामायण में नास्तिक चार्वाक के सिद्धान्त का खण्डन मिलता है और भागवत में जैन सिद्धान्त का खण्डन है । पीछे के नास्तिकों ने इन सिद्धान्तों को अपनाया था ।

वेदान्त-दर्शन में चार अध्याय और ५५० सूत्र हैं । प्रथमाध्याय में स्पष्ट अस्पष्ट उपास्य और ज्ञेय ब्रह्मविषयक वाक्यों का विचार तथा प्रधानत्वेन सन्दिह्यमान अजादि पदों का विचार है । द्वितीयाध्याय में सांख्ययोग, न्याय-वैशेषिकों से विरोध का परिहार, सांख्यादि मतों की दुष्टता, सृष्ट्यादि श्रुतियों का परस्पर विरोध-परिहार और इन्द्रिय-विषयक श्रुतिविरोध परिहार है । तृतीयाध्याय में जीव का परलोक गमन, त्वं-पदार्थ तत्पदार्थ शोधन, निर्गुणब्रह्मविषयक पदोपसंहार, निर्गुण ब्रह्मविद्या के बहिरङ्ग—चातुराश्रम्य—और अन्तरङ्ग साधन शम-दम-निदिध्यासन आदि का निरूपण है । चतुर्थाध्याय में सगुण-निर्गुण ब्रह्मविद्या का फलनिर्णय, म्रियमाण जीव का उत्क्रान्ति-प्रकार, सगुण ब्रह्मज्ञानी का उत्तर-मार्ग वर्णन और निर्गुण ब्रह्मज्ञानी की विदेह कैवल्यमुक्ति वर्णित है ।

सामान्यतः जीव और जगत् ये दो स्वतन्त्र सत्ताएँ हैं, परन्तु सूक्ष्मदृष्टि से विचार करने पर जगत् की सत्ता व्यवहार सिद्धयर्थ है । क्योंकि देश-काल कल्पना और ईश्वर-भक्ति ही द्वैत की दृढ भित्ति है । यद्यपि कठोपनिषद् में द्वैत की निन्दा की है । यथा—"मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ।" तथापि—"भक्त्यर्थं कल्पितं द्वैतमद्वैतादपि सुन्दरम्" यह सिद्धान्त भी निर्भ्रान्त है । जब निर्गुण ब्रह्म-माया से अवच्छन्न हो जाता है तब उसको "ईश्वर" नाम से व्यवहृत करते हैं । विश्व की सृष्टि, स्थिति और लय का कारण यही ईश्वर है ।

न्याय-वैशेषिक ईश्वर को इस जगत् का निमित्त कारण मानते हैं, परन्तु
इस मत में कोई जीव दुःखी और कोई सुखी यह व्यवस्था ठीक नहीं बैठती।
यदि कर्मानुसार मानें तो जो श्रुति ईश्वर को कर्मानुसार स्रष्टा बतलाती है
वही उसे उपादान कारण भी बतलाती है। वैशेषिक मत में अचेतनपरमाणुओं से
जगत् की उत्पत्ति मानी है। यह असङ्गत है, क्योंकि अचेतन परमाणुओं में
संयोगकी उत्पत्ति कैसे हो सकती है? यदि स्वाभाविक मानें तब उनमें विराम न
होकर प्रलयोच्छेद होगा। और जगदुत्पादक परमाणुओं में रूप-रसादि गुण भी
मानने पड़ेंगे।

सगुण वस्तु सदा अनित्य होती है। सांख्य-योग के मत में यह जगत् प्रकृति
और पुरुष दोनों द्वारा निर्मित है। जिनमें पुरुष क्रियाहीन पङ्गु है, जो कि निर्माता
हो ही नहीं सकता। और प्रकृति अचेतन है, उसमें प्रवृत्ति का उदय कैसे हो सकता
है? अतः प्रकृति-पुरुष में जगत्कर्तृत्व श्रुति युक्ति दोनों से विरुद्ध है। मीमांसा-
कार जैमिनि सुख-दुःखादि की प्राप्ति यज्ञादि कर्म द्वारा मानता है, ईश्वर के द्वारा
नहीं, परन्तु ईश्वर न मानना यह इस मत में महती त्रुटि है। तभी पीछे के मीमां-
सकों के ईश्वर को "यज्ञपति" के रूप में मानना पड़ा भट्टपाद, प्रभाकर, आपदेव
और लौगाक्षि ने ईश्वर को अपने-अपने ग्रन्थों में प्रणाम भी किया है। वेदान्त
देशिक वेङ्कटने तभी से "सेश्वर मीमांसा" लिखी और मीमांसकों को मोक्ष के
लिए ज्ञान को भी सहकारी-कारण मानना पड़ा। वेदान्त में श्रुतियुक्ति-विरुद्ध एक भी
अंश नहीं है। अतः वेदान्त-दर्शन ही सर्वाङ्गपूर्ण और श्रुतियुक्ति सङ्गत दर्शन है।

वेदान्त-दर्शन पर अनेक भाष्य हुए हैं, जिनमें पाँच भाष्य अति प्रसिद्ध
हैं। इनमें आद्य शंकराचार्य का शारीरक (शंकर) भाष्य सर्वप्रथम है।
वेदान्त-सिद्धान्त यद्यपि प्राचीन काल से प्रचलित है, तथापि उसका प्रचुर प्रचार
शाङ्कर ग्रन्थों से हुआ। शांकर-भाष्य की यह एक विशेषता है कि उसके पद-पद में
श्रुतिप्रामाण्य एवं गम्भीरता होने पर भी सर्वाधिक सरसता एवं सरलता है। इनका
जन्म ८४५ वि० सं० में हुआ था। इनके सम्बन्ध में यह प्रसिद्धि है —

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित्।
षोडशे कृतवान्भाष्यं द्वात्रिंशे यतिरभ्यगात्॥

इन्होंने अपने भाष्य में सम्राट हर्षदेवकृत लिङ्गानुशासन कोष के टीकाकार
शबरस्वामी के शाबरभाष्य का स्पष्टोल्लेख किया है और बौद्ध पं०
धर्मकीर्ति की एक कारिका को अपने शांकर-भाष्य में उद्धृत किया है। अतः
इनका समय वि० अष्टम शतक से पहले का नहीं हो सकता। इन्होंने तथा इनके
शिष्य-प्रशिष्यों ने अपने ग्रन्थों से "अद्वैतवाद" का प्रचार किया। दूसरा भाष्य
त्रिचनापल्ली-प्रान्त के भूतपुरीवास्तव्य केशवाचार्य के पुत्र श्रीरामानुजी का है।
इन्होंने तथा इनके अनुयायियों ने "विशिष्टाद्वैत" मत का प्रतिपादन किया।
श्रीरामानुज का जन्म १०७३ और मृत्यु ११८४ वि० में मानी गई है। दाक्षिणात्य

मध्वाचार्य का तीसरा माध्व-भाष्य है। इन्होंने और इनके मत के विद्वानोंने "द्वैत-वाद" को प्रधानता दी है। मध्वका समय १२६३ वि० है। चौथा भाष्य निम्बार्क स्वामी का है। इनका मत "द्वैताद्वैत" है। निम्बार्क का जन्म समय ११७१ विक्रम है। पाँचवाँ भाष्य श्रीवल्लभाचार्यजी का है। ये तैलङ्गदेशीय लक्ष्मणभट्ट के पुत्र थे। इनका मत "शुद्धाद्वैत" है। इनके भाष्य पर इनके पुत्र विट्ठलदासका 'विद्व-न्मण्डन' ग्रन्थ है। श्रीवल्लभाचार्य का समय १५८८ वि० तक माना जाता है। शांकर मत का सार है—

"एकं ब्रह्म द्वितीयं न", "ब्रह्मविद् ब्रह्मैव भवति"।

श्रीरामानुजादि के मत का सार निम्नलिखित है—

धर्मार्थकाममोक्षाणां ज्ञानवैराग्ययोरपि।
अन्तःकरणशुद्धेश्च भक्तिः परमसाधनम्॥

भगवद्गीता का एक पद्य इन पाँचों का समर्थन करता है—

"भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः" इति।

गीताका मुख्य प्रतिपाद्य 'ज्ञानयोग'

[महामहोपाध्याय पण्डितप्रवर श्रीअनन्तकृष्णशास्त्री]

'गीतारहस्यकार' श्रीलोकमान्य तिलक मानते हैं कि—

"गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिस्सृता॥"

इस श्लोक में यद्यपि 'गीता' यह स्त्रीलिङ्गान्त शब्द उसका उपनिषद् होना सूचित करता है, फिर भी प्रधानतः वह कर्मयोग-शास्त्र ही है, उपनिषद् नहीं। कारण अध्यात्म-विचार या भक्तियोग की उसमें अप्रधानता ही है। इस स्थिति में प्रस्तुत स्त्रीलिङ्ग की उपपत्ति उसके भगवदुक्ति होने के कारण ही माननी चाहिये। किन्तु यह ठीक नहीं। गीता उपनिषद् है, इसमें स्पष्ट प्रमाण है—

'सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।'

अर्थात् सभी उपनिषदें गायें हैं और नन्द-नन्दन (गोपाल) भगवान् श्रीकृष्ण उसके दुहने वाले ग्वाले हैं। फलतः उसमें कर्मयोग की प्रधानता नहीं कही जा सकती। यदि कर्मयोग ही उसका प्रधान प्रतिपाद्य होता, तो प्रस्तुत श्लोक में

उसे 'उपनिषत्सार' कहना व्याहत हो जायगा। इस भगवदुक्ति के 'गीता' (गाने योग्य पद्य) मानने का हेतु यही है कि साधारण गीता की तरह इसको उलट-पुलट कर गाने, इसका अन्यथा विवरण करने या बेसुरा गाने से कानों को पीड़ा होती है। इसलिये 'गीता सुगीता कर्तव्या' में इसका 'सुगेय' (शुद्धरूप में गायन) आवश्यक प्रतीत होता है। इस प्रकार परामर्श उपक्रम, परामर्श और उपसंहार के ऐक्य रूप से सिद्ध गीतार्थ ही सबके लिये आदरणीय हो सकता है। यतः गीता उपनिषत्सार सिद्ध है, अतः यदि कर्मकाण्ड और उपनिषदों की तरह गीता की उपनिषदों के साथ ज्ञानकर्म समुच्चय के अभिप्राय से एकवाक्यता करना चाहें या एकशास्त्रता कहें, तो वह नहीं हो सकती; क्योंकि वैसी स्थिति में उसके उपनिषत्-सारत्व की अनुपपत्ति हो जायगी। "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति" इत्यादि वचन में कर्मकाण्ड की या कर्मयोगाध्याय की विविदिषा में (आत्मज्ञान की इच्छा में) ही उपयोगिता कही गई है। अतएव गीता के द्वितीयाध्याय में कर्मयोग के प्रकरण में ज्ञानयोग का या ज्ञानयोग के प्रकरण में कर्मयोग का निरूपण दीख पड़ने पर भी उनमें कोई विरोध नहीं है। अतएव "वेदैश्च सर्वैरहमेव वेद्यः वेदान्तकृद् वेदविदेव चाहम्"—यहाँ सकलवेदप्रतिपाद्यत्व अहमर्थभिन्न प्रत्यगभिन्न परमात्मा में ही बोधित होता है। इस प्रकार सभी वेदान्तों की तरह पूरी गीता प्रधानतः अध्यात्मशास्त्र ही है, कर्मयोगप्रधान नहीं।

यही कारण है कि "सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते" (गी० ४।३३) यहाँ स्पष्ट रूप में गीता कहती है कि सम्पूर्ण कर्म और भक्तियोग-प्रकरणका उपनिषत्-पदप्रतिपाद्य ज्ञान में पर्यवसान है। इससे यह स्पष्ट होता है कि गीता में स्वतन्त्र ज्ञानयोग-प्राधान्य है। उसमें सभी शास्त्रों की गुण-प्रधान भाव से, अधिकारिभेद से या अवस्थाभेद से सङ्गति बिठाई जाय, तो सभी शास्त्र कृतकृत्य (सार्थक) हो सकते हैं, अन्यथा नहीं। जबतक ज्ञानयोगाभिमत आत्मस्वरूपज्ञान उत्पन्न नहीं होता, तबतक सभी शास्त्र उपयोगी (सप्रयोजन) हैं। उसके पश्चात् ज्ञानयोग के साथ उन सब का बाध हो जाता है। इसीलिये भगवान् भाष्यकार शङ्कराचार्यने कहा है—

"तमेतमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वाणि शास्त्राणि विधिनिषेधमोक्षपराणि।"

इससे यह सिद्ध होता है कि सभी विस्तीर्ण शास्त्रों के संग्रह (संक्षेप से स्वरूप-कथन) रूप में ही गीताशास्त्र प्रवृत्त हुआ है। सभी आस्तिक-दर्शन और नास्तिक-दर्शनों का किसी प्रकार ज्ञान-योगवाद में ही पर्यवसान होने से ज्ञानयोग-प्राधान्यवाद में सभी दर्शनों की उपयोगिता भी सिद्ध ही हो जाती है। यह बात वेदान्तसार आदि में स्पष्ट है, जहाँ अन्नमयादि मूलवाक्यों पर ('अन्नं ब्रह्मेत्यु-

पासीत' आदि वाक्यों पर) आधृत देहात्मवाद आदि का भी पहली, दूसरी आदि सीढियों के क्रमसे भगवत्पादाभिमत ज्ञानयोग में ही पर्यवसान दिखलाया गया है। यदि गीता में कर्मयोग या भक्तियोग का प्राधान्य मानें, तो अहमर्थ-प्रत्यगात्मज्ञान ही ज्ञानयोग होने से परमात्मा के निर्विशेषस्वरूपबोधक वचनों का तदभिप्रायोंण बोधकत्वलक्षण प्रामाण्य नहीं बन सकता, किन्तु वह सगुण ब्रह्मके अभिप्राय से ही होगा। एवञ्च भगवत्पादाभिमत ज्ञानयोग-शास्त्र का अधिकारिभेद या अवस्था-भेद से, बोधकत्व-लक्षण प्रामाण्य तथा तत्परत्वेन ही उपनिषदों या गीता का शास्त्रत्व व्याहत हो जायगा। अतः यद्यपि गीता में अनेक दर्शनों के विचार पाये जाते हैं और "सर्वशास्त्रमयी गीता" कहा जाता है, तथापि उन सबका अधि-कारी और अवस्थाभेदों से ही प्रामाण्य मानना चाहिये। मुख्य रूप से ज्ञानयोग ही उसका प्रतिपाद्य है। इतने से अवान्तर दर्शनों का प्रामाण्य व्याहत नहीं होता। उत्तर दर्शन का अधिकार प्राप्त करने तक उनका प्रामाण्य और चारितार्थ्य अबा-धित ही रहता है। जबतक धान से चावल नहीं निकलते, तबतक सतुष धान्य का ही ग्रहण किया जाता है, पर बाद में तुष फेंक ही दिया जाता है। अतएव उनका निरूपण भी इस प्रसङ्ग में अनुचित नहीं है। यही कारण है कि उपनिषदों में अन्नमय, प्राणमय, मनोमय, विज्ञानमय, आनन्दमय क्रम से आत्मा का निरू-पण पाया जाता है। अन्ततः "आनन्दं ब्रह्मेति व्यजानात्" ही उपादेय होता है। इसी अभिप्राय से कहा गया है "किमन्यैः शास्त्रविस्तरैः" अर्थात् तत्तत् दर्शन के तत्त्व विचार जबतक करणीय होते हैं, तभी तक सम्पूर्ण ग्रन्थविस्तार की उपा-देयता है। उसके बाद जब उनमें से यावत् उपादेय अंश ग्रहण कर लिया जाता है, तब दर्शनान्तरों के साथ एकवाक्यता करके ही विचार करना युक्ति युक्त है। गीता में सभी दर्शनों की एकवाक्यता कर चरम फल का उपदेश दिया गया है। अतः सभी अवान्तर या मुख्य तत्त्वों को जानने के लिये एक ही गीता का अध्ययन पर्याप्त है। शास्त्रान्तरों का अध्ययन, तदर्थ पृथक् अपेक्षित नहीं है, यही गीता की सर्वोत्कृ-ष्टता है।

———

गीता और शरणागति

[महामण्डलेश्वर श्री १००८ स्वामी सदानन्दजी महाराज, गीतामन्दिर, काशी]

गीता वेदमाता है। वह परब्रह्म श्रीकृष्ण के मुखकमल से निकला हुआ रसमय काव्य है। इसमें रसब्रह्म श्रीकृष्ण के वाङ्मय का सुन्दर दर्शन है। गीता औपनिषद आध्यात्मिकता यानी आत्माभिव्यञ्जना का दिव्य भागवत संगीत है और यही है, श्रीकृष्ण की बाँसुरीकी स्वर-लहरी का एक उत्कृष्टतम प्रतीक!

निगमागम, पञ्चम वेद तथा पुराण-संहिताओं में प्रयुक्त श्रीकृष्ण-वाणी की सर्वमयता गीता में अभिव्यक्त हो उठी है। भगवान् वेदव्यासने ब्रह्मसूत्र एवं अपनी अन्य रचनाओं में गीतातत्त्व का अक्षरशः स्पष्टीकरण किया है। वेद कृष्णरस का प्रतीक रूप है। भगवान् वेदव्यास इसके श्रेष्ठतम ज्ञाता हैं। आदिकवि वाल्मीकिने वैदिक ब्रह्म राम के स्वरूप का रामायणमें निरूपण किया, तो भगवान् वेदव्यासने भागवत में बताया कि स्वयं श्रीकृष्ण ही भगवान् हैं।

भागवत भगवान् कृष्ण का रूपशास्त्र है। गीता श्रीकृष्ण को समाधि-भाषा और भगवान् की दिव्यतम वाणी है। कवियों की वाणी दिव्य हुआ करती है, ऋषियों की दिव्यतर तो भगवान् की वाणी गीता दिव्यतम, सनातन और परम्परागत होती है।

वेद-कल्पतरु के अमरफल उपनिषदें हैं। इनमें से नित्य-अनवरत, सतत अमृत का प्रवाह बहता रहता है। इस सतत अमृत भरने वाले सागर से गीता-गंगा प्रकट हुई है। यह ज्ञानगंगा है और इसमें भक्ति और भागवत का अनुपम संगम होता है। इस संगम में भक्तजन श्रद्धा और विश्वास के साथ स्नान करने से उसी प्रकार अन्तर्बाह्य पवित्र होकर संसार-सागरसे पार उतर जाते हैं, जिस प्रकार गंगामें स्नान करने वाले जीव जीवन से पार उतर जाते हैं। गीता-गंगा आत्मसागर के क्षितिज पर परमात्म-सूर्य का दर्शन कराती है। यह भक्ति-मुक्ति-स्वरूपिणी है, सच्चिदानन्द रूप की रमणी है। भक्ति रसब्रह्म श्रीकृष्ण की हृदय विहारिणी है।

गीताकी परम्परा प्राण-संजीवनी भगवद्भक्ति है। गीता का परम श्रेयत्व इसीमें है कि जिससे जीवात्मा भगवान् के भावराज्य में, रसराज्य में यानी शरणागति में नित्य रमणशील रहे। यही कारण है कि भगवान् श्रीमुख से कहते हैं—'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।'

इस उपदेश का अर्थ यही है कि जीवात्मा सदा के लिये भगवान् की शरणागति में रमण करे और इस पर भगवान् के तद्रूपभाव का सेवन करे। गीता की सनातन परम्परा की प्राणमय वस्तु यही है कि सर्व धर्मों का परित्याग और भगवत्-

आश्रय। सभी धर्म तो प्रेरित हैं, इसलिए सब धर्मों का परित्याग करना यही शरणागति गीता में प्रतिपादित है। गीता में सर्वधर्मों का परित्याग, लयस्थान स्वत है। भगवान् की शरणागति में जीवात्मा आत्मधर्म में, स्वधर्म में प्रतिष्ठित हो भगवान् के रसास्वाद में रमण करता है। 'मामेकं शरणं व्रज' यही एकमात्र सार है।

जीवात्मा मृत्यु-संसार-सागर को पार कर ज्ञान-साम्राज्य में तल्लीन हो जाता है। यही गीता की भक्ति योगमयता अर्थात् शरणागति है। इसीमें गीता की सनातन परम्परा नित्य-नवीन दिखाई पड़ती है।

'सर्वधर्मान् परित्यज्य' और 'मामेकं शरणं व्रज' ये दो वचन भगवान् के आदेश रूप हैं तथा 'तेषामहं समुद्धर्ता' और 'मृत्युसंसारसागरात्' ये दो वचन उनके अभय-वचन हैं। इनका परस्पर एकवाक्यतापन्न भावार्थ यह है कि जो सब धर्मों का परित्याग कर भगवान् की शरण जाता है, उसका इस मृत्यु-संसार-सागर से उद्धार हो जाता है—वह मोक्षका भागी हो जाता है। इस तरह ये गीता के चार 'महावाक्य' हैं।

गीता की यही सनातन परम्परा है। भगवत् शरणागति ही श्रेयःप्राप्ति का एकमात्र विधान है। आत्मा की शरणागति ही गीता का रहस्य है।

'मामेकं शरणं व्रज' यह गीता का गुह्यातिगुह्य मन्त्र है। इस मन्त्र की उपासना से परमात्मा की शरणागति प्राप्ति होती है वर्णाश्रम-धर्म प्रतिपादित प्रधान चतुष्टय धर्म, अर्थ, काम और मोक्ष इनसे भी परे होकर शरणागति-धर्म गीता का परम मन्त्र है। यही सनातन तत्त्व भगवान् ने गीता में निरूपित किया है। शरणागति की साधना से ही इस 'नित्यो नित्यानां चेतनश्चेतनानाम्' परमात्मा की परा अभिव्यक्ति का प्राकट्य भी होता है। भगवान् की शरणागति, भगवत्प्रेम की अखण्डितता तथा सनातनी व्याप्ति ज्योतिरूप है। गीता का यह सत्-तत्त्व, नित्य चेतन ही गीता की शरणागति के क्षेत्र में परम प्रतिपाद्य, आराध्य और उपास्य है। इसलिये गीता को 'सर्वशास्त्रमयी' कहा जाता है।

गीता में जीवात्मा अपने परम स्वरूप का ज्ञान प्राप्त करता है। भगवान् की शरणागति स्वीकार कर लेने पर जीवात्मा स्वयं उसीमें मिल जाता है। मुक्त जीव ब्रह्ममें स्वस्थ हो स्थिरता पाता है। जीवात्मा मृत्यु से परे होकर परमात्म-स्वरूप में मिल जाता है। अनादि काल से गीता की सनातन परमात्मैक्य पर ही प्राणमयी आस्था बनी हुई है।

गीता की सनातन परम्परा में सार्वदैशिक और सार्वकालिक नित्य और नवीन व्यावहारिक जीवन का जो दर्शन दिखाई पड़ता है, वही गीता की शरणागति की मुख्य भूमि है। धर्मक्षेत्र और कुरुक्षेत्र के इस वाङ्मय में जीवनशास्त्र का निरूपण

किया गया है। गीता से जीवात्मा को अपने परम स्वरूप का ज्ञान प्राप्त होता है। इस तरह हम गीता को शरणागति को सर्वशास्त्रों से उपोद्बलित, सर्वशास्त्रों का सारसर्वस्व और मानव-जीवन की चरम इतिकर्तव्यता के रूप में पाते हैं। यह आसान से आसान और कठिन से कठिन है। इसलिये इसका सभी लोग अपनी अपनी शक्तिभर अनुसरण कर सकते हैं।

गीतायां ज्ञानयोगस्यैव प्राधान्यम्

[पण्डितश्रीमहादेवोपाध्यायः, वाराणसेयसंस्कृतविश्वविद्यालये साहित्याध्यापकः]

अथेदं श्रीमद्भगवद्गीतायां ज्ञानयोगस्य प्राधान्यविषयमवलम्ब्य विमृश्यते। गीतायां ज्ञानयोगो भक्तियोगः कर्मयोगश्चेति निर्विवादम्। तत्र केचिदाचक्षीरन् अर्जुनस्य युद्धकर्मणि प्रवृत्त्यर्थमेव गीतायाः प्रवृत्तिः। अन्ते च तत्रैव प्रवृत्तिदर्शना-दुपक्रमोपसंहाराभ्याम्, मध्ये च "कर्मण्येवाधिकारस्ते", "कुरु कर्मैव तस्मात्त्वम्", "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इत्यादिपरामर्शाच्च युद्धकर्मण्येव तात्पर्यावगमः इति, तत्रेदं वक्तव्यम्—

"सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥"

इत्याद्युक्तिभिः गीतायाः सर्वोपनिषत्सारत्वं प्रतिपादितम्। उपनिषदां च ज्ञानकाण्डत्वेन प्रसिद्ध्या ज्ञानमात्रपरत्वमविवादमिति तत्सारभूतायाः गीतायाः कथं कर्मयोगपरत्वम्? किञ्च गीतायाः युद्धविधिपरत्वमपि नोपपद्यते। तथा हि विधिरत्यन्तमप्राप्तौ भवति। क्षत्रियस्य राज्यपालनं तदर्थञ्च युद्धं धर्म इति तत्परैर्धर्म-शास्त्रैः विहितमेव। अतः "यत्परः शब्दः स शब्दार्थः" इति न्यायेन न युद्धविधि-परत्वं गीतायाः। अतएव—"धर्म्याद्धि युद्धात् श्रेयोऽन्यत् क्षत्रियस्य न विद्यते" इति वाक्ये विधिबोधकलिङादिप्रत्ययाभावः। धर्मशास्त्रप्रसिद्धिद्योतकश्च 'हि' शब्दप्रयोगः। "तस्मात् युद्ध्यस्व भारत" इत्यादयस्तु "आत्मा वारे द्रष्टव्यः" इत्यादय इव विध्याभासाः। धर्मत्वं तु युद्धस्य धर्मशास्त्रविहितमर्जुनो जानात्येव। इतः प्रागपि बहूनि युद्धानि कृतवान्, अत्रापि युद्धार्थमेव गतश्च। अतः युद्धं शास्त्रविहित-मपि किं श्येनादिवदधर्मः, उत धर्म इत्यर्जुनस्य संशयः। युद्धमधर्म एवेति विपरीत-निश्चयरूपो मोहश्चार्जुनस्य सञ्जात इति द्वयमपि सूचितम्—

"न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः।",

"पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः।" इति वाक्याभ्याम्। तदपाकरणार्थमेव गीतायाः प्रवृत्तिः। अतएव "शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्" इत्युपक्रमेऽर्जुनस्य वाक्यम्। उपसंहारे च—

"कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा।
कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनञ्जय॥" इति भगवतः प्रश्नः।

"नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव॥"

इत्यर्जुनोक्तं संगच्छते। एवं गीतायाः युद्धविधिपरत्वं नोपपद्यते, किन्तु युद्धविधिप्रतिबन्धकमोहनिवर्तकत्वमेवाध्यात्मोपदेशेनेति न कर्मयोगपरत्वं गीतायाः, किन्तु ज्ञानयोगपरत्वमेव। अतएव "सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते" इति सर्वकर्मणां परिसमाप्तिः ज्ञाने भगवताऽभिहिता। अतएव गीतायां प्रत्यध्यायमन्ते "उपनिषत्सु ब्रह्मविद्यायाम्" इति पदद्वयं प्रयुक्तं दृश्यते। उपसंहारे च—

"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥"

इति सर्वधर्मपरित्यागं वदता भगवता कर्मयोगपरत्वं गीतायाः कण्ठत एव निषिद्धम्। धर्मशब्दस्य कर्मसु शक्तिः। "अथातो ब्रह्मजिज्ञासा" इति सूत्रे भाष्यवार्तिककृदादिभिः निर्णीतमेवेति। किञ्च गीतायाः अर्थवादरूपतया रात्रिसत्रन्यायेनोपासनरूपकर्मयोगपरत्वं मीमांसकाभिप्रेतं न सम्भवति। तेषां नये भगवतः सर्वज्ञस्य सर्वशक्तेरीशितुरभावेन तदुपासनकर्मणोऽसम्भवात्।

अन्ये त्वेवं प्रत्यवतिष्ठन्ते—गीतायां भक्तियोगस्य प्राधान्यमितरयोस्तु कर्मयोगज्ञानयोगयोस्तदङ्गत्वमिति। किञ्च ज्ञानकर्मणोर्भक्तियोगाङ्गयोः "विद्यां चाविद्यां च यस्तद्वेदोभयं सह" इत्यादिमन्त्रबलेन समसमुच्चयः, ननु तयोः परस्परमङ्गाङ्गिभावः।

"न त्वेवाहं जातु नासम्" इत्यादि पद्यं गीतायाः उपक्रमे भक्तियोगपरम्, मध्ये च "भजते मामनन्यभाक्", "भक्त्या मामभिजानाति", "मन्मना भव मद्भक्तः" इत्यादिभिर्बहुशो भक्तेरभ्यासः इति। तत्रेदं वक्तव्यम्—न भक्तियोगपरत्वं गीतायाः। तथाहि—

"चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥" इति।

"उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्", "तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते" इति वाक्येभ्यो जीवपरैक्यज्ञानवतो ज्ञानिन एव मुख्यभक्तत्वोक्त्या ज्ञानरूपायाः भक्तेरेव गीतायां विवक्षितत्वात्। अतएव "नहि ज्ञानेन सदृशं पवित्रमिह विद्यते" इत्युक्त्या कर्मणां भक्तेश्च जीवपरैक्यज्ञानातिरिक्ताया अपवित्रत्वं भगवता प्रतिपादितम्। यदपि च—

"सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥"

इत्युपसंहारवाक्यस्य भक्तियोगपरत्वमाहुः, तदपि न सम्भवति। यतो हि अत्र एकमिति पदं भेदनिषेधकं जीवपरैक्यज्ञानरूपां भक्तिमेव सूचयति, इति गीतायाः ज्ञानयोगपरत्वमेव।

यदप्युच्यते गीतायामस्मत्पदार्थाः त्रयः सन्ति। एकः श्रीकृष्णः वसुदेवापत्यरूपः, द्वितीय आचार्यरूपः, तृतीय उपास्यरूपः, तेनापि भक्तियोगपरत्वमेव गीतायाः निर्णीयत इति, तदपि न क्षोदक्षमम्। भक्तिपदार्थश्च किं 'भज सेवायाम्' इति धातोः क्तिन्निष्पन्नो भगवदर्चनादिरूपसेवापरः? किं वा भगवति स्वामित्वबुद्ध्या सेवाकारणीभूतनिरतिशयप्रीतिविशेषरूपरतिपरः? किं वा भगवति स्वाभेदभावनया निरन्तरसत्काराभ्याससमुत्पन्नतत्साक्षात्कारप्रयुक्तनिरतिशय-प्रीतिविशेषपरः? तत्र प्रथमद्वितीयपक्षयोः "अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते", "मयि चानन्ययोगेन भक्तिरव्यभिचारिणी", "भजते मामनन्यभाक्", "तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते" इत्यादिगीतावाक्यानां बहूनामनन्यभक्तियोगरूपपरमार्थज्ञानयोगपराणां का गतिः? न चात्र सर्वत्रैव नान्यत् सजातीयव्यक्त्यन्तरं यस्मादिति व्युत्पत्त्या अनन्यशब्दः सजातीयद्वितीयनिषेधपरः, नतु जीवाभेदपर इति वाच्यम्; निषादस्थपत्यधिकरणन्यायेन नञ्समासे जीवाभेदपरत्वस्यैवोचितत्वात्। बहुव्रीहौ तु अन्यपदार्थपरत्वमिति गौरवात् हेयमेव तत्। किञ्च भक्तियोगस्य प्राधान्ये—

"भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥"

इति गीतावाक्यस्य भक्तिसाध्यं ज्ञानम्, ज्ञानसाध्यन्तु कैवल्यमित्येतत्परस्य "ज्ञानादेव तु कैवल्यम्", "ऋते ज्ञानान्न मुक्तिः", "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इत्यादिश्रुतिवाक्यानां का गतिः? त्रिविधभक्तिपदार्थमध्ये अनन्यभक्तिरूपपरमार्थ-किञ्चोपक्रमोपसंहाराभ्यासवाक्यानां ज्ञानयोगपरत्वमेव सम्भवति। असम्भवे हेत्वभावात्।

एवञ्च "विद्यांचाविद्याञ्च" इत्यत्राविद्यापदेन याग-होम-दानादीनि वैदिकानि कर्माणि अज्ञानमूलकत्वेनोच्यमानानि कथं भक्तिवादिमते सम्भवन्ति, तन्मते

कर्मणां कर्तृगताधिकारप्रमाप्रयुक्तत्वात्। अद्वैतिनां मत एव कर्मणां कर्त्रधिकारभ्रान्ति-प्रयुक्तत्वसम्भवात्। किञ्च कर्मज्ञानयोः समसमुच्चयः विद्याञ्चाविद्याञ्चेत्यत्र कस्मात्पदात्प्रतीयते। कर्मणां चित्तशुद्धिद्वारा ज्ञानसम्पादकत्वेन ज्ञानं प्रत्युपकार-कत्वेनाप्राधान्यं सम्भवति न वेत्यस्य किमुत्तरं भविष्यति? कर्मज्ञानयोः समप्राधान्ये "कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते" इत्यादिवचनानां कर्मणां चित्त-शुद्धिद्वारा ज्ञाने उपयोगप्रतिपादकानां का गतिः स्यात्?

किञ्च "न त्वेवाहं जातु नासम्" इत्यादिगीतोपक्रमवाक्यस्य यदि भक्ति-योगपरत्वं तद्धुपास्यस्य नित्यत्वप्रतिपादने क उपयोगः?। प्रत्युत जीवानामपि नित्यत्वप्रतिपादने भगवत्युपास्यत्वप्रतिपादनोक्तेर्विरोध एव समापतति। किञ्च मीमांसकमते अर्थवादरूपाया गीताया उपासनरूपकर्मयोगपरत्वं न सम्भवति, उपास्याभावादित्युक्तचरम्।

तत्र मीमांसकमते यथा वस्तुभूतेन्द्रादिरूपदेवताया अभावेऽपि इन्द्रादिशब्द-रूपाया एव देवताया यागादिकर्माङ्गत्वम्। एक एवेन्द्रशब्दः नानाक्रतुषु प्रयुक्तः युगपत् सर्वयागाङ्गं भवतीत्यादिवचनात्। तथा गीताप्रतिपाद्यायाः ब्रह्मादिशब्दरूपाया एव देवताया उपासनकर्माङ्गत्वं सम्भवतीति यदि तूच्यते तत्रोपास्यधर्मा जगत्कर्तृ-त्वादयो न सम्भवन्तीति तदापि उपासनानामाहार्यबुद्धिविभ्रमरूपेच्छाजन्या "मनो ब्रह्म, आदित्यो ब्रह्म, योषाग्निः" इत्यादिवाक्येषु दृश्यते। तत्रातस्मिंस्तद्धर्मारोप-रूपायां तस्यामुपयोगो वस्तुभूतानामुपास्यधर्माणामतद्धर्मारोपरूपोपासनादेव शास्त्र-प्रत्ययेनाभीष्टफलसिद्धिरिति।

किञ्च द्वैतिनः गीतायामस्मत्पदार्थाः त्रिविधा इति वदन्ति। तत्र त्रिविधा-स्मत्पदार्थस्य गीतायां क उपयोगः? कथं वोपयोगः? तथोपयोगे कानि वा प्रमाणानि? तद्धर्माणामुपलक्षणत्वेनैव गीतायामुपयोगात्।

